# मुग्धबोधं व्याकरणम्

महामहोपाध्यायेन श्रीमता वोपदेव-पण्डितेन

विरचितम्



श्रीमद्भिर्दुर्गादास-राम-गङ्गाधर-तर्कवागीशैः

प्रणीताभ्यां विवृतिभ्यः सारमाकलय्य पाणिन्यादिसूत्रसाम्यमभिप्रदर्श्य च

संस्कृतविद्यालयाध्यापकचरेण

गिरिशचन्द्र-विद्यारत्नेन

यत्नेन संस्कृतम्

तस्य ज्येष्ठात्मजेन कलिकाता-प्रेसिडेन्सीकलेजाख्यविद्यालय-संस्कृताध्यापकचरेण

श्रीहरिश्चन्द्र-कविरत्नेन

प्रयत्नेन संस्कृतम्

चतुर्थं संस्करणम्

कलिकाताराजधान्याम्

गिरिश-विद्यारत्न-वर्त्मनि चतुर्विंशति संख्याक-सद्मनि

गिरिश विद्यारत्न-यन्त्रे

टीकाकृतः कनिष्ठात्मजेन श्रीशशिभूषण ज्ञानरत्न-भट्टाचार्य्येण

मुद्रितं प्रकाशितञ्च

संवत् १९६३ । ई १९०६ ।

## संशोधनो ।

| अशुद्धम् | शुद्धम् | पृष्ठे | पङ्क्तौ |
|---|---|---|---|
| कोटतथ:, यामतथ: ।७ | कोटतथ:, (यामतथ:) ।७ | २१५ | २ |
| [ षोडंशादि: पंच | षोडंशादि पंच | ३४२ | १ |

# প্রথম সংস্করণের বিজ্ঞাপন।

এ প্রদেশে যে যে স্থলে সংস্কৃত ভাষা শিক্ষার রীতি আছে তাহার অধিকাংশেই, অল্পায়াসে ও অল্প দিবসে ব্যুৎপাদক বলিয়া, মুগ্ধবোধ ব্যাকরণ পাঠনার প্রচলন দেখা যায়। তন্নিমিত্ত এই ব্যাকরণ অনেকপ্রকার আকারে অনেকবার মুদ্রিত হইয়াছে। কিন্তু ঐ সকল মুদ্রিত পুস্তকের অধিকাংশই ভ্রম-প্রমাদে পরিকলিত। তন্নিবন্ধন অধ্যাপক ও অধ্যেতৃগণের পাঠনা ও পঠন কার্য্যের অত্যন্ত অসুবিধা জন্মে, এবং অনেক বালকই অশুদ্ধ ও অসংলগ্ন পুস্তক অধ্যয়নবশতঃ প্রায়ই প্রকৃত ব্যুৎপত্তি লাভ করিতে সমর্থ হয় না। আমি ঐ অসুবিধা ও অনিষ্ট নিবারণের বাসনায় এই পুস্তক মুদ্রিত করিলাম।

শ্রীযুক্ত বাবু শ্যামাচরণ সরকার মহাশয়, ইতিপূর্ব্বে মুগ্ধবোধ ব্যাকরণ সংক্ষিপ্ত টীকার সহিত বাঙ্গালা অক্ষরে মুদ্রিত করিতে আরম্ভ করিয়াছিলেন, সন্ধ্যধ্যায় এবং শব্দেরও কিয়দংশ পর্য্যন্ত মুদ্রিত হইয়াছিল। পরন্তু ব্যবস্থাদর্পণাদি গ্রন্থ প্রণয়নে ব্যস্ততা প্রযুক্ত সময়াভাবে ব্যাকরণের টীকা-সঙ্কলনে সমর্থ না হইয়া, নিম্ন প্রণালীতে তাহা প্রস্তুত করিতে, এই অভিসন্ধিপূর্ব্বক, আমাকে ভার দেন, যে সময়ে সময়ে উভয়ে একত্রিত হইয়া মৎসংগৃহীত টীকা পুনর্দৃষ্টি করত মুদ্রাঙ্কনার্থে প্রস্তুত করিব। কিন্তু তাহা করিতেও তিনি সময় না পাইয়া আমার প্রতিই সম্পূর্ণ ভারার্পণ করেন। তদনুসারে আমি ঐ প্রণালীমতে দুর্গাদাস, রাম গঙ্গাধর তর্কবাগীশের টীকা হইতে সার সংগ্রহপূর্ব্বক সমুদয় গ্রন্থ মুদ্রিত করিলাম। শোধন ও সুখবোধ বিষয়ে যথাসাধ্য যত্ন ও পরিশ্রম করিয়াছি।

অধ্যাপক ও ছাত্র-বর্গের বিশেষ সুবিধার উদ্দেশে, প্রত্যেক সূত্রের নিম্নভাগে পদচ্ছেদপূর্ব্বক বিভক্তি-নির্দ্দেশ করিয়াছি। ১।২ ইত্যাদি অঙ্ক, প্রথমা দ্বিতীয়াদি বিভক্তির জ্ঞাপক, এবং ।, ॥, ।।।, এই চিহ্নগুলি, একবচন, দ্বিবচন ও বহুবচনের সূচক। আর কোন কোন স্থলে ১।২ ইত্যাদি অঙ্কের পশ্চাৎভাগে (।) এক দাঁড়ি চিহ্ন দিয়া লুপ্ত বিভক্তির সঙ্কেত করা হইয়াছে। মূল গ্রন্থে সমস্ত সূত্রের আদি ভাগে একাদিক্রমে অঙ্ক বিন্যাস করিয়া, টীকার মধ্যে পদসাধন-স্থলে ঐ সকল অঙ্কের উল্লেখ করিয়াছি, তাহাতে পদসাধনের উপযোগি সমুদয় সূত্রগুলি অনায়াসেই নিষ্কাশিত হইতে পারিবে। এই প্রণালীতে সন্ধি, শব্দ, তিঙন্ত ও কৃদন্তের সমস্ত পদই প্রায় সাধিত হইয়াছে।

গ্রন্থকার এই ব্যাকরণে দশটী অধ্যায় এবং প্রত্যেক অধ্যায়ে চারি চারি পাদ নির্দ্দেশ করিয়াছেন; ঐ দশ অধ্যায় ও চল্লিশটী পাদ যে যে পৃষ্ঠে মুদ্রিত হইয়াছে, ঐ ঐ পৃষ্ঠের অঙ্ক বিন্যাসপূর্ব্বক একটী নির্ঘণ্ট-পত্র আদিভাগে যোজিত হইল। এবং এই গ্রন্থে যতগুলি সংজ্ঞা, শব্দ, ধাতু, সমাসান্ত, স্ত্রী-প্রত্যয়, তদ্ধিত-প্রত্যয় এবং কৃৎ-প্রত্যয় নির্দ্দিষ্ট হইয়াছে ঐ সমস্তই অকারাদি বর্ণক্রমে সূচী করিয়া, এই পুস্তকের যে যে পৃষ্ঠে বা যে যে সূত্রে ঐ সকল বিষয় নির্দ্দিষ্ট আছে, ঐ সূচী সকলে তাহার অঙ্ক বিন্যাসপূর্ব্বক, শেষ ভাগে সংযোজিত হইল। যে কোন ব্যক্তির এই ব্যাকরণের যে কোন বিষয় জানিবার প্রয়োজন হইবে, তিনি ঐ সূচী দৃষ্টে তৎক্ষণাৎ তাহা অক্লেশেই নিষ্কাশিত করিতে পারিবেন।

এই গ্রন্থ মুদ্রিত করিতে যেরূপ ব্যয় হইয়াছে, ন্যূনকল্পে ৪, চারি টাকা মূল্য করিলেও তাহার অনুরূপ হয় না, কিন্তু তাহা হইলে পাঠকবর্গের, বিশেষতঃ বালকদিগের, ক্রয় করিতে কষ্ট হইতে পারে, এই বিবেচনায়, বিন্দুমাত্র অর্থলাভাংশ পরিত্যাগ করিয়া, ইহার মূল্য ২॥০ আড়াই টাকা স্থির করিলাম।

এক্ষণে অধ্যাপক মহাশয়দিগের নিকট প্রার্থনা —

এই পুস্তকে যে সকল দোষ দৃষ্ট হইবে, অথবা কোন বিষয়ের ন্যূনতা বা আধিক্য অনুভূত হইবে, অনুগ্রহ করিয়া ঐ ত্রুটি সংশোধনপূর্ব্বক অধ্যয়ন করাইবেন। এবং আমার প্রতি বিশেষ অনুগ্রহ করিয়া ঐ ত্রুটি আমাকে জানাইবেন; তাহা হইলে, যদি কখন এই পুস্তক পুনর্মুদ্রিত করিতে হয়, ঐ ত্রুটি আর ঘটিতে পারিবে না। ইতি

জ্যানুয়ারি, ১৮৭১ } শ্রীগিরিশচন্দ্র বিদ্যারত্ন
সংস্কৃত কলেজ, কলিকাতা।

---

## দ্বিতীয় সংস্করণের বিজ্ঞাপন।

প্রায় দ্বাদশ বৎসরের পর মুগ্ধবোধ পুনর্মুদ্রিত হইল। গতবারে মুদ্রাকরপ্রমাদবশতঃ যে দুই একটী ভ্রম ঘটিয়াছিল, সেগুলি এবারে সংশোধন করা গেল। অধিকন্তু এবারে নানা প্রদর্শনার্থ প্রায় প্রত্যেক সূত্রের টীকায় পাণিনি ব্যাকরণের সূত্রের অধ্যায়, পাদ ও সংখ্যা লিখিত হইল। এবং শেষভাগে বোপদেব-সম্মত একটী শব্দানুশাসন ও কতকগুলি উণাদি-প্রত্যয় সন্নিবেশিত হইল, আর সূত্র, আগম, আদেশ ও প্রত্যয় সম্বন্ধীয় সূচী কয়েকটীও সংযোজিত হইল। ইতি

১লা নবেম্বর, ১৮৮২ } শ্রীগিরিশচন্দ্র বিদ্যারত্ন
সংস্কৃত কলেজ, কলিকাতা।

---

## তৃতীয় সংস্করণের বিজ্ঞাপন।

প্রায় নয় বৎসরের পর মুগ্ধবোধের তৃতীয় সংস্করণ মুদ্রিত হইল। এবারে পুস্তকের অনেক বিষয় কিছু বৰ্দ্ধিত হইয়াছে। পূর্ব্ববারে সূত্র ও বৃত্তিগুলি ক্ষুদ্রাক্ষরে মুদ্রিত হইয়াছিল, পাঠ-সুবিধার্থ এবার ঐগুলি তদপেক্ষা বৃহৎ অক্ষরে মুদ্রিত হইয়াছে। আর পূর্ব্ববারে কেবল পাণিনি ও কাত্যায়নের সূত্রগুলি টীকায় দর্শিত হইয়াছিল, এবার প্রয়োজনমতে মহাভাষ্য, সিদ্ধান্তকৌমুদী, সুপদ্ম, কলাপ ও সংক্ষিপ্তসারের সূত্র বা তন্মত লিখিত হইয়াছে। যে স্থলে বোপদেবের মতের সহিত পাণিন্যাদির অনৈক্য বা মতান্তর আছে, তথায় তাঁহাদের সেই ভিন্ন ভিন্ন মত লিখিয়া দেওয়া গিয়াছে। এবার শব্দ ও ধাতুর গণগুলি প্রায় সম্পূর্ণরূপে নিবেশিত হইয়াছে। ফলতঃ ব্যাকরণখানির অঙ্গসৌষ্ঠবসম্পাদনে বিশেষ যত্ন করা গিয়াছে। শারীরিক অসুস্থতাবশতঃ স্বয়ং সমর্থ না হওয়ায় এই তৃতীয় সংস্করণ মুদ্রিত করিবার ভার আমার জ্যেষ্ঠ পুত্র কলিকাতা প্রেসিডেন্সী কলেজের সহকারী সংস্কৃতাধ্যাপক শ্রীমান্ হরিশ্চন্দ্র কবিরত্নের উপর অর্পিত হয়। তিনি যথাশক্তি পরিশ্রম করিয়া এই কার্য্য সম্পন্ন করিয়াছেন। ইতি

১লা অক্টোবর, ১৮৯১ } শ্রীগিরিশচন্দ্র বিদ্যারত্ন।

---

## চতুর্থ সংস্করণের বিজ্ঞাপন।

সন ১৩১০ সালের ১৭ই অগ্রহায়ণ তারিখে (৩রা ডিসেম্বর, ১৯০৩) পূজ্যপাদ পিতৃদেবের স্বর্গারোহণের পর এই চতুর্থ সংস্করণ মুদ্রিত হইল।

तातं गतं दिविषदां भुवि तद्वियोग-
*शोकान्धकारितदृशा विहितं मयैतत् ।
श्रीवोपदेवकृतिसंस्करणं तुरीयं
संशोधयन्तु सुधियः सदयं प्रमादात् ॥
स्थानानि यानि गहनानि पुरात्र तेषां
सारल्यसाधनविधौ विहितः प्रयासः ।
शिक्षार्थिनामुपकृतिर्यदि काचन स्यात्
नन्दन्तु नन्दनवने ननु तातपादाः ॥
स्थाने क्वचित् क्वचिदपीह मदात्मजेन
बालावबोधनकृते विवृतिः प्रयुक्ता ।
योगीन्द्रनाथविदुषा विदुषां मुदे सा
स्याच्चेत्तदस्य सफलो निखिलः प्रयासः ॥

संवत् १९६१ । आषाढ़े । श्रीहरिश्चन्द्रकविरत्नस्य ।

---

टीकाकर्त्तुर्वंशवर्णनम् ।

कालीपीठतलप्रवाहिसलिला याख्यादिभागीरथी
ग्रामो राजपुराख्यया सुविदितो देदीप्यते तत्तटे ।
नानागोत्रधरामरैः सुकृतिभिः कीर्णोऽपि विद्वद्वरै-
र्बाहुल्यात् समपूरि वैदिकगणैर्यो दाक्षिणात्यैः पुरा ॥

तत्रोदपादि हृतकौशिकगोत्ररत्नं
श्रीश्यामसुन्दर इति प्रथितो मनीषी ।
पञ्चाननेति विदितं समगादुपाधिं
यो न्यायपूर्व्वमिति गौरवमन्वयस्य ॥

यं तर्कपञ्चाननकोविदेन* विचारदक्षं परिलक्ष्य तोषात् ।
पुरा ददे राजपुराय नाम याम्यं नवद्वीपमिति प्रसिद्धम् ॥

तस्यात्मजोऽजनि जनप्रियचन्द्रचूड़ो
यः सार्व्वभौम इति लब्धविदग्धसंज्ञः ।
तस्यात्मजेष्वसु चतुर्षु वयःकनिष्ठः
प्राभूत्तु रामधन एव गुणैर्वरिष्ठः ॥

नानाशास्त्राध्ययनजनितज्ञानभासा विनीतो
विद्यावाचस्पतिरिति समासादितोपाधिमुख्यः ।
भूपोत्सृष्टां विरचितचतुष्पाठिकां वास्तुभूमिं
योऽध्युष्यादाद्बहुविषयिणीं शिष्यवर्गाय विद्याम् ॥

तस्यात्मजो गिरिशचन्द्र इति प्रसिद्धः
शास्त्रार्च्चनामकृत संस्कृतपाठगेहे ।
अध्यापनातिपटुतामवलोक्य विद्या-
रत्नेत्युपाधिमददुर्गुरवश्च यस्य ॥

स हि व्युत्पत्तिगम्यार्थ-शब्दसाराभिधानकृत् ।
चकार मुग्धबोधाय मुग्धबोधस्य संस्कृतिम् ॥

कादम्बरीकथायाश्च पाठान्तरसमन्विताम् ।
विद्यार्थिसुखबोधाय रचयामास टिप्पनीम् ॥

---

* त्रिवेणीवास्तव्येन स्वनामप्रथितेन ७जगन्नाथतर्कपञ्चाननेन ।

# निर्घण्टः ।

मुग्धबोधपठनप्रयोजनम्।

गीर्वाणवाग्गीवदनं मुकुन्दसङ्कीर्त्तनश्चेत्युभयं हि लोके।
सुदुर्लभं तच्च न मुग्धबोधान्न लभ्यतेऽतः पठनीयमेतत्॥ (मुग्धबोधे)

---

ग्रन्थकृत्-परिचयः।

येनाप्ता वरदातटस्थितमहास्थाने जनिः केशवात्
धीराच्चापि धनेश्वरात् कुशलता सर्व्वेषु शास्त्रेष्वपि।
श्रीमद्देवगिरीश्वरस्य च महादेवाभिधक्ष्माभृतो
यच्चामात्यवरेण सभ्यपदवीमापादि हेमाद्रिणा॥

(तत्कृतशतश्लोकीलिखितश्लोकसारांशः)

विद्वद्धनेश्वरच्छात्रो भिषक्केशवनन्दनः।
वोपदेवश्चकारेदं विप्रो वेदपदास्पदम्॥ (मुग्धबोधे)

"विद्वद्धनेशशिष्येण भिषक्केशवसूनुना।
हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत्॥"

(मुक्ताफलनामके तत्कृते भागवतभाष्ये)

शङ्कराचार्य्यसमयात् परं वर्षशतद्वये।
उदितो वोपदेवोऽभूदिति केचन मेनिरे॥


"यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबन्धा दश
प्रख्याता नव वैद्यकेऽपि तिथिनिर्द्धारार्थमेकोऽद्भुतः।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य भु-
व्यन्तर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः॥".

गीर्वाचस्पतिनेव, पन्नगपुरी शेषाहिनेवाभवत्
येनैकेन विदुष्मती वसुमती मुख्येन सद्भावताम्।
सोऽयं व्याकरणार्णवैकतरणि-चातुर्य्यचिन्तामणि-
र्जीयात् कोविदगर्व्वपर्व्वतपविः श्रीवोपदेवः कविः॥ (मुग्धबो.टी.)

(केनचित् शिष्येण रचितौ श्लोकौ)

---

# मुग्धबोधं व्याकरणम्।



## मङ्गलाचरणम्।

मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते।
मुग्धबोधं व्याकरणं परोपकृतये मया॥ *

१। ओँ नमः शिवाय। †

(ओँ ।१।, नमः ।१।, शिवाय ४।)।

इति नमस्कारसूत्रम्। ‡

---

* ग्रन्थारम्भे मङ्गलाचरणस्य शिष्टाचारपरिप्राप्तत्वादुच्यते,—मया वोपदेवेन सच्चिदानन्दं—सच्चासौ चिच्चासावानन्दश्चेति, नित्यज्ञानसुखस्वरूपं, मुकुन्दं—मुकम् मुक्तिं ददातीति—मुक्तिदातारं विष्णुमित्यर्थः। "मुकमव्ययमाख्यातं निर्व्वाणमोक्षवाचकम्। यत्तद्ददाति भक्तेभ्यो मुकुन्दस्तेन कीर्त्तितः॥" इति ब्रह्मवैवर्त्तपुराणम्। प्रणिपत्य प्रकर्षेण भक्तिश्रद्धातिशयेन नत्वा, मुग्धबोधं नाम मुग्धः सुन्दरः बोधः यस्मात् तादृशं सुन्दरबोधजनकम्, मुग्धान् मूढान् बोधयतीति अल्पबुद्धिबोधकं वा—मुग्धः सुन्दरमूढयोरिति विश्वः, व्याकरणं—व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दाः अनेनेति शब्दव्युत्पादकशास्त्रम् अथ शब्दानुशासनमिति महाभाष्यकारोक्तः, परोपकृतये परेषां पाठकानामुपकृतिस्तस्यै पाठकोपकाराय, परा उपकृतिः तस्यै श्रेष्ठोपकाराय वा, प्रणीयते प्रकर्षेण नीयते रचितं क्रियते इत्यर्थः।

† विघ्नबाहुल्यशङ्कया पुनर्मङ्गलमाचरति। शिवाय निर्गुणातीताय ब्रह्मणे ओँ नमः, प्रणवस्य पदे निस्त्रैगुण्ये शिवाय नमो नमः इति प्रमाणम्। ओँशब्दप्रयोगेणापि मङ्गलं सूचितं,—तथाच ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ॥ इति। अथवा शिवाय झटिति ग्रन्थसमाप्तिरूपमङ्गलाय ओँ नमः हरिहरब्रह्मरूपिणे नमः, ओङ्कारस्य अव्ययत्वात् अत्र लुप्तचतुर्थ्येकवचनम् ज्ञातव्यम्, तथाच—अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः। मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः॥ इति।

‡ इति, ओँ नमः शिवाय—एतत् वाक्यं, नमस्कारस्य सूत्रं सूचकं—सूचयति अर्थं प्रत्याययतीति सूत्रम्। तथाच—

स्वल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥ इति।

स्वल्पाक्षरं—ह्रस्वदीर्घप्लुतादिशब्दानां स्वर्णवर्णादिरूपेण संज्ञाकरणेन, उदोऽनूर्द्ध्वकर्मणोरित्यादि (१।३।२४) पाणिनिसूत्राणाम् उदोऽनूर्द्धे ह् (८७०) इत्यादि संक्षेपकरणेन च स्वल्पाक्षरत्वमसन्दिग्धत्वञ्च सूत्राणाम्। असन्दिग्धं—अद्भ्यःपिबदेशो लुक्पे (५५२) इत्यत्र पाठानन्त्यानि दिशन्ति इत्यात् स्वल्पार्थकशोभनार्थकयोर्न सन्देहः। सारवत् निष्कृष्टार्थयुक्तम्। विश्वतोमुखं—गुणवृद्धिनुवर्णी: (५४२,५३७) सर्वेषाञ्च बहुप्रवृत्तिः। अस्तोभं—निरर्थकशब्दशून्यम्। अनवद्यम्—अश्लीलत्वादिदोषशून्यम् अनभिप्रेतसिद्धिनिवर्त्तकञ्च।

सूत्रं षड्विधम्—संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥ इति।

सम् सम्यक् ज्ञायते अनया इति—यद्व्यवहारार्थं शास्त्रे कृतः सङ्केतः संज्ञा, यथा, प्रपरादीनां गिरिति (१०)। परितः सर्व्वत्र चिह्नं न भाष्यते आख्यायते इति अन्यथा सङ्केतपरित्याज्यत्वात् सङ्केत-विशेषः परिभाषा,—इति कविकल्पद्रुमे वोपदेवः। यथा, षष्ठीदिनिर्दिष्टस्य (९) अन्तस्य प्रति। संज्ञाविशेषः परिभाषा इति संज्ञापरिभाषयोरवान्तरभेदः। अप्राप्तप्रापको विधिः, स च द्विविधः वर्णोत्पादनरूपः अभावरूपश्च; अभावोऽपि द्विविधः— लोपो निषेधश्च। सामान्यप्राप्तस्य विशेषेऽव-धारणं नियमः। "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।" ९७।९८ इति सूत्रद्वयं सर्व्वापि ११२७ सूत्रं नियमार्थम्। अन्यधर्म्मस्य अन्यत्रारोपणमतिदेशः। स च पञ्चविधः शास्त्राति-देशः, कार्य्यातिदेशः, निमित्तातिदेशः, व्यपदेशातिदेशः, रूपातिदेशश्च। अतिदेशश्च प्रायेण वत्-वदादिसादृश्यवाचकशब्देन व्यक्तीक्रियते। यथा, "एकदेशविकृतमनन्यवद्भवति" ११५सूत्रटीका द्रष्टव्या। पूर्व्वसूत्रस्थपदस्य परसूत्रेषूपस्थितिरधिकारः, स तु त्रिविधः—

सिंहावलोकिताख्यश्च मण्डूकप्लुतिरेव च।
गङ्गास्रोत इव ख्याता अधिकारास्त्रयो मताः।
आकाङ्क्षायान्तु सर्व्वेषामनुवृत्तिः परे भवेत्॥ इति।

कस्यापि शब्दस्य कतिपयसूत्रपर्य्यन्तमनुवृत्तिः सिंहावलोकिताख्या, एतदपेक्षया अधिक-संख्यकसूत्रानुवृत्तिः गङ्गास्रोतः। यथा, (२६) इत्यत्र दान्ते इत्यस्य पादशेषपर्य्यन्तमनुवृत्तिः सिंहाव-लोकिताख्या (सिंहावलोकमन्यात्मन्तु किञ्चित् पृथक्), (६८) इत्यादौ मण्डूकप्लुतिः (टीका द्रष्टव्या), (६५) इत्यत्र वेरित्यस्य गङ्गास्रोतः।

सूत्रलक्षणं संक्षेपं निर्द्दिश्य सम्प्रति सूत्रं वर्णनीयविषयानुपन्यस्यति—

कार्य्यी कार्य्यं निमित्तञ्च त्रिभिः सूत्रमुदाहृतम्।
कदाचित् कार्य्यिकार्य्याभ्यां क्वचित् कार्य्यनिमित्ततः॥
यस्य निर्द्दिश्यते कार्य्यं स कार्य्यी गदितो बुधैः।
क्रियते यत् तत् कार्य्यमादेशप्रत्ययागमम्।

## २ । शं शब्दैः ।

(श ।१।, शब्दैः ३॥) ।

**शब्दैर्मङ्गलं स्यात् । इति प्रयोजनाभिधेयसम्बन्धाः । ***

यस्मात् परं, परे यस्मिन्, तन्निमित्तं द्विधा मतम् ॥

यथा (११५) जरस् जराचि तु इति सूत्रे जराशब्दः कार्य्यी, जरस् कार्य्यम्, अचीति निमित्तम् ।

अन्यच्च, सूत्रविषयक-विशेषनियमाः ।—

बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बली ।

प्रत्ययाश्रितकार्य्यं न बहिरङ्गमुदाहृतम् ॥

प्रकृत्याश्रितकार्य्यं स्यादन्तरङ्गमिति ध्रुवम् ।—(७०२ सूत्रे दरिद्र इत्यादौ) ।

प्रकृतेः पूर्व्वपूर्व्वं स्यादन्तरङ्गतरं तथा ॥—(६९ सूत्रे आदौ उकारस्य वत्वम्) ।

सावकाशविधिभ्यः स्यात् बली निरवकाशकः ।

कस्यचिद्विषकार्य्यस्य प्रथमं परतस्तथा ।

सम्भवेत् विषयो यस्य स विधिः सावकाशकः ॥

आदौ हि विषयो यस्य परतो न हि सम्भवेत् ।

स पण्डितगणैरुक्तो विधिर्निरवकाशकः ॥ –(११५सूत्रटीका द्रष्टव्या) ।

तथा—सामान्यस्य विशेषस्य स्याद्विशेषविधिर्बली ।

बहवो विषया यस्य स सामान्यविधिर्भवेत् ।—(७० सू.) [उत्सर्गः] ।

अल्पः स्याद्विषयो यस्य स विशेषविधिर्मतः ॥—(६९ सू.) [अपवादः] ।

आगमादेशयोर्मध्ये बलीयानागमो विधिः ।—(१४१ सूत्रे क्रोष्टु नामि तृच न इन्) ।

आगमोऽनुपघाती यः प्रकृतेः प्रत्ययस्य च ।—(११० सूत्रे आमः नुम्) ।

तयोर्य उपघाती स आदेशः परिकीर्त्तितः ॥—(१२९ सूत्रे क्रोष्टुशब्दस्य तुनः इन्) ।

सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।—(७७ सूत्रे ढढ इत्यादौ ढलोपः) ।

लोपस्वरादेशयोस्तु स्वरादेशविधिर्बली ॥ इति ।—(५६२ सूत्रे आर्द्धौ गुणो न सिलोपः) ।

* प्रयोजनाभिधेयसम्बन्धानाह शब्दैर्मङ्गलं स्यादिति । शब्दैरेव मङ्गलमुदितं स्यादित्यर्थः, शब्दव्युत्पादकशास्त्रारम्भे शब्दैरेव मङ्गलं कर्त्तव्यमिति न्यायात् । तथाच श्रुतिः—एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवतीति । व्याकरणव्युत्पन्नशब्दज्ञानाधीनं कल्पादि-शास्त्रान्तरज्ञान, तदधीना च वैदिकक्रिया, तत्फलं स्वर्गादि,—अतएव शब्दैर्मङ्गलम् । इति प्रयोजनाभिधेयसम्बन्धाः—इतिशब्दस्याव्ययत्वेन प्रयोजनपक्षे सम्बन्धपक्षे च तृतीयान्तत्वम्, अभिधेयपक्षे प्रथमान्तत्वं बोध्यं, तेन 'इति' एभिः शब्दैर्व्याकरणस्य प्रयोजनं—मङ्गलरूपम्, "इति' इमे शब्दाः व्याकरणस्याभिधेयाः –वाच्याः, 'इति एभिः शब्दैः सह व्याकरणस्य सम्बन्धः व्युत्पाद्यव्युत्पादकभावः –इत्यर्थः ।

---

# स्याद्यन्ताधिकारः । *



## १मः । सन्ध्यध्यायः । †

### १म पादः—संज्ञा । ‡

**१ । अ इ उ ऋ लृ क, ए ओ ङ, ऐ औ च,—**
**ह य व र ल, ञ ण न ङ म, झ ढ ध घ भ,**
**ज ड द ग ब, ख फ छ ठ थ, च ट त क प,**
**श ष साद्यन्ताख्याः । §**

(अ—स ।१॥, आद्यन्ताख्याः १॥) ।

एषां मध्ये ये वर्णास्ते आदिवर्णान्तवर्णसमाहारसंज्ञाः स्युः । ¶

---

* सिः आदिः यासां ताः स्यादयः (विभक्तयः), ताः अन्ते यस्य स स्याद्यन्त इति शब्दः ... एकार्थावच्छिन्नाध्यायसमूहः—अधिकारः ।

† सन्धीयते सन्धिश्चयते इति सन्धिः संहिता इत्यर्थः, तत्प्रतिपादकः—एकार्थावच्छिन्न-पादसमूहः—अध्यायः ।

‡ एकार्थावच्छिन्नसूत्रसमूहः—पादः ।

§ आदिना सहितोऽन्तः आद्यन्तः स एव आख्या येषां ते । अपि अध्यकारस्य स्पष्टार्थम् ।

¶ एषां मध्ये इति मध्यशब्दोऽधिकरणवाची, तेन अत्र सूत्रे ये वर्णास्ते आदिवर्णान्त-वर्णयोर्यः समाहारो मेलनं स एव संज्ञा येषां तादृशाः—मध्यवर्णसहितादिवर्णान्तवर्णाभिधायक-आदिसंज्ञकाः स्युः । यथा—अक, अच, अण, अम, अल । इक, इच, इण, इम । उक । एङ, एच, एड । ऐच । हल, हश, हस । यल, यम, यप । वल । जम, जप, जम । बड, बम, बप । भम, भव, भप, भस । डम । जय । खप, खप, खस । .चल । भक, चप । शस ।—(४०) । पाणिनिमतं एतं प्रत्याहाराः । प्रियसूत्राणि, १।१।७१ च ।

## ४। इत् क्ते।

(इत् ।१।, क्ते ।४।)।

कस्मैचित् कार्य्यायोच्चार्य्यमाणो वर्ण इत्संज्ञः स्यात्। तस्य कार्य्यं अनुस्वारः। यथा अचि क-ङ-चाः संज्ञार्थाः। हशे अकार-उच्चारणार्थः। * ✓

## ५। आ वत् स्वर्घप्लु।

(आ ।१।, वत् ।१।, स्व-र्घ-प्लु ।१।)।

अ आ अ—इति वर्णत्रयं क्रमेण स्व-र्घ-प्लु-संज्ञं स्यात्। वत्शब्दात् इ ई इ—इत्यादिषु च। † स्व एज्नास्ति। ‡

## ६। अपोऽक् समो णं स्टक् च।

(अप: १।, अक् ।१।, सम: १।, णं: १।, स्टक् ।१।, च ।१।)।

---

* क्ते इति विभक्तिप्रतिरूपकमेकारान्तमव्ययं, क्ते कार्य्याय इत्। एति गच्छतीति इत्, कार्य्यकाले न तिष्ठतीति यावत्। दृष्टान्तमाह यथा—अचि अच्प्रत्याहारमध्ये क-ङ-चाः संज्ञार्थाः संज्ञैव अर्थः प्रयोजनं येषां ते। एवं हशे अकार उच्चारणार्थः, उच्चारणमेव अर्थः प्रयोजनं यस्य सः, इत्यर्थः अकारस्य प्रयोजनान्तरं नास्ति। एतेन उच्चारणार्थोऽपि वर्णः इत्। पाणिनिः १।३।२-९।

† अश्च आश्च अश्च इति समाहारे आ, वदिति इवार्थोऽव्ययशब्दः, ततश्च आ स्वर्घप्लुसंज्ञं स्यात्, आवत् अन्योऽपि स्वर्घप्लुसंज्ञः स्यादित्यर्थः। तेन यथा अ आ अ—, तथा इ ई इ—, उ ऊ उ—, ऋ ॠ ऋ—, ऌ ऌ ऌ—च। संक्षेपकृता ग्रन्थकारेण ह्रस्वदीर्घप्लुतशब्देभ्यः संक्षिप्य स्वर्घप्लुसंज्ञा कृता, एवं सर्व्वत्र। एकमात्रो भवेत् ह्रस्वो, द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो, व्यञ्जनञ्चार्द्धमात्रकम्॥ कालेन यावता पाणिः पर्य्येति जानुमण्डलम्। स मात्रा कविभिर्ज्ञेया वृत्तलक्षणवेदिभिः। दूराह्वाने च गाने च रोदने च प्लुतो मतः॥ पाणिनिः १।२।२७।

‡ स्व एज्नास्तीति सूत्रमिति केचित्, तन्न, आ वदिति सूत्रस्य व्याख्यानान्तर्गतमेव तत्। सूत्रत्वे 'स्व एज्न' इत्येव कर्त्तव्यम्। एच्प्रत्याहारः ह्रस्वसंज्ञो न भवति, किन्तु दीर्घसंज्ञः प्लुतसंज्ञश्च भवतीत्यर्थः।

समानो अणोऽक् च परस्परं ण-संज्ञः स्यात्, ऋक् च । *

साम्यन्त्वेकस्थानत्वम् । †

अत्रयम् एह ‡ क ख ग घ ङाः कण्ठ्याः ।

इत्रयं च छ ज झ ञ शा ए ऐ या-स्तालव्याः ।

ऋत्रयं ट ठ ड ढ ण र षा मूर्द्धन्याः ।

लृत्रयं त थ द ध न ल सा वो दन्त्याः ।

उत्रयं प फ ब भ म वा ओ औ ओष्ठ्याः । §

एषां मध्ये यो येन समः स तस्य तत्र ततः । ¶

---

* अणः अक् इति पृथक्पठनकरणेन सम इत्यस्य प्रत्येकेन सम्बन्धः, समो अण परस्परं णसंज्ञः, समोऽक् च परस्परं णसंज्ञः स्यादित्यर्थः, तेन अचौ परस्परं णसंज्ञौ न (पाणिनि १।१।१०)। अकोऽन्तर्गतस्यापि ऋकः पृथक्पाठेन ऋवर्णं लृवर्णं समानं न चापि परस्परं णसंज्ञौ स्तः (पाणिनि: १।१।५१)। एतत्र स्पष्टतरमुच्यते, एकस्थानीया वर्णाश्च वर्णाः परस्परं णसंज्ञाः स्युः, अकमध्ये एकस्थानीया वर्णाश्च परस्परं णसंज्ञाः स्युः, ऋवर्णं लृवर्णौ च परस्परं णसंज्ञौ स्तः। णः सवर्णः। "तुल्यास्यप्रयत्नं सवर्णम्" -पाणिनि: १।१।९।

† समस्य भावः साम्यं समानवर्णत्वम्। एकं स्थानं येषां ते एकस्थानाः तेषां भावः एकस्थानत्वम्, एकस्थानोच्चारितत्वमित्यर्थः। आभ्यन्तरमपि साम्यं ग्राह्यम् (टीका द्रष्टव्या।)

‡ स्थानज्ञानाधीनं साम्यज्ञानमिति स्थानं निरूपयति अत्रयमित्यादि। एह इति प्रत्याहारः—ए ओ ऐ औ ह।

§ ए ऐ ओ औ इत्येतेषाम् उच्चारणस्थानं कण्ठमुख्यं, ए ऐ इत्युभयोस्तालव्यकार्यार्थं तालव्यमध्ये, ओ औ इत्युभयोरोष्ठ्यकार्यार्थम् ओष्ठ्यमध्ये भिन्नपदैः पृथक् पठनम्। एवम् अन्तःस्थवकारस्य वैयाकरणमते उच्चारणस्थानम् ओष्ठमुख्यं दन्त्यकार्यार्थं दन्त्यमध्ये भिन्नपदैः पाठः।

¶ एषां कण्ठ्य-तालव्य-मूर्द्धन्य-दन्त्यौष्ठ्यानां वर्णानां मध्ये यो वर्णो येन वर्णेन समो भवति, सः तस्य स्थाने (१), तत्र तस्मिन् परे (२), ततः तस्मादूर्ध्वं च (३), स्यात्। यथा—(५५७) अभविष्ट (१), (५१) मान्तः (२), (६१) वाग्घरिः (३)। अत्र षष्ठीसप्तमीपञ्चमीति-विभक्तिक्रमेण ततस्तत्र तत्रेति नोक्त्वा यथासंख्यमेव निर्देशः तत् द्वयोः यथायथं वा समवायं पूर्वपूर्वस्य प्रथमप्राप्त्यर्थम्। अत्र वदन्ति—षष्ठी युक्तं ततः स्थाने, पञ्चमी च तदूर्ध्वं। सप्तमी च परे वाच्यं यत्र चोपपदं क्वचित्॥ इति। पाणिनि: १।१।४९,६६,६७।

## ७। चपोदिताकानिता र्णः।

(चपा १।, उदिता १।, अका १।, अनिता १।, र्णः १)।

उकारेता चपेन * इद्रहितेनाका † र्णो गृह्यते।

## ८। इङोऽरलेङ् गुः।

(इङः ६।, अर् अल् एङ् ।१।, गुः १)।

इङः स्थाने अर् अल् एङ् एते गुसंज्ञाः स्युः। ‡

## ९। अच आरालैज् व्रिः।

(अचः ६।, आ आर् आल् ऐच् ।१।, व्रिः १)।

अचः स्थाने आ आर् आल् ऐच् एते व्रिसंज्ञाः स्युः। §

---

* च ट त क पाः यदा उदितः स्युस्तदा सवर्णं गृह्णन्ति, तेन उदिद्भिः चु टु तु कु पुभिः क्रमेण च वर्गे ट वर्ग-त वर्ग-क वर्ग-प वर्गाणां प्राप्तिः स्यात्। उदिद्रहितेन तु च ट त क प इति वर्णपञ्चकेन केवलं तत्तत् वर्णमात्रं गृह्यते।

† अ इ उ ऋ ऌ एते यदा इद्रहिताः स्युस्तदा सवर्णं गृह्णन्ति, तेन अनिद्भिः अ इ उ ऋ ऌ इत्येतैः क्रमेण अ आ अ ३, इ ई इ ३, उ ऊ उ ३, ऋ ॠ ऋ ३, ऌ ॡ ऌ ३, इत्येतेषां प्राप्तिः, किन्तु अकारादि-ऌकारान्त वर्णानां मध्ये इद्युक्तेन येन केनचित् वर्णेन केवलतन्मात्रवर्णो गृह्यते, यथा अत् इत्यनेन केवलम् अ इति वर्णमात्रं गृह्यते, न तु अ आ अ ३ इति वर्णत्रयम्। परन्तु आदेशे प्रत्यये च प्रायशः अनिता अका तत्सवर्णो न ग्राह्यः इति वक्तव्यम्। आदेशे यथा, ७८५ सूत्रे इः; प्रत्यये यथा, ११५२ सूत्रे अः। वर्णात् कारतकारौ स्वरूपे रात्तु इफ इत्यौणादिकमपि वचनम्। पाणिनिः १।१।६९-७०।

‡ इ उ ऋ ऌ ए ओ वर्णानां स्थाने क्रमेणादिष्टाः—

ए ओ अर् अल् ए ओ, वर्णाः गु (गुण)संज्ञाः स्युः। समत्वात् इ-वर्ण-एकारयोरैकारः, उ-वर्ण ओकारयोरोकारः। अर् अल् इति द्वयोरेकदेश-रेफ-लकाराभ्यां सह ऋ ऌ इति द्वयोः समत्वात् तयोर्गुणौ क्रमेण अरलौ स्याताम्, समुदायसाम्याभावेऽपि आंशिकसाम्यस्य ग्राह्यत्वात्। वृद्धिविधायकसूत्रेऽप्येवम्। पाणिनिः १।१।२।

§ अ इ उ ऋ ऌ ए ऐ ओ औ वर्णानां स्थाने क्रमेणादिष्टाः—

आ ऐ औ आर् आल् ऐ ऐ औ औ वर्णाः व्रि-(वृद्धि)संज्ञाः स्युः। आदेशविशेषस्य उच्चारणस्थानसाम्यात् पूर्ववत् बोधः। पाणिनिः १।१।१।

१०। प्रपरापसंन्यवानुनिर्दुर्व्यधिसूत्परिप्रत्यभ्यत्यप्युपाङ् गिः ।

(प्र - आङ् ।१। गिः ।१)।

एते विंशतिर्गि-संज्ञाः स्युः । *

---

* प्र, परा, अप, सम्, नि, अव, अनु, निर्, दुर्, वि, अधि, सु, उत्, परि, प्रति अभि, अति, अपि, उप, आङ्, एते विंशतिः गि (उपसर्ग) संज्ञाः स्युः । विशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोरिति विंशतेरेकवचनान्तत्वम् । अत्र निर्, दुर् शब्दौ रेफान्तौ निस्, दुस् शब्दौ दन्त्यसान्तौ च पाणिनिमते ।

क्रियायोगिनः प्रादेरेव उपसर्गसंज्ञा, न तु द्रव्यादियोगिनः (निष्प्रसादार्थिना द्रव्यम्) । "उपसर्गाः क्रियायोगे" पाणिनिः १।४।५९ । द्रव्यादियोगिनस्तु प्रकृष्टवाचकत्वमिति 'प्रेम' इत्यादौ उपसर्गसंज्ञाभावात् (२५) सधीगिति न स्यात् । १००० सूत्रे कृतौ भावः प्रभावः, तेज । आदौ धातुयोगे पश्चात् लिङ्ग(शब्द)संज्ञायामुपसर्गत्वमस्त्येव ।

क्रियावाचित्वमाख्यातं प्रसिद्धोऽर्थः प्रदर्शितः । प्रयोगतोऽनुमन्तव्या अनेकार्था हि धातवः ॥ इति धातुपाठे वोपदेववचनात् धातूनामनेकार्थत्वं सिद्धम् । उपसर्गाः पुनस्तदर्थद्योतकाः, न तु वाचकाः । उपसर्गस्य धातुलीनार्थद्योतकत्वम् आदानमदानमादायवत्सम्भवम् इति माघटीकायां मल्लिनाथः । उक्तञ्च,—निपातायाद्यो ज्ञेया उपसर्गाश्च प्रादयः । द्योतकत्वात् क्रियायोगे लोकादवगता इमे ॥ इति नैयायिकमतम् . वैयाकरणास्तु उभयेऽपि द्योतका इति मन्यन्ते । पाणिनिः १।४।५७-५८ ।

प्रादयः उपसर्गाः असंयुक्तावस्थायां न केषाञ्चिदर्थानां द्योतकाः, क्रियापदानां धातुमूलकशब्दाश्च प्राक् प्रयुज्यमानाः प्रायशो व्यवह्रियन्ते । क्वचिदुपसर्गद्वयं तत्रय तत्रत्ययं सम्मिलिता व्यवह्रियन्ते—यथा, विहारः, व्यवहारः, सुव्यवहारः, समभिव्याहारः ।

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते । तमेव विशिनष्टान्यः उपसर्गगतिस्त्रिधा ॥ प्रादयः क्वचित् मूलपदप्रकाशितार्थस्य परिवर्तकाः,—यथा, आदत्ते, आगच्छति, क्वचित् तदर्थे लीयन्ते,—यथा, प्रसूते, अवस्थितिः ; क्वचिच्च मूलपदप्रकाशितार्थं विशेषेण अर्थान्तरं योजयन्ति,—यथा, प्रणमति, अनुतापः । किन्तु कस्य पदविशेषस्य संयोगे प्रादयः तदर्थं परिवर्तयन्ति, तत्पदार्थे कमर्थं योजयन्ति, कमर्थं न योजयन्ति वा, तत् सर्वमभिधानाधीनम् । उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥ अपरम् ।

प्रादीनामर्थानाह पुरुषोत्तमदेवः ।—

प्र—गत्यारम्भोत्कर्षं सर्वतोभाव प्राथम्य-ख्यात्युत्पत्ति व्यवहारेषु ।

अत्र शंसायां स्वती, नातिक्रमेऽतिः, पर्य्यधी गतौ।
अपिः पदार्थ सम्भाव्य-गर्हानुज्ञा-समुच्चये ॥ *

## ११। प्रादिर्णुः। (प्रादिः १।, णुः १।)।

परा — पराभवानादर-प्रत्यावृत्ति-न्यग्भावेषु।

अप — अनादर-भाग-साकल्य-वैरूप्य-त्याग-नञर्थेषु।

सम् — प्रकर्ष-श्रेय-सङ्गत्यौचित्याभिमुख्येषु।

नि — निश्चय-निषेधयोः।

अव — निश्चय-साकल्यानादरेषु।

अनु — पश्चात्-सादृश्य-लक्षण-वीप्सेत्थम्भाव-भाग-हीन-सामर्थ्य-सहार्थ-सामीप्य-दैर्घ्य-पुनरर्थेषु।

निर् निस् — अत्यर्थ-निषेध-निश्चय-बहिष्करणेषु।

दुर् दुस् — निषेध-कष्ट-निन्दावक्षेपणेषु।

वि — विशेष-वैरूप्य-नञर्थ-गति-दानेषु।

अधि — उपरिभावे।

सु — पूजन-शोभनानायासातिशयेषु।

उत् — ऊर्द्धोत्कर्ष-प्राकट्य-शैथिल्येषु। (उद् इति पृथगव्ययम्)।

परि — सर्व्वतोभावातिशय-वीप्सेत्थम्भाव-चिह्न-भाग-त्याग-नियमेषु।

प्रति — लक्षण-व्यावृत्ति-प्रशान्तीत्थम्भाव-भाग-प्रत्यर्पण-सादृश्य-विरोध-वीप्सा-समाधिषु।

अभि — समन्तादुभयार्थ-लक्षण-वीप्सेत्थम्भाव-धर्षणेषु।

अति — अतिशयातिक्रम-पूजनासम्भावनेषु।

अपि — आहरणाल्पत्व-सम्भावन-निन्दानुज्ञा-समुच्चयेषु।

उप — अनुगति-पश्चाद्भावानुकम्पाधिक्य-हीन-सामीप्य-प्राथम्येषु।

आङ् — समन्तादग्रहण-प्रत्यावृत्तीषदर्थ-मर्य्यादा-व्याप्तिषु।

* अत्र सूत्रे, सु अति प्रशंसायां, अति अतिक्रमे—फलोदयेऽपि क्रियाप्रवृत्तौ, परि अधि गतौ—एतौ यदा गत्यर्थधातुयोगे गतिं द्योतयतस्तदा, अपि अल्पत्वक्रियायोग्यतावलम्बननिन्दानुमतिसमुच्चयेषु णि-संज्ञा न स्युः। एषु अर्थेषु णिसंज्ञाभावात्, सुस्तुत्वा इत्यादौ [illegible] णुकारेति (५४८) समासाभावे, णौक इत्यादिना (५७२) षत्वं न स्यात्, ण्याचो यप् च (११७६) न स्यात् इति फलम्। किन्तु णिसंज्ञापठितस्य निपातत्वमित्यवश्यं वाच्यं, निपातत्वे सति अव्ययत्वम्, अतोऽतिराज्ञीति सिद्धम्,—अव्ययत्वे व्यं पूर्व्वमित्यनेन (२६६) अतेः पूर्व्वनिपातः। पाणिनिः १।४।९३-९६।

भू सत्तायामित्यादिर्गणो धुसंज्ञः स्यात् । *

## १२ । सित्यादिः त्रिः । (सित्यादिः १। त्रिः १।) ।

स्यादिस्त्यादिश्च त्रिसंज्ञः स्यात् । †

## १३ । क-द्व-व्वान्येक-द्वि-बह्वेकशः । 

(क द्व-व्वानि १।॥, एक द्वि बहुषु ७।॥, एकशः ।१॥) ।

त्रेरेकैकं वचनं क्रमात् क-द्व-व्व संज्ञं स्यात्, तानि च क्रमादेक-द्वि बहुष्वर्थेषु प्रयुज्यन्ते । ‡

## १४ । त्र्यन्तान्यौ दली । (त्र्यन्तान्यौ १॥, दली १॥) ।

त्र्यन्तशब्दो दसंज्ञः स्यात्, अन्यस्तु लिसंज्ञः । §

---

* क्विप्प्रत्ययसिद्धस्य पृथिवीवाचकस्य भूशब्दस्य धातुसंज्ञानिरासायाह भू सत्तायामित्यादिर्गण इति । भू इत्यादि प्रकृतयः (१८) यथा सत्तादि क्रियावाचकाः सन्ति ता धातुसंज्ञाः स्युः । भ्वादिगणो यथा — भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च । तुदादिश्च रुधादिश्च तनक्र्यादि चुरादयः ॥ इति । "भूवादयो धातवः" पाणिनिः १।३।१ ।

† सिश्च तिश्च सिती, सिती आदी यस्य स सित्यादिः, द्वन्द्वान्ते श्रूयमाणः शब्दः प्रत्येकमभिसम्बध्यते इति न्यायात् स्यादिस्त्यादिश्चेति । शब्देभ्यः प्रयुज्यमानाः सि औ जसादयः (१८) एकविंशतिः, धातुभ्यः प्रयुज्यमानाः तिप् तसादयः (५०) साष्टाशीति शतं संख्याकास्त्रि(विभक्ति)-संज्ञाः स्युः । पाणिनिः १।४।१०४ ।

‡ विभक्तेरेकवचनं कसंज्ञं, द्विवचनं द्वसंज्ञं, बहुवचनं व्वसंज्ञं स्यात् । एकवचनमेकार्थे, द्विवचनं द्विसंख्यार्थे, बहुवचनं बह्वर्थे प्रयुज्यन्ते । एकस्य ककारं वचनस्य वकारं गृहीत्वा क — इति संकेतितं, इत्यन्यावप्यूह्ये । नित्यबहुवचनान्ता अपि शब्दाः सन्ति यथा — दाराः, वर्षाः, सिकताः, जलौकसः, दशाः (वस्त्रान्तवाचिन्यः न तु अवस्थावाचिन्यः), बहुलाः, कृत्तिकाः, सप्तर्षयः, लाजाः, असवः (प्राणे बहुवचनमेव, क्लीबे तु सर्ववचनानि) इत्यादि । गौरवे सर्वेभ्यो बहुवचनं भट्टारकपादाः इत्यादि । विकल्पेऽपि बहुवचनं क्वचित् — यथा — सुमनसः सुमनाः, अप्सरसः अप्सराः इत्यादि । पाणिनिः १।४।१०२-१०३ ।

§ विभक्त्यन्तशब्दः द(पद)संज्ञः, तद्भिन्नशब्दो लि(लिङ्ग)संज्ञः स्यात् । (१२०) प्रत्ययलोपे प्रत्ययलक्षणमिति न्यायात् लुप्तविभक्तिकानां पदत्वम् आतिदेशिकं — यथा, उमा, गौरीत्यादि । पाणिनिः १।४।१४, १।२।४५-४६ च ; तन्मते लि = प्रातिपदिकम् । व्याकरणान्तरेषु च नाम शब्दस्य संज्ञान्तरं ।

## १५ । लुपि न सन्ध्याद्यविधौ ।

(लुपि ७।, न ।१।, सन्ध्याद्यविधौ ७॥) ।

लुबिति लोपे कृते यो लुप्तस्तदाद्यन्तयोः सन्धिर्न स्यात्, तदाद्यस्य च यो विधिः स च न स्यात् । *

## १६ । चादिर्गिर्निः । (चादिः १।, गिः १।, निः १।) ।

चादिर्गणो गिश्च नि संज्ञः स्यात् । †

## १७ । णमितोऽन्त्याचोऽन्तोऽन्त्यस्यादौ ।

(णम इतः १॥, अन्त्याचः ५।, अन्तः १।, अन्त्यस्य ६।, आदौ ७।) ।

---

* आद्यश्च अन्त्यश्च आद्यन्तौ तयोर्विधिः आद्यन्तविधिः, सन्धिश्च आद्यन्तविधिश्च तौ सन्ध्याद्यन्तविधी। लुप्शब्देन लोपे कृते यो लुप्तस्तदाद्यन्तयोः सन्धिर्न स्यात् यथा, (३७) हरर्णह। तदाद्यस्य च विधानं यत् किमपि तन्न स्यात्, तेन राजभ्यामित्यादौ (११८) इति न-लोपे (१०८) इति न स्यात्। इदन्तु न सर्वत्र, दण्डी भस्मीकरण (६०७, धातुसंख्या ४८) (४९५) इत्यादिज्ञापकात् क्वचित् आद्यन्ताकारस्थाने विधिर्भवतीति, यथा नञा निर्दिष्टमनित्यमिति न्यायात् भस्मीकरणमित्यत्र न लुप्यपि आद्यन्ताकारस्थाने ईर्भवतीति। अत्र, आदिपदेन सिद्धे आद्य इति अवर्णग्रहणम् अवर्णाश्रितनिषेधार्थम्, तेन लुप्तस्यादिस्थितावर्णनिमित्तकविधिरपि न स्यात्, यथा,—राजभिरित्यत्र (११८, १०६) न ऐस्। अन्यनिमित्तकन्तु स्यादेव, यथा, चक्रवर्त्तिषु इत्यादौ (११८) नस्य लुप्यपि इलात् (१११) षत्वम्। अत्र 'सन्धि'शब्दग्रहणफलं (२३) दामोदर इत्यत्र स्वयं लिखितम्। पाणिनिः १।१।६२।

† चादिर्गणः—च, वा, ह, हा, हि, हो, हुं, हैं, हौ, वे, ना, नो, तु, नु, स्म, वै, ओम्, स्वित्, अह, एव, एवम्, नूनम्, शश्वत्, भूयस्, चेत्, कच्चित्, यत्र, तत्र, हन्त, माङ्, नञ्, नहि, यावत्, तावत्, वषट्, वौषट्, स्वाहा, स्वधा, स्वस्ति, ओम्, खलु, किल, अथ, सुष्ठु, अ, आ, इ, ई, उ, ऊ, ऋ, ऌ, ए, ऐ, ओ, औ, यथा, तथा, यदि, यत्, तत्, किम्, धिक्, हाहा, आहो, उत, अहि, अहो, अथो, ननु, अस्ति, असि, अपि, इति, इव, वत, अमा, जातु, कथम्, कुतः, कुत्र, आहोस्वित्, दिष्ट्या, अङ्ग, फट्, अये, अरे, उरी, उररी, उकरी, ऊरी, ऊररी, ऊकरी, तिर्य्यक् इत्यादि;—गिश्च—प्रादयो विंशतिः, एते नि(निपात)संज्ञाः स्युः। गिशब्देनेह गिसंज्ञापठिता एव गृह्यन्ते अतएव स्वरादीनामर्थादौ गिसंज्ञाभावेऽपि निसंज्ञा अव्ययसंज्ञा च। पाणिनिः १।४।५७,५८।

चित् यस्योच्यते तस्याद्यादयः परः, निदन्ते, ङिदन्त्यस्य स्थाने, मिदादौ, स्यात्। *

१८। परस्त्यः। (परः १।, त्यः १)।

प्रकृतेः परो यः स त्यसंज्ञः स्यात्। †

१९। अं अः तुवी।

(अं अः ।१॥, तु-वी १॥)।

अकार उच्चारणार्थः, बिन्दुद्विबिन्दुमात्रौ वर्णौ क्रमात् तु-वि-संज्ञौ स्तः। ‡

२०। क×पौ मूम्यौ।

(क×पौ १॥, मू-मी १॥)।

वज्र-गजकुम्भाकृती वर्णौ क्रमात् मू-मी-संज्ञौ स्तः। §

---

* चम्—च न ङ म—इत् येषां ते चमितः, चमं भवः चम्यः, चम्यमाद्यो यस्येति तस्मात् चन्त्याद्यः। मूर्धन्यचकारेदागमः स्थानिनः (२६-सूत्रमपि द्रष्टव्यम्) चन्त्याद्यः परे भवति, दन्त्यनकारेदागमः स्थानिनोऽन्ते, ङकारेदादेशः स्थानिनोऽन्त्यवर्णस्य स्थाने, मकारेदागमः स्थानिनः आदौ। यस्योच्यते इति षष्ठ्यन्तनिर्देशात् प्रत्ययेषु न प्रसङ्गः। तेन ङकारेतो ङे-आदि-विभक्तयः लिङ्गात् परा एव, एवं मूर्धन्यचकारेतो चपादयः धातोः परा एव। पाणिनिः १।१।४६,४७,४८,५२ ; तन्मते चित्=मित्, नित्=कित्, मित्=टित्। ङित् उभयत्र तुल्यम्।

† प्रकृतेः परो यः स त्य(प्रत्यय)संज्ञः स्यात्। पदस्य मूलभागः प्रकृतिः। "प्रतीयते विधीयते इति प्रत्ययः।" सिद्धान्तकौमुदी। पाणिनिः ३।१।२।

‡ तुरनुस्वारः। विर्विसर्गः। पाणिनौ विसर्गः=विसर्जनीयः।

§ मूर्जिह्वामूलीयः—जिह्वामूलोच्चार्यः। मीरुपध्मानीयः—उपध्मानीयस्योत्पत्तिस्थानम् ओष्ठः, उच्चारणन्तु सर्पश्वासवत्। कपाद्युच्चारणार्थौ। (६८ सूत्रं द्रष्टव्यम्)।

तु वि मू मीनां स्वविधौ स्वरता, स्वरसन्धौ व्यञ्जनता, तत्रापि—तुवी पूर्वेण सम्बद्धौ मूमी तु परगामिनौ। चत्वारोऽयोगवाहाख्याः स्वरव्यञ्जनमध्यगा मताः। अयः स्वं विराजन्ते, द्वयञ्च परगामिनः॥

## २१ । हो झस् । (हः ।१।, झस् ।१।) ।

हकारो झस्-संज्ञः स्यात् । *

इति संज्ञापादः ।

---

### २य पादः—अच्-सन्धिः । †

## २२ । सह वँ घँः ।

(सह ।१।, वँ ७, घँः ११) ।

वँ परे पूर्व्वस्य, वेँन सह घँः स्यात् । ‡

---

* झस् प्रत्याहारमध्ये (२) हकारस्याभावात् (५०) दंहितमित्यादिसिद्ध्यर्थं हकारो झस्संज्ञायां परिगणितः । पाणिनौ तु 'हल्' इति पृथक् प्रत्याहारस्वीकारः ।

---

† संयोगयोग्यशब्दानामसंयोगे तेषामुच्चारणकाठिन्यम् असुश्राव्यता च भवति, तद्दोष-निवारणाय द्वौ शब्दौ, पूर्व्वशब्दशेषाक्षरस्य परशब्दप्रथमाक्षरस्य वा उभयोर्वा परिवर्त्तनेन, संयुज्येते,—एवंविधसंयोगः सन्धिराख्यातः । "परः सन्निकर्षः संहिता" इति पाणिनिः १।४।१०९ । तत्र सामान्यनियमः—सन्धिरेकपदे नित्यो नित्यो धातूपसर्गयोः । समासेऽपि च नित्यः स्यात् स चान्यत्र विभाषितः ॥ इति ।

‡ पूर्व्वसवर्णस्य परसवर्णेन सह दीर्घः स्यात् ।—सवर्णद्वयमध्ये पूर्व्ववर्णस्य ह्रस्वत्वे परस्य दीर्घत्वे १, पूर्व्वस्य दीर्घत्वे परस्य ह्रस्वत्वे २, उभयोर्ह्रस्वत्वे ३, दीर्घत्वे वा ४, पूर्व्ववर्णो दीर्घो भवेत् । यथा, शिव-आशा=शिवाशा १, उमा-अर्चा=उमार्चा २, सुर-अरिः=सुरारिः ३, राजा-आगतः=राजागतः ४, इत्यादि । अत्र सूत्रे वेँन घँः इति कृते पौर्व्वापर्य्यनियमाभावात् होतृकार इत्यत्र परस्य दीर्घे होतॄकार इत्यनिष्टं स्यात् । अत एव दीर्घः स्यात्, अपः सवर्णत्वेऽपि (६) दीर्घत्वासम्भवात् । पाणिनिः ६।१।१०१ ।

मुरारिः, लक्ष्मीशः, विष्णूत्सवः, धातृद्धिः, मधूदन्तः, होतॄकारः । *

## २३ । आदिगेचोर्गुऔ ।

(आत् ५।, इक्-एचोः ६॥, गु-औ १॥) ।

अवर्णात् परयोरिगेचोरवर्णेन सह क्रमात् गु-औ स्तः । †

हृषीकेशः, दामोदरः । ‡

सन्धिग्रहणात् सन्धिलुप्येव न सन्धिः । §

माधवर्द्धिः, शिवल्कारः, कृष्णैकत्वं, मुकुन्दौकः, कृष्णैक्यं, भवौषधम् । ¶

## २४ । गेर्धोरनेधिन एङ्ऋकोः ।

(गेः ५।, धोः ६।, अन्-एध्-इनः ६।, एङ्-ऋकोः ६॥) ।

गेरवर्णात् परयोरेधिन्वर्ज्जितस्य धोरेङ्ऋकोरवर्णेन सह क्रमात् गु-औ स्तः । ||

---

* मुर-अरिः = मुरारिः, लक्ष्मी-ईशः = लक्ष्मीशः, विष्णु-उत्सवः = विष्णूत्सवः, धातृ-ऋद्धिः = धातृद्धिः, मधु-उदन्तः = मधूदन्तः, होतृ-ऋकारः = होतॄकारः ।

† अवर्णात् परस्य यथासम्भवम् इकः अवर्णेन सह गुणः (८) स्यात्, एचस्तु अवर्णेन सह वृद्धिः (९) स्यात् । पूर्वसूत्रात् सहानुवृत्तिः । पाणिनिः ६।१।८७-८८ ।

‡ हृषीक-ईशः = हृषीकेशः, दामन्-उदरः = दामोदरः ।

§ सन्धिग्रहणात् (२५) लुपि न सन्ध्यादिविधौ—इत्यत्र सन्धिशब्दग्रहणात् सन्धिलुप्येव सन्ध्यध्यायसूत्रेण लुप्येव सन्धिर्न स्यात्; अध्यायान्तरसूत्रेण लुपि तु सन्धिः स्यात्, यतोऽत्र दामन् इति शब्दस्य न-कारस्य अध्यायान्तर(पञ्चमाध्याय)सूत्रेण (११८) लुपि दामोदर इति सन्धिः ।

¶ माधव-ऋद्धिः = माधवर्द्धिः, शिव-ऌकारः = शिवल्कारः, कृष्ण-एकत्वं = कृष्णैकत्वं, मुकुन्द-ओकः = मुकुन्दौकः, कृष्ण-ऐक्यं = कृष्णैक्यं, भव-औषधम् = भवौषधम् ।

|| आत् सह चेत्यनुवर्त्तते । उपसर्गाणां मध्ये प्र परा अप अव उप आ(ङ्)—एषाः

प्रेजते, परोक्षति, अपार्च्छति । *

अनेधिनः किं—उपेधते, अवैति । †

## २५ । लिधोर्वा । (लिधोः ६।, वा ।१।) ।

लिंधोस्तु पूर्व्वोक्तं कार्य्यं वा स्यात् । ‡

प्रेकीयति प्रेकीयति, प्रोघीयति प्रौघीयति, प्रार्चीयति प्रर्चीयति, प्राल्कारीयति प्रल्कारीयति । §

## २६ । लोपोऽस्योमाङोः ।

(लोपः १।, अस्य ६।, ओम्-आङोः ७॥) ।

अवर्णस्य ओमाङोः परयोर्लोपः स्यात् । ¶

शिवायोनमः, शिवेहि, ब्रह्मोतं, राजर्षिः । ||

---

परस्य एध-इन-वर्जितस्य धातोः प्रादीनामवर्णेन सह एङो गुणः (८), ऐचो वृद्धिः (९) स्यात् । धातोर्लृकाराभावात् एङ्ऋतोरित्यनेनापि इष्टसिद्धौ लृग्रहणं परस्यानुवृत्त्यर्थमेव । पाणिनिः ६।१।८९,९१,९४ ।

* प्र एजते=प्रेजते, परा-ओक्षति=परोक्षति, अप-ऋच्छति=अपार्च्छति ।

† उप-एधते (२१)=उपेधते, अव-एति (२१)=अवैति ।

‡ पूर्व्वोक्तनिमित्तीभूतेन उपसर्गावर्णेन सह नामधातोः एङ्ऋचोः क्रमात् गुण(८)-वृद्धी(९) वा स्तः । प्र-ओङ्कारीयति इत्यादौ पूर्व्वापरयोः परविधिर्बलवान् इति न्यायात् ("विप्रतिषेधे परं कार्य्यम्" पाणिनिः १।४।२) परसूत्रेण (२६) अवर्णस्य लोपे प्रोङ्कारीयति, न तु प्रौङ्कारीयति । पाणिनिः ६।१।९२,९४ ।

§ प्र-एकीयति=प्रेकीयति (वा २१) प्रेकीयति, प्र-ओघीयति=प्रोघीयति (वा २१) प्रौघीयति, प्र-ऋचीयति=प्रार्चीयति (वा २१) प्रर्चीयति, प्र-लृकारीयति=प्राल्कारीयति, (वा २१) प्रल्कारीयति ।

¶ इह अवर्णग्रहणं स्व-निवृत्त्यर्थम् । अवर्णस्य ओकारे आदिष्टाङि च (४०) परे लोपः स्यात्, अनादिष्टे आङि परे दीर्घेणैव पदसिद्धेः अवर्णलोपस्य वैयर्थ्यात् । पाणिनिः ६।१।९५ ।

|| शिवाय-ओम्-नमः (५०,५१)=शिवायोनमः [समासान्तर्गतशब्दानां पदत्वलोपकारत्वानित्यत्वात्] ; अत्र, लोपोऽप्याश्रित उच्यते इति न्यायात् स्थानिवदादेश इति नियमेन अकारस्य

स्थानिवदादेशः। * द्वयोर्विभाषयोर्मध्ये विधिर्नित्यः। †

**२७। एवेऽनियोगे।** (एवे ७, अनियोगे ७)।

अवर्णस्य एवे परे लोपः स्यात् अनियोगे। ‡

अद्येव। नियोगे तु—अद्यैव गच्छ। §

**२८। वौष्ठोत्वोः से।** (वा ।१।, ओष्ठोत्वोः ७॥, से ७)।

अवर्णस्य ओष्ठोत्वोः परयोर्लोपः स्यात् वा से सति। ¶

बिम्बोष्ठः बिम्बौष्ठः, स्थूलोतुः स्थूलौतुः। ‖ से किं—तवौष्ठः। **

---

स्थानिवत्त्वेन अयां योरिति(२०) यकारस्य न लुप्। शिव-आ-इहि(२२)=शिव-एहि=शिवैहि, आ-ऊतम्(२२)=ओतं, ब्रह्म-ओतं=ब्रह्मोतम्, आ-ऋषिः(२२)=अर्षिः, राजा-अर्षिः=राजर्षिः।

* स्थानमस्यास्तीति स्थानी, आदिश्यतेऽसौ आदेशः। यो वर्णो यस्य वर्णस्य स्थाने आदिष्टः स पूर्व्वाचरवत् भवतीत्यर्थः। वस्तुतस्तु येषु ष्वनिष्टं तेषु स्थानिवत्त्वं नास्ति, अतएव प्राचः—इष्टसाधनार्थमेव न्यायः स्वीक्रियते, न त्वनिष्टसाधनार्थमिति। पा. १।१।५६।

† पूर्व्वापरयोः सूत्रयोः विकल्पवाचिनि वाशब्दे प्रयुक्ते तन्मध्यवर्त्तिनि सूत्रे सूत्रयोः सूत्रेषु वा वाशब्दस्य नानुवृत्तिः, अतस्तद्विधिर्नित्यः, यथा—(२५) खिधोर्वा, (२८) वौष्ठोत्वोः से, इत्येतयोर्मध्ये (२६) लोपोऽस्योमाङोः, (२७) एवेऽनियोगे इत्येतयोः वाशब्दस्य नानुवृत्तिः। यत्र तु वाशब्दो व्यवस्थावाची, तत्र विभाषाद्वयमध्यवर्त्तिनः इष्टत्वात् नित्यत्वम् अनिष्टत्वादनित्यत्वं बोध्यम्—तेन (२०) अयां योरिति, (२८) गोर्वेत्येतयोर्मध्ये, (२८) एङोऽतः इत्यस्य नित्यत्वम्। (६६) से तु क ख प फे वेति, (७१) अवाचि इत्येतयोर्मध्ये, (६७) असि असिति, (६८) क ख प फयोर्मूर्द्धाविन्द्वेतयोर्द्वयोर्विकल्पः, (६९) अतोऽत्वम्तुः, (७०) च भो भगो इत्येतयोर्द्वयोर्नित्यत्वम्।

‡ अनियोगे अनियमे अनवधारणे इत्यर्थः। "एवे चानियोगे" इति वार्त्तिकम्।

§ अद्य-एव=अद्येव। अद्य-एव गच्छ (२२)=अद्यैव गच्छ।

¶ ओष्ठे ओतौ च परे अवर्णस्य लोपः स्याद्वा समासे। वाशब्दस्येह व्यवस्थावाचित्वात् संज्ञायां नित्यम् अवर्णलोपः स्यात्, तेन ओष्ठो रसः, ओष्ठो मत्स्यविशेषः। वार्त्तिकम्।

‖ बिम्ब-ओष्ठः=बिम्बोष्ठः, स्थूल-ओतुः=स्थूलोतुः, (वा २२) बिम्बौष्ठः, स्थूलौतुः। बिम्बे इव ओष्ठौ यस्य, स्थूलश्चासावोतुश्चेति समासवाक्यम्।

** से किं—से (समासे) इति कथमुक्तम्, असमासे—तव-ओष्ठः (२२)=तवौष्ठः।

२९। वौसे त्वृतो त्रिं।

(वौ-से ७, तु ।१।, ऋतः १।, त्रिं २।)।

अवर्णात् परं ऋतो त्रिमाप्नोति वौसे सति। *

शीतार्त्तः। † वौसे किं—परमर्त्तः। ‡ त्वन्तस्य नानुवृत्तिः। §

३०। ऋण प्र वसन वत्सर वत्सतर दश कम्बलस्यर्णः। (ऋण—कम्बलस ६।, ऋणः १।)।

एषामवर्णात् परं ऋणो त्रिमाप्नोति। ऋणार्णं, प्रार्णं। ¶

३१। स्वाक्षयोरीरोहिन्यौ(ण्यौ)।

(स्व-अक्षयोः ६॥, ईर-ऊहिन्यौ १॥)।

---

* अर्थवशात् विभक्तेर्विपरिणाम इति न्यायात् (२६) लोपोऽल्लोमाङ्कोरित्यतः अस्य विभक्तिं विपरिणमय्याह अवर्णात् परं इति। वृद्धिविधानदर्शनादेव सवर्णानुवृत्तिः। तृतीयासमासे अवर्णात् परस्य अव्यवहितस्य ऋतशब्दस्य ऋकारस्य पूर्वावर्णेन सह वृद्धिः स्यात् (८)। पाणिनिः ६।१।८९ सूत्रस्य वार्त्तिकम्।

† शीत-ऋतः=शीतार्त्तः। शीतेन ऋतः—पीड़ितः इति तृतीयातत्पुरुषसमासः। एवं क्षुधा-ऋतः=क्षुधार्त्त इत्यादि।

‡ परम-ऋतः=परमर्त्तः। परमश्चासौ ऋतश्चेति कर्मधारयसमासे ऋतस्य वृद्ध्यभावेन (२२) गुणः (८)।

§ त्वकारान्तस्य पदस्य परसूत्रे अनुवृत्तिर्नास्तीति। अनेन ज्ञापकेन त्वन्तभिन्नपदस्य परसूत्रेऽनुवृत्तिः सूचिता, परन्तु ज्ञापकसिद्धमनित्यमिति न्यायात् क्वचिदनिष्टे नानुवर्त्तते।

¶ ऋणापनयनार्थम् ऋणम् ऋणार्णं, प्रकृष्टमृणं प्रार्णं, वसनार्थमृणं वसनार्णं, वत्सरे देयमृणं वत्सरार्णं, वत्सतरार्थमृणं वत्सतरार्णं, दश ऋणाः पयोदुर्गाणि सन्ति यस्मिन् यस्यां वा दशार्णो देशः दशार्णा नदी, कम्बलार्थमृणं कम्बलार्णम्। ऋणोऽस्त्रियां पयोदुर्गे देये तोये दुरात्मनीति पद्मगोविन्दः। एतदन्यत्र तु (२२) गुणः—यथा, अधम-ऋणः=अधमर्णः, उत्तम-ऋणः=उत्तमर्णः। "प्रवत्सतरकम्बलवसनार्णदशानामृणे" इति वार्त्तिकम्। "अत्र काशिकानुसारिणो वत्सरशब्दमपि पठित्वा वत्सरे देयमृणं वत्सरार्णमित्युदाहरन्ति। अपरे तु वत्स-शब्दमपि पठन्ति। तत्सर्वं भाष्यादिविरुद्धम्" इति प्रौढ़मनोरमा।

अनयोरवर्णात् परावेतौ त्रिमाप्नुतः । * स्वैरम्, अक्षौहिणी । †

३२ । प्रस्योढोढ्यूहाः । (प्रस्य ६।, ऊढ ऊढि ऊहाः १॥) ।

प्रस्यावर्णात् परा एते त्रिं यान्ति । प्रौढः, प्रौढिः, प्रौहः । ‡

३३ । वैषैष्यौ । (वा ।१।, एष-एष्यौ १॥) ।

प्रस्यावर्णात् परावेतौ त्रिं वा प्राप्नुतः । प्रेषः प्रैषः, प्रेष्यः प्रैष्यः । §

३४ । मनीषाः । (१॥) ।

मनीषाद्या निपात्यन्ते । ¶

---

* स्वाक्षयोः क्रमशः—स्वस्य अकारात् ईरः, अक्षस्य अकारात् ऊहिनी च, तेन सह त्रिमाप्नोति । सूत्रे ईर इत्यस्य अकार उच्चारणार्थः, तेन रेफान्त ईर् इत्यस्य ग्रहणं, तेन ईर-ईरिणोः प्राप्तिरिति—यथा, स्वैरं, स्वैरी, स्वैरिणी । स्वेरा इत्यत्र न स्वादनभिधानात् । भवादिरहिते स्वैरं स्वच्छन्दमन्दयोरित्यमृत इत्यादिभिः । अक्षाणां अक्षौहिणीति वाक्ये "संज्ञायामेव" अक्षौहिणी (बलं)—परिमाणविशेषविशिष्टा सेना । अक्षाणामूहनम् इति अर्थे तु अक्षोहिणी(नी)त्येव भवति । पूर्ववत् वार्त्तिकम् ।

† स्व-ईरं=स्वैरम् । अक्ष-ऊहिनी=अक्षौहिणी ।

‡ प्र-ऊढः=प्रौढः, प्र-ऊढिः=प्रौढिः, प्र-ऊहः=प्रौहः । ऊहधातोः घञ्प्रत्ययेन ऊहशब्दः साध्यः, वहधातोस्तु क्त-क्ति-प्रत्ययाभ्यां ऊढः ऊढिः इति पदद्वयं सिद्धम् । प्रौढो भार इत्यत्र प्रपूर्वादाङ्पूर्वाच्च वहधातोः क्रमशः रूपम् । पूर्ववत् वार्त्तिकम् । काशिका-रुचि-कलाप-सुपद्म-संक्षिप्तसारमते (प्राचां मते भाष्येऽपि) वार्त्तिकसूत्रे ऊहशब्दस्य उल्लेखो नास्ति, नव्यानां मते तु भाष्ये तदुल्लेखो दृश्यते ।

§ विकल्पेन वृद्धिविधानात् पक्षे गुणो भवतीत्यवसेयम्, इदमेव वाशब्दस्य व्यवस्था । प्र-एषः=प्रेषः, प्र-एष्यः=प्रैष्यः । वा (२४) प्रेषः, प्रेष्यः । इत्यादयः । पूर्ववत् वार्त्तिकम् ।

¶ यत् यत् लक्षणेनानुत्पन्नं तत् सर्वं निपातनात् सिद्धमिति भाष्यम् । तत्र सिद्धिः—क्वचित् वर्णागमैः, क्वचित् वर्णविपर्ययैः, क्वचित् वर्णविकारैः, क्वचित् वर्णनाशैः, क्वचिच्च धात्वर्थातिशयेनापि बोद्धव्या । निपातः पञ्चविधो यथा—वर्णागमो वर्णविपर्ययश्च, द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तमिति पूर्वाचार्याः । उदाहरणानि यथा—भवेद्वर्णागमात् हंसः सिंहो वर्णविपर्ययात् । गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम् ॥ पाणिनिः ६।१।८९ सूत्रस्य वार्त्तिकम्, तथा ६।३।१०९ सूत्रमपि ।

मनीषा, हलीषा, लाङ्गलीषा, मकन्धुः, कुलटा, सीमन्तः, पतञ्जलिः, सारङ्गः । *

३५ । यवलायवायावोऽचीचः ।

(यव्-रल्-अय्-अव्-आय्-आवः १।३, अचि ७।१, इकः ६।१—यत्वा १।, वा ।

इकः स्थाने य् व् र् ल् अय् अव् आय् आव् एते अचि परे क्रमात् स्युः । † व्यश्वकः, विष्वोघौ, धात्रंशुतौ, लाकृतिः, हरये, प्रभवे, नायकः, पावकः । ‡

३६ । वाव गोर्दन्ते ।

(वा ।१।, अव ।१।, गोः ६।, दन्ते ७)।

---

* मनस् ईषा=मनीषा—बुद्धिः । हल-ईषा=हलीषा, लाङ्गल-ईषा=लाङ्गलीषा, ईषा लाङ्गलदण्डः । संक्षिप्तसार-सुपद्म-मते ईषा नमनम् । मक-अन्धुः=मकन्धुः—मकदेशस्थकूपः । कर्कान्धुः शकन्धुः कर्कन्धुरित्यपि कर्तव्यम् । कुल-अटा=कुलटा—वेश्या । सीम-अन्तः=सीमन्तः—केशविन्यासः । पतत्-अञ्जलिः=पतञ्जलिः—मुनिविशेषः । सार-अङ्गः=सारङ्गः—चातकादिः । शकन्धादिषु पररूपं वाच्यमिति वार्त्तिकम् ।

अत्र अधिकृतौ अचां लोपविधायकेऽपि सूत्रे बहुवचननिर्देशात् इतरो वादिपदस्योपादानाच्च अन्यान्यपि पदानि निपातनात् सिध्यन्ति, इत्यादि बहुवचनान्ताः शब्दाः संगृहीताः इति भावः । यथाच—बृहस्पतिः, वनस्पतिः, वनस्पतिः, वलाहकः, श्रीमदम्, षाण्डं, जीमूतः, तस्करः, मस्करी, पटवी, आश्चर्यं, पृषोदरः, केशवः, परांश, पश्चार्द्धं, हरिश्चन्द्रः, सुपर्णीकः, अन्योऽन्यम्, परस्परं, परम्परा, पिशाचः, कपित्थः, शिष्टं, रथमित्यादि ।

† इ उ ऋ ऌ ए ओ ऐ औ एतेषां वर्णानां स्थाने क्रमेण—

य् व् र् ल् अय् अव् आय् आव् इते क्रमात् स्युः सवर्णे एचि असमान-ज्ञकि च परे । समान-ज्ञकि परे तु (२९) दीर्घ एव, यथा—दध्योदः, समानाश्रयविधिबाधोसंज्ञे विधिर्विधिमर्जयान् इति भावात् । सूत्रे अच इति अकारान्तपाठः उच्चारणार्थः (४) । पाणिनिः ६।१।७७-७८ ।

‡ वि-अश्वकः=व्यश्वकः, कोऽपि अश्वकानि अचूंषि यस्य । विष्णु ईषौ=विष्वोघौ, धातृ-अंशुतौ=धात्रंशुतौ, लृ-आकृतिः=लाकृतिः, लृकारस्येव आकृतिर्यस्य । हरि-ए=हरये, प्रभो-ए=प्रभवे, नै-अकः=नायकः, पौ-अकः=पावकः ।

गोरिचः स्थाने अवः स्याद्वा अचि परे दान्ते । *
गवेशः, गवीशः । दान्ते किं, गवे । गवेन्द्र-गवाक्षौ नित्यम् । †

३७ । अयां य्वोर्लुब् वा ।

(अयां ६॥, य्वोः ६॥, लुप् १।१, वा ।१) ।

दान्ते स्थितानामयादीनां यवयोर्लुप् स्याद्वा । ‡ हरएहि हरयेहि, प्रभइदं प्रभविदं, श्रियाएति श्रियायेति, विष्णाउत्कः विष्णावुत्कः । §

३८ । एङोऽतः । (एङः ५।१, अतः ६।१) ।

दान्ते स्थितादेङः परस्य अकारस्य लुप् स्यात् । हरेऽव, विष्णोऽव । ¶

---

* इच इत्यस्यानुवृत्तिः । अव इति पृथग्विधानात् गोशब्दस्य ओकारस्थाने अकारान्त-अवादेशः स्याद्वा अचि परे पदान्ते । इतो गोरिचः सहचात् चित्रा गौर्यस्य इत्यादौ (११०) नवामादेरित्यादिना गोरोकारस्थाने ह्रस्व-उकारादेशे चित्रगु-आचार्यः=चित्रगवाचार्यः इत्यादि सिद्धम् । गवीश इत्युदाहरणानन्तरम् अयां य्वोरिति अवयवकरणात् नात्र यलोपः, केचित् समासे न स्यादित्याहुः । पाणिनिः ६।१।१२२ ।

† गो-ईशः (३६,२२)=गवेशः, वा (३६) गवीशः । गो-ए (३६)=गवे । गो-इन्द्रः=गवेन्द्रः, गो-अक्षः=गवाक्षः, उभयत्र नित्यमवादेशः । पाणिनिः ६।१।१२३-१२४ ।

‡ अयाम् इति बहुवचननिर्देशो यथार्थः । पदान्ते स्थितानाम् अय्, अव्, आय्, आव्, इत्येषां य्वोर्लुप् स्याद्वा । अत्र वाशब्दस्य व्यवस्था—क्वचिन्न स्यात्, क्वचित् वा स्यात्, क्वचिन्नित्यमिति ज्ञातव्यम् । अभिधानादुदाहरणानि ज्ञेयानि । पाणिनिः ८।३।१९ ।

§ हरे-एहि (३५)=हरय्-एहि (३७)=हरएहि, प्रभो-इदं (३५)=प्रभव्-इदं (३७)=प्रभइदं, श्रियै-एति (३५)=श्रियाय्-एति (३७)=श्रियाएति, विष्णौ-उत्कः (३५)=विष्णाव्-उत्कः (३७)=विष्णाउत्कः । वा (३५) हरयेहि, प्रभविदं, श्रियायेति, विष्णावुत्कः । (३५) सन्धि-सूत्रेण लुप्करणात् हरएहि इत्यादौ न सन्धिः ।

¶ अपदान्ते यथा—हे-अनं (३५)=हयनं, भो-अनं (३५)=भवनम् । पाणिनिः ६।१।१०९ ।

३९। गोर्वा। (गोः ६।, वा ।१।)।

गोरति वा सन्धिः। * गवाग्रं गोऽग्रं गो-अग्रम्। †

४०। नाजो-अन्तोऽनाङ् निः प्लुश्च।

(न ।१।, अच् ।१।, ओ-अन्तः १।, अनाङ् ।१।, निः १।, प्लुः १।, च ।१।)।

अच्मात्र ओकारान्तश्च निराङ्वर्जः सन्धिं नाप्नोति, प्लुश्च। ‡

अ-अनन्त, इ-ईश्वर, उ-उमेश, अहो-ईशान, कृष्ण-एहि।

अनाङ् किं—

मर्य्यादायामभिविधौ क्रियायोगेषदर्थयोः।
य आकारः स ङित् प्रोक्तो वाक्यस्मरणयोरङित्॥ §

---

* अर्थवशात् विभक्तेर्विपरिणाम इति न्यायात् अतः इति षष्ठ्यन्तपदं सप्तम्यन्तं भूत्वा अनुवर्त्तते, इत्यत आह गोरतीति। प्रकरणवशात् सन्धिर्बोध्यः। अत्र पूर्व्वसूत्रात् एङः इत्यनुवर्त्त्य एङन्तस्य गोरिति वक्तव्यम्, तेन (चित्रगु-अग्रम्) चित्रग्वग्रमित्यत्र नास्य सूत्रस्य प्रसरः। पाणिनिः ६।१।१२२।

† गो-अग्रं (२६)= गवाग्रं, वा (१८)= गोऽग्रं, (३९)= गो-अग्रम्।

‡ अच्मात्राव्ययस्य, ओ-कारान्ताव्ययस्य, प्लुतस्य च, अस्यावयवस्य शब्दान्तरस्थाद्यावयवेन सह न सन्धिः। तेन अनन्त-अ, ईशान-अहो इत्यादौ सन्धिः स्यादेव। ओ अन्त इति पृथक्करणात् अच्पदेन तन्मात्रं प्रतीयते, अन्यथा प्रजवदरस (५७४) इत्यादिवत् अजन्तस्यैव प्राप्तिः स्यात्। तेन अ, इ, उ, ऋ, ऌ, ए, ऐ, ओ, औ, इत्येकैक-निपाताः, एवमोकारान्तोऽपि निपातः। यथा निर्दिष्टमनित्यमिति न्यायात् अहोऽतिरम्यमित्यादिरपि सिद्धिः। पाणिनिः १।१।१४-१५।

§ ङिदङिल्लक्षणमूलस्य आकारस्य आकृत्य भेदज्ञानं कथम् इत्यत आह—य-आकारः—मर्य्यादायां सीमायाम् [तेन विना मर्य्यादा] (१), अभिविधौ अभिव्याप्तौ [तत्सहितोऽभिविधिः] (२), क्रियायोगे क्रियावाचकपदपूर्व्ववर्त्तिनि (३), ईषदर्थे अल्पार्थे (४), वर्त्तते, स ङित् प्रोक्तः, तस्य सन्धिरिति भावः।

मतान्तरे यथा—ईषदर्थे क्रियायोगे मर्य्यादाभिविधौ च यः।
एतमातं ङितं विद्यात् वाक्यस्मरणयोरङितं॥

आत्मबोधादेकदेशादालोकोपरतेर्हरिः।
आ एवं तत्त्वमर्य्यादा, आ एवं तत् ज्ञातं मया ॥ *

४१। ब्वद्वेऽमीयू। (ब्व-द्वे ७, अमी-ई-ऊ-ए = यू ।१।)।

ब्वे निष्पन्नोऽमी-शब्दो, द्वे निष्पन्न ईदूदेदन्तश्च सन्धिं नाप्नोति। † अमी-ईशाः, हरी-एतौ, विष्णू-इमौ, गङ्गे-इमे। ब्वद्वे किम्— अम्ब्ययं, वध्वर्थः। ‡

४२। स्वोदितौ। (स्वि-ओत् = स्वोत् ।१।, वा ।१।, इतौ ७)।

स्वौ जात ओकारः सन्धिं वा नाप्नोति इतौ परे। §

---

* यथा,—आ-आत्मबोधात् = आत्मबोधात्—आत्मज्ञानपर्य्यन्तम् (१)। आ-एकदेशात् = ऐकदेशात्—एकदेशं चरणयुगादिकं व्याप्य (२)। आ-आलोके = आलोके—इष्ट इत्यर्थः (३)। आ-उपरतेः = ओपरतेः—ईषद्विरतेः (४)। य आकारः—वाक्यार्थ(१)-पूर्व्ववाक्यार्थानुमत्योः (२) वर्त्तते, स अञ्चित्, अतएव तस्य सन्धिर्न स्यादित्यर्थः, यथा, आ एवं तत्त्वस्य प्रज्ञयो मर्य्यादा इति वाक्यं (१), मया तत् ज्ञातम् आ एवम् इति स्मरणम् (२)।

† बहुवचननिष्पन्नः अमी-शब्दः, द्विवचननिष्पन्नः ई-कारान्तः ऊ-कारान्तः ए-कारान्तश्च सन्धिं नाप्नोति। अत्र ईकारादेः सन्धिनिषेधात् तन्निमित्तकस्यापि सन्धिनिषेधो बोध्यः —तेन गङ्गे-अत्र इत्यादौ (२८) नाकारलोपः। पाणिनिः १।१।११-१२।

‡ अम्बी-अयम् = अम्ब्ययम्, अम्बी—रोगी। वध्वा-अर्थः (११८) = वधू-अर्थः = वध्वर्थः, एवं गार्य्यां-अर्थः = गार्य्यर्थः इत्यादौ ऊकार-ईकारयोः द्विवचननिष्पन्नत्वाभावात् सन्धिः स्यादिति। तथा निर्द्दिष्टमनित्यमिति न्यायात् द्विवचने अदन्त एकारस्य सन्धिः स्यादिति, अश्रुनी-इव (२५,२७) अश्रुकइव अश्रुनविव, अश्रुने-अत्र (२८) = अश्रुनेऽत्र, एवं मणीवादिषु द्विवचननिष्पन्नस्यापि ईकारस्य इवे परे सन्धिः स्यादिति। यथा, मणी भार्य्यापती चैव दम्पती जम्पती तथा। रोदसी वाससी चैव इवे जायापती तथा। अचेतनोऽपि पक्षमते पितृशौनश्रमवपीति मणीवादयः। अथवा इवार्थक वाशब्दस्य वकारस्य वा लोपादिव ते साधवः। ईदूतोर्दीर्घग्रहणात् अथवावशावानिश्च इत्यस्य सन्धिः।

§ स्वौ परे जात ओकारः उकारान्तशब्दस्य सम्बोधने एव सम्भवति, स ओकारः सन्धिं वा नाप्नोति इति-शब्दे परे। पाणिनिः १।१।१६।

विष्णो-इति विष्णइति विष्णविति। *

## ४३। उञ् णपात्त्वचि व वा।

(उञ् ।१।, णपात् ५।, तु ।१।, अचि ७।, व ।१।, वा ।१।)।

उञ् सन्धिं वा नाप्नोति इतौ परे, णपात् परस्तु वो वा स्यादचि। † उ इति, विति। किम्वुक्तं, किमु-उक्तम्। ‡

## ४४। वेक् स्वश्चाणोऽसे।

(वा ।१।, इक् ।१।, स्वः १।, च ।१।, अणि ७।, असे ७।)।

इक् सन्धिं वा नाप्नोति, स्वश्च वा स्यादणि परे, नतु से, दान्ते। § शार्ङ्गी अत्र शार्ङ्गि अत्र शार्ङ्ग्यत्र। असे किं—हर्यर्थी। ¶

## ४५। ऋत्यक्। (ऋति ७।, अक् ।१।)।

---

* विष्णो-इति = विष्णा-इति, वा (१७,२५) विष्णइति विष्णविति।

† अकारोऽस्य नञ्वदव्ययत्वज्ञापकः। पूर्वतोऽनुवर्तमानेन वाशब्देन, उञ् सन्धिं वा नाप्नोति इतौ परे, इत्येकोऽर्थः। णप्प्रत्याहारात् परस्तु व-कारो वा स्यादचि इत्यपरोऽर्थः। पाणिनिः १।१।१७, ८।३।३३।

‡ विधिबलात् सवर्णे परेऽपि उकारस्य वत्वं (२५), न तु दीर्घः (२२)। उकारस्य स्थानिवत्त्वेन अव्ययत्वेन वा दान्ते म (५१) इत्यनेन न मस्यानुस्वारः। विकल्पपक्षे (४०) नाञा-अत्र इत्यनेन सन्धिनिषेधः।

§ नञ्कुञ्जुक्वा (२६) सूत्रात् दान्ते इत्यस्यानुवृत्तिः। इक्प्रत्याहारः सन्धिं वा नाप्नोति, ह्रस्वोऽपि वा स्यात्, असमासे अणि परे, पदान्ते, असमासे। सन्धिनिषेधसम्बद्धो वाशब्दः पूर्वस्मादनुवर्तत एव, इह पुनर्वाग्रहणं ह्रस्वत्वार्थम्, अन्यथा सन्धिनिषेधसम्बद्धस्य वाशब्दस्य सन्धिनिषेधेनैव चरितार्थत्वे ह्रस्वस्य नित्यत्वापत्तिः स्यात्। अत्र वाशब्दस्य व्यवस्थावाचित्वात् क्वचिदनित्यसमासेऽपि स्यात्, तेन नद्या-अत्र इति समासे (११८) नदी-अत्रः नदि अत्रः नद्यत्रः इति। पाणिनिः ६।१।१२७।

¶ हरि-अर्थी (२५)=हर्यर्थी। ह्रस्वान्त-प्रत्युदाहरण-ज्ञापनात् ह्रस्वान्तस्यापि पक्षे ह्रस्वभाव इति सूचितं, तेन वारि-अत्र वार्यत्र इत्यपि सिध्यति।

अक् सन्धिं वा नाप्नोति ऋकि परे ह्रस्वश्च वा स्यात्। *

ब्रह्मा-ऋषिः, ब्रह्मऋषिः, ब्रह्मर्षिः।

इति अच्-सन्धि-पादः।

---

## २य पादः—हस्-सन्धिः।

### ४६। स्तु श्चुभिः श्चुशात्।

(स्तु ।१।, श्चुभिः ३॥, श्चु ।१।, अशात् ५।)।

सकार-तवर्गौ शकारेण चवर्गेण वा योगे शकार-चवर्गौ क्रमात् प्राप्नुतः, न तु शात् परौ। †

सच्चित्, शार्ङ्गिञ्जय। अशात् किं—प्रश्नः। ‡

---

* इह वाद्वयमनुवर्तते। ऋमकौ प्रत्याहारौ। यत्र ऋक्सम्भावना नास्ति तत्र च वा सन्धिरिति—तेन, दधि-ऋच्छति दध्यृच्छति इत्यादि। अत्र असमासे इति नानुवर्तते, तेन महांश्चासौ ऋषिश्चेति समासे, महाऋषिः महऋषिः महर्षिरिति। अतएव "समासेऽप्ययं प्रकृतिभावः" इति सिद्धान्तकौमुदी। [अतएव २६ सूत्रे 'चाश्रमः' इत्यत्र समासेऽपि प्रकृतिभावः।] वस्तुतस्तु अनित्यसमासे एवायं विधिः, तेन पराञ्चतीत्यादौ न स्यात् (५४८ सूत्रं द्रष्टव्यम्)। पाणिनिः ६।१।१२८।

---

† श्चुभिरिति बहुवचनं योगक्रमाभावसूचनार्थम्। तृतीयया साहित्यसूचनात् योगो लभ्यते। योगश्च अव्यवहितपूर्वापरैकतरवर्त्तित्वम्। तालव्यशकार-चवर्गयोरन्यतरेण सह अव्यवधाने स्थितौ दन्त्यसकार-तवर्गौ क्रमात् तालव्यशकार-चवर्गौ प्राप्नुतः शकारचवर्गयोर्भावं प्राप्नुत इत्यर्थः—शकारचवर्गौ भवत इति यावत्, न तु तालव्यशकारात् परस्थितौ। अत्र "शात् परस्य चुत्वं न स्यात्" इति सिद्धान्तकौमुदी। एतच्च इतः प्राक्शाद्योऽन्यत्रापि प्रयुज्यते बाधकं विनेति नियमात्, परसूत्रोक्त 'न च हान्तात् टवर्गात् परौ' इतिवत् अत्रापि 'न च शान्तात् चवर्गात् पराविति' बोध्यं, तेन अच्-सन्धिः, नञ्-समासः, प्रच्छ-धातुः इत्यादिर्सिद्धिः। पाणिनिः ८।४।४०।४४।

‡ सत्-चित् = सच्चित्, शार्ङ्गिन्-जय = शार्ङ्गिञ्जय। प्रश्-नः = प्रश्नः।

## ४७। ष्टुभिः ष्टुरपदान्तटोः।

(ष्टुभिः ३॥, ष्टु ।१।, अषि ७, अपदान्तटोः ६।)।

सकार-तवर्गौ षकारेण टवर्गेण वा योगे षकार-टवर्गौ क्रमात् प्राप्नुतः, न तु षकारे परे, न च पदान्तात् टवर्गात् परौ। * तट्टीका, चक्रिण्ढौकसे। अषि किं—सत्-षष्ठः। अपदान्तटोः किं—षट्-ते। †

## ४८। षण्णां षण्णवति षण्णगर्य्यः। (१॥)।

एते निपात्यन्ते। ‡

## ४९। ले लस्तोः। (ले ७।, लः १।, तोः ६।)।

ले परे तोर्लकारः स्यात्। § तल्लयः, विद्वाँल्लिखति।

यलो द्विधा तौ निरनुनासिकः सानुनासिकः।
अमोऽनुनासिकस्तेन तत्स्थाने सानुनासिकः॥ ¶

---

* पूर्व्वतः च इत्यस्यानुवृत्तिः। ष्टुभिरिति बहुवचनं पूर्व्ववत्। मूर्द्धन्यषकारटवर्गयोरन्यतरेण सह सम्बन्धेऽपि स्थितौ दन्त्यसकारतवर्गौ क्रमात् मूर्द्धन्यषकारटवर्गौ भवतः, न तु मूर्द्धन्यषकारे परे, न च पदान्तटवर्गात् परस्थितौ। षट्-सन्त इत्यत्र नषटनञ (१०) इत्यनेन टस्थाने तत्कारश्चादेव, अनेन पुनः तस्थाने टकारो न स्यात्। पाणिनिः ८।४।४१-४२।

† तत्-टीका=तट्टीका, चक्रिन्-ढौकसे=चक्रिण्ढौकसे; हे चक्रिन् त्वं गच्छसीत्यर्थः, ढौकृ गतौ इति कविकल्पद्रुमः।

‡ षष्-नाम्=षण्णां, षष्शब्दादामो नुडागमे (११०) निपातनात् षस्य णत्वे षण्णामिति। तत्र तु दोषत्वात् नुडागमो न स्यात् तत्र न निपातनं, तेन षतिषणामित्येव। षडधिका नवतिः षण्णवतिः। षषां नगरी षण्णगरी। नगरीति [illegible] षड्नगरमित्यत्र न स्यात्। "षष्णान्नवतिनगरीणामिति वाच्यम्" इति वार्त्तिकम्।

§ तोर्लत्वमेव। अत्र [illegible] हुस्वे इति दीर्घं, तेन लुपसृष्टि (२१२) इत्यत्र न [illegible]। पाणिनिः ८।४।६०।

¶ विद्वाँल्लिखतीत्यत्र अनुनासिकद्वितीयात् यलो द्विधेति। अनुनासिकोऽर्थः [illegible]

५० । म्नोर्नुर्झस्यदान्ते ।

(म्नोः ६॥, नुः १।, झसि ७।, अदान्ते ७।)।

अदान्ते स्थितयोर्मनयोर्नुः स्यात् झसि परे। रंस्यते, बृंहितम्। *

५१। अपे अम् नोः। (अपे ७।, अम् ।१।, नोः ६।)।

अदान्ते स्थितस्य नोऽपे परे अम् स्यात्। शान्तः, पङ्क्तिः।†

५२। वा त्वरयपेऽरयम्।

(वा ।१।, तु ।१।, अरयपे ७।, अरयम् ।१।)।

दान्ते अदान्ते वा स्थितस्य मो रेफवर्ज-यपे परे रेफवर्ज-यम् वा

---

रुद्धः, अपि च नासिकामनु यद्योऽन्य उच्चार्य्यतेऽसौ इति व्युत्पत्त्या अनुस्वारे अमि च वर्त्तते। नास्ति रो यस्मिन् सोऽरः यस्य इत्यस्य विशेषणम्, ततश्च रभिन्न-यवप्रत्याहारो द्विधा भवति—निरनुनासिकः—अर्द्धचन्द्राकृतिवर्णशून्यः, सानुनासिकः—अर्द्धचन्द्राकृतिवर्णपूर्व्वकश्च। अमः स्वभावादनुनासिकः—नासिकामनु यद्योऽन्य उच्चार्य्यमाणः, तेन हेतुना तस्य स्थाने जायमानो यवः सानुनासिकः अर्द्धचन्द्राकृतिवर्णपूर्व्वक एव स्यात्, कारणगुणाः कार्य्यगुणमारभन्ते इति न्यायादित्यर्थः। एवम् अनुस्वारजातो यवः सानुनासिको भवति। विसर्गस्थानीयस्य मस्थान-जातत्वात् यकारस्य अर्द्धचन्द्राकृतिवर्णपूर्व्वकत्वम्, अर्द्धचन्द्राकृतिवर्णस्य अनुस्वारवत् पूर्व्वेणैव सम्बन्धः। अर इति किम्, अवावरीत्यादौ (२६१) मनो मस्थानजातोऽपि रः निरनुनासिक एव। पाणिनिः १।१।८।

* रंस्यते इति रमधातोः स्यते विभक्तिः, पदमध्यगतत्वात् अदान्तत्वं, रम्-स्यते—रंस्यते। बृहिधातोः इदित्त्वेन (५६८) नुमि आगमः, अतएव अदान्तत्वं, बृन्-हितं—बृंहितं, नो अम् (२१) अनेन एव अमत्वम्। अदान्ते इति किं—राजन् [illegible]। झसीति किं—मन्यते, रम्यते। पाणिनिः ८।३।२४।

† अदान्ते स्थितस्य अनुस्वारस्य अपेवर्गे परे तद्वर्गीयपञ्चमः स्यात्। अत्र पूर्व्वतोऽनु-वर्त्तमानत्वादपि नोः पुनर्ग्रहणं सानुनासिकानुस्वारात्मग्रहणेन, अन्यथा विसर्जनीयस्थानीयानुस्वारस्यापि अवयवे (८२७) अप्राप्तसिद्धिः स्यात्। शाम्-तः—(५०, ५१) शान्तः, पङ्क्-तिः—(५०, ५१) पङ्क्तिः। शमधातोः क्तप्रत्ययेन क्तः। पाणिनिः ८।४।५८।

स्यात् । * यँवोऽनुनासिकाः । † यँय्यम्यते यंयम्यते ‡, हरि-भ्याञ्ज हरिंभज । कम्यते § इति पूर्व्वेण नित्यम् । परे किं—रंरम्यते ।

५३ । दान्ते मोऽसम्राजो हसे तुः ।

(दान्ते ७।, मः ६।, असम्राजः ६।, हसे ७।, तुः १।) ।

दान्ते स्थितस्य मस्य हसे परे तुः स्यात्, न तु सम्राजः । मिमंस्तीति । असम्राजः किं—सम्राडिति । ¶

५४ । पुंसः सन् खय्यम्परेऽख्ये ।

(पुंसः ६।, सन् ।१।, खयि ७।, अम्परे ७।, अख्ये ७) ।

---

* पृथग्योगात् पदान्ते इति नानुवर्त्तते, तेन दान्ते पदान्ते वायं विधिः । तथाच, दान्ते पदान्ते वा स्थितस्य अनुस्वारस्य यवले परे यवला वा स्युः ; दान्ते स्थितस्य तु वर्गीयवर्णे परे तद्वर्गान्तो वा स्यादित्यर्थः । दान्ते यवले परे यथा—त्वंय्यक्ष त्वंयक्ष, संव्वृणोमि संवृणोमि, त्वंल्लुभः त्वंलुभः । पदान्ते यवले परे यथा—यंय्यम्यते यंयम्यते, वंव्वम्यते वंवम्यते, लंल्लभ्यते लंलभ्यते । रमधातोः रूपान्तरेव लमधातुसिद्धिः, रम्फात् लम्फवत् रलयोरभेदात् । पाणिनिः ८।४।५९ ।

† यवोऽनुनासिक इति—अत्र आयमाणो यत्र: अनुनासिकः अनुनासिकवानित्यर्थः, (४४०). अर्शआदित्वादच्प्रत्ययः । यवाऽनुनासिक इति तु लिपिकरप्रमादपाठः, तथात्वे हरिंभज इत्यत्रापि अनुनासिकपूर्व्वक-अभापत्तेः ।

‡ (८२०) सूत्रानुसारेण—यं-यम्यते = यंय्यम्यते (वा) यंयम्यते ।

§ कम्-यते (५०,५१) = कम्यते । एवं भवन्ती, भजन्ति इत्यादि । अत्र अनुस्वारस्य पदान्ते स्थितत्वात् पूर्व्वसूत्रेणैव नित्यमादेशः ।

¶ मिमम्-सीति । सम्-राज्-क्विप् = सम्राडिति, इतिशब्देन सम्राजशब्दो अभिधार्थे नत्वन्यैव वर्जनमिति बोध्यम् । यदिन्द्र—येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राडित्यमरोक्तेः । तेन सम् शोभनं राजते इति संराट अत्र इत्यत्र अनुस्वार एव ॥ पाणिनिः ८।३।२५ ।

पुंसो मस्य सन् स्यात्, अम्परे खपि परे, न तु खे । *
पुंस्कोकिलः । अम्परे किं—पुंक्षीरम् । अखे किं—
पुंख्यातः । †

५५ । नोऽप्रशामश्छते ।

(नः ६।, अप्रशामः ६।, छते ७) ।

दान्ते स्थितस्य नस्य सन् स्यात्, अम्परे छते परे, न तु प्रशामः । ‡ शार्ङ्गिंश्छिन्धि, चक्रिंस्त्राहि । अम्परे किं—सन्त्सरुः । अप्रशामः किं—प्रशान्तनोति । §

५६ । कांस्कान् नॄंः पि वा ।

(कांस्कान् ।१।, नॄंः ।१।, पि ७, वा ।१।) ।

कांस्कान् कान्कान्, नॄंःपाहि नॄन्पाहि । ¶

---

* अम् परो यस्मात् सोऽम्परस्तस्मिन्, खपीत्यस्य विशेषणम् । पूर्व्वस्मात् नकारः अनुवर्त्तते । सनो न इत्, तेन (१०) नस्यान्ते भवति; सकारे अकार उच्चारणार्थः । पाणिनिः ८।३।६, वार्त्तिकञ्च ।

† पुमांश्चासौ कोकिलश्चेति विग्रहे (१८१) पुम्-कोकिलः = (५०) पुंस्कोकिलः, पुस्-सकारस्यादिविधित्वात् (१५) तस्य विसर्गाभावः । एवं पुंस्कृतिः, पुंस्त्वं, पुंस्पुत्रः, पुंस्पालक-इत्यादि । पुंसः सकाशादीभूतं क्षीरम् = पुंक्षीरम् । पुंभिः ख्यातः = पुंख्यातः ।

‡ अम्परे, दान्ते, सन्, इत्येतेषाम् अनुवृत्तिः, सनो न इत् (१०) नस्यान्ते भवति; सकारे अकार उच्चारणार्थः । अत्र सन्धिजातितरनकारा ग्राह्याः, तेन किंनन इत्यादौ न स्यात् सन् । पाणिनिः ८।३।७ ।

§ शार्ङ्गिन्-छिन्धि = शार्ङ्गिन्-स-छिन्धि (५०,४६) शार्ङ्गिंश्छिन्धि । चक्रिन्-त्राहि = चक्रिन्-स-त्राहि (५०) = चक्रिंस्त्राहि । सरुः खड्गादिमुष्टौ त्सरुस्मरः । प्रशान्-तनोति (२०२)= प्रशान्तनोति ।

¶ कान् कान् इति पदद्वयस्य स्थाने कांस्कान् इति पदं निपात्यते वा, पकारे परे नु

५७। न ण टन ङः चकान् श शस् स शसि वा।

(न ण टन ङः ६।, चकन् ।१।, श शस् स शसि ७।, वा ।१।)।

दान्ते स्थितस्य नस्य चन् शे, णस्य टन् शसि, टनयोस्तन् से, ङस्य कन् शसि, स्यात्। * सञ्छम्भुः सञ्च्शम्भुः सञ्शम्भुः, सुगण्ट्षष्ठः सुगण्षष्ठः, षट्त्सन्तः षट्सन्तः, सन्त्सः सन्सः, प्राङ्क्षष्ठः प्राङ्षष्ठः। †

५८। चपोऽमे जब्। (चपः ६।, अमे ७।, जब् ।१।)।

दान्ते स्थितस्य चपस्य जब् स्यात् अमे परे। वागीशः, चिद्रूपः। ‡

५९। अमे अम् वा। (अमे ७।, अम् ।१।, वा ।१।)।

---

मुम् इति पदस्य स्थाने मुं: इति सानुस्वारविसर्गान्तं निपात्यते वा इत्यर्थः। कान्-कान् = कांस्कान्, (वा) कान्कान्। मुम्-पाहि = मुं:पाहि, (वा) मुम्पाहि। पाणिनिः ८।३।१०। १२।२५।२०।

* टश्च नश्च टनं, नश्च चश्च टनश्च चकेति तत्र। चकात् न् चकन्, चन् प्रत्याहारः, तस्मात् चन् टन् तन् कन् इति चत्वारि। दान्ते इत्यनुवर्तते। वा-ग्रहणं परस्य नित्यार्थम्। चकादीनां न् इत्, तेन चर्णं भवन्ति (१०)। पाणिनिः ८।३।२८-३१।

† सन्-शम्भुः (५०,५०,५१,६१), चयो द्वितीयाः शरि पौष्करसादेः इत्यनेन चकारस्य छत्वे — सञ्छम्भुः। (पाणिनिमते सञ्च्छम्भुरित्यपि पदं स्यात्)। (६१) पक्षे न चस्य छः, सञ्च्शम्भुः। चनः चकाभावपक्षे (५६) सञ्शम्भुः। सुगण्-षष्ठः = सुगण्ट्षष्ठः, (वा) सुगण्षष्ठः। षट्-सन्तः = षट्त्सन्तः, (वा) षट्सन्तः। सन्-सः = सन्त्सः, (वा) सन्सः। प्राङ्-षष्ठः = प्राङ्क्षष्ठः, (वा) प्राङ्षष्ठः।

‡ दान्ते इत्यनुवर्तते। चप्स्थाने जब् स्यात्, साम्यात् यथाक्रमं वा। वाक्-ईशः = वागीशः। चित्-रूपः = चिद्रूपः। पाणिनिः ८।२।३९।

दान्ते खितस्य चपस्य ङमि परे ङम् वा स्यात् । एतन्मुकुन्दः एतद्मुकुन्दः । *

## ६० । त्ये । (७)।

त्ये मे परे दान्ते खितस्य चपस्य ङम् स्यादित्यर्थम् । चिन्मयं, वाङ्मयम् । †

## ६१ । शहोश्चपात् वाभि छझभौ ।

(शहोः ६।, चपात् ५।, वा ।१।, अभि ७।, छ-झभौ १।।) ।

दान्ते खितात् चपात् परयोः श-हकारयोः अमेयामि परे छ-झभौ वा स्तः । ‡ तच्छिवः तच्शिवः, वाग्घरिः वाग्हरिः । अमि किं—वाक्श्च्योतति §

---

* चप इत्यनुवर्त्तते । एतत्-मुकुन्दः = एतन्मुकुन्दः, (वा) (५८) एतद्मुकुन्दः । पाणिनिः ८।४।४५ ।

† त्यः प्रत्ययः, त्ये अ च न क इत्येतेषामभावात् म इति । विकल्पप्रसक्तावपि स्यादस्य नित्यत्वम् । चित्-मयं = चिन्मयं—(४८६) चिदात्मकम् । वाक्-मयं = वाङ्मयं—वागात्मकमित्यर्थः । "तत् प्रकृतवचने" इति पाणिनिसूत्रेण (५।४।२१) स्वार्थे चिन्मयमिति सिद्धम् । "एकाचो नित्यम्" इति सिद्धान्तकौमुदीमतेन विकारावयवयोरर्थयोः मयट्प्रत्ययेन, "तत् प्रकृत्येव प्रस्तुतमिति" गोयीचन्द्रव्याख्यानेन च वाङ्मयमिति सिद्धम् । पाणिनिः ८।४।४५ सूत्रस्य वार्त्तिकम् ।

‡ अभोरिति स्थानिनिर्देशात् चपो निवृत्तिः, अतएव पुनश्चपो ग्रहणम् । दान्ते खितात् चपात् परस्य तालव्य-शकारस्य स्थाने छकारः स्यात्, एवं खान्त-चपात् हकारस्य झभ् स्यात्, अमन्तस्थाने परे । अत्र उच्चारणार्थं वाक्यं, तेन गात् परस्य घ, डात् परस्य ढ, दात् परस्य ध, बात् परस्य भ । पाणिनिः ८।४।६२,६३,५५, वार्त्तिकञ्च ।

§ तत्-शिवः (६१,४६) = तच्छिवः, वा (४६) = तच्शिवः । वाक्-हरिः (६१,५८) = वाग्घरिः, वा (५८) = वाग्हरिः । वाक्-श्च्योतति अत्र तालव्यशकारात् परस्थितचकारस्य अमन्तस्थाभावात् न अत्र छः ।

## ६२। स्वाद्ङ्णोऽचि द्विः।

(स्वात् ५।, ङणः १।, अचि ७।, द्विः १।)।

स्वात् परो दान्ते स्थितो ङणो द्विः स्यादचि परे। *

सुगण्णीशः, सन्नच्युतः, प्रत्यङ्ङात्मा। †

## ६३। छोऽचः। (छः १।, अचः ५।)।

अचः परश्छकारो द्विः स्यात्। ‡

## ६४। झप्‌झसोः खस्‌झबोश्चप्‌जबावन्ते च।

(झप्‌झसोः ६॥, खस्‌झबोः ७॥, चप्‌जबौ १॥, अन्ते ७।, च ।१।)।

झप्‌झसयोः स्थाने खस्‌झबयोः परयोः क्रमात् चप्‌जबौ स्तः, विरामे च। शिवच्छाया, षच्छा। §

इति हस्-सन्धिपादः।

সপ্তঃ অসি চপাদেশঃ ওবোদেশঃ অগো অণে ॥

---

* द्विरिति (४८५) सुजन्तमव्ययम्। अच (१८१) अचाची इति, (९९२) चिनगात् वे इति, (६१२) वम्‌वङ्न्तौ छिरित्वादिज्ञापकात् समासे ङणौ द्विर्न स्यादिति बोध्यं, तेन परमनः, सुगण्नः, त्रिकन्नः, बङ्न्नः, उषादिः, ब्रमादिः इत्यादयः सिद्धाः। वस्तुतस्तु ज्ञापकज्ञापित-विधेरनित्यत्वात् क्वचिदपि स्यादेव, यथा, "सलिलङ्घाजेः सर्वादिज्ञापितसमासन्तेः" इत्यमरः। स्वादिति किं, प्राङ्-आस्ते=प्राङास्ते। दान्ते स्थित इति किम्, धनितोभ्यादौ (६९६) (धातुसंख्या १९७) न स्यात्। पाणिनिः ८।३।३२।

† सुगण्-ईशः=सुगण्णीशः, सन्-अच्युतः=सन्नच्युतः, प्रत्यङ्-आत्मा=प्रत्यङ्ङात्मा।

‡ अत्र मा(ङ्), मा(ङ्)भिन्न दीर्घात् पदान्ताच्च विकल्पेनेति वक्तव्यम्। पाणिनिमते छन्दसि विभाषाद्यैः परोऽपि विकल्पेन, यथा, विकचगच्छं विकचगच्छमित्यादि। पाणिनिः ६।१।७३-७६।

§ अचः खचि चपादेशो जसो भवति अवचाचा। विरामे तौ तयोः अकारादिवर्णः समवोधितः॥ अष्टमाह—वर्गादिचतुष्टयस्य स्थाने तद्वर्गस्य प्रथमवर्णः स्यात् खसे परे,

### ४र्थ पादः—वि-सन्धिः।

## ६५। वेः सोऽघसन्ते छते।

(वेः ६।, सः १।, च घसन्ते ७।, छते ७।)।

वेः सकारः स्यात् च-घसन्ते छते परे। कृष्णश्चिन्त्यः, हरिष्टीकते, विष्णुस्त्राता। घसन्ते तु—कः त्सरुः। *

## ६६। से तु क-ख-प-फे वा।

(से ७।, तु ।१।, क ख प फे ७।, वा ।१।)।

वेः सकारो वा स्यात् क-ख-प-फेषु परेषु, से सति। भास्करः भाःकरः, भास्खरः भाःखरः, भास्पतिः भाःपतिः, भास्फेनः भाःफेनः। †

---

जये परे तु तवर्गस्य तृतीयवर्णः स्यात्, विरामे तु तद्वर्णद्वयं स्यात्। विरामः परवर्णाभावः। अवः स्थाने तु शब्दानुसारेण, यथा (२१२) इत्यवस्थारस्य दः। पाणिनिः ८।४।५३।५५-५६। "वावसाने" (८।४।५६) इति पाणिनिसूत्रेण विरामे परे विकल्पः।

---

* छत—छ ठ थ च ट त। त्सरु इति खड्गमुष्टिः। चघसन्त इति छते विशेषणम्। कृष्णः-चिन्त्यः (३६)—कृष्णश्चिन्त्यः। हरिः-टीकते (४०)—हरिष्टीकते—हरिर्गच्छतीत्यर्थः [टीकृ गत्यौ]। विष्णुः-त्राता—विष्णुस्त्राता। कः-त्सरुः—सकारस्य घकारात्मकत्वात् न वेः सः। पाणिनिः ८।३।३४-३५।

† तुकारात् परत्र सकारानुवृत्तिर्नास्ति। तथापि चघसन्त इति विशेषणानुवृत्तिः—तेन च भाःचाल इत्यादौ न स्यात्। [illegible]—तेन, काट काल कंश कुच कुटी (कुशा) [illegible] पाद पाठ पाशेषु—परेषु नित्यं स्यात्। [illegible], यथा [illegible] इत्यादि। भीःकार भीःकाल इत्यादिषु न स्यात्। [illegible] पतिः, [illegible] इति [illegible]। पाणिनिः ८।३।३६-३८ (विशेषतः ८।३।४१); एतु सूत्रेषु क्वचिन्नित्यम्, क्वचिद्विकल्पः।

## ६७। शसि शस्। (शसि ७, शस् ।१।)

वेः शस् वा स्यात् शसि परे। हरिश्शेते हरिःशेते, सन्तष्-षट् सन्तःषट्, शिवस्सेव्यः शिवःसेव्यः। *

## ६८। कख-पफयोर्मून्यौ।

(कख-पफयोः ७, मून्यौ १॥)।

वेर्मून्यौ क्रमात् वा स्यातां कख-पफयोः परयोः। †

हरि×काम्यः हरिःकाम्यः, मधे×खनिः मधेःखनिः, कृष्णᵐ-पाता कृष्णःपाता, भक्तिᵐफलति भक्तिःफलति।

## ६९। अतोऽद्वय्युः। (अतः ५।, अत्-हवि ७, उः १।)

अकारात् परस्य वेरुकारः स्यात् अकारे हवि च परे।

शिवोऽर्च्यः, शिवोवन्द्यः। ‡

## ७०। अ भो भगो अघोभ्योऽवे लुप्।

(अ भो भगो अघोभ्यः ५॥, अवे ७, लुप् ।१।)।

---

* श-ष-सेषु परेषु विसर्गस्य क्रमेण श-ष-सा वा स्युरित्यर्थः। पाणिनिः ८।३।३६।

† [illegible] तेन कःकरोति कःपाति इत्यादौ न मून्यौ। [illegible] परेऽपि न वा इति [illegible] (क्रमदीश्वरसूत्रं), तेन कःस्यात्। पाणिनिः ८।३।३७।

‡ [illegible] तेन रामोऽस्ति [illegible] शिवोऽर्च्य इत्यादौ, [illegible] पूर्वपूर्वं [illegible] विसर्गजातात् उकारात् [illegible] अकारस्य लकारः। शिवः-पूर्वः (६८,२१,१८)—शिवोऽर्च्यः। शिवः-वन्द्यः (६८,२१)—शिवोवन्द्यः। [illegible] इत्यादौ न स्यात्। पाणिनिः ६।१।११३-११४।

अवर्णात् भो भगो अघोश्च परस्य वेर्लुप् स्यात् अवे परे। [illegible] नमस्याः, भो हरे, भगो रक्ष, अघो व्रज। *

७१। य वाचि। (य ।१।, वा ।१।, अचि ७)।

अवर्णात् भो भगो अघोश्च परस्य वेर्यो वा स्यादचि परे। शिवयुपः शिवउपः, भोयच्युत भो अच्युत। †

७२। रिच्वोऽवे। (र ।१।, इचः ५।, अवे ७)।

इचः परस्य वे रेफः स्यादवे परे। हरिरयं, चतुर्भुजः। ‡

७३। रोऽचः। (रः ६।, अचः ५।)।

अचः परस्य रेफस्य वे रेफः स्यादवे परे। भ्रातरव, भ्रातर्गच्छ। §

---

* अत्र भोः-भगोः-अघोः-पदानि भवत्-भगवत्-अघवत्-शब्दानां सम्बोधनसाधितानि (२२६), सिद्धान्तकौमुदी-गोयीचन्द्रमते सान्ताव्ययानि च बोध्यानि। भोः-हरे—हे हरे, भगोः-रक्ष—भगवन् रक्ष, अघोः-व्रज—अघवन् (पापिन्) व्रज—पूजय। चकारात् अवे परे यथा—शिव [illegible]। पाणिनिः ८।३।१७,२२।

† भो अच्युत इत्यादौ (१५) सुपि न सन्धीति न सन्धिः। किञ्च गत्वा निर्दिष्टमनित्य-मिति न्यायात्, सैष दाशरथी रामः सैष राजा युधिष्ठिरः, सैष रथमारुह्य मथुरां याति माधवः इत्यादिसिद्धिः पादपूरणानुरोधात् (पा. ६।१।१३४)। पाणिनिः ८।३।१७,१८,२०।

‡ इचः इति अत्रार्थम्। सामान्यविधिरयम् [illegible] अपि भवति। हरिः-अयं—हरिरयं; चत्वारो भुजा यस्य स चतुः-भुजः—चतुर्भुजः। पाणिनिः ८।३।१४, ८।२।६६।

§ अचस्तु परस्य रेफजातविसर्गस्यावस्थानादेव सुतरामप्राप्तौ रुप्रसिद्ध्यर्थं पुनरस्यो-[illegible]। भ्रातर् (१०२)—भ्रातः-अव—भ्रातरव, एवं भ्रातः-गच्छ—भ्रातर्गच्छ। पाणिनिः ८।३।१५, ८।३।१४, ८।२।६६।

## ७४ । खपि वा । (खपि ७।, वा ।१।) ।

अचः परस्य रेफस्य वें रेफः स्याद्वा खपि परे । गौर्पतिः गौष्पतिः गौःपतिः । *

## ७५ । नाह्नो रकन्नौ । (न ।१।, अह्नः ६।, रकन्नौ ७।) ।

अह्नो रेफस्य वे रेफो न स्यात् रेफे कें न्नौ च परे । †

अहोरात्रः, अहस्करः, अहोभिः । ‡

## ७६ । हस्येतत्तदोऽनञकः सेर्लोपः ।

(हसि ७।, एतद्-तदः ५।, अनञकः ५।, सेः ६।, लोपः १।) ।

नञकवर्ज्जादेतदस्तदश्च परस्य सेर्वेर्लोपः स्यात् हसि परे । एष-

---

* पूर्व्वतः अचोऽनुवृत्तिः । अचूकवृत्तमत्या (६६) से तु कखपफे इत्यतः से इति चानुवर्त्तते । तेन अत्र गोः पतिरसौ इत्यादौ न स्यात् । एवं गिर् धुर् अहन् एषामेव विसर्गस्य प्रतिशब्दे परे एव प्राप्तो बाध्यं, तेन गौःपाठः चाग्नीःपतिरित्यादौ न स्यात् । क्वचित् प्रयोगानुसारात् नित्यमपि, तेन चतुर्थमिति (४५५) स्वयमुदाहरिष्यति । गोर् (१०२) गोः-पतिः = गौर्पतिः, (६६,१११) = गंष्पतिः, वा गोःपतिः । पाणिनिः ८।२।६९ - सूत्रे "अहरादीनां पत्यादिषु वा रेफः" इति वार्त्तिकम् । अत्र "गौर्पतिरित्यसाधु" इति क्रमदीश्वरः । सिद्धान्तकौमुद्याञ्च "पक्षे विसर्गोपध्मानीयौ" इत्युक्तत्वात् गोःपतिः गोꣻपतिः इत्येव पदद्वयं स्यात् । सुपद्मे तु गौष्पतिपदं दृश्यते । कालन्त्रे तु नास्ति । गौर्पतिर्धिषणो गुरुरित्यमरः ।

† अत्र रोः इति रात्रि-रूप-रथन्तर-शब्दानामेव, तेन अहा-रजनी, अहा-रवी इत्यादौ रेफः स्यात् । एवं सिंहपदेन प्रात्यलोपस्तेरपि ग्राह्यं, तेन दीर्घाहो निदाघ इत्यादौ (१४८) इत्यात् विलोपेऽपि रेफनिषेधः । अहर्पति तु तत्र रेफः स्यादेव, तेन सूर्यासर्वपतिरित्यादौ (१६८) अहर्पति रेफः स्यादिति । पाणिनिः ८।२।६९, वार्त्तिकञ्च ।

‡ अहन् (२९७) = अहर्, (१०२) अहः-रात्रः (६८,२१) = अहोरात्रः । अहः-करः (६६) = अहस्करः । अहः-भिः (६८,५२) = अहोभिः ।

ब्रह्म:, स-विष्णुः। अगजक: किम्—अजः शिवः, एषको रुद्रः। *

७७। ढ्रोढि र्घश्चानृः।

(ढ्रोः ६।, ढि ७।, घं: १।, च ।१।, (अनृ-ऋ)=अनृः ६।)। २. ९.६–

ढकारस्य ढकारे परे, रेफस्य रेफे परे, लोपः स्यात्, पूर्वस्य च ऋवर्जस्य घं:। रूढ़ः, हरीरम्यः। अनृः किं—वृढ़ः। †

इति वि-सन्धि-पादः।

इति सन्ध्यध्यायः।

---

* न विधेते गजको यत्र सोऽगजकस्तस्मात्। तदुपवाचक-स-शब्दस्य तद-धातु-निष्पन्नस्य एष-शब्दस्य च वारणाय एतत्पदोपन्यस्तम्। एषको रुद्र इति सूत्रनियमव्यतिक्रमोदाहरण-दर्शनात् एतत्सूत्रं तद् गजकोर्न क्रमः; तेन सको पूर्वः, असौ इहाति इत्यादिर्विसिद्धिः। पाणिनिः ६।१।१३२। लोपि सत्येव चेत् पादः पूर्यते, तदा अपि परे सन्धिर्भवति, ७१ सूत्रस्य टीका द्रष्टव्या।

† न ऋ अनृ तस्य अनृः। अत्र (इत्यत्र) लोपनिमित्तत्वाभावात् ऋद इत्यादौ ऋकारस्य दीर्घाभावेऽपि ढलोपः। यत्र तु लोपो न भवति तत्र दीर्घोऽपि न स्यात्, दीर्घविधे-र्लोपनिमित्तत्वात्। वह्-तः=ऊढः। हरि-रम्यः (७२)=हरिर्-रम्यः=हरीरम्यः। पाणिनिः ८।३।१३-१४, ६।३।१११।

# २यः । सुबन्ताध्यायः ।

## १म पादः—संज्ञा ।

७८ । स्वेः—सि औ जस्, अम् औ शस्, टा भ्याम् भिस्, ङे भ्याम् भ्यस्, ङसि भ्याम् भ्यस्, ङस् ओस् आम्, ङि ओस् सुप् ।

(स्वेः ५।, सि—सुप् ।१॥) ।

स्वादीन्येकविंशतिर्लेः पराणि प्रयुज्यन्ते । *

ज श ट ङ पाः सि-ङस्योरिकारश्चेतः । †

७९ । त्रिशः प्रौ द्वौ बौ घौ पौ षौ सत्रः ।

(त्रिशः ।१॥, प्रौ—सत्रः १॥) ।

स्वादीनि त्रीणि त्रीणि क्रमात् प्रौ द्वौ बौ घौ पौ षौ सौ-संज्ञानि स्युः । ‡

---

* सिप्रभृतयः एकविंशतिर्विभक्तयः लिङ्गात् (१४) रामादिप्रकृतिभ्यः परस्थिता एव प्रयुज्यन्ते । विभक्तीनां न तु पृथक् प्रयोगः, रामादिप्रकृतीनामपि केवलानां न प्रयोगः, नापदं शास्त्रे प्रयुञ्जीतेति न्यायात् । पाणिनिः ४।१।२ । सुस्थाने सिः, औट्स्थाने औ—इत्येव तत्रापभेदः ।

† विभक्तीनां ज श ट ङ पाः इतो भवन्ति, सि-ङस्योरिकारश्च इत् भवतीत्यर्थः ;—जसो ज इत्, शसः श इत्, टा इत्यस्य ट इत्, ङे ङसि ङस् ङि एषां ङ इत्, सुपः प इत्, सि ङसि एतयोः इकारश्च इत् भवतीति फलम् । पाणिनिमते सुप् प्रत्याहारः, अत्र तु न तथा । अतएव सुबन्तं पदं—स्याद्यन्तं पदम् ।

‡ सि, औ, जस्—प्रौ ; अम्, औ, शस्—द्वौ ; टा, भ्याम्, भिस्—बौ ; ङे, भ्याम्, भ्यस्—घौ ; ङसि, भ्याम्, भ्यस्—पौ ; ङस्, ओस्, आम्—षौ ; ङि,

## ८० । सम्बुद्धौ सिर्धिः ।

(सम्बुद्धौ ७।, सिः १।, धिः १।) ।

सम्बोधने विहितः सिः धि-संज्ञः स्यात् । *

## ८१ । स्यमौजस् घिः ।

(सि अम् औ जस् ।१।३।, घिः १।) ।

सि अम् औ जस्—एते घि-संज्ञाः स्युः । †

## ८२ । शिः क्लीवे । (शिः १।, क्लीवे ७।) ।

नपुंसके शिरेव घि-संज्ञः स्यात् । ‡

## ८३ । दान्तवत् सभि । (दान्तवत् ।१।, सभि ७।) ।

---

चोम्, सुप्—सी । प्रथमा द्वितीया तृतीया चतुर्थी पञ्चमी षष्ठी सप्तमीनाम् एकदेशं गृहीत्वा नद्यादित्वादीपि एताः संज्ञाः कृताः । (१२) सूत्रेण स्यादीनां त्रि(विभक्ति)संज्ञा कृता (पाणिनिः १।४।१०४) । (१३) सूत्रेण च प्रत्येकम् एकवचन-द्विवचन-बहुवचनेषु एताः प्रयुज्यन्ते इति बोध्यम् (पाणिनिः १।४।१०२) ।

* सम्बुद्धिः—सम्बोधनं, चेतनाचेतनयोरभिमुखीकृत्याभिधानं, तत्र विहितस्य सेः धि-संज्ञा इत्यर्थः । पाणिनिः २।३।४९ ।

† अत्र प्रथमो घिरिति कृते, सम्बोधने धिसंज्ञाविधानरूपविशेषविधिना प्राः (प्रथमायाः) घिसंज्ञारूपसामान्यविधिर्बाधितः स्यात्, तेन हे पत्यः (१९०) इति पदं न सिध्यति । औ इत्यस्य अमृजसोर्मध्ये पाठात् औकारस्यैव ग्रहणम्, अन्यथा अनुक्रमनिर्देशो व्यर्थः स्यात् । पाणिनौ सुट्-प्रत्याहारस्य 'सर्वनामस्थान'-संज्ञा कृता (१।१।४२) ; (१।४।७) सूत्रस्य घिसंज्ञायाः पर्यन्तु "नपुंसकी संज्ञौ प्रत्यौ यादिवर्णोपदौ तदन्तं प्रकृत्यर्थे घिसंज्ञं स्यात्" इति सिद्धान्तकौमुदी ।

‡ नपुंसके (१९२) जस्शसोः स्थाने जातः शिरेव घि-संज्ञः स्यात्, न तु शसादिरित्यर्थः ; तेन वारिणी इत्यादौ नलञ्जनेति (१९४) न दीर्घः । पाणिनिः १।१।४२ ।

सभयोः परयोर्दान्तवत् कार्य्यं स्यात्। *

८४। भौ खिश्वोर्हसझसोरन्ते च।

(भौ ७।, खिश्वोः ६॥, हसझसोः ७॥, अन्ते ७।, च ।१।)।

भौ परे यत् कार्य्यं वक्ष्यते तत्खेर्हसे धोर्झसे स्यात्, अन्ते च तयोः। †

८५। हसोऽन्तः फः। (हसः १।, अन्तः १।, फः १।)।

हसो विरामश्च फ-संज्ञः स्यात्। ‡

८६। सर्व्व विश्व उभ उभय भवत् त्वत् त्वेक सम सिम नेमाः, अन्यान्यतरेतर डतर डतमाः, त्यद् तद् यद् एतदिदमदः किम् युष्मद्

[illegible]

---

* सौ भे च परे वस्तुतोऽदान्तस्यापि दान्तवत् कार्य्यं स्यात्, यथा, (२१०) सुहिन्सु इत्यादौ दान्तवत्त्वात् मोर्नुरित्यनेन (५०) न मस्यानुस्वारः। एवं (२११) पुम्भ्यां पुंभ्यांकत्यादौ दान्तवत्त्वात् दान्ते म (५१) इत्यनेन मस्यानुस्वारे, वा स्वरयपे (५२) इत्यनेन अनुस्वारस्थाने मकारो वेति। अत्र सभौति स्यादेरेव, तेन विद्वांस इत्यादौ अदान्तत्वात् (५०) नस्यानुस्वारः, दम्भ इत्यादौ च नस्यानुस्वारः, अनुस्वारस्य च (५१) मकारः। अत्र दवत् सभौति गौणौ दान्तवदिति वचनेन, दान्तत्वेन विहितं यत् कार्य्यं तदेव स्यात् नतु विरामविहितमिति, तेन लिट्सु (१७५) इत्यादौ (६४) अप्झसोरित्यनेन विराममाश्रित्य न जप्। पाणिनिः १।४।१६ १७।

† यत् कार्य्यं भौ परे वक्ष्यते तत्—खिद्वस्य हसे परे, धातोर्झसे परे, एवम् उभयोरेव विरामे परे स्यात्। अत्र ङ स्यादेरेव, तेन दिग्भि अर्थ दिग्धमित्यादौ मधुगोत्यादिभिः (१५४-१५५) घकादिर्न स्यात्। पाणिनौ भि-संज्ञा न दृश्यते।

‡ (२०२) धोर्मो नः इत्यनेन नवयोः प्रथमपञ्चमत्वात् अत्र हसः स्यादेरेव, तेन इकः हरिरित्यादौ घो कः फे (१५५) इति सूत्रस्य कार्य्यं न स्यात्। विरामस्तु स्यादिभ्यादेरेव। अन्तो विरामः, परवर्णाभाव इति यावत्। पाणिनौ फ-संज्ञा न दृश्यते।

युष्मदः, पूर्व्व परावर दक्षिणोत्तरापराधरान्तर-स्वाः, ञिः।

(सर्व्व—नेमाः १॥, अन्य—डतमाः १॥, यद—युष्मदः १॥, पूर्व्व—स्वाः १॥, ञिः १।)।

ङभेदो गणभेदार्थः। एते पञ्चत्रिंशत् शब्दाः ञिसंज्ञाः स्युः। *

समोऽतुल्ये, व्यवस्थायां पूर्व्वाद्योऽन्तरोऽपुरि।
वहिर्योगोपसंव्याने, स्वस्त्वज्ञातिधनाभिधः॥ †

८७। न गौणाख्याचपोसासे।

(न ।१।, गौणाख्याचपोसासे ७।)।

गौणत्वे, संज्ञायां, चे, त्वाः से पसे च, ते ञिसंज्ञा न स्युः। ‡

---

* सर्व्वादिगणः—सर्व्व विश्व उभ उभय भवत् त्यत् त्व एक सम सिम नेम इति। अन्यादिगणः—अन्य अन्यतर इतर डतर डतम इति। यदादिगणः—यद तद अद एतद इदम् अदस् किम् द्वि अस्मद् युष्मद इति। पूर्व्वादिगणः—पूर्व्व पर अवर दक्षिण उत्तर अपर अधर अन्तर स्व इति। एषां (१६५,१११,११४ सूत्रेषु) विशिष्टकार्य्यार्थं गणभेदः। सर्व्वेषां बुद्धिस्थानां नाम=सर्व्वनाम, तदेवदन्तत्वात् सिद्धं स्यादिः। विश्वशब्दः सर्व्वार्थः। उभशब्दो द्विवचनान्तः। उभयशब्दस्य द्विवचनं नास्तीति कैयटः, अस्तीति हरदत्तः। भवत्शब्दो युष्मदर्थः। त्यत् त्व इति द्वौ अन्यार्थौ। एकशब्दो यदा संख्यावाची तदा एकवचनान्त एव, यदा मुख्यादिवाची तदा द्विवचनबहुवचनान्तोऽपि। समः सिमः एतौ सर्व्वार्थौ। नेमः अर्द्धार्थः; नेम अर्द्धे इति सिद्धान्तकौमुदी। डतर-डतमौ प्रत्ययौ (५१०), तेन तदन्तानां कतरकतमादीनां ग्रहणम्। डतरान्तत्वेऽपि अन्यतरग्रहणम् अन्यतमस्य ञिसंज्ञानिषेधार्थम्। त्यदशब्दस्तदर्थः। पाणिनिः १।१।२७।

† अत्र समशब्दः अतुल्येऽर्थे ञिसंज्ञः, समः सर्व्वसमानयोरिति मेदिनी। पूर्व्वादयः व्यवस्थायां ञिसंज्ञः, व्यवस्था अवधिना दिग्देशकालाद्यभिधा। अन्तरः अपुरि पुर्भिन्ने, वहिर्योगे वहिःस्थितपदार्थे वाच्ये, उपसंव्याने परिधानवस्त्रे वाच्ये च ञिसंज्ञः। स्वशब्दस्तु अज्ञातिधनाभिधः—ज्ञातिश्च धनञ्च ज्ञातिधने, ते अभिदधाति कथयतीति ज्ञातिधनाभिधः, न ज्ञातिधनाभिधोऽज्ञातिधनाभिधः ञिसंज्ञः, ज्ञातिधनभिन्ने आत्मनि आत्मीये च वाच्ये ञिसंज्ञः स्यादित्यर्थः। स्वौ ज्ञातात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने इत्यमरः। पाणिनिः १।१।३४-३५, वार्त्तिकञ्च।

‡ गौणत्वमप्राधान्यं, तस्य भावो गौणत्वम्। चः द्वन्द्वः। पः समासः। अत्र भवतु सर्व्वो

## ८८। चे जसि वा । (चे ७, जसि ७, वा ।।१।)।

चे ते त्रिसंज्ञा वा स्युर्जसि परे । *

## ८९। पूर्व्वाद्यल्प प्रथम चरम तयायार्द्ध कतिपय नेमाः । (१॥)।

एते सप्तदश शब्दाः त्रिसंज्ञा वा स्युः जसि परे । †

## ९०। तीयोङिति । (तीयः १।, ङिति ७)।

तीयान्तः शब्दः त्रिसंज्ञः स्याद्वा ङिति परे । ‡

## ९१। पूर्व्वोऽन्त्यादुङ् । (पूर्व्वः १।, अन्त्यात् ५।, उङ् ।१।)।

अन्त्यात् वर्णात् पूर्व्वो वर्ण उङ्संज्ञः स्यात् । §

---

यथाः सासौ चोसासौ ; गौश्चश्च चाश्वश्च च यस्य तौसासौ चेति तस्मिन् । अप्राधान्ये, आख्यायां, द्वन्द्वसमासे, तृतीयासमासे, तृतीयासमासयोग्यवाक्ये च, ते सर्व्वादयः त्रिसंज्ञाः न स्युरित्यर्थः । पाणिनिः १।१।२९-३१,३४ ।

* चे द्वन्द्वसमासे । ते सर्व्वादयः (४२२)। पाणिनिः १।१।३१,३२ ।

† पूर्व्वादयो नव, अल्प प्रथम चरम तय अय अर्द्ध कतिपय नेम इत्यष्टौ च त्रिसंज्ञाः वा स्युः जसि परे । तयायौ प्रत्ययौ (४६०,४६१), तेन द्वितय त्रितय द्वय,त्रय इत्यादि । पाणिनिः १।१।३३-३४ ।

‡ तीयः प्रत्ययः (४५७), तेन द्वितीय-तृतीयौ ग्राह्यौ । तीय इति तन्नामप्रत्ययान्तस्य ग्रहणं, नतु (४८७) जातीयप्रत्ययान्तानामपि । तीयान्तस्य अल्पादौ गणाच्च तीयत्वे न वोक्तमेवेति (८७) निषेधः, तेन पतिद्वितीयाय, अन्यस्याः इत्येव स्यात्, एवमेव जौमराः । पाणिनिः १।१।३६ सूत्रस्य वार्त्तिकम् ।

§ अन्ते भवः अन्त्यः (४२४)। निमित्तविधित्वात् अस्य नित्यत्वम् । पाणिनिः १।१।६५ । तन्मते उङ्—उपधा ।

९२। अन्त्याजादिष्टिः। (अन्त्याजादिः १।, टिः १।)।

अन्त्यो योऽच् तदादिवर्णष्टि-संज्ञः स्यात्। *

९३। लुकि न तत्। (लुकि ७।, न ।१।, तत् ७।)।

लुक् इति लोपे सति यो लुप्तस्तस्मिन् परे यत् कार्यं तन्न स्यात्। †

९४। स्वरादि-नि-चित्तं व्यम्।

(स्वरादि-नि-चित्तं १।, व्यम् १।)।

स्वरादिर्गणो-नि-चकारेतश्चाव्य-संज्ञाः स्युः। ‡

---

* अन्त्यश्चासौ अच्चेति अन्त्याच्, अन्त्याच् आदिश्च सुपत्वात् पुंस्त्वम्। आदिशब्देन अवयवया अन्त्याजादिर्बोध्यः। तेन अजन्तशब्दानाम् अन्त्याच् टिसंज्ञः, हलन्तानान्तु अन्त्याजादि-वर्णष्टिसंज्ञः स्यादित्यर्थः। अतो तदादिवर्णं इत्यत्र वकारः लिपिकरप्रमादपतितः। [अयमर्थो चि टीकाकृद्भिरुक्तावितः; बोपदेवस्तु पाणिनिमनुससार।] पाणिनिः "अचोऽन्त्यादि टि" १।१।६४।

† लुचयतोः क्विपि लुक्। एतस्य लुप्करणेन इष्टसिद्धिर्न भवति, यतः पयः इत्यत्र (२६८) असोर्लुगिति ईर्लुपि, (१५) आदिविधित्वात् तत्र विसर्गानुपपत्तिः, आदिभिन्नत्वात् (१८५) अत्सोरिति अकारदीर्घापत्तिश्च स्यात्। पाणिनिः १।१।६३।

‡ स्वरादिर्यथा—स्वर्, अन्तर्, प्रातर्, पुनर्, उच्चैस्, नीचैस्, शनैस्, विना, ऋते, युगपत्, अर्वाक्, आरात्, अस्तम्, पृथक्, ह्यस्, श्वस्, दिवा, नक्तम्, सायम्, चिरम्, चिरेण, चिराय, चिरात्, चिरस्य, चिरे, मनाक्, ईषत्, जोषम्, तूष्णीम्, बहिस्, समया, निकषा, अन्तरा, अन्तरेण, सहसा, सपदि, स्वयम्, वृथा, मुधा, शनि, सार्धं, साक्षात्, सत्, तिरस्, आविस्, प्रादुस्, नाना, अम्, अलम्, अतम्, अति, उपांशु, दोषा, मृषा, क्षमा, मिथ्या, सम्यक्, मङ्क्षु, संवत्, पुरा, मिथो, मिथस्, प्रायस्, मुहुस्, अभीक्ष्णम्, चापलम्, सदा, झटिति, अकस्मात्, अग्रम्, साकम्, सार्धम्, समम्, सह, सना, कामम्, परम्, नमस्, धिक्, भूर्, भुवर्, स्वाहि, वरम् इत्यादि। आकृतिगणोऽयम्। निर्निपातः—(१६) आदिर्मयो निश्च, निरिति (१०) निसंज्ञा-पठितशब्दाः। चित्प्रत्ययाः (१०१२) चकारितः प्रत्ययाः—चि (१४९), चि (४९५), णुत् (४४०), अशात् (४९९), अमस् (४८२), अमोनस् (४८४), धस् (४८५), अतरां (४६५), अतमां (४६५), याच् (५२१), याच् (४५८), चाच् (५०१), णाच् (५००); शाच् (११६५), अतुम् (११६४), अवम् (११८२)—एते बोद्धव्या। स्वरादिपठितानां वाक्यत्वं, चादीनां वीतवत्त्वम्, अतः स्वरादि-चाद्योः पृथग्ग्रहणम् [२०सूत्रटीका द्रष्टव्या]। पाणिनिः १।१।३७।

९५। हसोऽनन्तरः स्फः।

(हसः १।, अनन्तरः १।, स्फः १।)।

अचामनन्तरिता हसः स्फ-संज्ञः स्यात्। *

९६। यूत् स्त्र्येव दी।

(यूत् ।१।, स्त्री ।१।, एव ।१।, दी ।१।)।

ईदूदन्तौ नित्यस्त्रीलिङ्गौ दी-संज्ञः स्यात्। †

९७। नास्त्रीयुवः। (न ।१।, अस्त्री ।१।, इयुवः ६।)।

इयुवस्थानावीदूतौ दीसंज्ञौ न स्तः, न तु स्त्री। ‡

९८। वामि। (वा ।१।, आमि ७।)।

इयुव ईदूत दीसंज्ञौ वा स्यादामि परे, न तु स्त्री। §

९९। स्त्री युश्च ङिति।

(स्त्री ।१।, युत् ।१।, च ।१।, ङिति ७।)।

---

* नास्ति अन्तरं व्यवधानं यस्य सः अनन्तरः। अचा अव्यवहितो हल्वर्णः स्फः (संयोग)संज्ञः स्यात्। पाणिनिः १।१।७।

† ईच ऊच यू, ताभ्यां त् यूत्। दी—नदी। स्त्री एवेति एवशब्देन नित्यस्त्रीलिङ्गो नियम्यते। यस्मिन्नर्थे यद्रूपेण स्त्रीलिङ्गशब्दः तस्मिन्नर्थे तद्रूपेण यदि लिङ्गान्तरं न भजति, तदा नित्यस्त्रीलिङ्गः। यथा, नदी गौरी, वधूः चमूः इत्यादि। पाणिनिः १।४।३।

‡ इयुवस्थानौ—इयुवप्राप्तियोग्यौ नित्यस्त्रीलिङ्गौ ईकारोकारान्तौ नदीसंज्ञौ न भवतः, स्त्रीशब्दस्तु नदीसंज्ञः। पाणिनिः १।४।४।

§ नित्यस्त्रीलिङ्गौ इयुवस्थानौ स्त्रीशब्दभिन्नौ ईदूदन्तौ दीसंज्ञौ वा स्याताम् आमि परे। पाणिनिः १।४।५।

स्त्रीलिङ्ग इदुदन्तौ नित्यस्त्रीलिङ्ग इयुव ईदूच दीसंज्ञः स्याद्वा ङिति परे, न तु स्त्री । *

१०० । अव्ययृताद्येप् पिः ।

(अव्ययृताद्येप् ।१।, पिः १।) ।

चिवर्ज-स्यादेरव्ययं तसंज्ञावृकारावीप् च एते पि-संज्ञाः स्युः । †

१०१ । सङ्ख्यावत् डत्यतुबहुगणा नेपि ।

(संख्यावत् ।१।, डति अतु बहु गणाः १।।, न ।१।, ईपि ७।) ।

डत्यतु बहु गणानां संख्यावत् कार्य्यं स्यात्, न त्वीपि । ‡

इति संज्ञापादः ।

---

* सामान्यस्त्रीलिङ्गौ इकारान्तोकारान्तशब्दौ, चकारात् नित्यस्त्रीलिङ्गौ इयुवस्थानौ स्त्रीशब्दभिन्नौ ईदूदन्तौ च दीसंज्ञौ वा स्यातां ङिति परे । पाणिनि: १।४।६ ।

† न चि: अचि: अचिरव्ययम्, अत्र अत अत्यौ, तत्र (५२७) तद्धितस्य अत्यौ तात्यौ, अव्ययं तात्यौ च ईप् च तेषां समाहार: अव्ययताद्येप् । भिन्नविषयत्वादस्य निवृत्तम् । पाणिनि: १।४।१८ । तस्मिन् पूर्वस्य भ-संज्ञा ।

‡ डति अतु प्रत्ययौ । तेन तदन्तानां—(५०८)कति यति तति यावत् तावत् एतावत् कियत् इयत् शब्दानां, (४८३,४८४) बहु-गण-शब्दयोश्च संख्यावाचकशब्दवत् कार्य्यं स्यात्, न तु ईपि ङिपौ, अत ईप् वर्जनं तत्र न संख्यावद्भावः । पाणिनि: १।१।२३,२५ ।

राम-स् इति स्थिते *—

**१०२ । स्रोर्विः फे ।** (स्रोः ६॥, विः १।, फे ७।) ।

सकार-रेफयोर्विः स्यात् फे परे । † रामः ।

औ-जसोः सन्धिः । रामौ रामाः । ‡

**१०३ । स्वदीभ्यां ध्यमृशसादेर्लोपः ।**

(स्व-दीभ्यां ५॥, धि अम्-शसादेः ६।, लोपः १।) ।

स्वात् दीसंज्ञकाच्च परस्य धेरमृशसादेश्च लोपः स्यात् ।

हे राम, रामं रामौ । §

---

* रामशब्दात् (७८) स् इति स्थिते सम्प्रत्ययः ।

† दान्तादान्तसाधारणयोः सकार-रेफयोः विसर्गः स्यात्, स्वादौ च-हसि विरामे च परे [८५सूत्रटीका द्रष्टव्या] । दान्तस्य—विरामे रामः इत्यादि, हसि पयोभ्यामित्यादि । अदान्तस्य—हसि परे (५११) नीसः धूसः इत्यादि । पयस्सान् भास्वान् (४४२) इत्यादौ स्वादौच हस्परत्वा-भावात् (४११) अदान्तत्वाच्च न विसर्गः । पाणिनिः ८।३।१५, ८।२।६६ ।

‡ औ परे जसि परे च सन्धिर्भवतीत्यनेन प्रकरणान्तरेऽपि सूत्रानुवृत्तिर्भवतीति सूचितम् । राम-औ=(२३) रामौ । राम-जस् (७८)=राम-अस्=(२२,१०२) रामाः ।

§ अम् च शस् च अमृशसौ तयोरादिः, धिश्च अमृशसादिश्च समाहारे तस्य । अत्र दी-ग्रहणम् अमृशसोरादिलोपार्थमेव, हे सखि, हे वधु इत्यादौ (१५२) ह्रस्वे कृते ह्रस्वादेव धिलोप-सिद्धेः । अत्र धिग्रहतोर्लोप इति यत्र कृतं तत्, अजरं कुलमित्यत्र (१६६) सेरमि कृते तस्यापि अकारलोपार्थम् । हे सम्बोधने, राम-धि (८०,१०३) राम । राम-अम्=रामं 'अमि पूर्वः' इति पाणिनिः सूत्रम् । राम-औ (२१)=रामौ । पाणिनिः ६।१।६९,१०७ ।

१०४ । असनामि धंः । (अस्-नामि ७, धंः १)।

असि नामि च परे स्रस्य धंः स्यात् । *

१०५ । पुंसि तु अस् न ।

(पुंसि ७, तु ।१।, अस् ।१।, न ।१।)।

स्यात् परः अस् न स्यात् पुंलिङ्गे । रामान् । †

१०६ । टा भिस् ङे ङसि ङसोसा-मिनैस-यात् स्य योसो ऽतः ।

(टा—ओसाम् ६॥, इन—योसः १॥, अतः ५।)।

अकारात् परेषामेषां स्थाने एते क्रमात् स्युः । ‡

---

* नामीति नुमुत्पन्ननकारेण सहितो ऽपि, तेन अग्निनामित्यादौ न प्रसङ्गः । नामो ऽपि षष्ठ्येवेष्टसिद्धौ नामीति करणम् आगमादिसंयोगमध्ये बलीयानागमो विधिरिति (स्वपक्षे) ज्ञापनार्थम्, तेन क्रोष्टूनामित्यत्र नादौ (११०) नुमि (१४०) तृजादेशो न स्यात्, एवं प्रकृते रामान् इत्यादौ दीर्घस्य ध्वनिवशेन प्रकृतपरत्वात् यथा असो नकारविधानं तथा (११०) नुमागमो न स्यादिति सूचनार्थञ्च । पाणिनिः ६।१।१०२, ६।४।३ ।

† पुंग्रहणं पुंलिङ्गस्य प्रकृत्यानुवर्त्तितनिवारणार्थम् । पुंस्त्वमिह अभिधानादिनिरूपितविशेषपर्यवसन्नं, न तु स्तनादिमत्त्वं, दारादि-कलत्रादिष्वभावात् ; तथा च भाष्यः—शब्दसंस्कारसिद्धार्थमुपायाः परिकल्पिताः, सर्वत्र तुल्यतया वर्णाः शास्त्रे पुंस्त्वादयस्त्रयः । ये तु योन्यादिलक्षणाः प्राणिजातीयगोचराः, न तेऽभ्युपायाः सिध्यन्ति कलत्रादि-तटादिषु इति । स्यादिति (१०४) सूत्रस्थमत्र विभक्तिविपरिणामेन, (१०१) सूत्रात्, अनुवर्त्तते । राम-अस्—(१०४,१०५) रामान् । पाणिनिः ६।१।१०३ । एतच्चापि पूर्वसवर्णदीर्घात् असो नः, यथा रामान् ।

‡ अकारात् परेषां टा, भिस्, ङे, ङसि, ङस्, ओस्, एषां स्थाने क्रमेण—
इन, ऐस्, य, यात्, स्य, योस्, एते भवन्ति ।

ङस् यात् न क्रमात् ऐस् यात् इत्यत्र निर्ज्ञरत्वेः निर्देशात् (११४) सिद्धार्थम् । पाणिनिः ७।१।९,१२,१३ ; ७।३।१०२ ।

## १०७ । षृ्र्णोऽदान्ते नोऽवकुपन्तरेऽप्यतङ्घान्त-पञ्चायुवाङ्कः ससेप्स्यादे नैकाच्कोस्तु वा । *

(षृ्ः ५।, णः १।, अदान्ते ७।, नः ६।, अवकुपन्तरे ७।, अपि ।१।, अतद्घात् ५।, तु ।१।, अपञ्चयुवाङ्कः ६।, ससेप्स्यादेः ६।, नैकाच्कोः ६।, तु ।१।, वा ।१।) ।

षकारात् रेफात् ऋवर्णाच्च परस्य अदान्ते स्थितस्य नस्य णः स्यात्, अच्-कवर्ग-पवर्ग-व्यवधानेऽपि । †

यत्र द्वे न-स्ततोऽन्यत्र गतास्तु निमित्तात् परस्य, साहिहि-तेनेपा स्यादिना च सहितस्य, पञ्चादिवर्जितस्य, स्यात्, तस्यैवे-काचः सकवर्गाद्यान्यस्य, वा स्यात् । रामेण । ‡

---

* ष च र च ऋश्च तस्मात् षृ्ः । अच्च कुश्च पुश्च तैरन्तरं व्यवधानं तस्मिन् । तच्च तत् द्वयेति तद्घं, न तद्घम्—अतद्घं तस्मात्, अतद्घपदेनात्र समस्यया अतद्घस्थिताः षकाररेफऋवर्णा-उच्यन्ते, अतएवाह यत्र द्वे नस्ततोऽन्यत्र गतादिति । पञ्च च युवा च अहश्च पञ्चयुवाहानि, न विद्यन्ते पञ्चयुवाहानि यस्मिन् सः अपञ्चयुवाङ्कस्तस्य । ईप् च स्यादिश्च ईप्स्यादी, सात् ईप्स्यादी सेप्स्यादी, ताभ्यां सह वर्तते योऽसौ ससेप्स्यादिस्तस्य । एकः अच् यस्य स एकाच्, कुः कवर्गवान्, एकाच्च कुश्च एकाच्कु:—एकाच्कवर्गवच्छब्दसम्बन्धी, न एकाच्कुः नैकाच्कुस्तस्य ।

† अच् इह प्रथमवर्णान्तः । अपिशब्दादव्यवधानेऽपि, यथा पूष्णा चतुर्णां नृणां नृणा-मित्यादि ।

‡ नकारवच्छब्दपूर्ववर्तिपदस्थितात् षकार-रेफ-ऋवर्णात् परस्य, समासोत्तरविहितयो-रीप्स्याद्योरिकतरेण युक्तस्य, पञ्च युवन् अहन् सम्बन्धि नकारभिन्नस्य, नस्य णः स्यात्, तस्यैव—ताहशस्यैव नकारस्य, एकाच्छब्दसम्बन्धि-कवर्गयुक्तशब्दसम्बन्धि-भिन्नस्य णो वा स्यात् ; एतेन एकाच्सम्बन्धिनः सकवर्गसम्बन्धिनश्च नकारस्य नित्यं णः स्यात्, तद्भिन्नस्य वा स्यादित्यर्थः । स्यादिना सहितः—स्यादिजातः स्यादियुक्तो वा । पञ्चादिष्वप्यत्रापि निषेधः, एवम् अच्कुपन्तरे-ऽपीति उभयत्रापि बोध्यम् । एकाच्कोर्यथा, हयणी, रम्यणिना ; श्रीकामिणी, श्रीकामेण । एकाच्कुभिन्नस्य यथा, हरिभाविणी हरिभाविनी, श्रीभावेण श्रीभावेन ; हरिभाविणा, हरि-

भाविना। समासोत्तरविहितेऽपि पदत्वात् हरिभाविणी हरिभाविनी इत्यादौ न स्यात्। पक्षादिषु गुरुपक्षेन, चक्रयूना, दीर्घाह्ना इत्यादि। पाणिनिः ८।४।१,२,११-१२।

धातुना सह प्रादेः समासे नैवं व्यवस्था, धातुप्रकरणे (५४९), कृत्प्रकरणे च (९६८) नस्य पृथक् णत्वविधानात्। एवं—कुवौ पूर्व्वेण सम्बद्धौ तृव्वौ तु परगामिणौ। चत्वारोऽयोगवाहाख्या णत्वकर्म्मण्यणो मताः—इति नियमेन एषां व्यवधानेऽपि णत्वं स्यात्, यथा बृंहणम्, उर×कायेण, उर~पेण इत्यादि। कुर्व्वन्ति रञ्जयतीत्यादौ णत्वपरत्वात् (५०) नस्यानुस्वारे, पुनः (५१) अनुस्वारस्य ञकारे, सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न्यायात् णत्वं न स्यात्। किञ्च: तृषः समर्पः इत्यादौ तु नकारे परे अनुस्वाराभावात् पूर्व्वनकारस्य णत्वे, (४७) ष्टुभिरित्यनेन परनकारस्यापि णत्वं; किन्तु निर्भिन्नः प्रभिन्नः इत्यादौ अपूर्व्वपदस्थनिमित्तत्वात् सखेप्सादिभिन्नत्वेन णत्वं न स्यात्।

राम-टा=(१०६,२२,१०७) रामेण।

अथ णशब्दस्य व्यवस्थया, केषाञ्चित् णत्वविधिहेतौ सति असति वा नित्यं णत्वं स्यात् (१), केषाञ्चित् वा स्यात् (२), केषाञ्चित् णत्वविधिहेतावपि न स्यात् (३), तद्यथा—

(१) पूर्व्वपदस्थनिमित्तात् परस्य नो णः स्यात्, संज्ञायाम् अक्कुपन्तरेऽपि, यथा—शूर्पणखा, द्रुणसः, खरणसः, वार्ध्रीणसः, खरणादः, नारायणः, परायणं, पारायणम्, उत्तरायणं, रामायणं, चान्द्रायणम्, अग्रणीः, ग्रामणीः, अक्षौहिणी। संज्ञायां किं, शुष्कनसः, ताम्रनसः। अक्कुपन्तरे किं, त्रिलोचनः। पाणिनिः ८।४।३, वार्त्तिकञ्च।

रेफादियुक्त-वहनीय-वस्तुवाचक-शब्दात् वाहनशब्दस्य नित्यं णत्वं स्यात्, दर्भवाहणमित्यादि। अक्कुपन्तरे किं, राजवाहनम् [राजस्वामिकवाहनमित्यर्थः]। पाणिनिः ८।४।८।

त्रिचतुर्भ्यां वयसि हायनस्य। यथा, त्रिहायणः, चतुर्हायणः। वयसीति किं—त्रिहायना शाला, त्रैहायनं व्रतम्। वयः प्राणिधर्म्मः इति गोयीचन्द्रः।

प्रपूर्व्वापरअधरेभ्यः अह्नशब्दस्य नित्यं णत्वं स्यात्। प्राह्ण इत्यादि। निरह्नः दुरह्नः इत्यादौ तु न भवति। दीर्घाह्नी शरदित्यत्रापि न भवति। पाणिनिः ८।४।७।

प्र निर् दुर् परिभ्यो नसः। यथा, प्रणस इत्यादि। पाणिनिः ८।४।२८ "उपसर्गाद्बहुलम्"। "नसश्च" इति सुपद्मे। "प्रादौ नसः" इति संक्षिप्तसारे।

अग्रे कोटरा सिध्रका मिश्रका सारिका पुरगा शराम्र कार्ष्य पीयूक्षा खदिर प्र-निरन्तरिक्षु-प्लक्षेभ्यो वनस्य नस्य नित्यं णत्वं स्यात्। यथा—अग्रेवणं, कोटरावणमित्यादि। एभ्यः किं, इन्द्र-वनम्। पाणिनिः ८।४।४,५।

(२) द्व्यक्षरौषधिवाचकात् त्र्यक्षरौषधिवाचकाच्च परस्थितस्य वनस्य नस्य णत्वं वा स्यात्, अक्कुपन्तरेऽपि, न तु इरिकादेः परस्य। यथा, ब्रीहिवणं ब्रीहिवनं, मन्दारवणं मन्दारवनं,

## १०८ । अ आ ङि-मभवि ।

(अ ।१।, आ ।१।, ङि-मभवि ७।) ।

### अकार आकारः स्यात् ङेमँ-भ-वेषु परेषु । *

---

ब्रीहिवणं ब्रीहिवनं, दूर्व्वावणं दूर्व्वावनं, हरिद्रावणं हरिद्रावनमित्यादि । द्विबाचः किं, देवदारुवनम् । अव्क्षपूर्व्वेऽपीति किं, पर्व्वटीवनम् । इरिकादिभ्यः इरिकावनं, तिमिरवनम् इत्यादि । वृक्षौषधिभ्यां किं, विदारी[शालपर्णी]वनम् । पाणिनिः ८।४।६, वार्त्तिकद्वयञ्च ।

पूर्व्वपदस्थित-निमित्तात् पानशब्दस्य भावकरणयोः प्रयुक्तस्य णत्वं वा स्यात् । यथा— क्षीरपाणं क्षीरपानमित्यादि । पाणिनिः ८।४।१० ।

गिरिणदी स्वर्णदी चक्रणदी गिरिणितम्ब चक्रणितम्ब गिरिणख गिरिणद्ध तूर्य्यमाण माषोण आर्गयण प्रभृति शब्दानां णत्वं वा स्यात् । पक्षे गिरिनदीत्यादि । आकृतिगणोऽयम् । ८।४।१० सूत्रस्य वार्त्तिकम् ।

(२) त थ द ध प भ म युक्तस्य नस्य णत्वं न स्यात्, यथा, क्षुभ्नाति प्रश्नन शब्दः दध्नन्ति तृप्नोति नृत्यति इत्यादि । पाणिनिः ८।४।२८,३९ । "क्षुभ्नादिषु च"—क्षुभ्नादिराकृतिगणः ।

पूर्व्वपदान्तस्थषकारात् परपदस्थनकारस्य णत्वं न स्यात्, यथा, हविष्पानम्, आयुष्कामिन इत्यादि । पाणिनिः ८।४।३५ ।* षकारादिति किं, निर्णयः ।

भगिनी कामिनी भामिनी यामिनीनां णत्वं न स्यात् । एवं मृन्मयस्यापि ।

स्वभावतो मूर्द्धन्यणवन्तः शब्दाः—

बाणी तूणीर वेणी फणि मणि लवणं कोण कल्याण बाणाः
गोणी घोणी कणाणु गुण विपणि पणं स्थाणु पुण्यं विषाणम् ।
माणिक्यं शोण शाणौ गुण गण गणिका वेणु सिंहाण वीणाः
निर्व्वाणो निक्वणश्च क्षण किण वणिजः कङ्कणं पाणि तूणौ ॥
पिण्याकमपि चाणक्यमित्याद्याः स्युः स्वभावतः ।
"फाल्गुने गगने फेने णत्वमिच्छन्ति बर्ब्बराः ।"

इत्यत्र मेदिनीकारेण फाल्गुनशब्दो नान्तमध्ये पठितः । गगनशब्दस्य णत्वं प्रामादिकम् । फेन-शब्दस्य विकल्प-णत्वं भरतसम्मतम् ।

* अत्र मकार-भकारौ आदेशौ, स्वादावसम्भवात् । एवञ्च विभक्तेरादावयव-मकारे परे एवायं विधिः, तेन रामम् इत्यादौ न आकारः । अतएव च 'त्वां मां' इत्यादि-साधनाय ङेप्योर्मइति (२१६) मकारे कृतेऽपि, त्वमोष्माङ् (२१७) इति आकारविधानं कृतम् । अत्र मकारभकाराभ्यामकारः उच्चारणार्थः । पाणिनौ 'यञि' इति कथनात् प्रत्याहारसूत्रसन्निविष्ट-वर्णक्रमानुसारेण 'यमभि' इत्येव स्यात् । अत्र तु आदिमकारस्य आदिमकारवकारयोर्मध्यपाति कारणं सुधीभिर्विभावनीयम् । पाणिनिः ७।३।१०१,१०२ ।

रामाभ्यां रामैः, रामाय रामाभ्याम्। *

१०९। भ्ये सुप्येः। (भ्ये ७, सुपि ७, एः १)।

अकार एकारः स्यात् भ्ये स-भयोः परयोः। †

रामेभ्यः, रामात् रामाभ्यां रामेभ्यः, रामस्य रामयोः। ‡

११०। नुमामः स्वद्याप्सङ्ख्याभ्यः।

(नुम् ।१।, आमः ६।, स्वद्याप्-सङ्ख्यार्थः ५।)।

स्वात् या आपो रषनान्तसङ्ख्यायाश्च परस्यामः आदौ नुम् स्यात्। र्षं-णत्वे। § रामाणाम्। रामे रामयोः। ¶

१११। किलात् क्ततोऽसात् सः षोऽन्ते नुव्यन्तरेऽपि ग्रास-वस-घस-साढ़ाञ्च।

(कु-इलात् ५।, क्रतः ५।, असात् ।५।, सः ६।, षः १।, अदन्ते ७, नु-वि-अन्तरे ७।, अपि ।१।, ग्रास-वस-घस-साढ़ां ६॥, च ।१।)।

---

* राम-भ्याम् (१०८)=रामाभ्याम्। राम-भिस् (१०६,२१)=रामैः। राम-ङे (१०६,२२)=रामाय।

† अत्र अकार अनुवर्तते। अकारात् परयोर्भ्यादिषुप्सु... [illegible] ... सुभयोर्ग्रहणम्। पाणिनिः ७।३।१०३।

‡ राम-भ्यस् (१०९,१०२)=रामेभ्यः। राम-ङसि (१०६,२२)=रामात्। राम-ङस् (१०६)=रामस्य। राम-ओस् (१०६,१०२)=रामयोः।

§ र ष ऋ ऋ न ष र्ष, ... [illegible] ... पाणिनिः ७।१।५४-५५, ८।४।२७।

¶ राम-आम् (११०,१०,१०४,१०७)=रामाणाम्। राम-ङि [(७७) ... ] (२२)=रामे। राम-ओस् (१०६,१०२)=रामयोः।

कवर्गादिभ्यश्च परः अतः स्यादेर्दमध्यगः सकारः प्रत्ययादेश्च षः स्यात्, नु-वि-व्यवधानेऽपि। * एत्व-षत्वे। रामेषु। †

एवं मुकुन्दानन्दमोदविनोदादयः। ‡

---

* इण्कः प्रत्याहारः (२)। नुम् विसर्ग नुवौ, ताभ्यामन्तरं व्यवधानं तस्मिन्। नुरिह नुमयमादौ (१५२) इत्यादिना विहितो नुमेव, न त्वनुस्वारः; तेन हवींषि धनूंषि इत्यादौ षत्वं, न तु पुंसु इत्यादिषु। सर्पिःषु इत्यादौ धनतरङ्गस्यादादौ रङ्कौ विसर्गे (१८७) पश्चात् षत्वं न तु रेफात्, तथात्वे चक्षुःषु इत्यादौ षत्वापत्तिः। स्यादिति षत्वप्रत्ययः (४९९), यथा अग्निसात् सर्पिस्सादित्यादि। अत इति प्रत्ययादेशागमानामेकतमसम्बन्धी इत्यर्थः, तेन स्वाभाविकसकारवतां धातूनां सस्य षत्वं न स्यात्, यथा सिसीयते इत्यादि। शास-वस-घसाम् अविकृतधातूनां पृथगुपादानात् अकृतोऽपि सकारः किलात् परः षः स्यात्, यथा शिष्टः उषितः अक्षन्नित्यादि। सादस्तु सहधातोः (१०२८) विप्प्रत्ययेन निष्पन्नस्य डकारान्तस्य ग्रहणात् क्विबापेक्षा नास्ति, तेन तुराषाट् इत्यादौ षत्वं, नतु तुरासाहमित्यादिषु। अथ, सूत्रे पदान्ते इत्युक्ते दमध्यग इति व्याख्यानं, समासे दान्ते स्थितस्यापि क्वचित् दमध्यगत्वेन षत्वं स्यादिति सूचनार्थं, तेन गोषतिः निष्कुम इत्यादि सिद्धम्। इह उदाहरणानि यथा, अग्निषु वायुषु पितृषु रामेषु गोषु नौषु चक्षुष्षु धनुष्षु वार्षु वक्षु। कौ—वाक्षु प्राक्षु। पाणिनि: ८।३।५५-६०।

† एत्व-षत्वे इति (१०८,१११) सूत्रद्वय-प्रयोगप्रदर्शनार्थम्। राम-सुप् [(७८) प इत्], (१०८,१११)—रामेषु।

‡ विशिष्टविधानवर्जिभूताः अवन्तोऽकारान्तपुंलिङ्गशब्दाः एवं ज्ञेयाः।

एतत्सूत्रोक्तनियमातिरिक्त-षत्वविधानानि।—

अग्नेः स्तुतः, अङ्गुलेः सङ्गस्य, भीरोः स्थानस्य सस्य षः समासे। यथा, अग्निष्टुत्, अङ्गुलिषङ्गः, भीरुष्ठानम्। पाणिनि: ८।३।८०-८२।

दीर्घान्तादग्नेः सोमस्य सस्य षः समासे। यथा, अग्नीषोमौ। दीर्घान्तादिति किं, अग्निः सोमौ माणवकौ। पाणिनि: ८।३।८२ सूत्रस्य वार्त्तिकवचनम्।

ज्योतिरायुरग्निभ्यः स्तोमस्य समासे। यथा, ज्योतिष्टोमः, आयुष्टोमः, अग्निष्टोमः। पाणिनि: ८।३।८२-८३।

गवियुधिभ्यां स्थिरस्य समासे। यथा, गविष्ठिरः, युधिष्ठिरः। पाणिनि: ८।३।९५।

मातुः पितुश्च स्वसुः सः षः समासे, अलुक्समासे तु वा। यथा, मातृष्वसा, पितृष्वसा। अलुक्समासे तु—मातुःष्वसा मातुःस्वसा, पितुःष्वसा पितुःस्वसा। पाणिनि: ८।३।८४-८५।

नि-नदीभ्यां स्नातेः कौशले। यथा, निष्णः, निष्णातः, नदीष्णः। पाणिनि: ८।३।८९।

## ११२। ते जस् ङे ङसि ङीनां-मि स्मै स्मात् स्मिनोऽतः।

(ते: ५।, जस् ङे ङसि ङीनां ६।।, इ ङे आत् स्मिन: १।।, अत: ५।)।

---

प्रादग्रगे स्थस्य। यथा, प्रष्ठः। अग्रगे इति किं, प्रस्थे हिमवतः पुष्पे। पाणिनिः ८।३।९२।

वेः स्तृणातेर्वृक्षासनयोः। यथा, विष्टरः। वृक्षासनयोरिति किं, वाक्यस्य विस्तरः। पाणिनिः ८।३।९३।

विकुपरिशमिभ्यः स्थलस्य। यथा, विष्ठलं, कुष्ठलं, परिष्ठलं, शमिष्ठलम्। कपिष्ठलः (तन्नामा ऋषिः) निपात्यते। अन्यत्र तु कपिस्थलम् (वानरावासः)। पाणिनिः ८।३।९१।९६।

अम्ब गो भूमि द्वि त्रि कु शङ्कु मञ्जि पुञ्जि दिव्यग्नि बर्हिर्भ्यः स्थस्य। यथा, अम्बष्ठः, गोष्ठः, भूमिष्ठः, द्विष्ठः, त्रिष्ठः, कुष्ठः, शङ्कुष्ठः, मञ्जिष्ठः, पुञ्जिष्ठः, दिविष्ठः, अग्निष्ठः, बर्हिष्ठः। एभ्यः किं, भूस्थः। स्थस्य किं, गोस्थितिः। परमेष्ठी, सव्येष्ठा—निपात्यौ। पाणिनिः ८।३।९७।

ह्रस्वात् सः षः संज्ञायामेकारे अगात् वा। यथा, सुषेणः, हरिषेणः, वायुषेणः। नक्षत्रात्तु भरणिषेणः, भरणिसेनः; रोहिणिषेणः रोहिणिसेनः। ह्रस्वात् किं, विष्वक्सेनः। एकारे किं, निसोताः, हरिसक्थम्। संज्ञायां किं, पृथुसेनः। पाणिनिः ८।३।९९,१००।

सुविनिर्दुर्भ्यः समसूत्योः। यथा, सुषमं, विषमं, निःषमं, दुःषमं; सुषूतिः, विषूतिः, निःषूतिः, दुःषूतिः। पाणिनिः ८।३।८८।

निर्दुर्बहिराविःप्रादुश्चतुरां सः (अनु प्रत्ययस्य) षः कखपफेषु। यथा, निष्फलः, दुष्करः, बहिष्कारः, आविष्कारः, प्रादुष्कृतं, चतुष्पथमित्यादि। पाणिनिः ८।३।४१।

निसस्तपतावनभ्यावृत्तौ। यथा, निष्टपति स्वर्णं परीक्षकः। आवृत्तौ तु, निस्तपति स्वर्णं स्वर्णकारः, पुनः पुनरग्निं स्पर्शयतीत्यर्थः। पाणिनिः ८।३।१०२।

निःसुदुर्भ्यः साम-सेध-सन्धिनां षः। यथा, निःषामा, सुषामा, दुःषामा, निःषेधः, निःषन्धिः। एवं सुषु, दुषु इत्यादि। पाणिनिः ८।३।९८। "सुषामादिषु च।"

अवात्स्तम्भेराश्रयानिकटयोः। यथा, यष्टिमवष्टभ्य आस्ते, तामाश्रित्य तिष्ठतीत्यर्थः; अवष्टब्धा गौः, निकटे निबद्धा आस्ते इत्यर्थः। अन्यत्र प्रीतिमानवस्तब्धः। पाणिनिः ८।३।६८।

परिस्थितादिषु सः षः। यथा, परिस्थितः, सुस्थितः, दुःस्थितः, प्रसरः, [1]धूसरः [1]इत्यादि। "दुःस्थादिषु" इति क्रमदीश्वरः।

ससाधना मूर्धन्यषकारवन्तः शब्दाः—

मनूषिर्वा प्रदोषी इव इषम मृषाषाढ राषीष षट्
षोषोष क्षेम भीषा विषय विष विषाणानि कृषाक्ष पक्षी।
कषायं माष मेषामिष विष मक्षिका षेष पाषाण शोषित्-
शीर्षामर्षाश्रुषारीषर मरुष पुरीषाम्बरीषाः करीषम्॥

अकारान्तात् स्त्रेः परेषामेषां स्थाने एते क्रमात् स्युः। *
सर्व्वे सर्व्वस्मै सर्व्वस्मात् सर्व्वस्मिन्। †

**११३। आत् सुमामः।** (आत् ५।, सुम् १।१, आमः ६।)।

अवर्णान्तात् स्त्रेः परस्य आम आदौ सुम् स्यात्। एत्व-षत्वे। ‡
सर्व्वेषाम्। शेषं रामवत्। § एवं विश्वादयोऽकारान्ताः।
उभशब्दो द्वान्तः। उभौ उभौ उभाभ्याम् उभाभ्याम् उभाभ्याम्
उभयोः उभयोः। ¶

---

पीयूषं विप्रुषा प्रतीक अथकालीषत् प्रषत् कित्विषं
प्रत्यूषेषु अथा कषाय कलुषं यूषं भिषक् सर्षपौ।
पुंषं पुष्कर वाष्प अष घषिरं दुष्यं तुरुष्कौषधे
सुष्यं गोष्पदं पौरुषं पद्दषमित्येते तथा चापरे॥

* अकारान्त-सर्व्वनाम-शब्दात् परेषां जस् ङे ङसि ङि एषां स्थाने क्रमात्—
ई स्मै स्मात् स्मिन् एते स्युः।
अत्र, जस्ङितम् ई स्मै स्मात् स्मिन् इति कृते, अतिसर्व्वाय इत्यत्र सर्व्वनामत्वाभावात् यथा स्मै न स्यात्, तथा अतिसर्व्वस्य इत्यत्रापि ङसः स्थाने स्यादित्यस्य प्रसङ्गः स्यात्, टाभिस् (१०६) इत्यनेनापि न भवितुमर्हति, अनेनैव विशेषेण विधानात्। पाणिनिः ७।१।१४,१५,१७।

† सर्व्व-जस् (११२,२१)=सर्व्वे। सर्व्व-ङे=सर्व्वस्मै। सर्व्व-ङसि=सर्व्वस्मात्। सर्व्व-ङि=सर्व्वस्मिन्।

‡ स्त्रेरित्यनुवर्त्तते। आत् अवर्णात्, तेन सर्व्वासामित्यादि। सुम उमावितौ, उच्चारणार्थः, मित्त्वादादौ। आमः स्थाने सुम्विधानं विभक्तिसम्बन्धित्वार्थम्, अत-एव एत्व-षत्वे इति, एत्वञ्च षत्वञ्च स्तः। सुमः स्वादीयसकारत्वात् (१०९) अनेन सूत्रेण एकारः, पश्चात् (१११) षत्वं भविष्यतीत्यर्थः। स्वादिस्थाने सर्व्वनामवयवादौ तु यस्मिन् परे न एकारः, यथा परस्मादित्यादि। पाणिनिः ७।१।५२।

§ सर्व्व-आम् (११३,१७,१०९,१११)=सर्व्वेषाम्। शेषम् उक्तादन्यत् रामवत् साध्यमित्यर्थः, पुंनपुंसकयोः शेषमित्यमरः।

¶ उभशब्दो द्वान्त इति सुखार्थमिमावेवोक्तं, तेन अधिमत्वौ उभौ वेन स चाङ्गुभः इत्यादि।

जसि—नेमे नेमाः । * शेषं सर्व्ववत् ।

११४ । पूर्व्वादेः स्मात्-स्मिनौ वा ।

(पूर्व्वादेः ५।१, स्मात्-स्मिनौ १।२, वा ।१।) ।

तौ । पूर्व्वस्मात् पूर्व्वात्. पूर्व्वस्मिन् पूर्व्वे । † शेषं नेमवत् ।
एवं परादयः ।

समोऽन्तुत्वे इत्याद्युक्तेः—

नमः समस्मात् पूर्व्वस्मा अन्तरस्मा अमेधसाम् ।
सुमेधसामन्तरस्मै सतां स्वस्मै स्वयम्भुवे ॥ ‡

---

उभशब्दादवयवार्थेऽयट्प्रत्ययेन साधितात् उभयशब्दात् द्विवचनं न प्रयुज्यते इति सम्प्रदायः । एकत्वसङ्ख्यावाचकादेकशब्दात् एकवचनमेव ।

* नेम-अस् (८९,११२,२२)=नेमे, वा (२६,१०२) नेमाः ।

† तौ इति वृत्तिः । पूर्व्वविहितौ (११२) स्मात्-स्मिनौ पूर्व्वादेर्वा स्याताम् । अतएव ङसि-ङ्योः स्थाने, अतश्चेति वक्तव्यम् । पूर्व्वाद्यस्येति (८९) सूत्रेण जसि परे वा सिसंज्ञामकृत्वा, अत्र पूर्व्वादेरि-स्मात्-स्मिनौ वा इति यत्र कृतं तत्, पूर्व्वाशब्दात् अतः स्मानि (११९) तसि कृते, पुंवत् सेरिति (१२०) पुंवद्भावे, पूर्व्वतः, (वा सिसंज्ञायां ८९) पूर्व्वात: इति पदमसिद्धार्थम् । पूर्व्व-ङसि—पूर्व्वस्मात्, वा (१०६,२२) पूर्व्वात् । पूर्व्व-ङि—पूर्व्वस्मिन्, वा (२३) पूर्व्वे । पाणिनिः ७।१।१६ ।

‡ समोऽन्तुत्वे (८६) इत्यादिवृदाहरणान्याह नमः इति—स्वयम्भुवे ब्रह्मणे नमः, कीदृशाय, समस्मात् सकलात् पूर्व्वस्मै पूर्व्वकालीनाय पूर्व्वकालवर्त्तिने इत्यर्थः, अत्र समशब्दस्य अतुल्यार्थकेन पूर्व्वशब्दस्य च कालार्थतया व्यवस्थावाचित्वेन, सिसंज्ञा । पुनः कीदृशाय, अमेधसां निर्बुद्धीनाम् अन्तरस्मै बहिःस्थिताय, सुमेधसां सुबुद्धीनाम् अन्तरस्मै सदा संलग्नाय परिधान-वसनकल्पाय; सतां साधूनां स्वस्मै आत्मीयाय; अत्र अन्तरशब्दस्य बहिर्योगवाचित्वेन उपसंव्यानवाचित्वेन च सिसंज्ञा, स्वशब्दस्य च आत्मीयवाचित्वेन सिसंज्ञा ।

समायेषु परायैषां मुक्तयेऽर्थान्तराय च ।
यदुस्वाय नमः स्वाय मन्त्रैर्जुष्टाय शार्ङ्गिणे ॥ *
अतिसर्व्वाय सर्व्वाय साध्वन्यानां सखिद्विषे ।
कालावराय कालेन पूर्व्वाय जगतो नमः ॥ †

जसि—साध्वन्ये साध्वन्याः । जसि—अर्द्धे अर्द्धाः । शेषं रामवत् । एवं प्रथमादयः । द्वितीयस्मै द्वितीयाय, द्वितीयस्मात् द्वितीयात्, द्वितीयस्मिन् द्वितीये । एवं तृतीयः । निर्जरः । ‡

---

* प्रत्युदाहरणान्याह समायेति—शार्ङ्गिणे विष्णवे नमः । कीदृशाय, एषु जगत्सु समाय तुल्याय जगन्मयत्वादित्यर्थः, अत्र समशब्दस्य तुल्यार्थत्वेन न सिसंज्ञा । पुनः कीदृशाय, एषां जगतां मध्ये पराय श्रेष्ठाय नित्यत्वादित्यर्थः, अत्र परशब्दस्य व्यवस्थावाचित्वाभावात् न सिसंज्ञा । किमर्थं नम इत्याह—मुक्तये मोक्षाय, अर्थान्तराय प्रयोजनान्तराय धर्म्मार्थकामार्थमित्यर्थः, अत्र अन्तरशब्दस्य बहिर्योगादिभिन्नार्थत्वेन न सिसंज्ञा । पुनः कीदृशाय, यदुस्वाय यदूनां ज्ञातये, स्वाय धनाय यदूनामिति समस्तपदेन सम्बन्धः, समस्तस्यासमस्तेन नित्याकाङ्क्षेव सङ्गतिरिति न्यायात्, अत्र स्वशब्दस्य ज्ञातिधनवाचित्वात् न सिसंज्ञा । पुनः कीदृशाय, मन्त्रैः वेदैः जुष्टाय सेविताय इति पद्यपूरणार्थम् ।

† न गौणत्वेऽप्यस्य (८७) उदाहरणान्याह अतिसर्व्वायेति, सर्व्वाय शिवाय नमः, अत्र सर्व्वशब्दस्य "सर्व्वः शिवः स्थाणुरिति" सहस्रनाममध्ये पाठेन आख्या(संज्ञा)वाचित्वात् न सिसंज्ञा । कीदृशाय, अतिसर्व्वाय सर्व्वमतिक्रान्ताय, अत्र तत्पुरुषसमासे (२१६) गौणत्वात् न सिसंज्ञा । पुनः कीदृशाय, साध्वन्यानां सखिद्विषे, साधवश्च अन्ये च साध्वन्यास्तेषां, सखा च द्विट् च तस्मै, क्रमात् साधूनां सखे, असाधूनां द्विषे शत्रवे इत्यर्थः, अत्र साध्वन्यानामिति द्वन्द्वसमासस्थितत्वात् न सिसंज्ञा, समासान्तविधेरनित्यत्वात् सखिद्विषे इत्यत्र (२२१) टजादिविधिना न अप्रत्ययः । पुनः कीदृशाय, जगतः कालावराय कालेन कनिष्ठाय, अत्र कालावरायेति तृतीयातत्पुरुषसमासस्थितत्वात् न सिसंज्ञा । पुनः कीदृशाय, जगतः कालेन पूर्व्वाय, अत्र तृतीयातत्पुरुषसमासयोग्यवाक्यस्थितत्वात् न सिसंज्ञा ।

‡ साध्वन्यशब्दस्य जसि तु (८८) पूर्व्वादित्वेन विकल्पेन सिसंज्ञायां साध्वन्ये साध्वन्याः इति पदद्वयम् । अर्द्धे अर्द्धाः इति (८९) पूर्व्वाद्यन्तर्गतत्वेन जसि परे वा सिसंज्ञा । एवं प्रथमे प्रथमाः, चरमे चरमाः, द्वितये द्वितयाः, त्रितये त्रितयाः, अल्पे अल्पाः, अर्द्धे अर्द्धाः, कतिपये कतिपयाः, नेमे नेमाः । तयबन्तस्य तु द्वयेषामिति प्रयोगो दृश्यते, तत्

## ११५। जरस् जराचि तु।

(जरस् ।१।, जरा ।१।, अचि ७।, तु ।१।)।

जराशब्दो जरस् वा स्यादचि परे।

निर्जरसौ निर्जरसः, निर्जरसं निर्जरसौ निर्जरसः, निर्जरसा। केचिदादाविनातात्विच्छन्ति,—निर्जरसिन, निर्जरसः, निर्जरसे, निर्जरसः, निर्जरसादित्यादि। पक्षे ङसे च रामवत्। *

## ११६। पाद दन्त यूष निशा पृतना मासासन सानु नासिकोदक हृदयासृक् यकृत् शकृत् शीर्षं दोषः—पद्द् यूषन्निश् पृन्मासासन् स्नु नसुदन् हृदसन् यकन् शकन् शीर्षन् दोषणः शसादि-पौ।

(पाद—दोष: १॥, पद्—दोषण: १॥, शसादि पौ ७।)।

---

सत्ताकविप्रयोगत्वेन साध्यम्, इयमित्यन्मोति क्विपि इयेप्शब्देन वा। श्रीमपाद्तु उभय-शब्दमपि अयान्तं मत्वा उभये उभयाः इति वदन्ति। द्वितीय-के—(८०,११२) द्वितीयकौ, वा स्त्रियांसंज्ञायां (१०६,२२) द्वितीयाय इत्यादि ; तृतीयशब्दोऽप्येवम्। निर्जर-सि (१०२)—निर्जरः। निर्गता जरा यस्येति बहुव्रीहिसमासे ११० सूत्रेण ह्रस्वः।

* पुंलिङ्गे सूत्रकरणात् विकृतस्यापि जराशब्दस्य ग्रहणम्, एकदेशविकृतमनन्यवत् भवतीति न्यायात् ; तेन जरा जर इत्युभयस्यापि जरस् वा स्यादचि परे। प्रकरणवशात् अचीति स्यादेरेव, तेन निर्जरस्यार्थौ निर्जराणां इत्यादौ न प्रसङ्गः। अत्र तु-शब्दो व्यवस्थापकः, व्यवस्था च केचिदादाविनातामिच्छन्तीति। (१४पृष्ठे) बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बलीति न्यायादादौ जरसादेशे अत आदिलोपः अतो नकारश्च न स्यात्, एवं टा-ङे ङसीनाम् इनाद्यादेशा-ऽपि न स्युः। किञ्च सर्व्वावयवादेशेन ह्रस्वपरत्वाभावात् आमो नुमागमोऽपि न स्यात्, तेन निर्जरसामिति ; एवं पदां दतामित्यादयोऽपि। केचित् पण्डिताः (१४पृष्ठे) सावकाशनिरवकाशविधिभ्यः स्यादनवकाशौ निरवकाशक इति न्यायेन, जरसादेशकरणात् आदौ टा-ङस्योः स्थाने इनातौ इच्छन्ति, तन्मते (टा, १०६) निर्जरसिन, (ङसि, १०६) निर्जरसादिति। पक्षे—जरसादेशाभावपक्षे, ङसे परे—भ्याम् भिस् भ्यस् सुप्—एषु परेषु पैत्यर्थः। पाणिनिः ७।२।१०१।

षां स्थाने एते क्रमात् स्युर्वा शसादौ पौ च परे। *
दः पदा पद्भ्यामित्यादि। दतः दता दद्भ्यामित्यादि।

## ११७। सदानोऽल्लोपोऽम्वस्थात् पौ वा त्वीङ्योः।

(सदा ।१।, अनः ६।, अत्-लोपः १।, अ-म्व-स्थात् ५।, पौ ७।, वा ।१।, तु ।१।, ईङ्योः ७॥)।

अनोऽकारस्य नित्यं लोपः स्यात् पौ परे, ईङ्योस्तु वा, न तु मस्थात् वस्थाच्च परस्य। †

---

* एतेषां स्थाने एते आदेशाः क्रमात् भवन्ति, यथा—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| पाद | दन्त | यूष | निशा | पृतना | मास | आसन | सानु |
| पद् | दत् | यूषन् | निश् | पृत् | मास् | आसन् | स्नु |
| नासिका | उदक | हृदय | असृज् | यकृत् | शकृत् | शीर्ष | दोष् |
| नस् | उदन् | हृद् | असन् | यकन् | शकन् | शीर्षन् | दोषन् |

अत्र शसादिग्रहणेन पूर्वविभक्तेर्निरासात् क्लीबे औकारस्य पित्वेऽपि तत्र न स्यात्। अत्र आसनशब्दस्थाने आसन् इति पदं साधयता वोपदेवेन काशिकामतमेव प्रामाणिकत्वेन गृहीतम्; सिद्धान्तकौमुदीकारेण तु आस्यशब्दस्थाने आसन् इति वदता तन्मतं प्रामादिकमिति सिद्धान्तितम्। [अत्र हेतुर्मनोरमायां तत्त्वबोधिन्यां च प्रदर्शितः; यथा—"आस्नो वृकस्य वर्तिकाम्" इति "तया हव्या जुह्वान आसनि" इति च वेदमन्त्रे आस्नः=मुखात्, आसनि=मुखे इत्येवार्थः। अत्र एवं विचार्यम्—"आसनि किं लभे मधूनि" इति काशिकालिखितोदाहरणे 'आसनि' इत्यस्य 'मुखे' इत्येवार्थः सङ्गच्छते, न तु उपवेशनसाधने द्रव्यादौ। आस्यासन शब्दयोरेकधातूत्पन्नत्वात् 'आस्यते सम्यक् निक्षिप्यते अन्नमत्र' इति व्युत्पत्त्या अधिकरणे अनटि कृते आसनं मुखमित्यपि यौगिकोऽर्थः सम्भवति। अतः 'आस्य'शब्दात् आसन् इति करणात् वरम् 'आसन'शब्दात् आसन् इति करणम्, प्रथमोक्तस्य कष्टकल्पनत्वात्।] वाशब्दस्य व्यवस्थया क्वचिद्वा स्यात् (१), क्वचिन्नित्यं (२), क्वचिन्न स्यात् (३), प्रयोगत इति। यथा, (१) शसादौ विकल्पः स्वयमुदाहृतः, एवं सुदती सुदन्ती इत्यादौ च। (२) केशार्थे शीर्षण्यः, पूरयितव्यार्थे उदकुम्भ इत्यादि। (३) पादप्रक्षालनार्थे पाद्यमित्यादि। पाणिनिः ६।१।६३, वार्त्तिकञ्च; तत्र वार्त्तिके मांसस्थाने मांस् इत्यपि दृश्यते, यथा—मांस्पच्या उखाया इति।

† सदेति पूर्व-वाधिकारनिवृत्त्यर्थम्। अथवा सदेति सप्तम्यन्तं मुख्यत्वे गौणत्वे चेत्यर्थः, तेन पूजितपूष्णः पीतपूष्णः इत्यादि सिद्धम्। अत्र म्वस्थेति म्वः (मवान्तः) म्वयास्तौ स्थेति म्वस्थः, न म्वस्थः अम्वस्थत्वात्; मवसंयोगात् यथा—कर्मणः यज्वनः इत्यादि। ईङ्योरिति -साहचर्यात् ई इति विभक्तिसम्बन्धीयमेव ग्राह्यम्, तेन राज्ञी अहनी इत्यादि (२४१ सूत्रस्थ)

यूष्णः यूष्णा । *

## ११८। नो लुप् फेऽधौ ।

(नः ६।, लुप् ।१।, फे ७।, अधौ ७।)।

नस्य लुप् स्यात् अधौ फे परे । † यूषभ्यामित्यादि ।
ङौ—यूष्णि यूषणि यूषे । मासः मासा माभ्यामित्यादि । ‡
पक्षे धौ च रामवत् । पदादयः पृथक् शब्दा इत्येके । §

## ११९। सङ्ख्या-वि-सायाद्वाह्नोऽह्नन् ङौ ।

(सङ्ख्या-वि-सायात् ५।, वा ।१।, अह्नः ६।, अह्नन् ।१।, ङौ ७।)।

सङ्ख्या-वि-सायेभ्यः परस्याह्न इत्यस्य अह्नन् वा स्यात् ङौ । ¶

---

(पा० ७।१।१८ धौ=शी) । ईपि तु नित्यं, राज्ञी विदाषोर्व्यादि (२५२)। सार्वत्र धौर्य सार्वराज्ञम् एषाम् धनैनेव सिद्धौ (४२५) अनुपन् इति सूत्रमिदं नियमयति—तद्धितस्य धपि धे च न सर्वत्र धनोऽल्लोपः, तेन राजन्यः मूर्धन्य इत्यादि सिद्धम् । पाणिनिः ६।४।१३४,१३६,१३७ ।

* यूष-शस् (११६)=यूषन्-शस (११७,१००)=यूष्णः । एवं यूष-टा=यूष्णा ।

† नाम्नस्तस्य पदान्त-नकारस्य लुप् स्यात् आदौ-शसौ विरामे च, न तु धौ । विवर्जनादेव विभक्तिनकारस्य प्राप्तिः, तेन (हनधातोर्भ्यां द्विपि) अहन् इत्यादौ न प्रसङ्गः । (२०२) प्रत्याप् (२२५ सूत्रस्थो) भवान् इत्यादौ अनत्वात् न नस्य लोपः । धौ तु न स्यात्; यथा, हे राजन्; क्लीबे तु प्रकृत्सूत्रकरणात् (२४२) विकल्पः, यथा, हे ब्रह्म, हे ब्रह्मन् । पाणिनिः ८।२।७,८ ।

‡ यूष-ङि (११६,११७,१००)=यूष्णि, वा यूषणि, वा यूषे । मास-शस्=मासः । मास-टा=मासा । मास-भ्याम् (११६,१०२,७०)=माभ्यां ।

§ एके—केचित् पण्डिताः [वामनादयः] पदादयः पृथक् शब्दाः सन्तीति वदन्ति, [अपरावागपि पदादयः शब्दाः प्रयुज्यन्ते इति काशिका] । एतत् वोपदेवस्यापि मतम्, अतएव वाक्ये (२८१) आपदनात् च इत्र इति द्वितीयैकवचने व्यवहृताऽभवत् ।

¶ सङ्ख्यावाचकशब्द-विशब्द-सायशब्देभ्यः परस्य अह्न इत्यस्य अह्नन् वा स्यात् ङौ परे । द्वयोरह्नोर्भवः द्व्यह्नः, विगतम् अहः व्यह्नः, अह्नः सायः सायाह्नः (पञ्चदीर्घिकलादाः)। तदन्तोपात्त इति (२५१) सप्तमी, सर्वैकदेश इति (२५७) अकारादेशे एकवचनम् । पाणिनिः ६।३।११० ।

दध्नि दधनि दध्ने, अक्ष्णि अक्षणि अक्ष्णे, सायाह्नि सायाहनि सायाह्ने । *

विश्वपाः विश्वपौ विश्वपाः, विश्वपां विश्वपौ । †

१२० । धोराल्लोपोऽच्यघौ ।

(धोः ६।, आ-लोपः १।, अचि ७।, अघौ ७।) ।

धोराकारस्य लोपः स्यात् अघावचि परे ।

विश्वपः, विश्वपा विश्वपाभ्यामित्यादि । एवं शङ्खध्मादयः । ‡

धोः किं—हाहाः हाहा हाहाभ्यामित्यादि । §

शेषं विश्वपावत् ।

हरिः ।

१२१ । युह्वा-मौ यु । (युह्वाम् ५।।, औ ।१।, यू ७।।) ।

---

* दध्न्-ङि=दधन् इ (११७)—दध्नि, वा दधनि, वा दध्ने इत्यादि । इत्यदन्ताः ।

† विश्वं पाति रक्षति यः स विश्वपाः (क्विबन्तः) विष्णुः । विश्वपा-सि (१०२)=विश्वपाः; विश्वपा-औ (२६)=विश्वपौ । विश्वपा-जस् (१०२,२९)=विश्वपाः । विश्वपा-अम् (२९)= विश्वपाम् ।

‡ धात्ववयवीभूताकारस्य लोपः स्यात् विभिन्न-स्वादौ अचि परे । तद्धिताच्-प्रकारयोः परयोः यस्येति च (२५८) इत्यनेन आकारलोपस्यावश्यकत्वे धोराल्लोपः घौ इति यत्र कृतं तत् लोपायुः आयुः पायुरित्यादौ (४४०) आकारस्थित्यर्थम् । विश्वपा-शस् (१२०,१०२)=विश्वपः इत्यादि । शङ्खं धमतीति शङ्खध्माः (क्विबन्तः) । एवं पुरुषं तायते इति (४४२) पुरुषताः, धान्यपाः, सर्वंपाः इत्यादि । पाणिनिः ६।४।१४० ।

§ हा इति कुत्सितं शब्दं जहातीति औणादिक-डाप्रत्ययेन, उक्तेचीति (११०) आकार-लोपे हाहा इति आकारस्य धात्ववयवत्वाभावात् न आकारलोपः । क्विप्प्रत्यये तु धात्ववयवत्वेन आकारलोप एव—हाहः । हाहा गन्धर्वः । "धातोऽनाप इति वक्तव्यम्" इति (पा. ६।४।१४०-सू) वार्तिकम्—आबन्तभिन्नानामाकारलोप इत्यर्थः । अत्र "धातोः किं, हाहान्" इति सिद्धान्तकौमुदी । "हाहान् वा, हाहाः हाहः हाहान् वा" इति लोपश्च । "हाहः" इति

इकारोकाराभ्यां परः घौ क्रमादिकारोकारौ प्राप्नोति। हरी। *

१२२। गुर्घिजस्ङित्सु। (गुः १।, घि-जस्-ङित्सु ७॥)।

इदुतोर्गुः स्यात् घौ जसि ङिति च परे। हरयः। †

त्यलोपे त्यलक्षणं—हे हरे। हरिं हरी हरीन्। ‡

१२३। टाद्सख्यास्त्रियान्तु ना।

(टा ।१।, अदसः ६।, च ।१।, अस्त्रियां ७।, तु ।१।, ना ।१।)।

इदुद्ग्रामदसश्च परष्टा ना स्यात्, न तु स्त्रियाम्। §

---

क्रमदीश्वरः। "अव्युत्पन्नोऽपि मन्वर्थवाचको डाडाशब्दोऽस्ति, तस्य डाडान् डाडे इत्यादि भवति" इति गोयीचन्द्रः। इत्यादन्ताः।

* इश्च उश्च यू, पश्चात् तकारानुबन्धेन युती ताभ्यां। क्रमश्च इकारात् घौ इ, उकारात् घौ उ। हरि-घौ=(१२१,२२) हरी। पाणिनिः ६।१।१०२।

† घश्च, इदुभ्यां विहिते एव घौ परे बोध्यं, तेन ई नदि ई सुभ्रु इत्यादौ सुभ्रुहीति(१५९) इस्वे पश्चात् न गुणः। ङिति च साक्षात् परे बोध्यं, अन्यथा मत्यै इत्यत्र वा ङितामिति (१५६) आमि कृतेऽपि पूर्वेण गुणापत्तिः स्यात्। हरि-जस्=(१२२,२५) हरयः। पाणिनिः ,७।३।१०८,१०९,१११।

‡ प्रत्ययस्य लोपे सति प्रत्ययस्य लक्षणं चिह्नं लोप्यते इत्यर्थः, तेन केनापि शब्देन प्रत्ययलोपेऽपि तत्प्रत्ययसम्बन्धि कार्यं स्यादिति यावत्। (पाणिनिः १।१।६२)। यथा, राजा इत्यादौ (१४८) सिलोपेऽपि (१६१) दीर्घः। वाचामीशः वागीशः इत्यादौ (११९) विभक्तिलुकि विभक्त्यन्त-विहिता पदसंज्ञा सिद्धा। हे हरे इत्यत्र चादौ गुणे कृते, स्थानिवद्भावेनैव सिलोपे सिद्धे, लोपेऽपि लक्षणमिति न्यायस्वीकारः स्थानिवदादेश इति न्यायस्य व्यभिचारसूचनार्थः। हे—हरि-सि (८०,१०१,१२२)—हरे। हरि-अम् (१०२)—हरिम्। हरि-शस् (१०४,१०५)—हरीन्।

§ नात् स्थानिवदिति (२२५) उक्ते अदन्तत्वादेव ना-भावेऽपि सिद्धे अदसो ग्रहणं वैभक्तिक-कार्यकाधीनमत्वमेव उत्पत्तीति ज्ञापनार्थं, तेन अमुना इत्यादौ नादौ मे कृते (११२) पश्चादुत्वे (२२५) मत्वे च (१११) पदसिद्धिः। पाणिनिः ७।३।१२०। "मुने इति चिन्त्यमाना नाभावः" इति सिद्धान्तकौमुदी।

हरिणा हरिभ्यां हरिभिः, हरये हरिभ्यां हरिभ्यः। *

### १२४। ङसिङसोश्च।

(ङस ६।, एङः ५।, लोपः १।)।

एङः परस्य ङसिङसोरत्स्य लोपः स्यात्। †

हरेः हरिभ्यां हरिभ्यः। हरेः हर्योः हरीणाम्। ‡

### १२५। इदुद्भ्यां ङेरौः। (इदुद्भ्यां ५॥, ङेः ६।, औः १।)।

इदुद्भ्यां परस्य ङेरौः स्यात्, ङ इत्। §

### १२६। टेर्लोपो ङिति, विंशतेस्तेश्च ङौ।

(टेः ६।, लोपः १।, ङिति ७।, विंशतेः ६।, तेः ६।, च।१।, ङौ ७।)।

ङिति परे पूर्वस्य टेर्लोपः स्यात्, विंशतेस्तेश्च ङौ। ¶

---

* हरि-टा (१२३,१०७)=हरिणा। हरि-ङे (१२२,२५)=हरये।

† ङः परः अः ङः तस्य ङस्, स च ङसिङसोरेव सम्भवति, अत आह ङसिङसो-र्ङसेति। एङ इति प्रकृतेर्विकृतेरपि, तेन गोः द्योरित्यादि। पाणिनिः ६।१।११०।

‡ हरि-ङसि (१२२,१२४,१०२)=हरेः। एवं हरि-ङस्=हरेः। हरि-ओस् (२५)=हर्योः। हरि-आम् (११०,१०४,१०७)=हरीणाम्।

§ यद्यपि, इदुद्भ्यां ङेरौ इति इदुद्भ्यां सह ङेरौ-विधाने कृते परसूत्रे अच्ग्रहणमिति वक्तव्यं न स्यात्, तथापि औ-करणं परसूत्रे स्वाध्यायप्रकरणीय-ङिति परे एव विंशतेस्तेर्लोपार्थं, तेन विंशतिमाचष्टे विंशतयति इत्यत्र (८५५) णिप्रत्ययस्य (४६७) ङित्त्वेऽपि टेरेव लोपः न तु तेः। पाणिनिः ७।३।११८-११९। एतन्मते चौत्।

¶ ङिति परे तत्पूर्वशब्दस्य टेर्लोपः स्यात्, विंशतिशब्दस्य तु ति-भागस्य लोपः स्यात्, पञ्चमी ङित्सम्बन्धिनिमित्ते ङिति परे, ङित्सम्बन्धिङिति परे तु विंशतिशब्दस्य टेर्लोप एवेत्यर्थः। यथा, विंशतेः पूरणः इत्यर्थे विंशतिशब्दात् (४५०) डटि कृते ति-भागलोपे विंशः, ङौ तु विंशती। पाणिनिः ६।४।१४२-१४३।

हरौ हर्य्योः हरिषु । * एवं श्रीपत्यग्निरव्यादयः । †

## १२७ । सख्यृद्भ्यां सेर्डाऽघेः ।

(सख्यृद्भ्यां ५।२, सेः ६।१, डा ।१।, अघेः ६।१) ।

सखि-शब्दात् ऋकारान्ताच्च परस्य सेर्डा स्यान्न तु घेः । सखा । अघेः किं, हे सखे । ‡

## १२८ । घौ ञिः । (घौ ७।१, ञिः १।१) ।

सख्युर्ऋकारस्य च ञिः स्यात् अघौ घौ परे । § सखायौ सखायः, सखायं सखायौ सखीन् । ¶

## १२९ । सख्युष्टाङिता-माएउसुसौ ।

(सख्युः ५।१, टा-ङिताम् ६।३, आ ए उस् उस् औ ।१।३) ।

---

* हरि-ङि (१२५,१२६)—हरौ । हरि-सुप् (१११)—हरिषु ।

† श्रीपतिश्च अग्निश्च रविश्च ते आदयो येषां ते । आदिपदात् विधिर्गिरि-वायसीश-मुनिप्र-भृतयो ग्राह्याः एवमित्यर्थः ।

‡ सखा च ऋच्च ताभ्यां, सख्यृद्भ्याम् । सखि-सि—सखि-डा [ड-इत्] (१२६)—सखा । हे सखि-सि (घि)—(१०३,१२२) सखे । पाणिनौ सखिपतिशब्दयोरनयमप्रकारः सम्यक् निर्दिष्टः एव । ७।१।९२,९३, ७।३।११९, ६।१।६९, ७।३।११८ ।

§ घर्षबलात् विसर्गेर्दिपरित्याग इति व्याख्यात् सख्युर्ऋत पदं षष्ठ्यन्तं भूत्वा अघौरिति पृथक् सप्तम्यन्तं भूत्वा घौ इत्यनुवर्तते । सखिशब्दस्य ऋकारान्तशब्दस्य च अन्त्यस्य ञिः स्यात् अघौ घौ परे । पाणिनिः ७।१।९२, ७।२।११५ ।

¶ सखि-औ—सखै-औ (६५)—सखायौ । एवं जस् अम् औ परे । सखि-शस् (१०४,१०५)—सखीन् ।

सख्युः परेषां टाङितां स्थाने आ ए उस् उस् औ—एते क्रमात् स्युः। *

सख्या सख्ये सख्युः सख्युः सख्यौ। शेषं हरिवत्। †

१३०। पत्युरसे। (पत्युः ५।, असे ७।)।

पतिशब्दात् परेषां टाङितां स्थाने आ ए उस् उस् औ—एते क्रमात् स्युर्न तु से। पत्या पत्ये पत्युः पत्युः पत्यौ। असे किं, श्रीपतिना इत्यादि। शेषं हरिवत्। ‡

कतिशब्दो व्यास्तः। §

---

* आ ए उसुसौ इत्यत्र सूत्रत्वात् न सन्धिः। टा ङे ङसि ङस् ङि स्थाने क्रमेण आ ए उस् उस् औ भवन्ति।
टादिस्थाने आ-आदि-करणं (१२२) ना-आदिनिषेधार्थम्। किन्तु, क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति अथवा आतिदेशिकं कार्यमनित्यमिति न्यायात् "सखिना वानरेन्द्रेण" इत्यादि सिद्धम्। सख्युराख्यामिति, धी शिरिति, सख्युष्टामिताभिति—एतेषु सखिशब्दस्य मुख्यस्यैव ग्रहणमिति केषाञ्चिन्मतम्, तन्न साधु, गौणस्यापि ग्रहणमिति भाष्यकारोक्तेः, तन्मते जितसखा, जितसखायौ, जितसख्या इत्यादि, एवमतिशयितः सखा अतिसखा इत्यादि च। अतएव "परमः सखा यस्येति विग्रहे परमसखा, परमसखायौ इत्यादि। गौणत्वेऽप्यनङ्‌णित्वे प्रवर्तेते" इति भट्टोजिदीक्षितः। तत्त्वबोधिन्यां च—"एतेन संज्ञासूत्रे शोभनः सखा यस्य सुसखिरित्युदाहरन्तो हरदत्तन्यासकारौ तदनुगामिनश्चान्ये उपेक्ष्याः।" इति। (२५१ सूत्रटीका द्रष्टव्या)। किञ्च, पुंलिङ्गे एव ग्रहणं, स्त्रियान्तु नित्यस्त्रीत्वात् (२७४) सखी गौरीवत्, क्लीबे चास्य न प्रयोगः। पाणिनिः १।४।७, ७।१।९२, ७।१।११८।

† सखि-टा=सखि-आ (२५)=सख्या। एवं ङे ङसि ङस् ङि—योगेऽपि। शेषं सखिशब्दस्य।

‡ अत्रापि पूर्वसूत्रवत् क्रमान्वयः, न्यायस्त्रीकारश्च, तेन "पतिना नीयमानायाः" इति, "नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ" इति, "सीतायाः पतये नमः" इत्यादि च सिद्धं छान्दसमिति केचित्। पति-टा=पति-आ (२५)=पत्या। एवं ङे ङसि ङस् ङि परे। श्रीपति-टा (१२२)=श्रीपतिना, श्रियाः पतिः श्रीपतिरिति विग्रहः। शेषं पतिशब्दस्य। पाणिनिः १।४।८।

§ कतिशब्दः किंशब्दनिष्पन्नवाचकः [का संख्या येषां ते कति इति व्युत्पत्तिः]; अतएव अभिधेयवहुत्वात्तेन बहुवचनान्त एव भवति।

## १३१ । डतिसङ्ख्याभ्यो जस्शसोर्लुक् ।

(डति-सङ्ख्या-भ्यः ५।।, जस्-शसोः ६।।, लुक् ।१।) ।

डत्यन्तात् षान्त-नान्त-सङ्ख्यायाश्च परयोर्जस्शसोर्लुक् स्यात् ।*

कति कति कतिभिः कतिभ्यः कतिभ्यः कतीनां कतिषु ।

एवं यति तति ।

डति-ष्ण षान्तसङ्ख्यास्मद्-युष्मदः सदृशास्त्रिषु । †

पञ्चादयः सङ्ख्याशब्दाः ष्णान्ताः । ‡

## १३२ । त्रेस्त्रयङ् नामि । (त्रेः ६।, त्रयङ् ।१।, नामि ७।) ।

त्रिशब्दस्य त्रयङ् स्यात् नामि परे, ङित्त्वादन्त्यस्य स्थाने । §

---

* ष च न च षनौ, सङ्ख्या षान्ता च नान्ता चेति षन्सङ्ख्या, डतिश्च सङ्ख्या चेति तस्मात् । डतिः प्रत्ययः, तेन डत्यन्ताः कति-यति-तति इति त्रयः । एषां मुख्यानामेव ग्रहणं, तेन प्रियकतयः अतिषषः अतिपञ्चानः इत्यादौ न लुक् । लुक्करणात् कति इत्यादौ (१२२) ङर्यौत्यादिना न गुणः, पञ्च इत्यादौ नान्तत्वात् (१६४) न दीर्घः, (२३) लुकि न तदेति निषेधात् । पाणिनिः १।१।२४-२५, ७।१।२२ ।

† ष च न च षनौ, षनौ अन्तौ यस्याः सा ष्णान्ता, ष्णान्ता चासौ सङ्ख्या चेति ष्णान्तसङ्ख्या, डतिश्च ष्णश्च ष्णान्तसङ्ख्या च अस्मच्च युष्मच्च ते । डतिप्रत्ययान्त-अव्यय-सङ्ख्यावाचक-ष्णान्तास्मद्-युष्मद्-शब्दाः त्रिषु लिङ्गेषु सदृशास्तुल्या एव भवन्ति इति नियमात् एषां लिङ्गविहित-विशेषकार्यं न भवतीत्यर्थः । एषां मुख्यानामेव ग्रहणं, ["इदञ्च गौणे न प्रवर्तते इति भाष्ये स्थितम्" तथा "गौणत्वे तु न नुम्नुटौ" इति सिद्धान्तकौमुदी ।] युष्मदस्मदोस्तु गौणत्वे मुख्यत्वे च, तेन "अतित्वम् अत्यहम्" इत्यादि (सिद्धान्तकौमुदी) । "अस्मद्युष्मत्संख्यास्त्रिषु सरूपाः" इति लिखता भट्टोजिदीक्षितेन अव्ययानामग्रहणं कृतम्, अतोऽत्र संख्यापि षष्ठं नोल्लिखितम् । बोपदेवेन तु प्राचां मतेन लिखितम् । "सदृशं त्रिषु लिङ्गेषु इत्यादिकाव्यं वस्तुतस्तु लिङ्गकारकसंख्याभावपरा" इति भट्टोजिदीक्षितव्याख्यानम् ।

‡ पञ्चादिशब्दस्य बहुवचनान्तत्वात् अष्टादशपर्यन्ता एव, ऊनविंशत्यादीनान्तु एक-वचनान्तत्वमेव, 'विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसंख्ययो'रित्यमरवचनात् ।

§ त्रिशब्दस्य मुख्यस्यैव ग्रहणं, तेन प्रियत्रीणामित्यादौ न स्यात् । परत्वात् ते त्रयेति तेषां परमत्रयाणामित्यादौ मुख्यत्वात् स्यादेव । "गौणत्वे तु नेति केचित् । प्रियत्रीणाम् । वस्तुतस्तु प्रियत्रयाणाम् ।" इति सिद्धान्तकौमुदी । "सर्वसामान्यबोधकस्य बहुवचनस्य वचनात्,

चयाणां चिषु । * द्विशब्दो द्वान्तः । †

**१३३ । त्यदां टेरः क्लौ ।** (त्यदां ६।३, टेः ६।१, अः १।१, क्लौ ७।१) ।

त्यदादीनां टेरकारः स्यात् क्लौ परे । ‡

द्वौ द्वौ, द्वाभ्यां द्वाभ्यां द्वाभ्यां, द्वयोः द्वयोः । §

वातप्रमीः वातप्रम्यौ वातप्रम्यः । ¶

**१३४ । यूतोऽम्शसो-र्वावदीधोः ।**

(यूतः ५।१, अम्-शसोः ६।२, वी १।२, अदीधोः ५।१) ।

---

गौणत्वेऽपि चयादेशो न्याय्यः, प्रियास्त्रा इत्यादौ चस्त्रायनन्त्वत् इति भावः ।" इति तत्त्वबोधिनी च । नाव्ययङ् चेरिति तु श्रुतिदुःखावहत्वात्र कृतं; क्वचिन्न स्यादित्यर्थमिति केचित्, तेन 'चीणामिव समुद्राणा'मिति सिद्धम् । पाणिनिः ७।१।५३ ।

* चि-आम् (११०,१२२,१०४,१०७)=चयाणाम् । चि-सुप् (१११)=चिषु ।

† द्विशब्दो मुख्यत्वे एव द्विवचनान्तः, तेन प्रियद्विः पुरुष इति । ["उपसर्जनत्वे—प्रियद्विः ।" हरिवत् । प्राधान्ये तु परमद्वौ इत्यादि" इति सिद्धान्तकौमुदी ।] येषां शब्दाना-मन्तेरत्वप्राप्तं न जायते ते एवादौ वक्तव्याः, अतएव इकारान्तशब्दानामुदाहरणे आदौ चिशब्दं मुक्त्वा पश्चात् द्विशब्दः कथितः ।

‡ अनुकरणशब्दस्य सिसंज्ञाभावेन टेरत्वाभावे त्यदामिति पदं सिद्धम् । बहुवचनं यथार्थम् (८६) । सिसंज्ञानामेव त्यदादीनां टेरकारः स्यात्, तेन अतितद् अतितदौ अतितदः, अतितन्दि कुलानि, इत्यादौ गौणे न स्यात्; युष्मदस्मदोस्तु गौणेऽपि; एवं चियुष्मदस्मदां न तस्मीति वक्तव्यम्; तेन अतियुष्मान् अत्यस्मान् अतित्वान् अतिमान् इत्यादि; वस्ति तु चित: युष्मत: अस्मत: त्वत: मत: अतियुष्मत: इत्यादि । सिद्धात् विभक्तेरावश्यकत्वेऽपि त्रिवत्वं स्यात् क्लौ पर एव चेदं, तेन सः एषः इत्यादौ (१४८) इत्यादुत्तरे चादौ न दीर्घोपः । त्यदां कद् क्लौ इति यत्र कृतं तत् प्रक्रियालाघवार्थमेवेति । पाणिनिः ७।२।१०२ ।

§ द्वि-औ=द्व-औ (२१)=द्वौ । द्वि-भ्याम् (१०८)=द्वाभ्याम् । द्वि-ओस् (१०६)=द्वयोः । **इति इदन्ताः ।**

¶ वातं प्रमिमीते प्रमाति वेत्ति वातप्रमीः [वातशब्दात् प्रम-माङ्-मान-धातोर्मो आचार्यैः औणादिकः ईप्रत्ययः (स च कित्)] औणादिकत्वेनापि इत्यर्थः । वातप्रमी-औ (९५)=वातप्रम्यौ । जस् (९५)=वातप्रम्यः । सम्बुद्धौ हे वातप्रमीः । त्रिवत्वेनातप्रमीशब्दस्य तु (क्वि-प्, आचारे वा) अमि शसि ङौ च विशेषः—वातप्रम्यम्, वातप्रम्यः, वातप्रमि ।

दीर्घवर्जादीदूदन्तात् परयोरम्शसोः स्थाने क्रमात् मनौ स्तः । वातप्रमीं वातप्रम्यौ वातप्रमीन्, वातप्रम्या वातप्रमीभ्यामित्यादि । एवम् अतिलक्ष्म्यादयः ।

सुधीः । †

## १३५ । धोरियुवचि । (धोः ६।, इय्-उव् ।१।, अचि ७) ।

धोरीदूतोः स्थाने क्रमादियुवौ स्तोऽचि परे । ‡
सुधियौ सुधियः इत्यादि । एवं सुश्रीयवक्र्यादयः । § प्रधीः । ¶

## १३६ । कथ्याद्यनेकाचोऽस्थादहन्पुनर्वर्षाकाराद्यन्यभूसुधियोर्य्वौ ।

(कथ्याद्यनेकाचः ६।, अस्थात् ५।, अहन्—सुधियोः ६।।, य्वौ १।।) ।

कादेर्धादेरनेकाचश्च धोरीदूतोरस्थात् परयोः क्रमात् यवौ

---

* नदीसंज्ञक-धातु-भिन्नात् ईदूदन्तात् शब्दात् परस्य अम्स्थाने न शस्स्थाने न स्यात् । वातप्रमी-अम्=वातप्रमीम् । वातप्रमी-औ (३५)=वातप्रम्यौ इत्यादि । अतिलक्ष्म्यादयः इति आदिपदेन अतितन्त्री बहुश्रेयसी अतिचमू हूहू प्रभृतयः । पाणिनिः ६।१।१०७ १०२ ।

† सु शोभना धीर्यस्येति सुधीः । ध्यैधातोः क्विप्प्रत्यये धीः (१०२७) ।

‡ विसर्गं विपरिणमय्य ईदूतं तनुभक्तिः । धात्ववयवीभूतयोः ईदूतोः स्थाने क्रमात् इयुवौ स्तः अचि परे । प्रायेण क्विप्क्विप्प्रत्ययान्तशब्दानामेव ईदूतोर्धात्ववयवत्वं सम्भवति, तथाच— "क्विब्विजन्ता हि धातुत्वं न त्यजन्ति कदाचन । क्वचित् त्यजन्ति धातुत्वं सुधीनीति-प्रदर्शनादिति (१०२सूत्रवृत्तौ) ।" अचीति व्यादेरिव, क्वचित् तद्भिन्नस्यापि, तेन 'धाम स्वायम्भुवं ययु'रिति सिद्धम् । विशेषविधित्वात् (२२) सूत्र यें वें इत्यस्यापि बाधकोऽयं, तेन श्रियै सुधियै इत्येव । पाणिनिः ६।४।७७ ।

§ सुधी-औ=सुधियौ इत्यादि । शोभना धीः (१०२५), सुष्ठु श्रीर्यस्य सः सुश्रीः, यवेन क्रीणातीति यवक्रीः । आदिशब्दात् सुश्रूः भ्रूः सुलू कटप्रू खलपू प्रभृतयः ।

¶ प्रकृष्टा धीर्यस्य सः प्रधीः । [(धातुर्ज्ञानार्थाद्वा धीः क्विप्प्रत्ययेनेत्) । "धीशब्दे तु नियकुन्निति निषेधेन नदीसंज्ञाभावाच्च प्रधीशब्दे नदीकार्याभाव इति" प्रबोधिनी । प्रकर्षेण ध्यायतीति ध्यायतेर्धातोः क्विप् इति केचित् ।]

स्तः अचि परे, न तु इन्भू-पुनर्भू-वर्षाभू-काराभूभ्योऽन्यस्य भू-शब्दस्य सुधियश्च । *

प्रध्यौ प्रध्यः इत्यादि । एवं दीध्यादयः । †

कव्याद्यनेकाचः किं, शुद्धधियौ । अस्मात् किं, यवक्रियौ । नीः नियौ । ‡

---

*  कश्च व्यश्च कव्ये, ते आदी यस्य स कव्यादिः, स च अनेकाच कव्याद्यनेकाच् तस्य । हन् च पुनर् च वर्षाश्च कारा च ता आदयो येषां ते हन्पुनर्वर्षाकारादयः, तेभ्योऽन्यः हन्पुनर्वर्षाकाराद्यन्यः, स चासौ भूश्चेति हन्पुनर्वर्षाकाराद्यन्यभूः, स च सुधीश्च तौ हन्पुनर्वर्षाकाराद्यन्यभूसुधियौ, न तौ अहन्पुनर्वर्षाकाराद्यन्यभूसुधियौ तयोः ।

य्वौ इति द्विवचनान्तेन क्रमनिर्व्वाहार्थं पूर्व्वतः य्वोरिति द्विवचनान्तं भूत्वा अनुवर्त्तते । ततश्च—कारकादेरव्ययादेरनेकाचश्च धातोरीदूतौ यवसंयोगात् परौ भवतः—तदा तयोः क्रमात् य्वौ स्तामचि परे, हन्भ्वादिभिन्नभूशब्दस्य सुधियश्च न स्यादित्यर्थः । इयुवोर्निषेधे (९५) अजाद्यवायेत्यनेन सिद्धावपि यवविधानं (२२) दीर्घबाधनार्थं, तेन ङौ प्रश्नि । अत्र हन्पुनर्वर्षाकारादि-भूशब्दस्य क-विधाने तद्भिन्नभूवर्जनस्य कष्टगम्यतया स्पष्टार्थमेव तद्भिन्नभूवर्जनं कृतम् । अथापि अभौति स्यादेव, तेन प्रधीश्वर इत्यादौ न प्रसङ्गः । हन् इति हिंसार्थमव्ययं, तस्मै भवतीति हन्भूः अप्सरोजयोः, [हन्भूर्व्यञ्जनौ, कश्चन इत्यन्ये, कपिरित्येके], पुनर्भूः स्यात् द्विरूढायाम् [अत्र तु पुनर्भवतीति व्युत्पत्त्या पुंलिङ्गः पुनर्जातार्थे], पुनर्नवायां वर्षाभूः स्त्रियां शिशुकुक्षौ भवे (भवा भेकः), काराभूर्निगडस्थाने इति कोषः । [करभू-कारभूशब्दौ अपि स्वीकृतौ ।]

अत्र चायं विशेषः—स्वाद्युत्पत्तेः पूर्व्वं कारकाव्ययाभ्यां कृतसमासस्यैव धातोरीदूतोर्भवतः न तु स्याद्यन्तस्य समासे, तेन अयनं धीरिति क्विपि, ईषत् धीर्येषां ते ईषद्धियः, दुःखिता धीर्येषामिति दुर्धियः इत्यादि । तथाच हविषक्रिया पचावमानस्य आशीविषमुखे विनिपात इति भाष्यम् । अथ हविषस्य श्रीरिति विग्रहे (हविषसम्बन्धिनी श्रीः) कारकादित्वाभावादिति केचित् । परन्तु सुष्ठु धीः प्रकृष्टा धीरिति विग्रहेऽपि सुधीप्रध्यौ श्रोत्रश्रीर्वादित (१५९ सूत्रवृत्तौ) कथनात् सम्मते नेयं व्यवस्था । पाणिनिः ६।४।८२-८५ । "गतिकारकपूर्व्वस्यैवेष्यते, यवादिषु" इति वार्त्तिकम्, अन्यत् वार्त्तिकपचय ।

†  दीधीङ् च सु देवने दीप्तौ इति धातोः क्विपि दीधीरिति अनेकाच्, आदिग्रहात् अयनी सुती लूनी सुखी प्रभृतयः । (१२८सूत्रटीका द्रष्टव्या) ।

‡  युवा धीर्यस्य सः शुद्धधीः । [अत्र कारकादित्वाभावात्] शुद्धधीःऽची (१२५)—शुद्धधियौ [युवं शुद्धं ध्यायति सः इति वाक्ये तु कारकादित्वात्] शुद्धध्यौ इत्येव स्यात् । असंयोगात् किं, यवक्रियौ । यवक्रीणातीति यवक्रीः यवक्री यवाः इत्यत्र संयोगः न धात्ववयवीभूतः ; अतः यवक्रियौ इत्येव । अनेकाचः किं, नियौ ।

## १३७। न्यापदीभ्यो ङेराम्।

(नी-आप्-दीभ्यः ५ब, ङेः ६१, आम् ।१।)।

नीशब्दादापो धाव परस्य ङे-राम् स्यात्। नियाम्। शेषं सुधीवत्। ग्रामणीः ग्रामण्यौ। ङौ—ग्रामण्याम्। शेषं प्रधीवत्। *

## १३८। त-तज-खादीयो ङो वोः।

(त-तज-खात् ५१, ई-यः ५१, ङः ६१, वा ।१।, उः ६१)।

तात् तस्यानजाद्यर्थात् खाच्च परादीकारजात् यकारात् परो ङसिङसो-ङं उः स्याद्वा। सुत्युः सुत्यः। लून्युः लून्यः। सुख्युः सुख्यः। †

शम्भुर्हरिवत् साध्यः। ‡

शम्भुः शम्भू शम्भवः, शम्भुं शम्भू शम्भून्, शम्भुना शम्भुभ्यां शम्भुभिः, शम्भवे शम्भुभ्यां शम्भुभ्यः, शम्भोः शम्भुभ्यां शम्भुभ्यः, शम्भोः शम्भ्वोः

---

* अत्र केवलनीशब्दस्य तदन्तशब्दस्य च ग्रहणं, तेन नियाम् ग्रामण्यां ग्रामण्यामित्यादि। नीवि तु अनरादखादादौ क्ले ङनि भर्तिनिनि कुचि, पुंवद्भावपक्षे भर्तिनिवामिति। नी-ङि—नी-आम् (१३५)—नियाम्। ग्रामं नयतीति क्विपि ग्रामणीः नायकः। ग्रामणी-ङी, णत्वादि-त्वात् (१२८)—ग्रामण्यी इत्यादि। पाणिनिः ७।३।११६।

† तकारस्य स्थाने जातः तजः, तच तजश्च खश्च ततजखं तस्मात्, ईकारस्य स्थाने यः ई-यस्तस्मात्। एतेन तकार-तजकारजातवर्ण-खकारेभ्यः परस्मिन् अव्यायवर्णाप इत्यनेन जातयकारात् ङसिङसोरकारः उः स्याद्वा इत्यर्थः। सुतमिच्छति सुतमिवाचरति वा इत्यादि वाक्ये सुतीयतीति सुतीयतातोः क्विपि (७७१,६४२) सुतीशब्दः। एवं लूनमिच्छतीति लूनीः [अत्र तकार-नः: १०५१], सुखमिच्छतीति सुखीरित्यादि। सुती-ङसि (१२६,१२८)—सुत्युः, वा सुत्यः। एवं लून्युः वा लून्यः, सुख्युः वा सुख्यः इत्यादि। पाणिनिः ६।१।११२।

इति ईदन्ताः।

‡ हरिवदित्ये इकारस्य कार्येण, अत्र तु उकारस्येति विशेषः; वाक्यस्थानि तुल्यानि।

शम्भूनां, शम्भौ शम्भ्वोः शम्भुषु। हे शम्भो। एवं विष्णु-वायु-भान्वादयः।

१३९। क्रोष्टोस्तुनस्तृन्नघौ धौ स्त्रियाञ्च।

(क्रोष्टोः ६।, तुनः ६।, तृन् ।१।, अघौ ७।, धौ ७।, स्त्रियां ७।, च ।१।)।

क्रोष्टुशब्दस्य तुनः स्थाने तृन् स्यात् अघौ धौ परे स्त्रियाञ्च। न इत्।*

(१२७) सख्यृन्नामिति। क्रोष्टा, हे क्रोष्टो।

(१२८) धौ त्रिरिति, क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रोष्टून्।†

१४०। वाच्यघौ। (वा ।१।, अचि ७।, अघौ ७।)।

क्रोष्टोस्तुनस्तृन् वा स्यात् अघावचि परे। क्रोष्ट्रा।‡

---

* क्रोशतीति क्रुशधातोरौणादिक-तुन्प्रत्यये क्रोष्टु इति सिद्धं (शृगालवाचकं), तस्य तुनः स्थाने तृन् आदेशः स्यात्। तृन् इत्यस्य नकारः (१४२) धावस्तृदृचोरिति गुणनिषेधकतया सार्थकः, न तु नित्त्वादन्ते, तथा सति तुनो नकारं निरर्थकं स्यात्। गौणस्यापि ग्रहणं, तेन बहुक्रोष्टा दिशः। स्त्रियाञ्चेति स्त्रीलिङ्गवर्त्तित्वे सति निमित्तान्तरस्य नापेक्षा, तेन क्रोष्ट्री बहुक्रोष्ट्री इत्यत्र ङिप (२५७) ऋदन्तत्वादीप्। स्त्रियां नित्यमिति क्रमदीश्वरः। क्लीबे तु नामविधेर्बलवत्त्वादन्तादौ (१६९) तुचि बहुक्रोष्टूनि वनानि इत्यादि। पाणिनिः ७।१।९५,९६।

† क्रोष्टु-सि=क्रोष्टृ-आ (१२०)=क्रोष्टा। हे क्रोष्टु-सि (धि) (१०९,१२२)=क्रोष्टो। क्रोष्टु-शस् (१०४,१०५)=क्रोष्टून्।

‡ पूर्वसूत्रे विकल्पवादेव अघ विभक्तिप्राप्तौ पुनर्विधानं कदाचिदपि यस्य नित्यं तृन्भवति तन्निषेधार्थम्, अतएव शस्विभक्तौ न तृन्, अतः क्लीबे धौ (१६९) इतौ शसो (८२) नित्यत्वबाधात्। "विभाषा तृतीयादिष्वचि" इति पाणिनि-क्रमदीश्वर-प्रभृतयः। अत्र अचीति स्थानेऽपि, तेन क्रोष्टुरिदं (अ-प्रत्यये) क्रौष्टवमिति। क्रोष्टु-टा=क्रोष्टृ-आ (२५)=क्रोष्ट्रा। पाणिनिः ७।१।९७।

## १४१ । ऋतो ङौ डुः । (ऋतः ५।, ङः १।, डुः १।) ।

ऋकारात् परो ङसिङसोर्ङी डुः स्यात्, ड इत् ।
क्रोष्टुः क्रोष्टुः क्रोष्ट्रोः क्रोष्टूनाम् । *

## १४२ । गुर्ङिध्योः । (गुः १।, ङि-ध्योः ७।) ।

ऋकारस्य गुः स्यात् ङौ धौ च परे । क्रोष्टरि † क्रोष्ट्रोः ।
पक्षे हस्वे च मधुवत् । ‡
हहः हहौ हहः इत्यादि, वातप्रमीवत् । एवमतिचम्वादयः ।
सुभ्रूः सुभ्रुवौ सुभ्रुवः इत्यादि, सुधीवत् । एवं कटप्रूस्वयम्भ्वादयः ।
सुलूः सुल्वौ सुल्वः इत्यादि, प्रधीवत् । एवं हन्भूखलप्वादयः । §
धाता, ह्रस्वन्तक्रोष्टुवत् । धौ हे धातः । एवं नप्तृहोतृपोत्रादयः । ¶ पिता, हे पितः ।

---

* क्रोष्टु ङसि=क्रोष्टु-उस् (१२६,१०२)=क्रोष्टः, एवं ङस् परे । क्रोष्टु-ओस् (१४०, २५,१०२)=क्रोष्ट्रोः । क्रोष्टु-आम् (११०,१०४)=क्रोष्टूनाम् । आगमादेशयोर्मध्ये बलीयानागमो विधिरिति (श्यपष्ठे) न्यायादादौ नुमागमे ऋच्परत्वाभावात् न तृन् । पाणिनिः ६।१।१११ ।

† क्रोष्टु-ङि (१४०,१४२)=क्रोष्टरि । पाणिनिः ७।३।११० ।

‡ पक्षे तृनोऽभावपक्षे, ह्रस्वे निघादौ परे मधुशब्दवत् । इति उदन्ताः ।

§ [illegible] (११७) [illegible] । सुभ्रू-औ (११५) =सुभ्रुवौ इत्यादि । सुलू-औ (११६)=सुल्वौ इत्यादि । [illegible] (ताक्षा) [illegible] । कटभ्रूः [illegible] इति मेदिनी । इति ऊदन्ताः ।

¶ धातृ-सि (१२०,११६)=धाता । (१४पादे) [illegible] (१०७) [illegible] । धौ हे धातृ-सि (१०६,१४२,१०२)=धातः । [illegible] (११०) [illegible] । [illegible]

पिता माता ननान्दा ना सव्येष्टृभ्रातृयातरः ।
जामाता दुहिता देवा न तृनन्ता इमे दश ॥ *

**१४३ । घावस्वसृतृणोः ।** (घौ ७, अ-स्वसृतृणोः ६॥) ।

घौ परे ऋकारस्य गुः स्यात् न तु स्वसृतृणोः ।† पितरौ पितरः, पितरं पितरौ । शेषं धातृवत् । एवं जामातृभ्रात्रादयः ।

**१४४ । नुर्वा नामि घः ।**

(नुः ६।, वा ।१।, नामि ७।, घः १।) ।

नृशब्दस्य नामि परतो घः स्यात् वा । नृणां नृणाम् । ‡
शेषं पितृवत् । §

---

भ्राता च संज्ञा च तृनन्ततुल्याः, षडेते शब्दाः खलु शक्तिभाजः ॥ एते षट् शब्दा. पौणादिषु रूढाः; नम दु पू यद निम प्र-शास शास शन्स—एतेभ्यो धातुभ्यः तृन्प्रत्ययेन सूत्रतो निपातनाच्च सिद्धाः । एवं यावतीयतृनन्ताः धातृशब्दवत् ज्ञेयाः । पाणिनिः ६।४।११ ।

* मातृशब्दो (मा-न पूजायां, नलोपः) जननीवाचकः, परिमाणकर्तृवाचकत्वे तृनन्त एव, तेन धान्यस्य मातारौ पुरुषौ । सव्येष्टृशब्दः रथवामपार्श्वस्थितवीरे रूढः (सारथिर्वा) टवर्गद्वितीयवान् । यातृशब्दः स्वामिभ्रातृस्त्रीवाचकः, अन्यत्र तृनन्तः, तेन तीर्थस्य यातारौ पुरुषौ । ननान्दृ (ननन्दृ इत्यपि) सव्येष्टृ इह—शब्दाः न तृनन्तवत् प्रतीयमानाः किन्तु तृनन्तत्वेन निपातनात् सिद्धाः । अत एते दश शब्दा वस्तुतः तृनन्ता अपि न तृनन्ताः, तृनन्तकार्यं (१२८) घौ निर्दिष्टत्वेन दीर्घं न भजन्ते इत्यर्थः, (१४३) घावस्य इत्यनेन गुणं लभन्ते इति यावत् ।

† पाणिनिः ७।३।११० । "सुष्ठु असति"=स्वसा । "पातेराकारस्य इत्वम्"=पिता । "जायां माति"=जामाता । "माङतेर्लोपः"=माता । "दिवेर्ऋः"=देवा=देवरः ।

‡ नामीति सुब्धातुलक्षणाचारवार्थं, तेन अतिनृणाम् अतिनृणामिति । (नयति वः सः ना) नृ-आम्—(११०,१००) नृणां, वा नृणाम् । पाणिनिः ६।४।६ । **इति ऋदन्ताः ।**

§ ऋकारान्तं, लृदन्तस्य, एदन्तस्य, एदन्तस्य च शब्दस्य रूपं लोपदर्शनेन विरलप्रचारत्वात् न प्रदर्शितम् । जिज्ञासवश्चेत्सुधान्त्यु नु अन्यत्र है इति अन्यत्रस्य रूपं विज्ञेयम् ।

१४५। ओरौ घौ। (ओः ६।, औ।१।, घौ ७।)।

ओकारस्य औकारः स्यात् घौ परे। गोः गावौ गावः। *

१४६। आ अम्शसोः। (आ।१।, अम्-शसोः ७॥)।

ओकारस्य आकारः स्यात् अमि शसि च परे। †

गां गावौ गाः, गवा गोभ्याम् इत्यादि।

(१२४) ङसेङसो लोपः इति, गोः गोः। ‡

१४७। रै रा स्भि। (रै।१।, रा।१।, स्भि ७।)।

रैशब्दो रा स्यात् से भे च परे। §

राः रायौ रायः, राभ्यामित्यादि। ¶

ग्लौः ग्लावौ ग्लावः इत्यादि। ||

इति अजन्त पुंलिङ्ग पादः।

---

* पाणिनिः ७।१।९०।

† अम शसोः, ओकारस्य आ स्यात् द्वितीयाया अकारे परे इति यत्र ज्ञातं तत् स्पष्टार्थम्। पाणिनिः ६।१।९३।

‡ इति ओदन्ताः।

§ "अर्थ-रै-विभवा अपि" इत्यमरः। स्त्रीत्वेऽपि, तेन क्लीबेऽपि सुराभ्यां सुरासु इति (१०१सूत्रवत्तौ)। (१६०) क्लीबे ह्रः इति ह्रस्वेऽपि एकदेशविकृतमनन्यवत् भवतीति न्यायात् रा आदेशः। पाणिनिः ७।२।८५।

¶ इति ऐदन्ताः।

|| "ग्लौर्मृगाङ्कः कलानिधिः" इत्यमरः। इति औदन्ताः।

## १४८। आबीब्‌हसात् सेर्लोपः।

(आप्-ईप्-हसात् ५।, सेः ६।, लोपः १।)।

आप ईपो हसाच्च परस्य सेर्लोपः स्यात्। उमा। *

## १४९। यौराप:। (ई।१।, औः १।, आपः ५।)।

आपः पर औरी स्यात्। उमे उमाः। †

## १५०। धिटौस्से:। (धि-टा-ओसि ७।, एः १।)।

आप एः स्यात् धौ टौसोश्च परतः। हे उमे।

उमाम् उमे उमाः, उमया उमाभ्याम् उमाभिः। ‡

## १५१। ङितां यम्। (ङितां ६।॥, यम्।१।)।

आपः परेषां ङितां यम् स्यात्, म इत्। उमायै उमाभ्याम् उमाभ्यः, उमायाः उमाभ्याम् उमाभ्यः, उमायाः उमयोः उमा-

---

* आप् च ईप् च हस् च तस्मात्, सूत्रत्वादद्वन्त्वम्। (१९३) स्थानस्थारादित्यनेन हसात् सेर्लोपे सिद्धे अत्र हसो ग्रहणं सिलोपानन्तरं तत्पूर्ब्बकार्य्यनिर्व्वाहार्थं, स्थानस्थारादित्यनेन लुप्ति तु (१५) लुप्ति न तन्नीत्यनेन पूर्ब्बकार्य्यनिषेधापत्तिः स्यादिति। उं शिवं मीयते जपयीति माङ् चि शब्दे इति मा-धातोर्डप्रत्यये (९९७) उम इति शब्दात् स्त्रियाम् आपि उमा इति रूपम्। "उ भोः मा तपः कुरु" इति तु कुमारे कालिदासः। पाणिनिः ६।१।६८।

† औस्थाने दीर्घ-ईकारकरणं जस्सौ इति सिद्ध्यर्थम्। आपो ग्रहणात् ईप्-हसो-र्निवृत्तिः। उमा-औ=उमा-ई (२१)=उमे। उमा-जस् (२२)=उमाः। पाणिनिः ७।१।१८।

‡ विभक्तिविपरिणामेन आप इति पञ्चम्यन्तमनुवर्त्तते। औ टौसोश इत्युभयोः विशेषणाच्च इतो 'परतः' इति तदन्तपदं (५११) मनुक्तम्। हे उमा-धि (धि) (१४८,१५०)=उमे।

आम्। (११०) व्यपदेशाद् ङेरामिति। उमायाम्, उमयोः उमासु। एवं दुर्गामायाम्बिकादयः। *

१५२। स्ते: स्यम् स्वश्च। (स्तेः ५।, स्यम् १।१, स्वः १।, च ।१।)।

स्तेरावन्तात् परेषां ङितां स्यम् स्यात्, पूर्वस्य च स्वः। †

सर्वस्यै सर्वस्याः सर्वस्याः सर्वस्याम्। आमि—सर्वासाम्।

शेषम् उमावत्। एवं विश्वादय आवन्ताः। ‡

अपुरीत्सुते:—अन्तरायै नगर्य्यै। §

द्वितीयस्यै द्वितीयायै, द्वितीयस्याः द्वितीयायाः, द्वितीयस्यां द्वितीयायाम्। शेषमुमावत्। एवं तृतीया। ¶

---

उमा-अम् (२२)—उमाम्। उमा-औ (१४८,२१)—उमे। उमा-शस् (२२)—उमाः। उमा-टा (१५०,२५)—उमया। पाणिनि: ७।३।१०५-१०६।

* आप इति पञ्चम्यन्तेनानुवर्त्तनम्। आबन्तशब्दात् परेषां ङे-ङसि-ङस्-ङि एषां स्थाने यम् स्यात्, ञित्त्वादादौ। य इति यकारान्तः। ङिति य इति कार्य्ये (१०६) टाभिसित्यादिना यकारादेशापत्तिः स्यादिति। उमा-ङे=उमा-य-ए (२१)=उमायै। एवं ङसिङसोः उमा-य-अस् (२२,१०२)=उमायाः। उमा-ओस् (१५०,२५,१०२)=उमयोः। उमा आम् (११०)=उमानाम्। उमा-ङि (११०,१५१,२२)=उमायाम्। विशेषविधिवर्ज्जिताः दुर्गा-माया-अम्बिकादयः सर्व्वे आबन्तशब्दाः एवमित्यर्थः। पाणिनि: ७।३।११३।

† आबन्तसर्व्वनामशब्दात् परेषां ङितां स्थाने स्यम् स्यात्, ञित्त्वादादौ, स्वः पूर्व्वस्थितस्य दीर्घस्य ह्रस्वः। यद्यपि स्वम् इति कृते सर्व्वेति न वक्तव्यं स्यात्, तथापि अर्थे इत्यादि सांपत्ते मकारपरत्वाभावे (२०६) सूत्रः प्रवृत्तिमप्राप्तिः स्यात्। पाणिनि: ७।३।११४।

‡ सर्व्वा-ङे=सर्व्व-स्य-ए (२१)=सर्व्वस्यै। सर्व्वा-ङसि (२२,१०२)=सर्व्वस्याः, एवं ङस् परे। सर्व्वा-ङि (११०)=सर्व्व-स्य-आम् (२२)=सर्व्वस्याम्। सर्व्वा-आम् (११२)=सर्व्वासाम्। सर्व्व विश्वा, आदिपदेन आवन्ताः सर्व्वनामशब्दाश्च एवं ज्ञेयाः।

§ (८६) सूत्रोक्ताः इत्यत्र पुरुषितो ब्रह्मवादि अर्थे अन्तरशब्दस्य सिज्ञ्ञाभिधानात्—अन्तरायै (बहिःस्थितायै) नगर्य्यै (पुर्य्यै) इत्यत्र न सिज्ञ्ञा, अतएव उमाशब्दवत्।

¶ द्वितीया-ङे (९०) वा सिज्ञ्ञायां—द्वितीयस्यै द्वितीयायै इत्यादि। पाणिनि: ७।३।११५।

### १५३। सुभ्रू-दी-ह्रस्वाम्बार्थानां धौ ह्रः।

(सुभ्रू-दी-ह्रि-अम्-अम्बार्थानां ६।।।, धौ ७।, ह्रः १।)।

सुभ्रुवो वा ह्रस्वाम्बार्थानाञ्च ह्रः स्यात् धौ परे। हे सुभ्रु। शेषमुमावत्। एवमलाबादयः।

ह्रस्वः किं, हे अम्बाले, हे अम्बिके। *

जरा। (११५) जरस् जराचि तु। जरसौ। केचिदादावौत्वमिच्छन्ति। जरसौ जरे। † जरसः जराः इत्यादि।

(११६) पाददन्तेति, नासिका-पृतना-निशानां नस्-पृत्-निशः। नसः नसा नोभ्यामित्यादि। पृतः पृता पृद्भ्यामित्यादि। निशः निशा।

### १५४। श छ भ्राज यज व्रज सृज मृज व्रश्च भ्रस्जां षड् भौ।

(श—भ्रस्जां ६।।।, षड् ।१।, भौ ७।)।

शान्तानां छान्तानां राजादेश्च षड् स्यात् भौ परे। ‡

---

* दी नदी येषां ते ह्रस्वः, अम्बा अनमी अर्थो येषां ते अम्बार्थाः, ह्रस्वश्च ते अम्बार्थाश्चेति ह्रस्वाम्बार्थाः, सुभ्रूश्च दी च ह्रस्वाम्बार्थाश्च ते तेषाम्। चादिशाङ्गत्वात् सुभ्रूशब्दः स्त्रीलिङ्ग एव, पुंसि तु धौ सुभ्रूरेवेदक इति क्रमदीश्वरः। कोषे तु (१६७,१२२) हे सुभ्रो सुभ्रू इति। सुभ्रू-शब्दस्य नदीसंज्ञकशब्दस्य [illegible] च धौ परे ह्रः स्यात्। मातृवाचकः अम्बाशब्दस्तु सुखार्थ एव बाध्यः; न तु दुर्गावाचकः, तेन हे गौरि=अम्बे इत्यादि। एवम् अक्का, अल्ला, चादित्वात् अत्ता-अम्बाप्रभृतयः। हे अम्बाला-लि(भि) (१४८,१५०)=अम्बाली इत्यादि। पाणिनिः ७।३।१०७। "अम्बार्थं ह्रस्वं यदि" इति भाष्यम्, वार्त्तिकञ्च। हे सुभ्रु इति सिद्धान्तकौमुदी बालमनोरमा। हे सुभ्रु इति सौपद्मा जीवराज।

† जरा-औ (१४८,११५)=जरसौ, वा जरा-औ (१४९,२२)=जरे। "जरसौ इति केचिदाहुस्तच्चिन्त्यमूलम्" इति सिद्धान्तकौमुदी। "रूपमालायां जरसौ प्रयुक्तत्वात्" इति सुबोधिनी।

‡ [illegible] इत्यादि रूपे तेषाम्। एषां शान्तानां षड् स्यात् भौ (८४) परे—[illegible] इत्यर्थः। पाणिनिः ८।२।३६। षड् षः।

१५५ । षो डः फे । (षः ६।, डः १।, फे ७।)।

षस्य डः स्यात् फे परे । षिड्भ्याम् इत्यादि ।

पथि घौ च उमावत् । *

गोपा, विश्वपावत् । †

मतिर्हरिवत्, स्त्रीत्वात् न शस् न, न टा ना । मतीः मत्या । ‡

१५६ । ङ्या ङितामम् । (ङ्याः ५।, ङितां ६॥, अम् ।१।)।

ङ्याः परेषां ङिताम् अम् स्यात्, म इत् । मत्यै मतये, मत्याः मतेः, मत्यां मतौ । एवं श्रुति-स्मृति-बुद्ध्यादयः । §

१५७ । स्त्रियां पिबन्तुरोस्तिङ्घतङ् ऋवत् क्तौ । (स्त्रियां ७।, पिबन्तुरोः ६॥, तिङ्-घतङ् ।१।, ऋवत् ।१।, क्तौ ७।)।

---

* षि इति (८५) स्वादीव-इसौ विरामे च षोड्वम् । (६४) आप्स्वसोरिमनेन पक्षानि स्थानात् षि भवत्यपि, पिशाशब्द-सुपि पिट्सु इत्याद्यर्थमेतत्सूत्रकरणम् । पिशा-भ्याम् (११६) —पिष्-भ्याम् (१५५)—पिड्भ्याम् । पिष्-आदिषस्य विकल्पपक्षे, घौ परे च पिशाशब्दः उमा-शब्दवत् । पाणिनिः ८।४।५२ ।

† गां पृथिवीं पातीति क्विपि (१०१२) गोपाशब्दः विश्वपाशब्दवत् । इत्यादन्ताः ।

‡ मतिर्बुद्धिः, हरिशब्दवत्, किन्तु स्त्रीत्वस्य विशेषविधिनिषेधौ भवत एव । (१०३, १२१) एतत्सूत्रकार्यद्वयं [शस्स्थाने न, टास्थाने ना च] न स्यादित्यर्थः । मति-शस् (१०२,१०४) —मतीः । मति-टा (९५)—मत्या ।

§ ङितां स्थाने विधानात् अमः विभक्तित्वमित्यत्र, अतएव ङितौ इत्यादौ स्वादीवापि परे (११५) घोरिदुत्वपीति इत्यादिकः । मति-ङे —(८८ नदीसंज्ञायां) मति-अ-ए (१५,२२)— मत्यै । नदीसंज्ञाया विकल्पे मति-ए (१२१,१५)—मतये । मति-ङसि (वा ङस्)—मति-अ-आस् (१५,२२,१०२)—मत्याः, वा नदीसंज्ञायां (१२१,१२३,१०२)—मतेः । मति-ङि (११७, १५)—मत्यां, वा नदीसंज्ञायां (१२५,११६)—मतौ । पाक्षिकनदीसंज्ञकत्वात् (१२१०) वाणी-प्रभृति इत्यादीनि नदीविशेषकाः एवं बोध्याः । पाणिनिः ७।३।११२, ११६ ।

त्रिचतुरोः स्त्रीलिङ्गे क्रमात् तिसृचतसृ स्तः स्त्रौ परे। तौ च ऋवत्, तेन न गुवृदीर्घाः। तिस्रः तिस्रः तिसृभिः तिसृभ्यः तिसृभ्यः तिसृणां तिसृषु। *

टेरत्वे सत्याप्। द्वे द्वे द्वाभ्यां द्वाभ्यां द्वाभ्यां द्वयोः। †

गौरी गौर्य्यौ गौर्य्यः, हे गौरि, गौरीं गौर्य्यौ गौरीः, गौर्य्या गौरीभ्यां गौरीभिः। ‡

---

* तिसृचतसृ इति समाहारः। स्त्रीलिङ्गे वर्त्तिनः त्रिशब्दस्य तिसृ स्यात्, चतुर्शब्दस्य चतसृ स्यात् स्त्रौ परे। तौ चादेशौ दीर्घऋदन्ततुल्यौ, दीर्घतुल्यकथनात् ऋस्थाने जायमानाः गुवृदीर्घाः [(१४२) चावस्वस्वयोरिति गुणः, (१२८) घौ ञ्रिरिति वृद्धिः, (१०४) अस्नामि चं-इति दीर्घः] न स्युः, अन्यत्तु स्यादेव, तेन तिसृणामिति ऋस्यात् णुम्। (१०२) असोऽकारलोपाभावस्तु—सुख त्रिय चय चय इति विग्रहे गुवृदीर्घाः इत्यनेन अकारकार्यस्यापि निषेधात् ज्ञेय इति।

अथ प्रकरणबलात् स्त्रियां स्त्रौ स्त्रियामिति यदुक्तं, यत्र त्रिचतुरोर्न स्त्रियां वृत्तिः ततः ज्ञत-समासे स्त्रियां वृत्तावपि तत्र न तिसृचतसृौ भवतः इत्यभिप्रायार्थं, तेन प्रियास्त्रयो यस्याः सा प्रिय-त्रिरिति मतिवत्। प्राक् स्त्रियां वृत्तौ पश्चात् ज्ञतसमासे सर्व्वलिङ्गवर्त्तिनोरपि तयोः तिसृचतसृौ भवत एव, तेन तिस्रास्तिस्रो यस्य सः (१२७) प्रियतिसा, तथा क्लीवेऽपि प्रियतिसृ कुलमित्यादि, सिद्धान्तकौमुद्यान्तु प्रियत्रि प्रियतिसृ इति पदद्वयं लिखितम्। प्रियचीणामिति कातन्त्राः सौपद्माश्च, प्रियत्रयाणामिति तु क्रमदीश्वरः। "वामि प्रियत्रयाणामिति विशेषः" इति भट्टोजि-दीक्षितः। विभक्तिश्रुति तु न चादेशः, तेन तिसृभिः ज्ञतं त्रिज्ञतम्। किञ्च चावस्वस्य इति सूत्रविहितमिञ्चौ गुणः स्यादेव, तेन हे प्रियतिसर्देवदत्त, (१४२) प्रियतिसरि देवदत्ते इति। नान्तत्वात् मासदीर्घोऽपि (१६४) न निवार्यः, तेन प्रियतिसृणि कुलानि [इदं भाष्योदाहरणं कैयट-मतञ्च—इति प्रौढ़मनोरमा]। ङसिङसोः प्रियतिसः इत्यत्र अकारकार्यत्वात् (१४१) ज्ञुरपि न स्यादिति। तिसृ इत्यादौ दत्यादिप्रकरणात् न चलम्। पाणिनिः ७।२।९९,१००। ६।४।४।

† (१२२) त्यदां टेरः स्त्रौ इति टेरकारे द इति अकारान्तात् (२४९) स्त्रियामत इति आप् भवति, ततः द्वा इति शब्दस्य सभाशब्दवत् रूपम्। द्वा-औ (१४९,२२)—द्वे। द्वा-ओस् (१५०,२५)—द्वयोः। **इति दन्ताः।**

‡ गौरी-सि (१४८)—गौरी। गौरी-औ (२५)—गौर्य्यौ इत्यादि। हे गौरी-सि (सिं) (९६) ह्रस्वं चोच दीति नदीसंज्ञायां (१४८,१५२)—गौरि। गौरी-अम् (१०२)—गौरीम्। एवं ङसिषसी गौरीः।

(१५६) वा ङितामम् । गौर्य्यै गौरीभ्यां गौरीभ्यः, गौर्य्याः गौरीभ्यां गौरीभ्यः, गौर्य्याः गौर्य्योः गौरीणां, गौर्य्यां गौर्य्योः गौरीषु । एवं वाणी-काली-नद्यादयः । *

लक्ष्मीः । अनीबन्तत्वात् न सिलोपः । शेषं गौरीवत् । एवम् अवी-तन्त्र्यादयः । † स्त्री, हे स्त्रि । ‡

१५८ । स्त्री भ्रूधुः । (स्त्री ।१।, भ्रू; १।, धुः १।) ।

स्त्रीशब्दो भ्रूशब्दश्च धुसंज्ञः स्यात् । §

(१२५) धोरियुवचि । स्त्रियौ स्त्रियः ।

१५९ । स्त्री वाम्‌शसोः । (स्त्री ।१।, वा ।१।, अम्-शसोः ७।) ।

स्त्रीशब्दो धुसंज्ञो वा स्यात् अमि शसि च परे । ¶

स्त्रियं स्त्रीं स्त्रियौ स्त्रियः स्त्रीः, स्त्रिया स्त्रीभ्यां स्त्रीभिः, स्त्रियै

---

* आदिना विशेषणिका अवलोका: औत्सेका ईयन्तशब्दा एवं ज्ञेयाः ।

† लक्ष्मीरिति पदं लक्ष लक्ष् दर्शने इति धातोः औणादिकमीप्रत्ययेन सिद्धं, न ङीबन्तम् । अतएव (१४८) न सिलोपः । एवम्, अव तन्त्र तृ धातुभ्यः औणादिक ईप्रत्ययेन अवीः तन्त्रीः तरीरिति । तन्त्रीरकारान्तश्च । आदिपदेन ह्री श्री धी स्त्री प्रभृतीनां ङिबन्तानामपि ग्रहणम् । तथाच—अवी तन्त्री तरी लक्ष्मी ह्री श्री धी स्त्र्यादि-शब्दतः । अनीबन्ततया सिर्न लोपो नीयते क्वचित् ॥ इति । श्रीधरादु मितपदी: बहुबचीरियुक्तरूपाय पठन्ति ।

‡ स्त्री-सि (१४८)—स्त्री । हे स्त्री-सि(सि) (१४८,[(५५) नदीसंज्ञायां](१५१)—स्त्रि ।

§ [स्त्यायतेड्रट् इत्यौणादिकसूत्रेण स्त्यायत्यस्यां गर्भ इति (स्त्यै-ड्रट्-ईप्) स्त्री इति, भ्रमेर्डू: इत्यौणादिकसूत्रेण भ्रमति नेत्रोपरि इति (भ्रम-डू) भ्रू इति च पदं सिद्धम्] अतः स्त्री-भ्रू-शब्दयोरीदूतो-र्नित्यस्त्रीत्वाभावात्, (१२५) सूत्रार्थं धुसंज्ञाविधानम् । पाणिनिः ६।४।७७,७९ ।

¶ स्त्रीरूपं मुनित्रयेण ।

स्त्रीभ्यां स्त्रीभ्यः, स्त्रियाः स्त्रीभ्यां स्त्रीभ्यः, स्त्रियाः स्त्रियोः स्त्रीणां, स्त्रियां स्त्रियोः स्त्रीषु । *

श्रीः श्रियौ श्रियः । हे श्रीः । ङित्यामि च भेदः । श्रियै श्रिये, श्रियाः श्रियः, श्रियाः श्रियः, श्रीणां श्रियां, श्रियां श्रियि श्रीषु ।†

सुध्यादयः पुंवत् । सुष्ठु धीः, प्रकृष्टा धीरिति नित्यस्त्रीत्वे सुधीप्रध्यौ श्रीलक्ष्मीवत् । ‡

---

* स्त्रीशब्दात् अमि शसि च स्त्रियं स्त्रियः इति, अनेन सूत्रेण धातुसंज्ञायाम् आदौ (१२५) इयादेशे पश्चादीकारान्तत्वाभावात् (१०२) अमशसोरादिलोपो न स्यात्; घुसंज्ञाविकल्पपक्षे तु (१०२) स्त्रीं स्त्रीरिति । ङे ङसि ङस् ङि विभक्तिषु स्त्रियै स्त्रियाः स्त्रियाः स्त्रियाम्—एतेषु (९९) स्त्रीषुच ङितीत्यत्र स्त्रीशब्दवर्जनात् (९६) नित्यनदीसंज्ञायाम् आदौ (१५६) या ङितामम्, (१२७) ङेराम् च, पश्चात् इयादेशः । आम्विभक्तौ स्त्रीणामित्यत्र (९८) वामीति सूत्रे स्त्रीशब्दवर्जनात् (९६) नित्यनदीसंज्ञायाम्, आगमविधेर्बलवत्त्वादादौ (११०) नुम्, अतएव अच्परत्वाभावात् न इयादेशः । "स्त्रियमतिक्रान्तः अतिस्त्रिः अतिस्त्रियौ अतिस्त्रियः, अतिस्त्रिम् इत्यादि । हे अतिस्त्रे । क्लीबे तु अतिस्त्रि अतिस्त्रिणी अतिस्त्रीणि" इत्यादि सिद्धान्तकौमुदी । पाणिनिः ६।४।८० ।

† हे श्रीरिति (९७) नास्त्रीषुच इति नदीसंज्ञानिषेधात् (१५२) न ह्रस्वः । ङिति आमि च भेदः, स्त्रीशब्दात् विशेष इत्यर्थः, (९९) स्त्रीषुच ङितीति (९८) वामीति सूत्राभ्यां नदीसंज्ञा-विकल्पनात् रूपद्वयमिति यावत् । श्री-ङे (९९,१५६,१२५,२२)=श्रियै, वा (१२५)=श्रिये । श्री-आम् (९८,११०,१०७)=श्रीणां, वा (१२५) श्रियाम् । श्री-ङि (९९,१२७,१२५)=श्रियां, वा (१२५) श्रियि ।

‡ सु शोभना धीर्यस्याः यस्य वा इति बहुव्रीहौ सुधीशब्दस्य स्त्रीलिङ्गपुंलिङ्गयोरेकरूपतया नित्यस्त्रीत्वाभावेन नदीसंज्ञाभावात् स्त्रीलिङ्गविहितकार्याभावे पुंवदित्यर्थः, आदिशब्दात् सुश्री-यवश्री-प्रध्यादयः । शोभना चासौ धीश्चेति सुधीः, प्रकृष्टा चासौ धीश्चेति प्रधीरिति कर्मधारय-समासे तु नित्यस्त्रीत्वान्नदीसंज्ञायां सुधी-प्रध्यौ क्रमात् श्री-लक्ष्मीवत् । सुधीशब्दः इयस्थानित्वेन ङिति आमि च (९९,९८) वा नदीसंज्ञायां श्री-शब्दवत्, प्रधीशब्दस्तु नित्यस्त्रीत्वेन (९६) नित्यं नदीसंज्ञायां लक्ष्मीशब्दवदित्यर्थः । "प्रधीशब्दस्य तु वृत्तिकारादीनां मते लक्ष्मीवद्रूपम्, पदान्तरं विनापि स्त्रियां वर्त्तमानत्वं नित्यस्त्रीत्वमिति स्वीकारात्; लिङ्गान्तरानभिधायकत्वं तदिति कैयट-मते पुंवद्रूपम् । प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवत् ।" इति सिद्धान्तकौमुदी ।

इति ईदन्ताः ।

धेनुर्मतिवत् साध्यः । धेनुः धेनू धेनवः इत्यादि । *

वधूर्गौरीवत् । वधूः वध्वौ वध्वः इत्यादि । एवं चमूतन्वादयः । †

भ्रूः श्रीवत् । भ्रूः भ्रुवौ भ्रुवः इत्यादि । सुभ्रूः, हे सुभ्रु । ‡

पुनर्भूः सुलूवत् । § सुभूः पुंवत् । ¶

स्वसा धातृवत् । माता पितृवत् । ‖

द्यौः गोवत् । **

सुराः पुंवत् । ††

नौः ग्लौवत् । ‡‡

इति अजन्तस्त्रीलिङ्गपादः ।

---

* इति उदन्ताः ।

† तनूशब्दः (२०८) ऊङन्तपक्षे वधूवत्, अनूङन्तपक्षे धेनुवदित्यर्थः ।

‡ भ्रू-ङौ (१६८,१६५)—भ्रुवौ इत्यादि । हे सुभ्रू-धि (१५२,१०२)—सुभ्रु । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न्यायेन विसर्गनिपातजनितो ह्रस्वविधिर्विसर्गलोपनिमित्तं न भवतीत्यतः सुभ्रुरिति पदं विसर्गान्तमिति केचित् । हे सुभ्रूरिति तु पाणिनीयाः (१५२ सूत्रस्य टीका द्रष्टव्या)। "विभावना सुभ्रु कुतः पितुर्गृहे इति कालिदासप्रयोगोऽप्यनुपपन्न इति बोध्यम्" इति तत्त्वबोधिनी ।

§ पुनर्भूशब्दस्य (१२६) वर्ष्वादीति वकारप्राप्त्या सुलूशब्देन साम्यं न तु सर्वरूपैः, तेनास्य विषदार्थे नित्यस्त्रीत्वात् दीसंज्ञायां सर्वत्र वधूशब्दवदेव । एवं दृन्भू-वर्षाभू-कारभूणां रूपम् ।

¶ सुभूशब्दस्य नित्यस्त्रीत्वाभावेन दीसंज्ञाभावादित्यर्थः । इति ऊदन्ताः ।

‖ धातृवदिति (१२८) दृविप्राप्त्या, पितृवदिति (१३१) गुणप्राप्त्या, साम्यं, न तु सर्वरूपैः, तेन शसि स्वसॄः मातॄरिति च । इति ऋदन्ताः ।

** इति ओदन्ताः ।

†† शोभनो राः धनं यस्याः इति विग्रहे सुराःशब्दो रैशब्दवदित्यर्थः । [सिद्धान्तकौमुद्याम् 'राः पुंवत्' इति लिखितवत् । तदनुसृत्य तत्त्वबोधिन्यां 'रायेन राः स्त्री' इत्यादयो लिखिताः ।] इति ऐदन्ताः ।

‡‡ इति औदन्ताः ।

**१६०। क्लीबात् स्यमोऽधेर्मोऽतः ।**

(क्लीबात् ५।, सि-अमः ६।, अधेः ६।, मः १।, अतः ५।)।

अकारान्तात् नपुंसकात् परस्याधेः सेरमश्च मः स्यात् । *
ज्ञानं, हे ज्ञान ।

**१६१। क्लीबादयौः ।** (क्लीबात् ५।, ई ।१।, औः १।)।

क्लीबात् पर औरी स्यात् । ज्ञाने । †

**१६२। जस्शसोः शिः ।** (जस्-शसोः ६।, शिः १।)।

क्लीबात् परस्य जसः शसश्च शिः स्यात्, श इत् । ‡

**१६३। नुम्धयमादौ झसन्तरलादौ तु वा ।**

(नुम् ।१।, धयमादौ ७, झसन्तरलादौ ७, तु ।१।, वा ।१।)।

---

* (१०१) सदीर्घाभिन्नत्वेन अम आदिलोपे कृते सिद्धेऽपि अमः स्थाने मविधानं (१६८) स्यमोर्लुगित्यनेन सदीर्घाभिन्नत्वस्य बाधितत्वात् लुगापत्तिवारणार्थम्। ज्ञानमित्यत्र मकारस्य विभक्त्यवयवभिन्नत्वात् (१०८) था क्लिमभर्नोरित्यनेन न था। पाणिनिः ७।१।२४।

† अत्र पुनः क्लीबादित्युपादानं सामान्यार्थम्, तेन सर्वस्मात् क्लीबात् औकार ई स्यादित्यर्थः। ज्ञान-औ = ज्ञान-ई (२२) = ज्ञाने। पाणिनिः ७।१।१९।

‡ शित्करणं शिविधज्ञापनार्थम्, श इति कृते सर्वादेशवचनमसौ आयाति, (१८८) धणी सी धी थे इत्यादिषु शिविधकरणं कष्टकरञ्च स्यात्। यति पञ्च षट् पञ्चानि इत्यादिषु (१९१) शिवपि शिवचार्थनिषेधात् न शिः। नीथि तु पतिकतीनि पतिपञ्चानि इत्यादौ स्यादेव। पाणिनिः ७।१।२०।

क्लीवस्य घौ परे नुम् स्यात्, न तु यमादौ, झलन्तरलयोरादौ तु वा स्यात् । *

## १६४ । नसव्महन्नोऽधो घोऽधौ घौ ।

(नस्-अप्-महत्-नः ६।, अधोः ६।, घं: १।, अधौ ७।, घौ ७।) ।

नसन्तस्य आपो महतो नान्तस्य च धुवर्णस्य घं: स्यात् अधौ घौ परे। ज्ञानानि। हौ ग्रीवत्। शेषं रामवत्। एवं वन-धन-फलादयः। †

## १६५ । तोऽन्यादेर्मोऽनेकतरात् ।

(तः १।, अन्यादेः ५।, मः ६।, अनेकतरात् ५।) ।

अन्यादेः परस्य स्यमोर्मस्य तः स्यात् न त्वेकतरात् परस्य ।

---

* यम् प्रत्याहारः, यमस्यादिः यमादिः, न यमादि-रयमादिस्तस्मिन्। झल् अन्ते ययोस्तौ झलन्तौ, झलन्तौ च तौ रलौ चेति झलन्तरलौ तयोरादिस्तस्मिन्। नुमो च उम् अन्त्यात् परः (१७)। उकारेत् चित्रार्थः, न तु [नु (१८)] विन्दुमार्गमिति यथाति (२४२)। नुमः प्रकृतिभाक्त्वात् ज्ञानानि इत्यादौ नान्तत्वात् (१६४) दीर्घः। चत्वारि, मद्यामि इत्यादौ यमादौ परत्वेन न नुम्। [झलन्तरलयोरुदाहरणं २४२सूत्रस्थ प्रदर्शितम्।] अत्र नुमयमः इति यमन्तस्यैव निषेधे कृते सम्प्रश्नस्य अपि सत्सु अर्चांसि इत्यादौ अनन्तत्वात् नुमोऽप्रसङ्गः स्यात्। पाणिनिः १।१।४२, ७।१।७२।

† नस् च अप् च महांश्च न च समाहारे तस्य। नृस्मानान्तस्य अप्शब्दस्य महच्छब्दस्य नान्तस्य च धन्यस्वरस्य दीर्घो भवति सिजिके घौ परे, न तु धातोः नृस्मानान्तस्य नान्तस्य च इत्यर्थः। यथा—विद्वान् आपः महान्। न इति नान्तविशेषस्य ग्रहणं, यथा राजा इत्यादि। ज्ञानानीत्यादौ नुमो विकृतभाक्त्वात् नान्तत्वम्। पचन् इत्यादौ तु नकारस्य विकृतभाक्त्वेऽपि विकृतमध्यविहितत्वात् न नान्तत्वम्। अधौ किं, हे विद्वन् इत्यादि। पूर्वतः सिद्धत्वादपि घौ-कथनं सर्वविकृतेषु दीर्घार्थम्। ज्ञान-अस् (१६२,१६३,१६४)—ज्ञानानि। द्वितीया प्रथमावत्। शेषं प्रथमाद्वितीयाभिन्नं रामशब्दवत्। ज्ञानवीज-क्लीबलिङ्ग-धनादयः शब्दाः एवमेवम्। पाणिनिः ६।४।८,१०,११।

अन्यत् अन्ये अन्यानि । हे अन्य । पुनस्तद्वत् । शेषं पुंवत् । *
एवमन्यतरादयः । अनेकतरात् किम्—एकतरम् ।

१६६ । जरातोऽम् वा । (जरातः ५।, अम् ।१।, वा ।१।) ।
जराशब्दात् परस्य अमोर्मस्य अम् स्यात् वा ।
अजरसम् अजरम्, अजरसी अजरे, अजरांसि अजराणि । पुन-स्तद्वत् । शेषं पुंवत् । †

(११६) पाददन्तेति शीर्षंहृदयोदकासनानां शीर्षन्हृदुद-आसनः । शीर्षाणि शीर्ष्णा शीर्षभ्यामित्यादि । ‡ हृन्दि हृदा हृद्भ्यामित्यादि । उदानि उद्ना उदभ्यामित्यादि । आसानि आस्ना आसभ्यामित्यादि । पक्षे शेषे च ज्ञानवत् ।

---

* (१६०) प्रकरणबलात् अमोः स्थाने जातस्य मकारस्य तकारो भवतीति; तेन पुंलिङ्गे अमि अन्यमिति । अन्यतमस्य अन्यादित्वाभावात् (८६सूत्रटीका द्रष्टव्या) अन्यतममित्येव । अन्य-सि (१६०,१६५)=अन्यत् । पाणिनिः ७।१।२५; "एकतरात् प्रतिषेधो वक्तव्यः" इति वार्त्तिकञ्च ।

† क्लीबेऽपि जराशब्दात् शब्दान्तरेण प्राप्तसमासात् जराशब्दादित्यर्थः । नास्ति जरा यस्य तत् अजरम् । अजर-सि (१६०,१६६,११५)=अजरसम् । जरसादेशाभावपक्षे (१०२) ख्दीर्घ-मित्यनेन अम आदेशेऽपि अजरम् । अमोऽभावपक्षे च (१६०) अजरमिति । अत्र अमो नित्यत्वे-ऽपीष्टसिद्धौ वाग्रहणं व्यवस्थार्थं, व्यवस्था च—द्वितीयैकवचने अमि अजरसत्वाद्-वचनतोऽपि जरसादेशात् पूर्वम् अमः स्थाने (१६०) मकारः स्यात्, पश्चादनेन अमि अमः स्थितिरिति ; अन्यथा आदौ जरसादेशे (१६८) स्वमोर्लुगिति अमो लुगापत्तिः स्यादिति । अजर-औ (१६१, ११५)=अजरसी, पक्षे (२२)=अजरे । अजर-जस् (१६२,११५,१६२,१६४,५०)=अजरांसि, पक्षे अजराणि । सिद्धान्तकौमुदीमते "तोऽमादेशे कृते सन्निपातपरिभाषया न जरस्, अजरम् ; पराश्रयत्वात् जरसि कृते" इत्यादि—"सन्निपातपरिभाषया न (अमो) लुक् अजरसम्" इत्यादि ।

‡ शीर्षन्-शस् (१६२,११६,१६४,१०७)=शीर्षाणि । शीर्षन्-टा (११६,११७,१०७)=शीर्ष्णा, शीर्षन्-भ्याम् (११६,११८)=शीर्षभ्याम् । इत्यदन्ताः ।

## १६७ । क्लीबे ह्रस्वः । (क्लीबे ७।, ह्रस्वः १।)।

क्लीबे दीर्घस्य ह्रस्वः स्यात् । श्रीपं, ग्रामणि । *

## १६८ । स्यमोर्लुक् । (सि-अमोः ६॥, लुक् ।१।)।

क्लीबात् परयोः स्यमोर्लुक् स्यात् । † वारि ।

## १६९ । नुमिकोऽच्यनामि ।

(नुम् ।१।, इकः ६।, अचि ७।, अनामि ७।)।

इगन्तस्य क्लीबस्य नुम् स्यात् अचि परे, न त्वामि । वारिणी वारीणि । ‡

## १७० । सुर्वौ वा । (सुः १।, औ ७।, वा ।१।)।

इगन्तस्य क्लीबस्य सुर्वा स्यात् औ परे । हे वारे हे वारि । §
वारिणी वारीणि, वारिणा वारिणे वारिणः वारिणः वारिणोः

---

* तेन विधिस्तदन्तस्येति न्यायात् क्लीबलिङ्गशब्दस्य अन्तदीर्घस्य ह्रस्वः स्यात्, निमित्तान्तरापेक्षा नास्तीत्यर्थः । श्रियं पातीति श्रीपा, क्लीबलिङ्गवर्त्तित्वात् ह्रस्वे श्रीपमिति । पाणिनिः १।२।४७ । ह्रस्वादन्ताः ।

† (१६०) अकारान्तक्लीबात् स्यमोर्म-विधानेन अत्र अकारान्तभिन्नात् क्लीबादिति बोध्यम् । लुक्करणेन (८१) लुकि न तद्गेति निषेधात् तस्मिन् परे तत् चिह्नम् इत्यादौ न (१११) डेरः । विरामविहितत्वन्तु स्यादेव, यथा पयः हविः इत्यादि । पाणिनिः ७।१।२३ ।

‡ अत्र तेन तेनापि प्रत्ययेन इगन्तत्वादि बक्तव्यं, तेन मधुनी, सुधुनी, सुरिणी, पट्वीवर्णि प्रभृतीनि इत्यादि सिद्धम् । नुमो मित्त्वात् (१०) अन्त्याच्च परः । आमि त्वात्र प्रकृतिभावनि-मित्तानि इत्यादि सिद्धम् । नामि परे स्यात् वारीणि इत्यादौ नामत्वात् (१६३) दीर्घः । अनामीति आमभिन्ने अजादौ अचि परे इत्यर्थः, तेन वारीणामित्यादौ न स्यात् । वारि-औ (१६१,१६८,१००)—वारिणी । वारि-जस् (१६२,१६८,१६३,१००)—वारीणि । पाणिनिः ७।१।७३ ।

§ हे वारि इत्यादौ स्यमोर्लुगिति लुकि (८१) लुकि न तद्गेति निषेधात् (१२२) प्राप्ति-प्रतिषेधाभावात् अनेन पुनर्विकल्पेन गुणविधानम् । इत्यापि तेन तेनापि इगन्तत्व बक्तव्यं, तेन हे मधो हे मधु इत्यादि ।

वारीणाम्। * वारिणि वारिणोः। सुपि हरिवत्।

## १७१। पुंवद्वार्थोक्तपुंस्कं टाद्यचि।

(पुंवत् ।१।, वा ।१।, अर्थोक्तपुंस्कं १।, टाद्यचि ७।)।

इगन्तं क्लीबम् अर्थेन प्रोक्तपुंस्कं पुंवत् वा स्यात् टाद्यचि। अनादये अनादिने इत्यादि। शेषं वारिवत्। अर्थेन किं, पीलुने फलाय। †

## १७२। दध्यस्थिसक्थ्यक्ष्णोऽनङ्।

(दधि-अस्थि-सक्थि-अक्ष्णः ६।, अनङ् ।१।)।

एषामनङ् स्यात् टाद्यचि, ङकावितौ।

(११७) अनोऽल्लोपः। दध्ना दध्ने दध्नः दध्नः दध्नोः दध्नां दध्नि दधनि दध्नोः। शेषं वारिवत्। एवम् अस्थि सक्थि अक्षि। ‡

---

* वारि-आम् (११०,१०४,१००)=वारीणाम्।

† पुमानिव पुंवत्। अर्थेन एकार्थेन उक्तः पुमान् येन तत् अर्थोक्तपुंस्कम्। तदुक्तम्—एक एव हि यः शब्दः पुंसि क्लीबे च वर्तते। एकमेवार्थमाख्याति उक्तपुंस्कः स उच्यते॥ यथा, नास्ति आदिर्यस्य तत् अनादि कुलम् आदिरहितमित्यर्थः, एवम् अनादिः पुरुषः आदिरहित इत्यर्थः, अतएव अनादिशब्दः एकार्थोक्तपुंस्कः। एकार्थेन किं, पीलुने फलाय, पीलुशब्दः फलवाचित्वे क्लीबलिङ्गः, वृक्षवाचित्वे पुंलिङ्गः इति न एकार्थेन उभयलिङ्गता। वृक्षवाचित्वे तु पीलवे। अनादि-ङे (पुंवद्भावे, १२२,२५)=अनादये। पुंवद्भावविकल्पपक्षे (१६९)=अनादिने। कटवे कटुने इत्यादि। पाणिनिः ७।१।७४। "प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कम्" इति बालकौमुदी।

‡ दधि च अस्थि च सक्थि च अक्षि च समाहारे तस्य। (१७) क्वित्वादन्त्यस्य स्थाने। ...ऽप्यवमादिशः, तेन पीतदध्ना पुरुषेण, पीतास्था स्त्रियेन, पीतदध्ने स्त्रियै इत्यादि। [अति-...ति। दधि अतिक्रान्तेनेत्यर्थः। ...प्रियदध्नेति उरःप्रभृतिषु दधिमधुमाक्षीति पाठात् ...: कप् प्राप्तः, भाष्यकारप्रयोगादेव प्रियदधिशब्दे न भवतीत्याहुः। तच्चिन्त्यम्। भाष्ये ताद्दश...स्य बहुषु पुस्तकेष्वनुपलम्भात्। स्त्रियान्तु प्रियदध्ना प्रियदध्ने इति केचित्तन्न। सन्निपात...भावया बहिरङ्गपरिभाषया च ङीपोऽप्रवृत्तेः। तस्मात् पुंस्येव स्त्रियामपि अतिदध्नेत्यादिवदेव ...म्। इति प्रौढमनोरमा।] अथ दध्यादीनां ङकानामेव ग्रहणं, तेन दधातीति (१११९) ..., अस्य दधये दधिने आनाय इत्यत्र अनङ् न स्यात्। दधि-टा=दधन्-आ (११७)=...इत्यादि। दधामिवाग्न अजादेरव्याद्यनङ्, न आमः स्थाने नुम्। पाणिनिः ७।१।७५। इति इदन्ताः।

सुधि सुधिनी सुधीनि । हे सुधे हे सुधि । डौ प्रीवत् । सुधिया सुधिना इत्यादि । एवं प्रध्यादयः । *

मधु मधुनी मधूनि । हे मधो हे मधु । डौ प्रीवत् । मधुना मधुभ्यामित्यादि । एवम् अम्बु-सान्वादयः । (११६) घाददन्तेति स्नु वा । स्नूनि सानूनि इत्यादिभेदः । †

धातृ धातृणी धातॄणि । धौ—हे धातः हे धातृ । डौ प्रीवत् । धात्रा धातृणा इत्यादि । एवं ज्ञातृ-कर्त्रादयः । ‡

१७२ । एचो युत् स्नम् । (एचः १।॥, युत् ।१।, स्नं १।) । §

प्रद्यु प्रद्युनी प्रद्यूनि । हे प्रद्यो हे प्रद्यु । डौ प्रीवत् । प्रद्यवा प्रद्युना इत्यादि । ¶ सुरि सुरिणी सुरीणि । हे सुरे हे सुरि । सुराया सुरिणा सुराभ्यामित्यादि । ‖ सुनु सुनुनी सुनूनि । हे सुनो हे सुनु । सुनावा सुनुना इत्यादि । **

इति क्लीबलिङ्ग पादः ।

इति षजन्ताध्यायः ।

---

* सु शोभना धीर्यस्येति सुधि कुलम् इत्यादीनामप्येवमर्थेन उक्तपुंस्त्वम् । एवं प्रध्यादयः । इति ईदन्ताः ।

† इति उदन्ताः । [प्रियक्रोष्टु-शब्दस्य टादौ विकल्पः इति सिद्धान्तकौमुदी ।]

‡ दधातीति धातृ कुलम् धात्रर्थेनार्थेन उक्तपुंस्त्वम् । एवं जानातीति ज्ञातृ कुलम्, करोतीति कर्तृ कुलमित्यादि । सुधि, मधु, धातृ—औ (१६१,१६८)—सुधिनी, मधुनी, धातृणी । सुधि, मधु, धातृ—जस् (१६२,१६८,१६४)—सुधीनि, मधूनि, धातॄणि । सम्बोधने (१००) वा गुणः । टाद्यचिविभक्तौ पुंवद्भावविकल्पः । इति ऋदन्ताः ।

§ (१६०) क्लीबे वा: इत्यादिभिः कं प्राप्तुवन्त एचो युदेव (उत्, इत्) भवन्तीत्यर्थः । एचो ह्रस्वः (६) कण्ठालेन साम्यात् अकार एव जायते, अतः एतत्सूत्रकरणम् । पाणिनिः १।१।४८ ।

¶ प्रकृष्टा द्यौः यस्मिन् तत् प्रद्यु पुष्पम् । अत्र पुंवद्भावे ओदन्तवत् । इति ओदन्ताः ।

‖ शोभनो राः धनं यस्य तत् सुरि कुलम् । अत्र पुंवद्भावे रैशब्दवत् । इति ऐदन्ताः ।

** शोभना नौर्येन तत् सुनु जलम् । अत्र पुंवद्भावे नौशब्दवत् । इति औदन्ताः ।

[प्रद्यवा प्रद्युना, सुराया सुरिणा, सुनावा सुनुना—इत्यादिपदानि दीर्घदैर्घ्येण प्रायो संलभ्यन्ते

## १म पादः—हसन्त पुंलिङ्ग शब्दः ।

### १७४ । द्विरन्तजक्षादौ द्विः ।

(द्विरन्त-जक्षादौ १॥, द्विः १।) ।

अन्तद्वित्वशब्दो जक्षादिश्च द्विसंज्ञः स्यात् । *

### १७५ । हो ढो भौ । (हः ६।, ढः १।, भौ ७।) ।

हस्य ढः स्यात् भौ परे । †

(१४८)भावोब्भसात् सेर्लोपः। (६४)झप्झसोरिति चप्जबौ वा।
लिट् लिड्, लिहौ लिहः, लिहं लिहौ लिहः, लिहा लिड्भ्यामित्यादि ।

### १७६ । दादेर्घः । (दादेः ६।, घः १।) ।

दकारादेर्हस्य घः स्यात् भौ परे । ‡

---

रूपाणि लिखितानि । भट्टोजिदीक्षितेन तु माधवमतानुसारिणा तान्यनुक्तानि एतेषु भाषित-पुंस्कत्वाभावात् । वस्तुतस्तु एकदेशविकृतमनन्यवद्भवतीति न्यायात् तत्र भाषितपुंस्कत्वमस्त्येव, अन्यथा सुधीशब्दादिष्वपि न स्यात् इति विचारणीयम् । अतः "प्रायोदाहृतमपि नातीव दुष्यति" इति श्रीकृष्णतर्कवागीशव्याख्यायां तेनैव लिखितम् ।]

---

* पूर्वं प्रयोजनाभावादनुक्तां संज्ञामाह द्विरन्तेति । द्विः (८८५) उक्तं यस्य स द्विरन्तः, स च जक्षादिश्च तौ द्विरन्तजक्षादी । जक्षादिश्च—जक्षिति दरिद्राति-चकासि-शासिरेव च । दीधी-वेवी च सप्तामी जक्षादिः समुदाहृतः ॥ द्विसंज्ञाफलन्तु (१८२,२४१,४४२,६९०) एतेषु सूत्रेषु द्रष्टव्यम् । पाणिनिः ६।१।५,६ ।

† सिद्धस्य धातोर्हस्य ढः स्यात् भौ परे (८४) इत्यर्थः । पाणिनिः ८।२।३१ ।

‡ द आदिर्यस्य स दादिस्तस्य । दादेरिति शब्दस्य धातोर्वा विशेषणं, [illegible] धातोर्वा [illegible] । [illegible] ; तेन धुक् धुग्, [illegible] इत्यादौ स्यात्, दधिलिट् दामलिट् इत्यादौ न स्यादित्यर्थः । पाणिनिः ८।२।३२, [illegible] ।

## १७७ । झभान्तस्यादिजबां झभाः फे, धोस्तु सध्वेऽन्ते च ।

(झभान्तस्य ६।, आदिजबां ६॥, झभाः १॥, फे ७।, धोः ६।, तु ।१।, सध्वे ७।, अन्ते ७।, च ।१।) ।

झभान्तस्यादौ स्थितानां जबानां झभाः स्युः फे परे, धोस्तु सध्वे अन्ते च ।

धुक् धुग् दुहौ दुहः, दुहं दुहौ दुहः, दुहा धुग्भ्यामित्यादि । *

## १७८ । मुहां घङ् वा भौ ।

(मुहां ६॥, घङ् ।१।, वा ।१।, भौ ७।) ।

मुहादीनां घङ् वा स्यात् भौ परे ।

मुक् मुग् मुट् मुड् मुहौ मुहः, मुहं मुहौ मुहः, मुहा मुग्भ्यां मुड्भ्यामित्यादि ।

एवं द्रुह-स्नुह-नम्र-स्निहः । †

---

* झभः अन्ते यस्य स झभान्तः तस्य आदौ स्थिताः जबः तेषाम् । तदयमर्थः—यस्य शब्दस्य धातोर्वा अन्ते झभ्, तस्यैव आदिस्थितानां ज ब ग ड द इत्येतेषां स्थाने क्रमेण——————————झ ढ घ ध भ इत्येते भवन्ति, शब्दस्य—फे (८५, इति विरामे च) परे, धातोस्तु—सध्वे विरामे च परे इत्यर्थः । अत्र विशेषः—आदौ जब् अन्ते झभ् मध्ये स्वर-वर्णस्य एकस्वरस्य च व्यवधानेऽपि भविष्यति न तु बहुस्वरव्यवधाने, तेन गर्दभमाचष्टे इति णौ क्विपि गर्दभ् इत्यादौ न स्यात् । [एतदर्थं पाणिनौ 'एकाचः' इति ।] अस्यौ वाड़े इति धातोर्दन्त्यवकारत्वात् मुमाविन् इत्यादावपि न प्रसङ्गः । अकारस्य लकारो न स्यादिति बोध्यः, तेन अम्शब्दस्य अप्, लीह् शब्दस्य लीट् इति पदं भविष्यति (संधिप्रकारे सुबन्तपादस्य ११९ सूत्रं द्रष्टव्यम्) । दुह-क्विप् (१३८,१७६,१७७,८४)—धुक् धुग् इत्यादि । पाणिनिः ८।२।३७ ।

† मुहादिरिति बहुवचनं गणार्थम् । गणश्च मुह द्रुह ष्णुह ष्णिह इति । द्रुहस्यैव मुहादिपाठबलात् पक्षे हो ढो भाविस्यमेव ढः, न तु दादित्वं घत्वमेव घः, तेन ध्रुघ् ध्रुक् ध्रुट् ध्रुड् इति । द्रुह-क्विप् (१३८,१७८,८४)—ध्रुक् ध्रुग् । पक्षे (१७४,८४)—ध्रुट् ध्रुड् । पाणिनिः ८।२।३३,६२ ।

१७९। वाहो वौ पौ श्वेतात्तु वा।

(वाहः ६।, वा ।१।, औ ।१।, पौ ७।, श्वेतात् ५।, तु ।१।, वा ।१।)।

वाहो वा-शब्दस्य औः स्यात् पौ परे, श्वेतवाहस्तु वा। विश्वौहः विश्वौहा इत्यादि। शेषं लिड्वत्। *

१८०। अनादूः। (अनात् ५।, ऊः १)।

अनवर्णात् परो वाहो वा ऊः स्यात् पौ परे। भूहः भूहा इत्यादि। †

१८१। अनडुच्चतुरोऽणाणौ धिव्योः।

(अनडुह्-चतुरः ६।, अण्-आणौ १।, धिव्योः ७।)।

अनडुह-चतुरस्य धौ परे अण् वौ परे आण् स्यात्, अ इत्। ‡

१८२। हो नः सौ। (हः ६।, नः १।, सौ ७)।

अनडुहो हस्य नः स्यात् सौ परे। अनड्वान्। हे अनड्वन्।

---

* वाह् इति-वहधातोः (१०२८) विच्प्रत्ययेन सिद्धम्। औ-करणेऽपि सिद्धे औ-करणं [illegible] परत्वादि प्राप्त्यर्थं, तेन भारवाह शब्दस्य शसादौ भारौहः इत्यादि। विश्ववाह्-शस् = विश्व-औह्-शस् (२४) = विश्वौहः इत्यादि। श्वेतवाहस्तु उदाहरणं १८६ सूत्रयो प्रदर्शितम्। पाणिनिः ६।४।१३२, ६।१।८९।

† अः अवर्णः, न अः अनस्तस्मात् अनात्। वाहजातीयस्य विभक्तिविधौ विहितेऽपि वाहजातीयत्वमिति न्यायात् अवर्णसजातीयोऽचेव ग्राह्यः, न तु हल्। ततश्च—पूर्वसूत्रम् अवर्णविषयं प्रदर्शितवत्, एतत् सूत्रम् इवर्णादि-विषयमिति। भूवाह्-शस् = भू-ऊह्-शस् (२२) = भूहः। एवं शालिवाह्-शस् (१८०, २४)—शाल्यूहः इत्यादि। [illegible] एव वाह [illegible], तेन [illegible] भूवाट् शालिवाट् इत्यादि-पदानि [illegible]। पाणिनिः ६।४।१३२।

‡ अनडुच्चतुर् इति एकवचनं [illegible]। [illegible] (१०) [illegible]। पाणिनिः ७।१।९८, ९९।

अनड्वाहौ अनड्वाहः । अनडुहः अनडुहा । *

१८३ । स्रस्ध्वस्वस्वनडुहां दङ् फे ।

(स्रस्-ध्वस् वस्-अनडुहां ६॥, दङ् ।१।, फे ७) ।

एषां दङ् स्यात् फे परे, ङकारितौ । अनडुद्भ्यामित्यादि । †

१८४ । श्वेतवाहवयाउक्थशास्पुरोडाशां डस्ङ् । (श्वेतवाह—पुरोडाशां ६॥, डस्ङ् ।१।) ।

एषामन्तस्य डस्ङ् स्यात् फे परे, ङकारितौ । ‡

१८५ । अत्वसोऽधोः सौ घोऽधौ ।

(अतु-असः ६।, अधोः ६।, सौ ७, घः १।, अधौ ७) ।

अत्वन्तस्यासन्तस्य च घः स्यात् अधौ सौ परे, न तु धोः । श्वेतवाः । §

---

* उभयोरनुक्तावपि चतुरौ इकाराभावात् अनडुह इतीत्वं: । अनडुह्-सि (१८८, १८१)—अनडु-आ-ह् (११,१८२)—अनड्वान् । हे अनड्वन् इत्यादि । पाणिनिः ७।१।८२ ।

† अनुह अनुह धातुभ्यां क्विप्प्रत्यये स्रस् ध्वस् वस्तौ, वहतीति (१०८६) [illegible] क्विप्प्रभृतिः । (१७) इत्ये ञ्जिवादन्तस्य लोपे । सम्प्रसारणमिति (४०) वस्य ह [illegible] ओर्धि: धि (१०२) इत्यत्र नञ्पक्षेण वाचितत्वादनेन दङ्विधानम् । पुनः इत्यत्र [illegible] धातोः क्विपि वसुप्रत्ययान्तताभावात्र दङ् । पाणिनिः ८।२।७२ ।

‡ ञ्जिवादन्तस्य लोपे, (१२६) ञ्जिवात् टिलोपे, वद् इत्यत्र ञ्जिविः । [illegible] वचनात् उक्थात् पुरोडाश् इतीमौ अन्द्विवचनेन [illegible], [illegible] [illegible] ञ्जिवाञ्जिवाद्यें, तेन श्वेतवाहादीनामदन्तत्वात् अनडोऽऽधौरिति दीर्घः स्यात् । [illegible] [illegible] अन्द्विवचनेन चक्यं, तेन इत्यत्राद्यौ नपि इत्यत्र इत्यत्र च दीर्घः । पाणिनिः [illegible] ।

§ अतुश्च असश्च तत् । [illegible] अनुमनेन [illegible] (७१६, ११६) [illegible] सामान्यत च (१४२,२४२,३४६,१०११,१०८६,११०७) [illegible]

१८६। उहुणो धौ वा। (उहुणः ६।, धौ ७।, वा ।१।)।

उहुणो धौ परे वी वा स्यात्। हे श्वेतवाः हे श्वेतवः। श्वेतवाहौ श्वेतवाहः, श्वेतवाहं श्वेतवाहौ श्वेतौहः श्वेतवाहः, श्वेतौहा श्वेतवाड्भ्यां श्वेतवोभ्यामित्यादि। *

(१११) सिवादिषिति षः। तुराषाट् तुराषाड् तुराषाहौ तुराषाहः, तुराषाहं तुराषाहौ तुराषाहः, तुराषाहा तुराषाड्भ्यामित्यादि। †

चत्वारः चतुरः, ‡ चतुर्भिः चतुर्भ्यः चतुर्भ्यः। (११०) नुमागम इति चतुर्णाम्।

१८७। रुरो विः सुपि। (रुरः ६।, विः १।, सुपि ७।)।

रुरो विः स्यात् सुपि परे, न त्वन्य-रेफस्य। चतुर्षु। §

---

| अङ्ग | सम्बोधने । पुनः । |
| अचिरात् | शीघ्रं । |
| अच्छ | आभिमुख्ये । |
| अञ्जसा | शीघ्रं । यथार्थं । |
| अट्ट | उच्च शब्दे । |
| अतस् | अतएव । |
| अति | प्रकर्षे । लङ्घने । |
| अतीव | अतिशये, अधिके । |
| अत्र | एतस्मिन्, एतयोः, एतेषु, एतस्यां, एतयोः, एतासु । |
| अथ, अथो | अनन्तरं । प्रश्ने । मङ्गले । आरम्भे । साकल्ये । अधिकारे । प्रतिज्ञायां । समुच्चये । |
| अथकिम् | बाढं । |
| अद्धा | सत्ये । स्फुटे । अवधारणे । |
| अद्य | अस्मिन्नहनि । |
| अधरात्, अधरेण | नीचैः, निम्ने । |
| अधस्, अधस्तात् | नीचैः, निम्ने । |
| अधुना | इदानीं । |
| अनु | पश्चात् । सादृश्ये । |
| अनुपदम् | अनन्तरं । |
| अन्ततस् | शेषे, न्यूनकल्पे । |
| अन्तर् | मध्ये । शेषे । अन्तःकरणे । स्वीकारे । |
| अन्तरा | विना । मध्ये । |
| अन्तरेण | विना । मध्ये । |
| अन्यत् | अन्यप्रकारे । |
| अन्यतरेद्युस् | द्वयोरेकतरस्मिन् दिने । |
| अन्यतस् | अन्यत्र । अन्यस्मात् । |
| अन्यत्र | अन्यस्थाने । विना । |
| अन्यथा | अन्यप्रकारे । |
| अन्यदा | अन्यसमये । |
| अन्येद्युस्, अधरेद्युस्, अपरेद्युस् | अन्यदिने । |
| अपि | समुच्चये । प्रश्ने । सम्भावनायां । निन्दायां । शङ्कायां । |
| अभितस् | समन्तात् । उभयतः । सामीप्ये । आभिमुख्ये । साकल्ये । शीघ्रतायां । |
| अभीक्ष्णम् | पौनःपुन्ये । |
| अमा | साहित्ये । सामीप्ये । |
| अमुत्र | परलोके । |
| अयि | सम्बोधने । प्रश्ने । अनुनये । |
| अये | स्मरणे । सम्बोधने । सम्भ्रमे । |
| अरे, अरेरे | सम्बोधने । |
| अर्व्वाक्, अर्व्वाच् | पूर्व्वं, पश्चात् । वक्रे । |
| अलम् | व्यर्थतायां । सामर्थ्ये । भूषणे । पर्याप्तौ । वारणे । |
| अवश्यम् | निश्चये । |
| अवाक् | दक्षिण-दिग्-देश-कालेषु । |
| असकृत् | पौनःपुन्ये । |

* अर्थेषु यत्र यत्र विशेष्यविशेषणादिशब्दा व्यवहृताः, तत्र तत्र तद्वाचका बोद्धव्याः ।

| अव्ययं | तदर्थः |
|---|---|
| अस्तम् | अदर्शने, नाशे। |
| अस्ति | विद्यमानतायां। |
| अस्तु | असूया-स्वीकारे। |
| अहह, अहहा | अद्भुते। खेदे। |
| अहे | सम्बोधने। |
| अहो | आश्चर्य्ये। वितर्के। |
| अहोवत | करुणोक्तौ। |
| अह्नाय | शीघ्रं। |
| | **आ** |
| आ | स्मरणे। वाक्ये। |
| आङ् | मर्यादायां। अभिव्याप्तौ। ईषदर्थे। |
| आम् | स्वीकारे। |
| आस् (आः) | विरक्तौ, कोपे। पीड़ायां। |
| आरात् | दूरे। समीपे। |
| आविस् | प्राकाश्ये। |
| आहो, आहोस्विन् | वितर्के। प्रश्ने। |
| | **इ** |
| इ | खेदे। कोपे। सम्बोधने। विषादे। जुगुप्सायां। |
| इतरेद्युस् | अन्यदिने। |
| इति | एवं। आदौ। हेतौ। प्रकरणे। प्रकाशे। समाप्तौ। |
| इतिह | उपदेशपरम्परायां। |
| इत्थम् | एवम्प्रकारे। |
| इदानीम् | अधुना। |
| इव | साम्ये। वाक्यालङ्कारे। |
| इस् | कष्टे। विषादे। |
| | **ई** |
| ईषत् | अल्पत्वे। |
| | **उ** |
| उ | वितर्के। पादपूरणे। क्रोधोक्तौ। सम्बोधने। |
| उच्चैस्, उच्चैर् | उच्चे। अधिके। |

| अव्ययं | तदर्थः |
|---|---|
| उत | विकल्पे। समुच्चये। |
| उताहो, उताहोस्वित् | प्रश्ने। विकल्पे। |
| उत्तरतस्, उत्तरात्, उत्तरेण | उत्तरस्यां दिशि। |
| उत्तरेद्युस् | परदिने। |
| उदक् | उत्तर दिग्-देश-कालेषु। |
| उपजोषम्, उपयामम् | आनन्दे। |
| उपांशु | निर्जने। |
| उभयतस् | उभयदिशः। |
| उभयद्युस्, उभयेद्युस् | उभयदिने। |
| उम् | क्रोधोक्तौ। प्रश्ने। स्वीकारे। |
| उररी, उरी, उरुरी | स्वीकारे। विस्तारे। |
| उषा | निशा-शेषे। |
| | **ऊ** |
| ऊ | दुःखे। सम्बोधने। |
| ऊम् | गर्व्वे। क्रोधे। प्रश्ने। |
| ऊररी, ऊरी, ऊरुरी | स्वीकारे। विस्तारे। |
| | **ऋ** |
| ऋते | विना। |
| | **ए** |
| ए | स्मरणे। सम्बोधने। |
| एकदा | एकस्मिन् काले। |
| एतर्हि | अधुना। |
| एव | अवधारणे। |
| एवम् | इत्थं। स्वीकृतौ। सादृश्ये। अवधारणे। |
| | **ऐ** |
| ऐ | स्मरणे। सम्बोधने। |
| ऐषमस् | वर्त्तमानवत्सरे। |
| | **ओ** |
| ओ | सम्बोधने। स्मरणे। |
| ओम् | प्रणवे। स्वीकृतौ। |
| | **औ** |
| औ | सम्बोधने। वारणे। |

## क

| अव्ययं | तदर्थः |
|---|---|
| कच्चित् | प्रश्ने । इच्छाप्रकाशे । |
| कचि | क्षमार्थे । |
| कति | किंपरिमाणे । कियत्परिमाणे । |
| कथम् | किंप्रकारेण । |
| कदा, कदाचन, कदाचित्, कर्हि, कर्हिचित् | कस्मिन् काले । |
| कम् | जले । मस्तके । सुखे । |
| कामम् | यथेष्टे । अकामानुमतौ । |
| कारिका | मर्यादायां । पीडायां । यत्ने । |
| किञ्च | अपिच । |
| किञ्चन, किञ्चित् | अल्पे, कियदंशे । |
| किन्तु | परन्तु । |
| किमु | संशये, वितर्के । |
| किम् | कुत्सिते । प्रश्ने । वितर्के । |
| किमुत | अतिशये । विकल्पे । |
| किमु, किंस्वित् | वितर्के । सम्भावनायां । |
| किंवा | अथवा । |
| किल | निश्चये । अलीके । सम्भावनायां । प्रसिद्धौ । ऐतिह्ये । अनुनये । हेतौ । |
| कु | कुत्सिते । पापे । ईषत् । |
| कुतस् | कस्मात् हेतोः । कस्मात् स्थानात् । कुत्र । |
| कुत्र | कस्मिन् स्थाने । |
| कुत्रचित् | कस्मिंश्चित् स्थाने । |
| केशाकेशि | केशग्राहं प्रवृत्तं युद्धे । |
| क्व | कुत्र । |
| क्वचन, क्वचित् | कस्मिंश्चित् । |

## ख

| | |
|---|---|
| खलु | निश्चये । वाक्यालङ्कारे । निषेधे । प्रश्ने । अनुनये । |

## च

| अव्ययं | तदर्थः |
|---|---|
| च | समुच्चये । समाहारे । अन्वाचये । इतरेतरार्थे । पादपूरणे । |
| चतुर्धा | चतुःप्रकारं । चतुर्वारं । |
| चिरम्, चिरेण, चिराय, चिररात्राय, चिरात्, चिरस्य, चिरे | चिरकालं, बहुकालम् । |
| चेत् | यदि । |

## ज

| | |
|---|---|
| जातु | कदाचित् । |
| जोषम् | मौने । सुखे । |

## झ

| | |
|---|---|
| झटिति | शीघ्रं । |

## त

| | |
|---|---|
| तत् | तस्मात् हेतोः । |
| ततस् | तदनन्तरं । तद्धेतोः । |
| तत्र | तस्मिन्, तयोः, तेषु, तस्यां, तयोः, तासु । |
| तथा | तादृशे । सादृश्ये । |
| तदा, तदानीम् | तत्काले । |
| तावत् | परिमाणे । साकल्ये । पर्यन्ते । अवधारणे । वाक्यालङ्कारे । |
| तिरस् | वक्रतायां । अप्रकाशे । अन्तर्धाने । |
| तिर्यक् | वक्रतायां । पार्श्वे । |
| तु | किन्तु । निश्चये । भेदे । पादपूरणे । |
| तूष्णीम्, तूष्णीकाम् | मौने । |
| त्रेधा, त्रैधम् | त्रिःप्रकारे । |

## द

दक्षिणतस्, दक्षिणात्, दक्षिणेन दक्षिणस्यां दिशि।

| अव्ययं | तदर्थः |
|---|---|
| दण्डादण्डि | दण्डप्रहारैः प्रहृत्य युद्धे । |
| दिवा | दिने । |
| दिष्ट्या | भाग्यवशतः । हर्षे । |
| दुष्ठु | निन्दिते । |
| दोषा | रजन्यां । |
| द्राक् | शीघ्रं । |
| द्विधा, द्वेधा | द्विवारे । द्विप्रकारे । |
| | **ध** |
| धिक् | निन्दायां । निर्भर्त्सने । |
| | **न** |
| न, नञ् | निषेधे । |
| नक्तम् | रात्रौ । |
| ननु | प्रश्ने । अनुज्ञायां । अनुनये । आमन्त्रणे । अवधारणे । विरोधोक्तौ । |
| नमस् | नमस्कारे, प्रणामे । |
| नवतिधा | नवतिप्रकारे । |
| नवतिशस् | नवतिवारे । |
| नवधा | नवप्रकारे । नववारे । |
| नवशस् | नव नव कृत्वा । |
| नहि, ना | निषेधे । |
| नाना | बहुविधे । उभये । विना । |
| नाम | सम्भावनायां । प्रसिद्धौ । क्रोधे । स्वीकारे । निन्दायां । |
| नास्ति | अविद्यमानतायां । |
| निकषा | निकटे । |
| नितराम् | अवश्यं, अत्यन्तं । |
| नित्यदा | सर्व्वदा । |
| नीचकैस्, नीचैस् | क्षुद्रे, अल्पे । |
| नु | प्रश्ने । विकल्पे । |
| नूनम् | निश्चये । वितर्के । |
| नो | निषेधे । |
| न्यक् | नीचे, तुच्छे । |

**प**

| अव्ययं | तदर्थः |
|---|---|
| पञ्चधा | पञ्चप्रकारे । पञ्चवारे । |
| परम् | केवले । अनन्तरं । |
| परमम् | सम्मतौ । |
| परश्वस्, परःश्वस् | आगामितृतीयदिने । |
| पराक् | कौटिल्ये । |
| परारि | पूर्व्वतरवत्सरे । |
| परितस् | चतुर्दिक्षु । |
| परुत् | पूर्व्ववत्सरे । |
| परेद्यवि, परेद्युस् | परदिने । |
| पश्चात् | अनन्तरं । पश्चिमे । |
| पुनःपुनर् | वारंवारं । |
| पुनर् | अप्रथमे, भूयः । भेदे । अधिकारे । पक्षान्तरे । |
| पुरतस् | सम्मुखे । |
| पुरस्, पुरस्तात् | पूर्व्वदिशि । प्रथमे । सम्मुखे । अतीतकाले । |
| पुरा | चिरातीते । भविष्यति । निकटे । प्रबन्धे । पुरार्थे । |
| पूर्व्वेण | पूर्व्वदिशि । पूर्व्वे । |
| पूर्व्वेद्युस् | पूर्व्वदिने । |
| पृथक् | भिन्ने । नीचे । |
| पृष्ठतस् | पश्चाद्भागे । |
| प्रकामम् | यथेष्टं । स्वेच्छाक्रमे । |
| प्रगे | प्रातःकाले । |
| प्रति | प्रतिनिधौ । प्रत्येकं । |
| प्रत्यक् | पश्चिम-दिक्-देश-कालेषु । |
| प्रत्यहम् | प्रतिदिनं । |
| प्रत्युत | वैपरीत्ये । |
| प्रसह्य | हठात् । बलपूर्व्वकं । |
| प्राक् | पूर्व्व-दिक्-देश-कालेषु । |
| प्रातर् | प्रभाते । |
| प्रादुस् | प्राकाश्ये । नामनि । |
| प्राध्वम् | आनुकूल्ये । |

| अव्ययं | तदर्थः |
|---|---|
| प्रायशस् | बाहुल्ये । बाहुल्यरूपे । |
| प्रायस् | बाहुल्ये । |
| प्राह्णे | प्रभाते । |
| प्रेत्य | परलोके । |
| | फ |
| फट् | मन्त्रांशविशेषे । अनुकारशब्दे । |
| | ब |
| बलवत् | अतिशये । |
| बहुशस् | बाहुल्यरूपे । |
| | भ |
| भगोस् | सम्बोधने—भगवन् । |
| भूयस् | बाहुल्ये । वारंवारं । |
| भूरि | बहुले । |
| भूरिशस् | बहुवारे । |
| भृशम् | अतिशये । बहुवारं । |
| भो, भोस् | सम्बोधने—भवन् । |
| | म |
| मंक्षु | शीघ्रं । अतिशये । |
| मत् | मदीये । |
| मनस् | समार्थे । |
| मनाक् | ईषत् । शनैः । |
| मम | ममतायां, मायायां । |
| मा, माऽस्म | निन्दायां । निषेधे । |
| मिथस् | परस्परं । निर्जने । |
| मिथ्या, मुधा | वृथा । निष्फले । |
| मुष्टामुष्टि, मुष्टीमुष्टि | मुष्टिप्रहारैः प्रवृत्ते युद्धे । |
| मुहुस् | वारंवारं । |
| मृषा | मिथ्या, वितथे । |
| | य |
| यत् | यस्माद्धेतोः । सादृश्ये । यत्र । |
| यतस् | यस्माद्धेतोः । यदा । सादृश्ये । |

| अव्ययं | तदर्थः |
|---|---|
| यत्र | यस्मिन् स्थाने । |
| यथा | येन प्रकारेण । सत्ये । अनतिक्रमे । सादृश्ये । |
| यथातथम्, यथायथम्, यथार्हम्, यथावत्, यथास्वम् | यथायोग्ये, यथार्थे । |
| यथाशक्ति | शक्त्यनुसारेण । |
| यथेप्सितम् | इच्छानुरूपम् । |
| यदा | यस्मिन् काले । यतः । |
| यदि | सम्भावने । पक्षान्तरे । |
| यावत् | परिमाणे । साकल्ये । पर्य्यन्ते । अवधारणे । |
| युगपद् | * एककाले । |
| | र |
| रहस् | निर्जने । |
| | व |
| व | साम्ये । |
| वत् | साम्ये । |
| बत | खेदे । हर्षे । विस्मये । अनुकम्पायां । आमन्त्रणे । |
| वरम् | मनाक्प्रिये । |
| वषट्, वौषट् | हविर्दान-मन्त्रे । |
| बहिस् | बाह्ये । |
| वा | विकल्पे । वितर्के । समुच्चये । उपमायां । वाक्यपूरणे । |
| वाढम् | स्वीकारे । |
| विधिवत् | यथाविधि । |
| विना | वर्जने, ऋते । |
| विश्वक्, विष्वक् | सर्वव्यापिनि । |
| वृथा | निरर्थके । अवैधे । |
| वै | पादपूरणे । |
| | श |
| शनैस् | क्रमशः, क्रियामान्द्ये । |
| शश्वत् | पौनःपुन्ये । नित्ये । सह । |

| अव्ययं | तदर्थः | अव्ययं | तदर्थः |
|---|---|---|---|
| शान्तम् | निवृत्ते, वारिते। | सुतराम् | अत्यन्ते। अवश्ये। अगतौ। |
| श्रत् | श्रद्धायां। | सुष्ठु | अतिशये। सुन्दरे। |
| श्वस् | आगामिदिने। | स्थाने | उचिते, युक्ते। |
| | स | स्म | अतीते। पादपूरणे। |
| संवत् | वत्सरे। विक्रमाब्दे। | स्वतस् | आत्मनः। |
| सकृत् | एकवारे। सह। | स्वधा | पितृदान-मन्त्रे। |
| सत्रा | सह। | स्वयम् | आत्मना। |
| सदा, सना | सर्व्वदा। | स्वर् | स्वर्गे। परलोके। |
| सद्यस् | तत्क्षणे। समानेऽहनि | स्वस्ति | शुभे। आशीर्व्वादे। पुण्ये। |
| सपदि | शीघ्रं। तत्क्षणं। | स्वाहा | देवहविर्द्दान-मन्त्रे। |
| समन्ततस्, समन्तात् | सर्व्वदिक्षु। | स्वित् | प्रश्ने। वितर्के, संशये। |
| समम् | सह। युगपत्। | | ह |
| समया | समीपे। मध्ये। | ह | सम्बोधने। पादपूरणे। |
| समुपजोषम् | भाग्यवशतः। हर्षे। | हंहो | सम्बोधने। |
| सम्प्रति | अधुना। | हञ्जे | भृत्यां प्रति सम्बोधने। |
| सम्यक् | सत्ये। सुन्दरे। साकल्ये। | ह 3 | नीचां प्रति सम्बोधने। |
| सर्व्वतस् | सर्व्वदिक्षु। | हन्त | खेदे। हर्षे। अनुकम्पायां। वाक्यारम्भे। |
| सर्व्वत्र | सर्व्वस्थाने। | हला | सखीं प्रति सम्बोधने। |
| सर्व्वथा | सर्व्वप्रकारेण। | हा | विषादे। शोके। पीडायां। |
| सर्व्वदा | सर्व्वसमये। | हि | हेतौ। अवधारणे। पादपूरणे। |
| सहसा | हठात्, अतर्किते। | हिरुक् | विना। मध्ये। निकटे। |
| साकम् | सह। | हिहि, हीही | आह्लादे। हास्ये। |
| साक्षात् | प्रत्यक्षे। तुल्ये। | ही | विस्मये। |
| साचि | तिर्य्यगर्थे। | हुम्, हम् | स्वीकारे। परिप्रश्ने। वितर्के। |
| सामि | अर्द्धे। निन्दिते। | हे, हेहै, है, हो | सम्बोधने। |
| साम्प्रतम् | सम्प्रति। उचिते, युक्ते। | ह्यस् | गतेऽहनि। |
| सायम् | सन्ध्याकाले। | | |
| सार्द्धम् | सह। | | |
| सुचिरम् | बहुकालं। | | |

प्र-परादयो विंशतिरुपसर्गाश्चाव्ययशब्दाः।—१०म-सूत्रं द्रष्टव्यम्।

एतद्भिन्ना अपि अव्ययशब्दाः बहवः सन्ति।

---

# ४र्थः। स्याद्यन्ताध्यायः।

## १म पादः—स्त्रीत्वः।

### २४९। स्त्रियामत आप्।

(स्त्रियाम् ७।, अतः ५।, आप् ।१।)।

स्त्रीलिङ्गे स्थितादकारान्तादाप् स्यात्। मेधा, सर्व्वा। *

### २५०। हसाद्वा। (हसात् ५।, वा ।१।)।

स्त्रियां हसन्तादाप् स्याद्वा। वाचा वाक्, दिशा दिक्। †

---

* लिङ्गसाधनयोऽप्यानपि भाषादोष् काठिन्यभयात् स्त्रीलिङ्गपादे गोङ्गा पृथक् वदति स्त्रियामित्यादि। लिङ्गानां स्त्रीत्वविवक्षायां स्याद्युत्पत्तेः प्रागेव यथासम्भवमाबादयः स्युः, त्यदादिषु स्याद्युत्पत्तेः पश्चात् (१२२) टेरत्वे अदन्तत्वादाप् स्यादिति, अतएव त्यदादेष्टेरत्वे सत्याप् (१५७, २४०) इति स्वयमुक्तम्। आबीपोः पकारस्तु (१४८) आबीप्भसादित्यादिषु गोपा-गोपा-प्रभृतीनामप्राप्तये विशेषणार्थः। ऊपस्तु पकारः (४६२) रूपकत्वे पेचूप् इत्यादौ रूसादेः प्राप्तये विशेषणार्थः। मेधा मेधधातोः (११५४) अप्रत्यये, मेध इति नित्यस्त्रीलिङ्गादाप्। पाणिनि-स्त्रीलिङ्गन्तु—सर्व्वा। पाणिनिः ४।१।४। शूद्रा चामहत्पूर्व्वा इति वार्त्तिकम्।

† शिष्टप्रयोगानुसारेणैव स्याद्वा न तु सर्व्वस्मात् हसन्तादिति। यथा—क्षुधा वाचा दिशा क्षुधा विपाशा च सजा स्रजा। गिरोऽपिशा दैर्घ्यगिरा, पक्षे क्षुध्-वाच्-दिशादयः॥ (आयुरिमतम्)। "गिरादिर्वा" इति पद्मनाभः। "उषिहादीरित्येके" इति क्रमदीश्वरः। एवं नामन्तस्य अप्राप्त्या, विपाट् विपाश् चतुष्पादित्यादौ न स्यात्, विपदा विपद्या चतुष्पदा अप् इत्यादौ तु स्यात् (पाणिनिः ४।१।८)। अपि च गिं, विपदी स्त्री।

२५१। मनो डाप्। (मनः ५।, डाप् १।१)।

स्त्रियां मनन्तात् डाप् स्याद्वा। सीमे सीमानौ, पामे पामानौ।*

२५२। ह्रेऽनः। (ह्रे ७।, अनः ५।)।

स्त्रियां ह्रे स्थितादनन्तात् डाप् स्याद्वा। बहुयज्वे बहुयज्वानौ।†

२५३। ईप् चाम्वस्यात्। (ईप् १।१, च १।१, अम्वस्यात् ५।)।

अम्वस्याम्नपरान्नात् ह्रे स्थितात् स्त्रियामीप् डाप् च स्याद्वा। बहुराज्ञी बहुराजे बहुराजानौ।‡

---

* मन्भागान्तात् डाप् वा स्यात्, डपावितौ। सीमे इति सिधातोः इमनि, पामे इति पाधातोर्मनि, सीमन् पामन् इति लिङ्गम्, आभ्यां डापि औविभक्तौ सीमे पामे इति। पक्षे सीमानौ पामानौ। सीमसीमे स्त्रियामुभे, पामपामा विचर्चिका (रोगविशेषः) इत्यमरः। सिविभक्तौ विकल्पपक्षे रूपसाम्यात् नोदाहृतम्। एवं ददातीति दामा, अत्रापि दामे दामानौ इति। अपिच सुधर्म्मे सुधर्म्माणौ, बहुपटिमे बहुपटिमानौ। "मन इति नेदं प्रत्ययग्रहणं, किन्तु वर्णग्रहणं, तेन अतिमहिमानौ अतिमहिमे" इति गोयीचन्द्रः। पाणिनिः ४।१।११—१२।

† असंयोग-वसंयोगात्-परस्थित-नकारान्तेभ्योऽयं विधिः, तदन्यत्र परसूत्रेण बाधितत्वात्। बहवो यज्वानो ययोः सभयोस्ते सभे इति विग्रहे बहुयज्वे, पक्षे (१६४) बहुयज्वानौ। एवं बहुब्रह्मे बहुब्रह्माणौ, सुधर्म्मे सुधर्म्माणौ इत्यादि। पाणिनिः ४।१।१२।

‡ मश्च वश्च म्वौ म्वश्च नम् स्यर्थ इति म्वसः, न म्वसः अम्वसस्तस्मात्। अत्र 'एकेनैव सवाच्य' नुच्यते। व्याख्यायां अम्वस्याम्नपरान्नादिति, मश्च वश्च तौ ताभ्यामन्यः अम्वसंयोगः, तस्मात् परो योऽन् अम्वस्याम्नपरान्, सोऽन्ते यस्य तस्मादिति विग्रहः। असंयोगवसंयोगभिन्नवर्णात् परो योऽन् तदन्तादीप् चकारात् डाप् च स्याद्वा। बहुराज्ञी इति बहवो राजानो ययोः सभयोस्ते इति विग्रहे बहुराजन्शब्दात् अनेन ईपि (११०,४६) बहुराज्ञी-शब्दात् औ। पक्षे डापि (१२६)=बहुराजाशब्दात् औ (१४८,२१) बहुराजे। उभयाभावपक्षे [illegible]। एवं दृष्टपूर्व्वी दृष्टपूर्व्वे दृष्टपूर्व्वाणौ, सुदाम्नी सुदामे सुदामानौ स्त्रियौ इत्यादि। (२०६) न नसंयोगान्तत्वेन ईप्निषेधस्तु बहुधीवरीत्यत्र ज्ञेयः। तत्र बहुयुवा पुः दृष्टपर्वा स्त्री इत्युभयत्र ईप् न स्यात् डाप् तु स्यादेवेति वक्तव्यम्। पाणिनिः ४।१।२८, ६।४।१३७।

२५४ । काप्यनाभीरकेऽदिद्यत्तत्क्षिपादेः ।

(कापि ७।, अनाभीरके ७।, अत् ।१।, इत् ।१।, अयत्तत्क्षिपादेः ६।) ।

आभीरवर्जिते कापि परे अकार इकारः स्यात्, न तु यत्-तत्-क्षिपादेः ।

सर्विका कारिका । आभीरके तु जीवका ।

यदादेस्तु यका सका, क्षिपका ध्रुवका चटका । *

२५५ । द्वैषसूतपुत्रवृन्दारस्वज्ञाजभस्त्राध्रुत्य-क्योर्वा । (द्वैष—ऽध्रुत्यक्योः ६॥, वा ।१।) ।

द्वादेर्ध्रुत्यवर्जयोः कयोरकार इकारः स्याद्वा कापि ।

---

* कयुक्त आप् काप् तस्मिन् । आशिषि अकः आभीरकः, नास्ति आभीरको यत्र सोऽनाभीरकस्तस्मिन्, कापीत्यस्य विशेषणम् । यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्येति न्यायात् आभीरकवर्जनात् प्रत्ययककारस्य ग्रहणं न तु प्रकृतेः, तेन शकधातोः (९९२) पचादित्वादनि शका, मकधातोः मका इत्यादौ न इकारः स्यात् । मर्यादमितत्वात् तु मामिका इति आदेशत्वात् प्रत्ययककार एव । (मामक-नरकयोरुपसंख्यानमिति वार्त्तिकम् ।) सर्विकेति सर्वा इत्यस्य (२०८) ह्रस्वः पूर्वं अक्—सर्वका इति कापि परे सर्वस्य अकारः इकारः । कारिकेति करोति या इति वाक्ये कृधातोः (९९०) णकप्रत्यये आपि कारका इति कापि अकार इकारः । जीवकेति जीवतादिति वाक्ये (१००६) आशिषि अकः, पश्चात् स्त्रियां जीवका इति, आभीरवर्जिते जीविका इत्येव । यका सका इति या सा इति पदद्वयस्य (२०८) ह्रस्वः पूर्वं अकि रूपम् । क्षिपादिस्तु—"क्षिपका ध्रुवका चैव चरका सेवकेष्टका । एडका चटकाष्टाव पितृसामष्टका भवेत् । उपत्यकाधित्यका च तारका भक्षगंवर्षाः । वर्णका मकमिष्टं स्यात् प्रकृती वा तु वर्त्तिका ॥" इष्टकेति इषधातोः, चटकेति चटधातोरौणादिकस्तकः "इष्टाग्निषु तकन्" । चटका-तारका-वर्णकानाम् अन्यविषये चटिकेत्यादयः । चटिका दासी । वर्णिका नटादीनाम् । दीपदशायां वर्त्तिकैव । पाणिनिः ७।३।४४,४५, वार्त्तिकानि च । "स आप् सुपः परो यदि न भवति" इति किं, "बहुपरिव्राजका नगरी" इत्यत्र "बहवः परिव्राजका यस्यामिति विग्रहे सुबन्तादयं टाप्" इति पाणिनिटीका ।

द्विके द्वके, चटकिका चटकका, आर्यिका आर्यका ।

धुत्ययोस्तु—नायिका कत्यिका । *

## २५६ । वाच्चापोऽनुक्तपुंस्कस्य ।

(वा ।१।, आत् ।१।, च ।१।, आप: ६।, अनुक्तपुंस्कस्य ६।) ।

आप: स्थाने जातोऽकार इदाच स्याद्वा कापि न तूक्तपुंस्कस्य ।

गङ्गिका गङ्गाका गङ्गका । उक्तपुंस्कस्य तु शुभ्रिका । †

---

* द्व इति द्विशब्दस्य टेरत्वे रूपम् । एष इति एतदः सौ रूपम् । त्य इति नच प्रत्ययस्य संज्ञा किन्तु (५२५) त्यचेत्यनेन कृतस्य त्यप्रत्ययस्य ग्रहणम् । धुच त्यच धुत्यौ, न धुत्यौ अधुत्यौ । कच यच क्य, अधुत्ययोः क्य अधुत्क्य । द्वच एषच सुतच पुत्रच वृन्दारच त्वच अच अजच भस्त्रा च एषां समाहारः द्वैषसुतपुत्रवृन्दारत्वाऽजभस्त्र, तच्च अधुत्यक्य च तौ तयोः । द्वादीनां नवानाम् अकारस्य इकारः स्याद्वा कापि, धातोः ककारयकारौ त्यस्वरूपस्य च यकारं हित्वा अन्यौ यौ ककारयकारौ तयोरकारस्य च इकारः स्याद्वा कापीत्यर्थः । द्विके द्वके इति द्विशब्दात् औ कृते (१२२) टेरत्वे, (२०८) टेः पूर्व्वं अकि, (२४९) आपि द्वका इति स्थिते अनेन वा अकारस्य इः । एवं एषिका एषका, सुतिका सुतका, पुत्रिका पुत्रका, वृन्दारिका वृन्दारका इत्यादि । भस्त्रिका भस्त्रकेति, भस्त्रा चर्म्मप्रसेविका इत्यमरः । भस्त्रा एव (४११) स्वार्थे ककारे, (४१७) ह्रस्वे, भस्त्रका इति स्थिते अनेन वा इकारः । एषां गौणत्वेऽपि बहुभस्त्रिका बहुभस्त्रका इत्यादि । नञ्पूर्व्वत्वेऽपि अभस्त्रिका अभस्त्रका इत्यादि । चटकिकेति चटधातोरौणादिकोऽकः, ततः चटकाशब्दात् (४११) स्वार्थे ककारादि । आर्यिकेति ऋधातोः (९०१) घ्यणि आर्य्याशब्दात् स्वार्थे ककारादि । उभयत्र वा अकारस्य इः । नायिकेति णीधातोः (९९०) णकप्रत्यये नायकशब्दात् आप्, धातुसम्बन्धियकारत्वादप्राप्तौ पूर्व्वेण नित्यम् इकारः । धातोः ककारस्य यथा — चकधातोः णकप्रत्यये चाकिकेत्यादि पूर्व्वेण नित्यम् । कत्यिकेति क भवा इति वाक्ये (५२५) कत्या, ततः स्वार्थे (४११) ककारे कत्यका इति स्थिते पूर्व्वेण नित्यमिकारः । एवं तत्रत्यिका दाक्षिणात्यिका अमात्यिका इत्यादि । त्यस्वरूपनिषेधात् आढ्यिका आढ्यका इति । पाणिनिः ७।३।४६,४७, “[illegible]” इति वार्त्तिकञ्च ।

† उक्तः पुमान् येन तत् उक्तपुंस्कं, न उक्तपुंस्कम् अनुक्तपुंस्कं (लिङ्गं) तस्य । आपः स्थाने (४१७) केऽकः स इत्यनेन जातो योऽकारस्तस्य स्थाने इकार आकारश्च स्याद् वा कापि, पक्षेऽकारस्थितिः, न तु उक्तपुंस्कशब्दस्य । गङ्गा एव इति वाक्ये (४११,४१७) गङ्गका इति

## २५७। ष्टिड्नृञ्वाह्नदादेरीप्।

(ष्-ट्-उ-ऋ-इत् न् ऋ अञ् वाह् नदादेः ५।, ईप् ।१।)।

**षकारेत-टकारेत उकारेत ऋकारेतो नान्ता-ऋदन्ता-ऽञो वाहो नदादेश्च ईप् स्यात् स्त्रियाम्। ***

## २५८। यबोर्लोपोऽयुक्तौ पौ।

(ययोः ६।।, लोपः १।, अ-युक्तौ ७, पौ ७)।

---

स्थिते अनेन यकारस्य इकारः आकारश्च, पक्षे यकारस्थितिः। एवं दुर्गिका दुर्गाका दुर्ग्यका इत्यादि। युभिर्क्ति पूर्व्वेण नित्यमिकारः। एषः पुमान् इति च भवतीत्यभिमुक्तपुंस्कः शब्दः। पाणिनिः ७।३।४८,४९।

* षश्च टश्च उश्च ऋश्च इतः, ते इतो येषां ते षिट्वृदितः, ते च न च ऋश्च अञ् च वाह् च नदादिश्चेति तस्मात्। नकार-ऋकारयोः केवलयोरसम्भवात् तदन्तयोर्ग्रहणम्। ध्वन्सु सन्सु इत्यादौ धातोरुकारेतस्तु नात्र ग्रहणं "धातोरुगितः प्रतिषेधः" इति वार्त्तिकात्। अत्र षकारेत्-टकारेत्-नदादीनां मुख्यानामेव ग्रहणं, तेन बहुषैषावा, बहुभूषणा, बहुनदा इत्यादौ न स्यात्। अन्येषां गौणानामपि, तेन अतिविदुषी, अतिपचन्ती, अतिदण्डिनी, अतिकर्त्री, अतिप्रतीची, अतिशाल्यूढी इत्यादि स्यादेव। नदादिश्च (गौरादिरिति पाणिनिः)—

नदी मद-भट-चौरी गौर चेल भव प्लवाः।

[नदशब्दो गौरादौ न दृश्यते। अतः सिद्धान्तकौमुद्यां "नदट्। नदी" इति टित्वात् ईप् इति लिखितम्।]

दर कन्दर तर्कारा-सरणः कण-काकिणः।

बदरामलकौ सूद-हरीतक-बिभीतकाः।

मही देवी धातकश्च मातामह-पितामहौ।

आयःस्थूणाढकौ पाण्ड-कोषातक-पुटापुटः।

[आयःस्थूण इति पाणिनिः, आयस्थूण इति क्रमदीश्वरः।]

कवाटमापटौ नाटो नटो भोट-पटौ मठः।

बराटः शष्कुलः सूपः श्वा मण्डल-कुण्डलौ।

लोहिताण्डोऽथ कूष्माण्ड मठ पुष्कल पिप्पलाः।

[लोफाण्ड इति पाणिनिः।]

कदलः कन्दलः पिण्ड-काकलौ शङ्कको बयः।

इवर्णावर्णयोर्लोपः स्यात् भयावत्तौ पौ परे।

य—वैष्णवी वराकी। *

२५९। क्यङ्व्यञ्चौ पानात्यपत्यष्णास्य।

(क्य-ङ्य-ञ्चौ ७, च ।१।, अनादि ७, अपत्यष्णास्य ६।)।

अपत्यार्थ-ष्णास्य लोपः स्यात् भयावत्तौ पौ परे, क्य-ङ्य-ञ्चौ च, नत्वाकारे। गार्गी। †

---

●
अनडुत् सूर्म-कीली च पिङ्गलातस-वेतसाः।
मालतः श्रम-सूर्पौ च विल्व मण्डप केकयाः।
गड्डलौ मह-मल्लौ च सुपव: पृथिव: पृथु:।
रुश्यो मनुष्यो मत्स्यश्च शुकयो गवयो हयः।
महत् छहत् तरः शूद्रः एतदाद्या नदादयः। ८३१ आकृतिगणः।
(एतन्निमा अनेकेऽपि गौरादौ पठिताः पुनः।)

पुत्रशब्दोऽपि नदादाविति क्रमदीश्वरः। पाणिनिः ४।१।५,६,१५,४१,६१, "अवेषोप-संख्यान"मिति वार्त्तिकञ्च।

अत्र ८३संख्यको नदादिः पठितः, संक्षिप्तसारे तु ११०संख्यकः। पाणिनीयो गौरादिस्तु १५०संख्यकः, आकृतिगणश्च।

* इश्च अश्च तौ यौ, तयोः ययोः। युश्च ञिश्च युञौ, न विद्येते युञौ यत्र पौ सोऽयुञि-स्तस्मिन्। अत्र अश्च इश्च इति समासे एर्लोप इति कृते एकारलोपदशमो जायते, अतः ययोरिति। (४३०) प्रेष्ठः श्रेष्ठ इत्यादौ प्र श्र इत्याद्यादीनाम् अकारान्तनिर्देशात् न अकारलोपः। पारमेष्ठ्य-इत्यत्र तु (४१६) विपदत्वविधानात् न ईकारलोपः। अयुञौ किं, जाम्बाय्ञः रामिण इत्यादि। य—इति यकारान्तशब्दस्य उदाहरणज्ञापनम्। वैष्णवी, विष्णुर्देवता यस्याः इत्यर्थे विष्णुशब्दात् (४२२) विकारसंज्ञेति अप्रत्यये वैष्णवशब्दादीप्। वराकी—वृधातोः (१११९) लिख्यालेति षाकप्रत्ययं वराकशब्दादीप्। पाणिनिः ६।४।१४८।

† क्यश्च ङ्यश्च ञ्चिश्चेति क्यङ्यञ्चि तस्मिन्। न आत् अनात् तस्मिन्। अपत्ये ष्णा अपत्यष्णा तस्य। चकारात् युञिवर्जं पौ च। गार्गी इति गर्गस्य अपत्यम् इति अपत्यार्थे (४१५) ष्णे कृते, गार्ग्यशब्दात् (२५७) यकारेत्वादीपि, अनेन पौ परे ष्णालोपः। क्ये—गार्ग्यमिच्छति

२६० । सूर्य्यागस्त्यस्य तिष्यपुष्यस्य आमत्स्य-स्येयेपोर्भञ्यो ईपि यः ।

(सूर्य्यागस्त्यस्य ६।, तिष्यपुष्यस्य ६।, आमत्स्यस्य ६।, ईयेपोः ७॥, भञ्ये ७।, ईपि ७।, यः ६।) ।

एषां यस्य लोपः स्यात् ईयेपोः परयोः, नभञ्यो ईपि च ।
सौरी आगस्ती चातुरी । *

ट—नयी भूषणी । उ—विदुषी श्रीमती भवती । (२४५) अप्-यनो नित्यम्, ऋ—पचन्ती । (२४४) आदीपोः, तुदन्ती तुदती, भान्ती भाती । न—दण्डिनी अर्व्वती राज्ञी शुनी, मघवती मघोनी । ऋ—कर्त्री क्रोष्ट्री । अनृच—प्रतीची प्रत्यञ्ची, तिरश्ची तिर्य्यञ्ची, अमुमुईची अदमुईची, उदीची । वाह्—आरोही, श्वेतौही श्वेतवाही, प्रष्ठौही । नदी मही गौरी । †

---

(८४१) गार्गीयति । क्षे—गार्ग्यं इवाचरति (८४८) गार्गायते । च्वौ—अगार्ग्यो गार्ग्यो भवति (४९५) गार्गीभवति । विभक्तौ—गार्ग्ये इत्यादि । आकारे तु गार्ग्यायणः । अपत्य-ग्रहणमिति किं, सुभगस्य भावः सौभाग्यं, सौभाग्यमिच्छति (८४१) सौभाग्यीयति । पाणिनिः ६।४।१५०-१५२ ।

* सूर्य्यागस्त्ययो-रीये ईपि च परे, तिष्यपुष्ययोर्नक्षत्रार्थविहिते ञे परे, आ-मत्स्ययो-रीपि परे यस्य लोपः स्यादित्यर्थः । य इति अपत्यार्थभिन्नस्य ग्रहणं, पूर्व्वसूत्रे तस्य ग्रहणात् । सौरीति सूर्य्यस्येयमित्यर्थे (४११) ञे सौर्य्य इति स्थिते (२५७) स्त्रियामीपि अनेन यलोपः । एवं आगस्ती । चातुरीति चतुरस्य भावः इत्यर्थे (४२२) ञे चातुर्य्य इति स्थिते (२५७) ईपि अनेन यलोपः, एवम् औचिती मैत्री सामग्री । पाणिनिः ६।४।१४९, वार्त्तिकञ्च ।

† ट इति टकारेत् प्रत्ययविहितो ग्रहणम् । नयी नयानां पुरुषोऽस्त्यर्थे (४६१) नि-मस्यान् अर्थः । भूषणीति भूषधातोः करणार्थे (११९४) अनट्, टित्वादीप् । उ इति उकारेत्

## २६१ । आच्ख्साद्वनो रङीप् वा तु हे ।

(आच्ख्सात् ५।, वनः ५।, रङ् ।१।, ईप् ।१।, वा ।१।, तु ।१।, हे ७।)

आदचः ख्साच्च विहितात् वन ईप् स्यात्, वनो रङ् च स्त्रियां, हे तु वा ।

अवावरी धीवरी हरिद्दश्वरी, बहुधीवरी बहुधीवा । *

---

उदाक्रियते इत्यर्थः । विदुषीति विद्धातोः शतृ, (११०१) शतृस्थाने क्वसुः, विद्वस्शब्दात् उदित्वादीपि, (२२९) वस्थाने उः । श्रीमतीति श्रीरस्त्यस्या इति वाक्ये (४४१) श्रीशब्दात् मतुः, उदित्वादीप् । भवतीति भाधातोरौणादिको डवतुः, भवत्शब्दादीप् । ञ इति ञकारेत-उदाहरणम् । पचन्तीति पचधातोः (११००) शतृ । तुदधातोः भाधाताच्च शतृप्रत्यये विकल्पेन नुम् । न इति नान्तस्येत्यर्थः । दण्डिनीति दण्डोऽस्त्यस्या इति वाक्ये (४४४) इन्, अर्वतीति अर्वन्शब्दात् नान्तत्वादीपि (१९५) तृङ् । राजन्शब्दादीपि (११७,४६) राज्ञीति । शुनीति श्वन्शब्दादीपि (१९४) वस्य उः । मघवन्शब्दादीपि (१९१) तृङो विकल्पः, विकल्पपक्षे (१९४) वस्य उः । ऋ इति ऋदन्तस्येत्यर्थः । कर्त्रीति करोति या सा इति कृधातोः (९९०) तृन्, ततो ऋदन्तत्वादीप् । क्रोष्ट्रीति क्रोष्टुशब्दस्य स्त्रियां (१२९) तुनः स्थाने तृन्, ततः ईप् । अञ्च इति अञ्चधातोः क्विबन्तस्येत्यर्थः । प्रतिपूर्व्वकात् अञ्चधातोः (१०२२) क्विपि (५६७) नलोपे, प्रत्यच्शब्दात् ईपि (२२४) प्रतीची । पूजार्थे (५६८) नलोपाभावे प्रत्यञ्च्शब्दादीपि प्रत्यञ्ची । तिर्य्यच्शब्दादीपि (२२५) तिरश्ची । तिर्य्यञ्च्शब्दादीपि तिर्य्यञ्ची । अमुमुयच् अदमुयच् उदच् शब्देभ्य-ईपि (२२५) अमुमुईची अदमुईची उदीची । वाह् इति विश्वन्त वहधातोरित्यर्थः । भारं वहतीति (१०२८) विण्प्रत्यये भारवाह्शब्दादीपि (१७९) वा-स्थाने औ । श्वेतवाह्शब्दादीपि, वा औ । शालिवाह्शब्दादीपि (१८०) वा-स्थाने ऊः । नद्यादिरुदाहरणमाह नदी, अत्वशब्दादीपि, (२६०) अनेन यलोपः । (२६२) आगिरस्त इत्यत्र यकारोऽपवर्जनादप्राप्तौ नद्यादित्वादीप् । गौर-शब्दादीपि गौरीति ।

* आदन्तात् अजन्तात् ख्सन्ताच्च धातोः परः (१०२२) वासुक्विसित्यनेन विहितो यो वन्-प्रत्ययस्तस्मात् ईप् स्यात् स्त्रियाम्, ईपि सति वनो रङ् च स्यात्, बहुव्रीहौ तु रङीपौ वा स-इत्यर्थः । अवावरीति अपमारणार्थस्य औणधातोः (१०२२) वनिपि, (१०२१) णकारस्य आकारे (२५) औकारस्य अवि अवावन् इति स्थिते अनेन ईप् रङ् च । धीवरीति धाधातोः (१०२२)

## २६२ । सन्नोधःसंख्यादिदामवयोऽर्थहायनाद्बे ।

(स् ।१।, नः १।, च ।१।, ऊधस् सङ्ख्यादि-दाम-वयोऽर्थहायनात् ५।, ई ७।) ।

ऊधसः सङ्ख्यापूर्व्वात् दाम्नो वयोऽर्थहायनाच्च ईप् स्यात् ई, सस्य च नः स्यात् । पीनोध्नी द्विदाम्नी द्विहायनी । *

## २६३ । जातेरतोऽस्त्री-युङ्-सतकाण्डप्राक्-प्रान्तशतैकादिपुष्प-संभस्त्राजिनैकशणपिण्डादिफल-नादिमूलात् ।

(जातेः ५।, अतः ५।, अस्त्री—मूलात् ५।) ।

---

क्वनिपि (६१२) ङी, धीवन् इत्यस्मात् ईप् रङ् च, एवं विभावरीत्यादि । हरिदृश्वरीति हरिं पश्यति या इति वाक्ये हरि दृशधातोः क्वनिपि हरिदृश्वन्, वनिपो वकारस्य दन्त्यत्वेन भस्परत्वाभावात् (१५४) न पङ् । तस्मादीप् रङ् च । बहुधीवरीति बहवो धीवानः (कैवर्त्ताः) यस्यां नद्यामिति बहुव्रीहौ ईप् रङ् च, ईपोऽप्राप्तिपक्षे रङोऽप्यभावः, एकयोगनिर्द्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिरिति न्यायात् । पक्षे—बहुधीवन् मि (१४८,१६४,११८)=बहुधीवा । बण्टस्थात् किं, यज्वा । पाणिनिः ४।१।७, वार्त्तिकद्वयञ्च । अत्र तु "वनोरच्च ।"

* वयः अर्थो यस्य स वयोऽर्थः सचासौ हायनश्चेति वयोऽर्थहायनः, दाम च वयोऽर्थहायनश्च तौ, सङ्ख्या आदिर्ययोस्तौ सङ्ख्यादी, तौ च तौ दामवयोऽर्थहायनौ चेति सङ्ख्यादिदामवयोऽर्थहायनौ, ऊधस् च सङ्ख्यादिदामवयोऽर्थहायनौ चेति तस्मात् । ऊधसः सङ्ख्यापूर्व्वदाम्नः सङ्ख्यापूर्व्ववयोऽर्थहायनाच्च स्त्रियामीप्, बहुव्रीहौ सस्य नः स्यादिति सम्भवादूधस एव । ई इत्यस्य पुनरुपादानं परसूत्रे निवृत्त्यर्थम् । पीनोध्नीति पीनम् ऊधो यस्याः सा गौः, पीनोधस् अस्मादीप् सस्य च नः । द्वे दामनी (रज्ज्वौ) यस्याः सा द्विदाम्नी गौः । असङ्ख्यादेस्तु सुदामि सुदामानौ इति (२५२) पूर्व्वेण वा स्यात् । द्वौ हायनौ वयो यस्याः सा द्विहायनी, द्विवर्षा गौः । असङ्ख्यादिस्तु गतहायना । वयोऽर्थः किं, द्विहायना शाला । प्रयस्तु प्राणिनो गतपरमायुः । ई इति किं—अधोऽतिक्रान्ता अत्यूधाः । पाणिनिः ४।४।१३१, ४।१।२५-२७ । अत्र "संख्याव्ययादेर्ङीप्" इति पाणिनिसूत्रेण ऊधसशब्दोऽपि संख्यादिर्व्ययादिश्च गृह्यते, तेन द्व्यूध्नी, अत्यूध्नी, विविधोध्नी इति । अतएव वोपदेवेन सामान्यत एव ऊधस्शब्दः प्रथमं प्रयुक्तः ।

जातिवाचिनोऽकारान्तात् स्त्रियामीप् स्यात् न तु स्त्रीयुकादेः । मृगी हंसी शीतपाकी । स्त्रीयुकादेस्तु—मक्षिका वैश्या सत्पुष्पा संफला अमूला । जातेः किं—मन्दा । *

आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्व्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह ॥ †

---

* स्त्री नित्यस्त्रीलिङ्गः । य उङ् यस्य स युङ् । सच्च काण्डञ्च शाक् च प्रान्तञ्च शतञ्च एकञ्च ते आदयो यस्य तत् सत्काण्डशाक्प्रान्तशतैकादि, तच्च तत् पुष्पञ्चेति तत् । सम् च भस्त्रा च अजिनञ्च एकञ्च शणञ्च पिण्डञ्च ते आदयो यस्य तत् संभस्त्राजिनैकशणपिण्डादि, तच्च तत् फलञ्चेति तत् । नञ् आदिर्यस्य तत् नादि, नादि च तत् मूलञ्चेति नादिमूलम् । ततः स्त्री च युङ् च सत्काण्डशाक्प्रान्तशतैकादिपुष्पञ्च संभस्त्राजिनैकशणपिण्डादिफलञ्च नादिमूलञ्चेति । पश्चात् नञ्समासे अस्त्रीयुङ्सत्काण्डशाक्प्रान्तशतैकादिपुष्पसंभस्त्राजिनैकशणपिण्डादिफलनादिमूलं तस्मात् । मृगजातिः स्त्री मृगी, हंसजातिः स्त्री हंसी । शीते पाको यस्याः सा शीतपाकी, ओषधिविशेषः । जातिवाचिनो मुख्यादेव ईप्, तेन बहुमृगा भूमिः अनाजका पुरीत्यादौ न स्यात् । शीतपाकीत्यादिषु तु गौणदशायामेव जातित्वम्, अतोऽत्र; जातेर्मुख्यत्वमेव । नित्यस्त्रीलिङ्गात् मक्षिका बलाका इत्यादि । युङस्तु वैश्या क्षत्रिया । क्षत्रियमत्स्यादीनां युङ्त्वात्प्राप्तौ गदादौ पाठादीप् । पुष्पात्तु सत्पुष्पा काण्डपुष्पा इत्यादि । एभ्यः किं, शङ्खपुष्पी चोरपुष्पी । अजातेस्तु बहुपुष्पा लता । फलात्तु संफला भस्त्राफला । एवं त्रिफला श्वेतफला । एभ्यः किं, रक्तफली । अजातेस्तु बहुफला । नादिमूलात्तु अमूला । नञ्पूर्व्वनिषेधात् शतमूलीत्यादि भवति । अजातेस्तु दृढमूला । मन्दा इति मन्दगुणयुक्ता स्त्री जातित्वाभावान्न ईप् । पाणिनिः ४।१।६३.६४, वार्त्तिकत्रयञ्च । अत्र सूत्रे कलापसुपद्ममतानुसारेण प्राक्पुष्पा इत्येव धृतं वोपदेवेन; वार्त्तिके तु सामान्यतः अच् (अनृच इति क्रमदीश्वरेण) प्रयुक्तम्; अतएव प्राक्पुष्पा प्रत्यक्पुष्पा इति भट्टोजिदीक्षितः, अपाक्पुष्पा इत्यपि क्रमदीश्वरः । संभस्त्रेत्यत्र च एकशब्दः अधिक इव प्रतीयते "संभस्त्राजिनशणपिण्डेभ्यः फलात् प्रतिषेधो वक्तव्यः" इति वार्त्तिके अदृष्टत्वात्, सुपद्मे संक्षिप्तसारे कातन्त्रपरिशिष्टे च अनुल्लेखात् ।

† अथ जातिवाचकशब्दज्ञापनार्थं जातिलक्षणमाह आकृतिग्रहणेत्यादि—

आक्रियते व्यज्यते अनयेति आकृतिरवयवसंस्थानम्, आकृत्या ग्रहणं ज्ञानं यस्याः सा आकृतिग्रहणा जातिः, जातिराकृतिग्रहणा आकृतिव्यङ्ग्या भवतीत्यर्थः । अथवा [illegible] ग्रहणं

गार्गी कठी कौथुमी । *

---

करणसामान्यसिद्धत्वान्नास्य स्त्रीलिङ्गत्वम्', 'आकृतिर्ग्रहणं यस्याः सा आकृतिग्रहणा संस्थानव्यङ्ग्येति यावत्' इति गोयीचन्द्रः, 'अनुगतसंस्थानव्यङ्ग्येत्यर्थः' इति सिद्धान्तकौमुदी । तेन मनुष्यगोमृगहंसादीनाम् आकृत्या व्यज्यमाना मनुष्यत्वगोत्वमृगत्वहंसत्वादिर्जातिः । एवं लक्षणे सति, ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक् आकृतेरभावात् ब्राह्मणत्वादिर्जातित्वं नायातमिति लक्षणान्तरमाह लिङ्गानामिति, या च लिङ्गानां न सर्व्वभाक्—सर्व्वाणि लिङ्गानि न भजति, सा च जातिरित्यर्थः । तेन ब्राह्मणादीनां त्रिलिङ्गमात्रभाजित्वेन ब्राह्मणत्वादिर्जातिरिति । एवञ्च सति, हंसं दृष्टवतोऽपि अज्ञातहंसस्य जनस्य तदाकृत्या हंसत्वं व्यञ्जितुं न शक्यते अतो हंसत्वस्य न जातित्वमिति प्रथमलक्षणदोषः, एवं देवदत्तादि-संज्ञाशब्दस्यापि सर्व्वलिङ्गाभाजित्वेन जातित्वापत्तिर्द्वितीयलक्षणदोषश्च, इति दोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह सकृदिति । सकृदेकवारम् आख्यातेन उपदेशेन निर्ग्राह्या निश्चयेन ग्रहीतुं शक्या जातिरित्यर्थः । तेन प्राक् केनचिद् हंस इत्युपदेशे, पश्चात् हंसं दृष्टवतस्तदाकृत्या हंसं व्यञ्जितुं शक्यत एवेति प्रथमलक्षणस्य न दोषः,एवं देवदत्तादिसंज्ञाशब्दस्य एकव्यक्त्यावुपदेशे व्यक्त्यन्तरे ज्ञानाभावात् न जातित्वमिति द्वितीयलक्षणस्यापि न दोषः । "एतेन जातेरेकत्व नित्यत्वं प्रत्येकं परिसमाप्तिञ्च स्वरूपं दर्शितवान्" इति गोयीचन्द्रः । एवं लक्षणद्वयेऽपि सति, गार्ग्यादीनां कठादीनाञ्च आकृतिव्यङ्ग्यत्वाभावात् सर्व्वलिङ्गभाजित्वाच्च न जातित्वमायातमतः पारिभाषिकं जातिलक्षणमाह गोत्रञ्चेति, पुत्रपौत्रादिकमपत्यं गोत्र, चरणं वेदैकदेशः, एतदुभयञ्च जातिरित्यर्थः । "अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्य्यं लभत इत्यर्थः" इति सिद्धान्तकौमुदी । अत्र जातेर्लक्षणान्तराणि प्रदर्श्यन्ते—"असर्व्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः" इति सिद्धान्तकौमुदी । "या द्रव्यस्योत्पत्तावुत्पद्यते नाशे च नश्यति युगपद्गुणैः सम्बध्यते न सर्व्वलिङ्गं भजते बहून्यर्थाननुपैति सा जातिरभिधीयते । यदुक्तं, प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः । असर्व्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः ॥ एतस्मिन् दर्शने युवत्वकुमारत्वब्रह्मत्वादीनामजातित्वम्" इति क्रमदीश्वरः ।

* गर्गस्यापत्यं स्त्री इति वाक्ये (४१५) ष्यप्रत्यये गार्ग्यशब्दादनेन ईपि (२६०) यलोपः । गुणत्वादीप्निषेधेऽपि विशेषतो विधानात् गार्ग्यादीनां न निषेधः । षित्त्वात् पूर्व्वेण (२५७) ईप्सम्भावनायामपि गार्ग्यादीनां जातिसंज्ञाफलम्—गार्गी भार्य्या यस्यासौ गार्गीभार्य्य इत्यादौ (१२८) पुंवद्भावनिषेधः । गार्गी चासौ भार्य्या चेति कर्म्मधारये गार्ग्यभार्य्या इत्यादौ तु (२५०) पुंवद्भावः, गार्गीत्वम् इत्यादौ पुनः (२५०) पुंवद्भावनिषेधश्च । कठशाखाध्ययनकर्त्ता कठः तस्य स्त्रियाम् अनेन ईप्, एवं कौथुमीत्यादि ।

## २६४ । गुणाद्वोतोऽखरुस्योङः ।

(गुणात् ५।, वा ।१।, उतः ५।, न खरु-स्योङः ५।) ।

गुणवाचकादुकारान्तात् स्त्रियामीप् स्याद्वा, न तु खरोः स्योङश्च। मृद्वी मृदुः । खरुस्योङस्तु खरुः पाण्डुः । गुणात् किम्—

सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥

धेनुः । *

---

* स्यः संयोग उङ् यस्य स स्योङ्, खरुश्च स्योङ् चेति खरुस्योङ्, न खरुस्योङ् अखरुस्योङ् तस्मात् । गुणवाचकादिति गुणं वक्तीति कर्त्तरि णकः । अभेदोपचारात् गुणविशिष्टद्रव्यवाचकादुकारान्तादित्यर्थः । मार्दवगुणविशिष्टा स्त्री मृद्वी, वा मृदुः । एवं पट्वी पटुः, लघ्वी लघुः, गुर्वी गुरुरित्यादि । खरुशब्दस्य गुणवाचकत्वात् प्राप्ते निषेधः । "खरुः पतिंवरा कन्या" इति भट्टोजिदीक्षितः । "खरुः तीक्ष्णः" इति गोयीचन्द्रः । गुणमाह—

सत्त्वे इति । यः सत्त्वे द्रव्ये निविशते तदाश्रयति, अपैति तस्मादपगच्छतीत्यर्थः । यथा श्यामता आम्रादिफले निविशते पश्चात् पक्वदशायां तस्मादपैति । एवं पृथग्जातिषु द्रव्यान्तरेषु दृश्यते आम्रादिवत् कदल्यादिषु दृश्यते, स गुणः स्यादित्यर्थः । "पृथग्जातिषु दृश्यते नानाजातिष्ववलोक्यते इत्यर्थः ।—तथाहि श्यामता आम्रे द्रव्ये गवि च दृश्यते, एतेन जातिगुणत्वं निरस्तं, यतः सत्ता द्रव्ये गुणे कर्म्मणि च वर्त्तते नासौ जातिर्द्रव्यादपैति अन्यतः अथवा विनाशपर्य्यन्तमाधारद्रव्यापरित्यागात् न च जातिः ।—नहि गोत्वमश्वजातौ दृश्यते नाप्यश्वत्वं गोजातौ ।" इति गोयीचन्द्रः । एवं सति गमनादिकर्म्मणो गुणत्वापत्तिः द्रव्ये प्रवेशनिर्गमयोगात् द्रव्यान्तरेषु च दर्शनात्, अत आह आधेयश्चेति, यः आधेयः उत्पाद्यः, अक्रियाजो न क्रियाजन्यश्च, अनित्यो नित्यश्च भवतीत्यर्थः, पक्वघटादिरक्ततागुण उत्पाद्यः आकाशादिमहत्त्वादिगुणो नित्य इति, कतिपये गुणा अनित्याः कतिपये च नित्या इति तात्पर्य्यम् । कर्म्मणस्तु सर्व्वस्यैवानित्यत्वमिति तन्निरासः । "उत्पाद्यनीयो नित्यश्च" इति तृतीयपादस्य पाठान्तरं वक्ति क्रमदीश्वरः । एवञ्चेत् तर्हि द्रव्यमपि गुणोऽस्तु—अवयवि द्रव्यं हि आरम्भकावयवे निविशते अवयवविनाशात् तस्मादपैति च, द्रव्यान्तरेषु च एवं दृश्यते, द्रव्याणि च कतिचिदनित्यानि नित्यानि च कतिचित् सन्ति, अत उक्तम् असत्त्वप्रकृतिरिति, सत्त्वं प्रकृतिः स्वरूपं यस्य स सत्त्वप्रकृतिः, न सत्त्वप्रकृतिरसत्त्वप्रकृतिः द्रव्यभिन्न इत्यर्थः । धेनुरिति गुणवाचकाभावात् न ईप् । एतद्गुणलक्षणकारिका तु सिद्धान्तकौमुद्यां न दृश्यते, आकरतया एतस्या अन्यत्र व्याख्यानात् । काशिका: ४।१।४४, वार्त्तिकञ्च ।

## २६५ । पात्क्रोडादिस्वाङ्गतोऽक्तेर्वा ।

(पाद—स्वाङ्गेत: ५।, अक्ते: ५।, वा ।१।) ।

पाद: क्रोडादे: स्वाङ्गादिकारान्ताच्च स्त्रियामीप् स्याद्वा न तु क्ते: । त्रिपदी त्रिपात्, क्रोडी क्रोडा चञ्ची चञ्चा, बिम्बोष्ठी बिम्बोष्ठा । *

स्वाङ्गात् किम्—

स्वाङ्गं स्यादद्रवं मूर्त्तं प्राणिस्थमविकारजम् ।
दृष्टं तत्रातत्स्थमपि तद्वत्ताद‍ृशि च स्थितम् ॥ †

---

* पाद् च क्रोडादिश्च स्वाङ्गञ्च इश्च तस्मात् । न क्ति: अक्तिस्तस्मा: । (१४७) सङ्ख्या-सुपमानादिश्चनेनादिष्टात् पाद्शब्दात् क्रोडादे: स्वाङ्गवाचकात् शब्दात् क्तिभिन्नेकारान्ताच्च स्त्रियामीप् स्याद्वा इत्यर्थ: । क्रोडादिश्च—क्रोड: क्षपच-कल्याणौ पुराण: कमलस्तथा । विकटो-दारचञ्चाश्च खाधारर्धिमहटौ । सहायाराखभक्ता विष्माजाघास्तथा परे इति । अत्र क्रोडादिवर्जेन इकारान्तेन च पाणिनीयो बह्वादि: (४।१।४५) लक्ष्यते, परन्तु तत्र सहायसाधा-रचशब्दौ न दृश्येते, आकृतिगणोऽयमिति लिखनात् तु भवत्येव । कटिश्रोणिप्रभृतिस्वाङ्गाना-मिकारान्तत्वेन प्राप्ते: मुखनखादीनाञ्च स्त्रीत्वाभावात् स्वाङ्गमिह गौणमेवेति, तेन बिम्बोष्ठी दीर्घनखीत्यादि । अतएव पाणिनौ उपसर्जनादिति (४।१।५४), संक्षिप्तसारे च अप्रधानार्था-दिति, सुपद्मे अप्रधानादिति, कातन्त्रपरिशिष्टे च बहुव्रीहौ इति लिखनम् । त्रिपदीति त्रय: पादा: यस्या: इति बहुव्रीहौ (१४७) पादस्य पाद्-आदेशे त्रिपाद्शब्दादनेन ईपि, (२२१) पाद: पदादेश: । त्रिपदी ब्रह्मावारपाणी । पक्षे त्रिपात् । क्रोडवत्यां स्त्री क्रोडी, वा क्रोडा । चञ्ची चञ्चा इति क्रोडादित्वात् वा ईप्, अत्यन्तकोपना स्त्रीत्यर्थ: । बिम्बे इव ओष्ठौ यस्या: इति बिम्बोष्ठी बिम्बोष्ठा स्त्री, स्वाङ्गवाचकत्वात् वा ईप्, अत्र स्वाङ्गादुपसर्जनाददन्तादिति त्रिवान्द्र-कौमुदीविवरणात् शोभना शिखा सुशिखा इत्यत्र न ईप् । पाणिनि: ४।१।८,४३,४५,५४, "असंयोगोपधात्" इति वार्त्तिकञ्च ।

† स्वाङ्गलक्षणमाह—स्वाङ्गं स्यादिति । अद्रवं द्रवभिन्नं, मूर्त्तं साकारं (काठिन्यादिधर्म-विशिष्टं मूर्त्तिरिति बोपदेवः), प्राणिस्थं प्राणिनि स्थितं (मुखनासिकाभ्यां यो वायुः निष्-क्रामति स प्राण: सोऽस्यास्तीति प्राणी तत्र यत् तिष्ठति तत् प्राणिस्थमिति बोपदेव:), अविकारजं धातुवैषम्यादिजन्यविकारात् न जातम्—एवम्भूतं वस्तु तत् स्वाङ्गं स्यादित्यर्थ: । यथा बिम्बोष्ठी

बहुस्वेदा द्रवत्वात्। सुज्ञाना अमूर्त्तत्वात्। सुमुखा शाला अप्राणिस्थत्वात्। सुशोफा विकारजत्वात्। *
सुकेशी सुकेशा रथ्या, अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्।
सुस्तनी सुस्तना प्रतिमा, प्राणिवत् प्राणिसदृशे स्थितत्वात्। †
राजी राजिः, क्तेस्तु बुद्धिः मतिः। ‡

---

विश्लोष्ठा। द्वितीयलक्षणमाह दृष्टं तथातत्स्थमपीति—तत्र प्राणिनि दृष्टम् अनन्तरम् अतत्स्थम् अप्राणिस्थमपि अद्रवमूर्त्ताविकारजं यदङ्गं तदपि स्वाङ्गं स्यादित्यर्थः। यथा सुकेशी सुकेशा रथ्या। तृतीयलक्षणमाह—तद्वत् तादृशि च स्थितमिति तद्वत् प्राणिवदनन्, तादृशि प्राणितुल्ये स्थितञ्च अद्रवमूर्त्ताविकारजं यत् तदपि स्वाङ्गं स्यादित्यर्थः। यथा सुस्तनी सुस्तना प्रतिमा। उक्तकारिकायाः पाठान्तरमपि दृश्यते यथा सिद्धान्तकौमुद्याम् "अद्रवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्। अतत्स्थं तत्र दृष्टञ्च तेन चेत् तथा युतम्॥" "तस्य चेतत् तथा युतम्" इति क्रमदीश्वरः।

* अद्रवादिपदव्यावृत्तिमाह—बहवः स्वेदाः (घर्म्माः) यस्याः सा बहुस्वेदा, स्वेदस्य द्रवत्वात् न स्वाङ्गत्वमित्यर्थः। सुष्ठु ज्ञानं यस्याः सा सुज्ञाना, ज्ञानस्य अमूर्त्तत्वात्। सुष्ठु मुखं यस्याः सा सुमुखा शाला, अत्र शालामुखस्य अप्राणिनि स्थितत्वात्। सुष्ठु शोफः (शोथः) यस्याः सा सुशोफा, शोफस्य विकारजत्वात्, न स्वाङ्गत्वमिति सर्वत्रान्वयः।

† सुष्ठु केशी यस्याः सा सुकेशी सुकेशा रथ्या इति द्वितीयलक्षणोदाहरणम्। सुष्ठु स्तनौ यस्याः सा सुस्तनी सुस्तना प्रतिमा इति तृतीयलक्षणोदाहरणम्।

‡ राजी राजिरिति राजधातोः इप्रत्ययः, एवं गोपी श्रमी मणी धमी श्रेणी रजनी अवनीत्यादि, पक्षे गोपिरित्यादयः। श्रोः श्री, लक्ष्मीः लक्ष्मी इति दुर्घटवृत्तिकृत्क्रमदीश्वरौ। निषेधो यज्जातीयस्य विधिरपि तज्जातीयस्येति न्यायात्, क्तिवर्जनात् कृदिकारादेवायं विधिः, तेन सुगन्धिः पृथ्वजानिरित्यादौ न स्यात्। उपलक्षणात् क्तिः (११५९), अक्तिश्च (११६०) अजीवनिरित्यादौ न स्यात्।

स्वाङ्गवाचके विशेषाः—

बह्वचां स्वाङ्गानां मध्ये नासिकोदराभ्यामेव ईप् वा स्यात्। तुङ्गनासिकी तुङ्गनासिका, चौचोदरी चौचोदरा। आभ्यां किं, पृथुजघना, चारुवदना, दीर्घलोचना इत्यादि। पाणिनिः ४।१।५५।

संयोगोपधस्वाङ्गानां मध्ये गलौष्ठकण्ठकर्णशृङ्गाङ्गदन्तशालाग्रपुच्छेभ्य एव ईप् वा स्यात्।

## २६६। धात् क्रीतात्। (धात् ५।, क्रीतात् ५।)।

धनेन क्रीयते स्म—धनक्रीती। *

## २६७। क्तादल्पे। (क्तात् ५।, अल्पे ७।)।

धादित्येव। अभ्रेण लिप्यते स्म—अभ्रलिप्ती। †

## २६८। स्वाङ्गाद्धे। (स्वाङ्गात् ५।, हे ७।)।

स्वाङ्गात् परो हे स्थितो यः क्तस्तस्मादीप् स्यात्। शङ्खभिन्नी। ‡

---

दीर्घजङ्घी दीर्घजङ्घा इत्यादि। एभ्यः किं, सुनेत्रा सुगुल्फा इत्यादि। पाणिनिः ४।१।५५, वार्त्तिकानि च।

प्रोष्ठी कगलान्ती नित्यं संज्ञायाम्। प्रोष्ठी शफरी, कगलान्ती ओषधिविशेषः। श्रीपतिः।

शर कबर विष मणिभ्यः पुच्छात् नित्यम्। शरपुच्छीत्यादि। वार्त्तिकम्।

उपमानपूर्व्वात् पुच्छपक्षाभ्यां नित्यम्। श्वपुच्छी काकपक्षी इत्यादि। उपमानात् किं, सितपक्षा हंसीत्यादि। वार्त्तिकम्।

क्रोड खुर बाल शफ गुद प्रोथ घोणा गल भग योवादेर्न ईप्। पाणिनिः ४।१।५६।

सह विद्यमान नञः परात् स्वाङ्गात् न ईप्। सकेशा इत्यादि। पाणिनिः ४।१।५७।

नख मुखाभ्यां संज्ञायां न ईप्। शूर्पणखा कालमुखा। संज्ञायां किं, ताम्रनखी कन्या। पाणिनिः ४।१।५८।

मन्त्रार्थे पाद इत्यस्मात् न ईप्। द्विपदा ऋक्। पाणिनिः ४।१।९।

* करणपूर्व्वात् क्रीतादीप् स्यात् स्त्रियाम्। स्वाद्युत्पत्तेः प्रागेव समासे एतद्विधानं, अतो धनेन क्रीयते स्म इति वाक्यम्। धनेन क्रीता धनक्रीता इत्यत्र न स्यात्। धात् किं, राज्ञा क्रीयते स्म राजक्रीता इति। पाणिनिः ४।१।५०।

† करणपूर्व्वात् क्तान्तादीप् स्यात् स्त्रियां करणस्य अल्पत्वे सति। इहापि स्वाद्युत्पत्तेः प्राक् समासः, अत आह अभ्रेण लिप्यते स्मेति वाक्यम्। अल्पे किं, जलपूर्णा घटी, चन्दनानुलिप्ता अङ्गनेत्यादि। पाणिनिः ४।१।५१।

‡ पृथग्योगात् धादिति अल्पे इति च नानुवर्त्तेते, केवलं क्तादित्यनुवर्त्तते। स्वाङ्गवाचकशब्दात् परो बहुव्रीहिसमासे स्थितो यः क्तान्तशब्दस्तस्मादीप् स्यात्। शङ्खो (ललाटास्थि) भिन्नो यया इति शङ्खभिन्नी। शङ्खो निधौ ललाटास्थ्नीत्यमरः। हे इति किं, पादपतिता।

## २६९ । वाच्छन्नाज्जातेः ।

(वा ।१।, अच्छन्नात् ५।, जातेः ५।) ।

आच्छादनजातिवर्ज्जात् जातिवाचिनः परात् हे स्थितात् क्तादीप् स्याद्वा ।

इक्षुभक्षिती इक्षुभक्षिता । छन्नात्तु वस्त्रच्छन्ना । *

## २७० । पत्न्यामपालकान्तात् ।

(पत्न्याम् ७।, अपालकान्तात् ५।) ।

पुंवाचकादपालकान्तादीप् स्यात् भार्य्यायाम् ।

गोपी । पालकान्तात्तु गोपालिका । †

---

उपसर्गव्यवधानेऽपि क्वचित् स्यात्, यथा प्रोष्ठविचती । अत्र (पाणिनिः ६।२।१७०) कृतमित-जातप्रतिपन्नेभ्यो न स्यादिति, यथा दन्तजाता, मासजाता, सुखजाता, दुःखजाता, बहुकृता, अकृता, सुकृता, कुण्डमिता, कुण्डप्रतिपन्ना इत्यादि । विवाहे पाणिर्गृहीतो यया सा पाणिगृहीती पत्नी, अन्यत्र पाणिगृहीता इति च वक्तव्यम् । पाणिनिः ४।१।५२, वार्त्तिकद्वयञ्च ।

* छन्नं वस्त्रजातिः, नास्ति छन्नं यत्र सोऽच्छन्नस्तस्मात् । इक्षुर्भक्षिता यया सा इक्षुभक्षिती इक्षुभक्षिता, एवं शकहृष्टी शकहृष्टा इत्यादि । वस्त्रं छन्नं परिहितं यया सा वस्त्रच्छन्ना, एवं वसनप्राप्ता इत्यादौ न स्यात् । अत्रापि कृतादिभ्यो न स्यात्, तेन इक्षुकृता इत्यादि । पाणिनिः ४।१।५३, वार्त्तिकम्, तथा "अन्तः" ६।२।१८० ।

† पालकोऽन्ते यस्य स पालकान्तः, पत्न्याख्ययोगे यस्मात् । पालकान्तवर्ज्जनात् अकारान्तादेवायं विधिरिति । किञ्च पालकशब्देनैवेष्टसिद्धौ अन्तग्रहणं—पालकपर्य्यन्तस्य ज्येष्ठादिपदस्य (आदन्त,परिशिष्टोऽपि विवक्षितस्य) प्राप्त्यर्थम् । तेन, ज्येष्ठ कनिष्ठ मध्यमोत्तम गोपालक पशुपालक वर्ज्जात् पुंवाचकादकारान्तादीप् स्यात् पत्न्यामित्यर्थः । पुंवाचकादिति किं, देवदत्ता । गोपस्य पत्नी—गोपी, एवं पितामही मातामहीत्यादि । गोपालकस्य पत्नी—गोपालिका (२४९,२५४), एवं ज्येष्ठा कनिष्ठा मध्यमा उत्तमा पशुपालिका । गोपीत्यादिषु जातित्वादीपि सिद्धे इह उदाहरणं विविक्षानामपि प्राप्त्यर्थं, तेन वणिजस्य पत्नी वणिजी, वैश्यस्य पत्नी वैश्यीत्यादि । पाणिनिः ४।१।४८, "गोपालिकादीनां प्रतिषेधः" इति वार्त्तिकञ्च ।

२७१ । ब्रह्मरुद्रभवशर्व्वमृडेन्द्रवरुणादानङ् च ।

(ब्रह्म—वरुणात् ५।, आनङ् ।१।, च ।१।) ।

एभ्यः पत्न्यामीप् स्यात्, तेषामानङ् च । ब्रह्माणी रुद्राणी । *

२७२ । मातुलोपाध्यायक्षत्रियाचार्य्यसूर्य्यार्य्याद्वा । (मातुल—अर्य्यात् ५।, वा ।१।) ।

मातुलानी मातुली । अन्ये त्वीपमपि विकल्पयन्ति, तदा मातुलेत्यादि । तद्वाशब्दो व्यवस्थाप्यः । आचार्य्यानी, अत्र न णत्वं । †

२७३ । वृषाकप्यग्नि मनु पूतक्रतु कुसित कुसिदादैङ् च । (वृषाकपि—कुसिदात् ५।, ऐङ् ।१।, च ।१।) ।

---

* ब्रह्मा च रुद्रश्च भवश्च शर्व्वश्च मृडश्च इन्द्रश्च वरुणश्च तस्मात् । अथानस्य ईप्-प्रत्ययस्यानु-रोधात् [illegible] । आनङो ङित्त्वादन्त्यस्य स्थाने । ब्रह्मणः पत्नी ब्रह्माणी, एवं रुद्राणी भवानीत्यादि । अत्र वार्त्तिकमते ब्रह्माणमानयतीति ब्रह्माणी, न तु ब्रह्मशब्दादानङ् । एवं ब्रह्माणी शिवानीत्यादि । पाणिनिः ४।१।४९ ।

† मातुलश्च उपाध्यायश्च क्षत्रियश्च आचार्य्यश्च सूर्य्यश्च अर्य्यश्च तस्मात् । ईप् आनङ् इत्युभयो-रनुवृत्तिः । एभ्यः पत्न्यामीप् स्यात् तेषामानङ् च वा स्यादित्यर्थः । मातुलस्य पत्नी—मातुलानी मातुली, अन्येषां मते ईपोऽपि विकल्पः, तेन मातुला इत्यपि । स्वमते तु वाशब्दस्य व्यव-स्थया ज्ञेयम्, अभिधानविरुद्धानि पदानि भविष्यन्तीति भावः, यथा—उपाध्यायात् पत्न्या-मानङ् वा स्यात्, तेन उपाध्यायानी उपाध्यायी । स्वयं व्याख्यात्र्यर्थे केवलम् ईप् वा स्यात्, तेन उपाध्यायी उपाध्याया । स्वयं-क्षत्रियायां पत्नीवाच्ये [illegible] क्षत्रियी, जातौ अर्य्याणी अर्य्या, क्षत्रियाणी क्षत्रिया । आचार्य्यात् पत्न्याम् आचार्य्यानी, स्वयं व्याख्यातृत्वे आचार्य्या । सूर्य्य-[illegible] कदाचित् पत्नी सूरी (२६०), देवतायान्तु सूर्य्या । [illegible] पत्न्यां जातौ च ईपेव—[illegible] (वार्त्तिकम्) । [illegible] वाशब्दव्यवस्थया न कल्पितेति । "४।१।४९" इति पाणिनिसूत्रस्य वार्त्तिकानि ।

एभ्यः परस्यामीप् स्यात् तेषामैङ् च। वृषाकपायी अग्नायी मनायी। *

२७४। नारी सखी यवानी यवनानी हिमान्यरण्यानी मनावी पतिवत्न्यन्तर्व्वत्नी पत्नी भाजी गोणी नागी स्थली कुण्डी काली कुशी कामुकी घटी कबरी नील्यश्विश्वरः। (नारी—अश्विन्यः १७)।

एते निपात्यन्ते। †

---

* वृषाकपिश्च अग्निश्च मनुश्च पूतक्रतुश्च कुसितश्च कुसिदश्च (कुसिद इति पाणिनौ, कुसीद इति संक्षिप्तसारे, कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्य इति सिद्धान्तकौमुद्याम्) तस्मात्। अत्रापि प्रधानस्य ईपोऽनुरोधात् पञ्चम्यन्तत्वम्। उत्तरत्र वाक्यद्वयेन मध्यवर्त्तित्वादस्य नित्यत्वम्। ऐङ् इत्यस्य ङित्त्वादन्त्यस्य स्थाने। वृषाकपेः पत्नी वृषाकपायी, हरप्रिया वृषाकपी इत्यमरः। पूतक्रतुरिन्द्रः। पाणिनिः ४।१।३६—३८। "मनोरौ वा" (४।१।३८) इति सूत्रेण मनावी मनुश्च। परसूत्रे मनावीति पदं प्रदत्तम्। (तेन पदत्रयं—"मनावी, मनायी, मनुः"—सिद्धान्तकौमुदी)।

† निपातो ह्यर्थविशेषे भवतीत्यतः—

नरजातिस्त्रियां नारी, वयस्यायां सखी मता।
यवनानी लिपेर्भेदे, यवानी गर्हिते यवे।
हिमानी हिमसंहत्याम्, अरण्यानी महावने।
मनावी च मनोः पत्नी, पतिवत्नी सभर्तृका।
अन्तर्व्वत्नी च गर्भिण्यां, पत्नी पाणिगृहीतिका।
भाजी कश्चित् व्यञ्जने च, गोणी धान्यादिपात्रके।
नागी स्त्रियां स्यात् स्थूलायां, कान्तायश्चाद्विनीनः।
स्थली त्वकृत्रिमा भूमिः, कुण्डी पात्रविशेषके।
काली च कृष्णवर्णायां, कुशी लौहविकारके।
कामुकी मदनायत्ता, घटी क्षुद्रघटी मता।
कबरी केशविन्यासे, नीली प्राणिनि चौषधौ।
अश्विनी विश्वरिज्ञायां स्त्रियामेव निपातनम्॥

अत्र नारीति नृशब्दात् नरशब्दाच्च ईपि निपातनम्। सखीति सख्यन्तात् (२६५) विवक्षे

२७५ । पद्वती मन्त्री युवत्यनड्वाह्यौ श्वेन्येनी हरिणी भरिणी रोहिणी लोहिन्यसिक्नी पलिक्न्यौ वा । (पद्वती—पलिक्न्यः १८, वा ।१।) ।

पक्षे—पद्धतिः मन्त्रिः यूनी अनडुही श्वेता एता हरिता भरिता रोहिता लोहिता असिता पलिता । असिक्नी अवृद्धा, पलिक्नी वृद्धा । *

---

ईपि प्राप्ते, नित्यार्थो निपातः । यवनजातिस्त्रीत्वर्थे यवनी । मनोः पत्नीत्यर्थे मनायी-त्यपि पूर्ववत् (२०१) । पतिवत्नीत्यत्र पतिर्विवाहकर्त्ता, तेन पतिमती सेना । असत्त्वविव-क्षायां प्रायशो लिङ्गसामान्यादीप्, तेन मठी पटी कणी यंत्री मृणालीत्यादि, अस्ती इत्यः इत्यक-इत्यादौ न स्यात् । अथ वक्तव्यं—(पाणिनिः ४।१।२५) एकः पतिरस्या इत्यर्थे एकपत्नी, समानः पतिरस्याः सपत्नी, एवं नृपत्नी वीरपत्नी भ्रातृपत्नी भद्रपत्नी पुत्रपत्नी पितृपत्नीति नित्यम् ; "विभाषा सपूर्वस्य" (पाणिनिः ४।१।३४) इति सूत्रेण तु विकल्पः, यथा, दृढपतिः दृढपत्नी, स्थूलपतिः स्थूलपत्नी, वृषलपतिः वृषलपत्नीत्यादि तत्पुरुषे बहुव्रीहौ च । एवं जानपदी । "संज्ञायां वा" इति वार्त्तिकेन गोणी गोणा । पाणिनिः ४।१।३२,३३,३८, ४२,४९,६२ । "घटकुम्भात् पात्रे" इति कातन्त्रपरिशिष्टे श्रीपतिदत्तः । सुपद्मे घटीशब्दो गौरादौ पठितः । "कृतरयोर्ङीप्" इति शार्ङ्गरवादिगणपाठसूत्रम् (पाणिनिः ४।१।७३) ।

* पद्वती इत्यादयो निपात्यन्ते वा । पादस्य इतिः पद्वती, मन्त्रधातोः क्तिः मन्त्री मन्त्रभेदः, (पक्षे तु मन्त्रिरेव), अन्तत्वेन (२६५) अप्राप्ते ईपो विभाषा । युवन्शब्दात् ति-प्रत्ययं कृत्वा वा निपात्यते—युवती युवतिरिति च । अनडुह्शब्दात् (२५७) ईपि, आत् वा निपात्यते । श्वेत एत हरित भरित रोहित लोहित शब्देभ्यो वर्णवाचकेभ्यः वा ईप् तका-रस्य नकारश्च निपात्यते, मध्ये भरिणी रोहिणीति नित्यम् । असितशब्दादवस्थायां पलित-शब्दात् वयस्यायाम् ईप् तकारस्य क्न निपात्यते । पक्षे—पद्धतिमन्त्रिभ्यां (२६१) ईप्निषेधः । • यूनी अनडुही (२५७) ईप् । पाणिनिः ४।१।३९,४१,४२,७७, वार्त्तिकञ्च । "युवतीति तु यौतेः शतृप्रत्ययात् ङीपि बोध्यम्" इति सिद्धान्तकौमुदी ।

अथ वक्तव्यम्—ईश्वरशब्दादीप् वा, ईश्वरी ईश्वरा । "अवयवापाणिनीयत्वात् ईश्वरा ईश्वरीति श्रीधरादिभो वरद्" इति सुपद्मं ।

* केवल (केवल इति मन्त्रनामकमतीमध्ये, केवली ज्योतिर्विशेषस्य नामेति गोश्चन्द्रः)

## २७६। न मन्संख्यास्वस्रजादेः।

(न ।१।, मन्-संख्या-स्वसृ-अजादेः ५।)।

एभ्य ईप् न स्यात्। सीमा, पञ्च, स्वसा माता, अजा बाला। (१०१) नेपीत्युक्तेः—यावती कती। *

---

सुमङ्गल मामक (मामकी देवताविशेषः) भागधेय भेषज समान (समानी छन्दोविशेषः) पाप आर्य्यकृत दीर्घजिह्व अपर (अपरा इति क्रमदीश्वरः) रेचक टङ्कक कैकय भिक्षुकादेरीप् नास्ति। केवलीत्यादि। नाम्नीति किं केवला इत्यादि। पाणिनिः ४।१।३०।

क्रोडादि(अजादिरिति पाणिनिः)भिन्नादाद्यके वयसि वर्त्तमानात् शब्दादीप् स्यान्मते। कुमारी किशोरी कलभी तरुणीत्यादि। गौण्ये न—बहुकुमारा पुरी। वार्द्धके वयसि—स्थविरा वृद्धा। क्रोडादेस्तु—क्रोडा बाला वत्सा कन्या इत्यादि आकृतिगणः। त्रयाणां फलानां समाहारः त्रिफला, अत्र स्त्रीत्वम् आप् च निपात्यते। पाणिनिः ४।१।४,२०। "अजादित्वात् त्रिफला" इति सिद्धान्तकौमुदी।

* स्वसा च अजश्च स्वस्रजौ, तौ आदी ययोस्तौ स्वस्रजादी, मन् च संख्या च स्वस्रजादी चेति तस्मात्। मन्प्रत्ययान्तात् संख्यावाचकात् स्वस्रादेः अजादेश्च ईप् न स्यादित्यर्थः। सीमन्शब्दात् (२५१) डापोऽप्राप्तिपक्षे नान्तत्वात् प्राप्तस्य (२५७) ईपो निषेधः। एवम् अति-पटिमा इत्यादि। अत्र मन ईप्वर्जनं नान्तत्वात् प्राप्तस्य (२५७) ईप एव निषेधार्थं, तेन लब्धसीम्नी लब्धसीमे लब्धसीमानौ इत्यादिषु (२५२) ईप् वान्नस्यादित्यनेन ईप् स्यादेव। संख्यावाचकानां मध्ये एकद्विबहूनामीपोऽसम्भवः, त्रिचतस्रोः स्वस्रादिपाठादेव ईप्-निषेधः, ततश्च पञ्चादष्टादशपर्य्यन्तानां सुप्त्वे (१११) त्रिषु लिङ्गेषु समत्वविधानेनैव लिङ्ग-कार्य्यनिषेधे सिद्धे, अत्र संख्यावर्जनं नान्तसंख्यायाः गौणत्वे ईप्निषेधार्थं, तेन प्रियपञ्चा द्रौपदी इत्यादौ, अपञ्चा इत्यादौ च (२५२) ईप् वान्नस्यादित्यनेन ईप् न स्यात्, एवम् अति-पञ्चा स्त्रीत्यादौ (२५७) द्विगुप्रादिभ्यनेन ईप् न स्यात्। किञ्चात्र नञोऽस्वार्थत्वात् विंशति-षष्ट्यादेः (२६५) पाञ्चोषादीत्यनेन ईप् वा स्यादेव। पञ्च इत्युदाहरणं लिपिकरप्रमादः। पञ्चेति उदाहरणात् नान्तसंख्याया एव ईप्निषेध इति केचित्, सामान्यतो निषेधात् एकस्य पत्नी एका इत्यादौ ईप् न स्यादित्यपरे। स्वस्रादिश्च—स्वसृ मातृ यातृ दुहितृ ननान्दृ तिसृ चतसृ कति यति तति—इति दश। माता अत्र जननी, याता स्वामिभ्रातृपत्नी, तेन धान्यस्य मात्री, तीर्थस्य यात्री इत्यादौ ईप् स्यादेव। तिसृ चतसृ इत्येतयोः संख्यावाचकत्वान्निषेधे अत्र गौणत्वे ग्रहणं, तेन प्रियतिस्रा प्रियचतस्रा इत्यादि। कतियतिततीनां सुप्त्वे (१११) लिङ्गकार्य्यनिषेधात् गौणत्वे प्रियकतिरित्यादौ ईप् न स्यात्। अजादिश्च—अज बाल अश्व वडव एडक चटक कोकिल मूषिक परभृत परपुष्ट अन्यपुष्ट वाट वर्त्तक पिपीलिकादिः।

## २७७। उतोऽयुङ्रज्ज्वादेर्नृप्राणिजातेरूप्।

(उतः ५।, अयुङ्रज्ज्वादेः ५।, नृप्राणिजातेः ५।, ऊप् ।१।)।

स्त्रियामुकारान्तात् नृजातेरप्राणिजातेश्च ऊप् स्यात् न तु युङो रज्ज्वादेश्च। कुरूः कर्कन्धूः। प्राणिजातेस्तु, धेनुः। युङ्-रज्ज्वादेस्तु, अध्वर्युः, रज्जुः हनुः। *

## २७८। वामलक्षणशफसहसहितसंहितोपमानादूरोः।

(वाम-लक्षण-शफ-सह-सहित-संहित-उपमानात् ५।, ऊरोः ५।)।

वामोरूः रम्भोरूः। †

---

अथमजादिः पाणिनीयाद्रियते, तत्र परभृतादयो न दृश्यन्ते, एवं स्वाङ्गजातिभ्यां पराः कृतमित-जातप्रतिपन्नाश्च, केशकृता दन्तमिता इत्यादि। (२०१) नेपोत्युक्तेरिति ईपि कर्तव्ये ऋवर्णवर्गाणां सङ्गावधावनिषेधात् भावतोऽत्र उदित्वात् (२५०) ईप्। भगोऽत्र (२६४) गुणवाचकादीप्। पाणिनिः ४।१।४,१०,११। पाणिनीये स्वसादिगणे कति यति ततीनां निवेशो न दृश्यते।

* य ऊङ् यस्य स युङ्, रज्जुरादिर्यस्य स रज्ज्वादिः, युङ् च रज्ज्वादिश्च तत् युङ्-रज्ज्वादि, नास्ति युङ्रज्ज्वादि यस्याः सा अयुङ्रज्ज्वादिस्तस्याः। ना च अप्राणी च तत् नृप्राणि, तच्च तत् जातिश्चेति नृप्राणिजातिस्तस्याः। मनुष्यजातेः अप्राणिजातेश्च उकारान्तात् शब्दात् स्त्रियामूप् स्यात्, न तु यकारोङो रज्ज्वादेश्च। नृजातेः—कुरूरिति, कुरुशब्दः कुरुदेशस्थ-मनुष्यजातिवाची, एवं कारूः। अप्राणिजातेः—कर्कन्धूरिति कर्कन्धुशब्दः बदरीजातिवाची, एवम् अलाबूः। धेनुरिति ह्रीभवप्राणिजातित्वात् न ऊप्, एवं कृकवाकुः, पोतुः। “ननु सुतनूरनुपालयानुकामौ वरतनु संप्रवदन्ति कुक्कुटा इत्यत्र दीर्घान्तसुतनुशब्देन समासः” इति क्रमदीश्वरः। अध्वर्युरिति चरणत्वेन जातित्वात् प्राप्तौ युङ्त्वान्निषेधः, अध्वर्युर्ब्राह्मणी। रज्ज्वा-दिश्च—रज्जुः हनुः कद्रुः प्रियङ्गुः वायुरित्यादि। पाणिनिः ४।१।६६, वार्त्तिकञ्च।

† वामस्य लक्षणस्य शफस्य सहस्य सहितस्य संहितस्य उपमानस्य तस्मात्। वामादिभ्यः षड्भ्यः उपमानवाचकाच्च परो य ऊरुशब्दस्तस्मादूप् स्यात् स्त्रियाम्। वामौ सुन्दरौ ऊरू यस्याः सा वामोरूः। एवं लक्षणशब्दात् (४४६) अर्श आदित्वात् अप्रत्ययेन लक्षणौ सुलक्षणावन्तौ ऊरू यस्याः सा लक्षणोरूः; शफौ खुरौ इव संश्लिष्टौ ऊरू यस्याः सा शफोरूः; सहिते इति सह्यौ

## २७९ । तन्वादेर्वा । (तन्वादे: ६।, वा ।१।) ।

तनूः तनुः, वधूः वधुः । *

इति ऊरत्पादः ।

---

## २य पादः—कारकम् (क) ।

## २८० । त्यर्थसम्बुद्ध्युक्तार्थे प्री ।

(त्यर्थ-सम्बुद्धि-उक्तार्थे ७।, प्री ।१।) ।

लेरर्थे सम्बोधने त्यैरुक्तार्थे के सति च प्री स्यात् ।

कृष्णः श्रीः ज्ञानं । हे विष्णो । †

---

ऊरू यस्याः सा वरोरूः, विलक्षणोरुसहिता वा ; हितेन सहितौ ऊरू यस्याः सा सहितोरूः, (२८८) संहितशब्दस्य विकल्पे सहितौ संहितौ संश्लिष्टौ ऊरू यस्याः सा सहितोरूः संहितोरूः ; उपमानात्तु, रम्भे इव ऊरू यस्याः सा रम्भोरूः, एवं करभोरूः । एभ्यः किं, वृत्तोरुः पीनोरुरित्यादि । पाणिनिः ४।१।६९,७० ; सहितसहाभ्यां चेति वक्तव्यमिति वार्त्तिकञ्च ।

* तरुरादिर्यस्य तन्वात् । तन्वादेर्वा ऊप्, स्यादित्यर्थः । तन्वादिर्यथा—तनुश्वश्रूवधूभीरुः कद्रु पङ्गु प्रियङ्गवः । गङ्गुः कुरुरिति प्रोक्तास्तन्वादी सरयुस्तथा ॥ तनुशब्दात् बोध्योऽपि वरतनूः सुतनूरित्यादि । पाणिनि—वाम-कद्रु-कमण्डलुभ्यां नित्यमूप् स्यात् संज्ञायामिति वक्तव्यम्, भद्रबाहूरित्यादि (पाणिनिः ४।१।७०,७२) । श्वशुरस्य पत्नी श्वश्रूरिति निपात्यम् "श्वशुरस्योकाराकारलोपश्च" इति वार्त्तिकम् ।

---

† स्यादिभिर्लिङ्गानां रूपाणि निरूप्य स्यादीनामर्थान् निरूपयति त्यर्थेत्यादि ।—लिर्लिङ्गं, लेरर्थो त्यर्थः, सम्बुद्धिः सम्बोधनं, उक्तोऽर्थो यस्य तत् उक्तार्थं कारकं—त्यर्थश्च सम्बुद्धिश्च उक्तार्थश्च एतेषां समाहारस्तस्मिन् ।

त्यर्थोऽभिधेयः—तथाच 'शब्देनोच्चार्यमाणेन यस्य प्रतिपाद्यते, तस्य शब्दस्य तदर्थ

# सर्व्वोऽर्च्यो जीवनः पाता दानीयः प्रभवो लयः। *

---

प्रायतामर्थसम्प्रयेति प्राञ्चः। एवञ्च, "अस्मात् शब्दादयमर्थो बोद्धव्यः" इतीश्वरेच्छाशक्तिरभिधा, तया प्रतिपाद्यः अभिधेय इति। शक्तिग्रहश्च व्याकरणादिभ्यो भवति, यथा—शक्तिग्रहं व्याकरणोपमान-कोषाप्तवाक्यात् व्यवहारतश्च। सान्निध्यतः सिद्धपदस्य वृद्धाः वाक्यस्य शेषात् विवृतेर्वदन्ति॥ अर्थश्च पञ्चधा त्रिधा वा, तदुक्तं—स्वार्थो द्रव्यञ्च लिङ्गञ्च सङ्ख्या कर्म्मादिरेव च, अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमाः इति। स्वार्थो विशेषणं, द्रव्यं विशेष्यं, लिङ्गं पुंस्त्वादि, संख्या एकत्वादि, कर्म्मादिकारकादिरिति।

लिङ्गस्य अर्थे, सम्बोधने, प्रत्ययैः कथितार्थे कारके च सति, प्रथमा स्यादित्यर्थः। किञ्च यदा लिङ्गार्थातिरिक्तकर्म्माद्यर्थो न विवक्ष्यते तदैव लिङ्गात् प्रथमा स्यात्, अन्यथा कृष्णं श्रिताश्रीत्यादावपि प्रथमापत्तेः। लिङ्गार्थस्य एकत्वद्वित्वबहुत्वेषु क्रमादेकवचनद्विवचनबहुवचनानि प्रयोक्तव्यानि (१२)। यथा—घटः घटौ घटाः। एको द्वौ बहव इत्यादिषु सङ्ख्या एव लिङ्गार्थः, विभक्तिप्रयोगस्तु—"नापदं शास्त्रे प्रयुञ्जीत" इति नियमात् पदत्वार्थं, कर्म्मत्वादिप्रतीत्यर्थञ्च। अतएव प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति प्राञ्चः। पुंस्त्वादिकमपि लिङ्गार्थ इति ज्ञापयन्नाह कृष्णः श्रीः ज्ञानमिति। पाणिनिः २।३।४६,४७।

ननु क्रियारहितं वाक्यमस्तीति न्यायात् सर्व्वत्रैव क्रियाध्याहारेण उक्तार्थत्वात् प्रथमाप्राप्तौ किं लिङ्गार्थग्रहणमिति? उच्यते, यत्र अकर्म्मकक्रियापदं कर्त्रादिपदयुक्तं तत्रैव क्रियाध्याहारः, यत्र तु केवलो घटशब्दः प्रयुज्यते तत्र तदध्याहारावसरो नास्तीति। एवम् एकादिशब्दः यदा संख्येयवाची तदा घटादिना समानाधिकरणः स्यात्, तत्र लिङ्गार्थे प्रथमा—यथा, एको घटः, प्रसन्नो श्रीहरिरित्यादि।

आभिमुख्यविधानं सम्बुद्धिः। हे, अये, इत्यादावचेतनेषु तूपचारः। "सम्बोधनञ्च प्रवर्त्तनाविषयबोधनादिफलकाभिमुख्यम्" इति सिद्धान्तकौमुदीटीका। "सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते॥" इति हरिकारिका।

* उक्तार्थे उदाहरति सर्व्व इत्यादि। सर्व्वः शिवः—अर्च्यः, जीवनः, पाता, दानीयः, प्रभवः, लयश्च। अर्च्यतेऽयमिति कर्म्मणि ध्यण्, अत्र सर्व्व इति कर्म्म उक्तम्। जीव्यतेऽनेनेति जीवनः करणे अनट्, अत्र सर्व्व इति करणमुक्तम्। पातीति पाता कर्त्तरि तृन्, अत्र सर्व्व इति कर्त्ता उक्तः। दीयतेऽस्मै इति दानीयः, (९६५) अनेः कभावे इत्यनेन सम्प्रदाने अनीयः, अत्र सर्व्व इति सम्प्रदानमुक्तम्। प्रभवत्यस्मादिति प्रभवः अपादाने अल्, अत्र सर्व्व इत्यपादानमुक्तम्। लीयतेऽस्मिन्निति लयः अधिकरणे अल्, अत्र सर्व्व इत्यधिकरणमुक्तम्। उक्तार्थे इति बहुवचननिर्देशात् अन्येष्वर्थेष्वपि प्रथमा—तथाच सिद्धान्तकौमुद्याम् "अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः," "अभिहिते प्रथमा" "तिङ्कृत्समानाधि-

२८१। कर्म्मक्रियाविशेषणाभिनिविशाधिशीङ्स्थासन्वध्युपावस-ङं ढं द्वौ। (कर्म--अ १, ४ १, शौ।१।)।

कार्य्यं क्रियाविशेषणम् अभि-नि विशादेङश्च ढसंज्ञं स्यात्, तत्र च द्वौ। *

---

करणे प्रथमा" इति वार्त्तिकद्वये च। तिङा यथा--रामो वनं ययौ, अत्र कर्त्ता उक्तः, रामेण रावणो जघ्ने, अत्र कर्म्म उक्तम्। कृता न—मर्त्यः, इत्यादि अवगन्तव्यम्। तद्धितेन यथा—वाचा कृतं वाचिकम्, अत्र कर्म्म उक्तं, तर्कं वेत्त्यधीते वा तार्किकः, अत्र कर्त्ता उक्तः। समासे यथा—आरूढो वानरो यं स आरूढवानरो वृक्षः, छिन्नहस्तो येन स छिन्नहस्तः खड्गः, कृता पूजा येन स कृतपूजो भक्तः, दत्ता भूमिर्यस्मै स दत्तभूमिर्ब्राह्मणः, निर्गताः पक्षिणो यस्मात् स निर्गतपक्षी वृक्षः, सुप्ता नागा यस्मिन् तत् सुप्तनागाकाशम्, एवं क्रमेण कर्म्म करण कर्त्तृ सम्प्रदानापादानाधिकरणानि उक्तानि। अभ्यर्थनाद्युक्तार्थे प्रथमा यथा विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्। 'कृष्ण' इति 'कृष्णेति मङ्गलं नाम' इत्यादावति-शब्दस्य वर्णमात्राभिधायकत्वेन न विभक्त्युत्पत्तिः, इतिशब्देनैव विभक्तिकार्य्यकारित्वम्। पीत-मम्बरं यस्यासौ पीताम्बरो हरिरित्यादौ सम्बन्धमात्रार्थत्वे प्रथमेति सम्प्रदायः।

* क्रियाया विशेषणं क्रियाविशेषणम्। अभिश्च निश्च अभिनी, अभिनिभ्यां विशः अभिनिविशः, शीङ् च स्थाश्च आसश्च शीङ्स्थासः, अधेः शीङ्स्थासः अधिशीङ्स्थासः, अनुश्च अधिश्च उपश्च आङ् च ते अन्वध्युपाः, तेभ्यो वसः अन्वध्युपावसः, ततः अभिनिविशश्च अधिशीङ्स्थासश्च अन्वध्युपावसश्च तेषां ङ, पश्चात्—कर्म्म च क्रियाविशेषणञ्च अभिनिविशाधिशीङ्स्थासन्वध्युपा-वसङश्च एतेषां समाहारः। क्रियायाः कर्म्मणः, क्रियाया विशेषणस्य, अभिनिविशादीनामधि-करणस्य च, कर्म्मसंज्ञा स्यात्, तेन च द्वितीया स्यादित्यर्थः। क्वचिदुपसर्गाणामर्थेऽप्युपसर्गो ऽभिनिविशते इति न्यायात् अर्थेऽधिकारं, यानेऽधिवसतीत्यादिकमपि स्यात्। क्रियाविशेषणे तु केवलं द्वितीयाया एकवचनं स्यात्, क्रियाया लिङ्गसङ्ख्याविनिर्मुक्तत्वात्।

क्रियते यत् तत् कर्म्म, कर्त्तुरीप्सिततमक्रियाश्रयत्वात् कर्त्तृव्यापारेण साध्यते तत् कर्म्म इति यावत्। "कर्त्तुरीप्सिततमं कर्म्म" इति पाणिनिः (१।४।४९)। क्रियाव्याप्यं कर्म्मेति पद्मनाभः। कर्त्तृसमुद्दिष्टं कर्म्मेति क्रमदीश्वरः। यत् क्रियते तत् कर्म्मेति सर्व्ववर्म्माचार्य्यः। तच्च कर्म्म त्रिविधम्—निर्वर्त्त्यं विकार्य्यं प्राप्यञ्चेति। निर्वर्त्त्यते उत्पाद्यते यत् तत् निर्वर्त्त्यम्, यथा घटं करोति, पुत्रं प्रसूते इत्यादि। विक्रियते विद्यमानं वस्तु अवस्थान्तरं नीयते यत्

रामं नमति सानन्दं धर्म्मानभिनिविश्य सन्। *

श्रीशोऽधिशेतेऽहिमधिष्ठितोऽब्धि-

मध्यास्य घोषं मथुरामनूष्य।

---

तत् निर्वार्त्यं, तदपि द्विविधं प्रकृतेरुच्छेदकं प्रकृतेर्गुणान्तराधायकञ्च, यथा काष्ठं दहति, सुवर्णं कुण्डलं करोति इत्यादि। निर्वर्त्त्यविकार्य्याभ्यामन्यत् प्राप्यं, यथा ग्रामं गच्छतीत्यादि। तथाचोक्तं हरिणा—यदसज्जायते सद्वा जन्मना यत् प्रकाशते, तन्निर्वर्त्यं, विकार्य्यञ्च कर्म्म द्वेधा व्यवस्थितम्। प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्, किञ्चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते, दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते। परे तु अनीप्सितमपि प्रतिकूलमनुकूलञ्च कर्म्मान्तरं वदन्ति, यथा ओदनं बुभुक्षुर्विषं भक्षयतीत्यादि। अस्मते प्राप्यान्तर्गतमेव तत्।

क्रिया धात्वर्थस्तस्य विशेषणं क्रियाविशेषणम्। तच्च समानाधिकरणमेव, असमानाधिकरणविशेषणे (२८८) तृतीयाविधानात्। क्रियाविशेषणस्य कारकत्वं कैश्चिदेवमङ्गीक्रियते यथा "मृदु पचतीति क्रियाविशेषणत्वात् द्वितीयान्तम्। धात्वुपात्तभावनां प्रति हि फलांशः कर्म्मीभूतः। तथाच फलसामानाधिकरण्याद् द्वितीया," "क्रियायाः कृत्रिमकर्म्मत्वविवक्षायां तद्विशेषणत्वात् द्वितीया" इति मनोरमा। "द्वितीयेति क्रियाविशेषणादिति भावः" इति शब्दरत्नम्। "सामान्ये नपुंसकमिति—अनेनैव क्रियाविशेषणानां नपुंसकत्वे सिद्धे 'क्रियाविशेषणानां क्लीवत्वं द्वितीयान्तत्वञ्च' इति न। पूर्व्वं धात्वुपात्तभावनां प्रति फलांशस्य कर्म्मतया तत्समानाधिकरणे क्रियाविशेषणे द्वितीयान्तत्वस्यापि सिद्धेः, तस्य क्रियाजनकत्वमपि स्वज्ञानद्वारा बोध्यम्" इति शब्देन्दुशेखरः। क्रमदीश्वरेण च "अपृथग्रूपक्रियाया विशेषणस्य कर्म्मत्वं क्लीवत्वञ्च" इति सूत्रं कृतम्। अतः पृथग्रूपक्रियाविशेषणस्य कर्म्मत्वादिकं न स्यात्, तेन साधुः पाकः साधू पाकौ इत्यादि, कृदभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायेन द्रव्यत्वातिदेशात् पाकस्य पृथग्रूपत्वम्। क्रियाविशेषणस्य कर्म्मत्वेऽपि अकर्म्मकधातूनामकर्म्मकत्वमेव, कर्म्मनिबन्धनकार्य्यं किमपि न स्यादिति यावत्। कर्म्मसंज्ञाफलन्तु स्तोकं सिञ्चतीति स्तोकशीघ्रादस्य (१२६) अव्ययमेकाच इत्यनेन कारकादित्वात् षकारप्राप्तिरित्यादि। पाणिनिः २।२।२,१।४।४६—४८, वार्त्तिकञ्च।

* रामं नमतीत्यादि। सन् साधुः धर्म्मान् अभिनिविश्य सानन्दं यथा स्यात्तथा रामं नमतीत्यन्वयः। रामम् इति नमनक्रियाव्याप्यं कर्म्म। सानन्दमिति क्रियाविशेषणम्, आनन्देन सह वर्त्तते यत् तत्, आनन्दसहिताभिन्नो नमस्कार इत्यर्थः। धर्म्मानिति अभिनिविश-धातोरधिकरणे कर्म्मत्वम्।

यो द्वारकामध्युषितो विकुण्ठ-

मुपावसद्वावसतात् स कृष्णः ॥ *

## २८२ । देशाध्वकालभावं वाऽड़ैः ।

(देश-अध्वन्-काल भाव १।, वा :१।, अड़ैः ३॥) ।

अड़ैर्धुभिर्योगे एते डसंज्ञा वा स्युः ।

नदीर्वनेषु चोषित्वा क्रोशानब्धेश्चहर्निशि ।

चंक्रमित्वा प्रियानीतिं रामो रणोवधे स्थितः ॥ †

---

* शौरि इति । यः शौरिः अब्धिमधिशितः सन् अद्रिमधिशेते, व्योममध्यास्य मथुरामनूष्य द्वारकामध्युषितः सन् विकुण्ठमुपावसत्, स त्वां(?) हृत् हृदयम् आवसतादित्यन्वयः । अद्रिमिति अधिशीङः, अब्धिमिति अधितिष्ठतेः, व्योममिति अध्यासेः, मथुरामिति अनुवसतेः, द्वारकामिति अधिवसतेः, विकुण्ठमिति उपवसतेः, हृत् इति आवसतेः, अधिकरणे कर्मत्वम् । हृत् इति हृदयशब्दजातस्य हृद्शब्दस्य रूपम् (११६) । आवसतादिति तुपः स्थाने (१५६) तातङ् । कर्मणि वाच्येऽपि एतेषां कर्मत्वं, यथा मकुन्दाधिशितो ऽब्धिः, वनैरध्युषिताश्चारु मलयाद्रि उपव्यस्ताः इत्यादि । क्वचित् अधिष्ठानं, कल्याणे अभिनिवेशः इत्यादिप्रयोगास्तु जातिवैशिकमनित्यमिति न्यायात् समाधानीयः । अत्र अधिशीङ्स्थासामकर्मकाणामेव ग्रहणं, तेन वने राजानमधितिष्ठति अपेक्षते इत्यर्थः इत्यादि ।

† देशश्च अध्वा च कालश्च भावश्च तेषां समाहारस्तत् । नास्ति डं कर्म येषां ते अडाः तैः । देशः पृथगेकदेशः नदीवनपर्वतादिः । अध्वा अध्वपरिमाणं क्रोशयोजनादिः । यथा —किष्कुहस्ते वितस्ती च नरः किष्कुचतुःशतम् । धनुर्दण्डो धनुस्तस्य सहस्रं क्रोश उच्यते । क्रोशद्वयम् गव्यूतिस्तद्द्वयं योजनं विदुरिति । कालः क्षणदण्डमुहूर्तप्रहरदिनरात्रिपक्षमासवत्सरादिः । भावो धात्वर्थः । अकर्मकधातुयोगे देशादीनां कर्मसंज्ञा वा स्यादित्यर्थः । अकर्मकाश्च—लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् । शयनक्रीडारुचिदीप्त्यर्था नैते कर्मणि धातव उक्ताः इति । विस्तरस्तु (२१२) सूत्रे द्रष्टव्यः । नदीरित्यादि—रामः नदीः वनेषु च उषित्वा, अहः दिवसं निशि रात्रौ क्रोशान् क्रोशपरिमितान् अब्धेः समुद्रस्य मार्गपरिमितेषु पथिषु चंक्रमित्वा इतस्ततो भ्रमित्वा, प्रियानीतिं प्रियायाः सीतायाः आनयनं रणोवधं च स्थित इत्यन्वयः । अत्र उषित्वेति अकर्मधातुयोगे नदीरिति कर्मत्वं, पक्षे वनेषु इति (१०८) सप्तमी । चंक्रमित्वा भृशं भ्रमित्वा इति क्रमि पादविक्षेपे इत्यस्मात् यङन्तात् अकर्मकत्वे तद्योगात् क्रोशानिति अहरिति च कर्मत्वं, पक्षे अब्धेर्निशि निशीति च सप्तमी ।

## २८३। सदाध्वादि व्याप्तौ सर्वैः सिद्धे तु थं।

(सदा ।१।, अध्वादि ।१।, व्याप्तौ ७।, सर्वैः ३।।।, सिद्धे ७।, तु ।१।, थ १।)।

सर्वैर्धुभिर्योगे अत्यन्तसंयोगे अध्वादयो नित्यं ढसंज्ञाः स्युः, अर्थसिद्धौ तु थसंज्ञाः।

भृत्यैः कृष्णोऽन्वितः क्रोशं मासं गुरुगृहे स्थितः।
गुरूपदेशं निभृतो माध्वीमध्यैष्ट वाङ्मयम्॥ *

## २८४। घोऽज्ञौ ञेः शब्दाशनगतिज्ञार्थाढ़-ग्रहदृशश्रो-रखादनीक्रन्दायशब्दायह्वादासूतघवहा-

---

स्थित इति स्थाधातुयोगे गुरुगृहमिति कर्मत्वं, पक्षे ञ्योऽधे इति सप्तमी। पाणिनिः १।४।५, वार्त्तिकञ्च, "देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्" इति कारिका च। अत्र वक्तव्यम्—"अकर्मकधातुप्रयोगेऽक्रियान्तरान्तराभावे देशभावाभावात्" इति क्रमदीश्वरसूत्रम्। तेन क्रियान्तरान्तराभावे—मास आस्ते इत्यादि, अभिव्याप्येत्यर्थः।

* सदा नित्यम्। व्याप्तिः साकल्येनाभिसम्बन्धः अविच्छेद इति यावत्। ("क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः सम्बन्धोऽत्यन्तसंयोगः।" इति काशिका।) अतएव "कालाध्वनोरविच्छेदे" इति क्रमदीश्वरसूत्रम्, "कालाध्वनोरत्यन्तसंयोगे" इति पद्मनाभसूत्रञ्च। सर्वैः सकर्मकैरकर्मकैश्च धातुभिर्योगे क्रियाविच्छेदाभावे गम्यमाने अध्वकालभावाः नित्यं कर्मसंज्ञाः स्युः, अर्थसिद्धौ प्रयोजनसिद्धौ (अपवर्गे इति पाणिनिः ; अपवर्गः फलप्राप्तिरिति सिद्धान्तकौमुदी, फलप्राप्तौ क्रियापरिसमाप्तिरपवर्ग इति पद्मनाभः) सत्यां तु करणसंज्ञाः स्युरित्यर्थः। भृत्यैरित्यादि—कृष्णः क्रोशं व्याप्य भृत्यैरन्वितः अनुगतः सन्, मासं व्याप्य गुरुगृहे स्थितः सन्, गुरूपदेशं व्याप्य निभृतः अनन्यासक्तः सन्, माध्वीं व्याप्य वाङ्मयं सकलं शास्त्रम् अध्यैष्ट अधीतवान् इत्यन्वयः। अत्र अन्वित इति सकर्मकधातुयोगे क्रोशे अनुगमनक्रियाविच्छेदाभावात् कर्मत्वम्। एवं स्थित इत्यस्य योगे मास इति, निभृत इत्यस्य योगे गुरूपदेशमिति च कर्मत्वम्। अध्यैष्ट इत्यस्य योगे माध्वीमिति अध्ययनजन्यज्ञानरूपप्रयोजनस्य सिद्धत्वेन करणत्वम्। अर्थसिद्धेरभावे त्वह्नेन मासं वाऽधीत इत्यत्र किमपि न ज्ञातमित्यर्थः। पाणिनिः २।३।५,६ ; वार्त्तिकञ्च।

**हिंसाभक्षी ह्वज्ञनाभिवादिदृशस्तु वा।** (ञ: ११, कर्मी ७,

ञे: ६।, शब्द—र्थाः ६।, खाद—भक्ष: ६।, ह्व-ज्ञ-नाभिवादि-दृश: ६।, न।१।, वा।१।)।

**ण्यन्तानां शब्दार्थादीनां यो ञः स ण्यन्तानां ढं स्यात्, न तु खादादेः, ह्वादेस्तु वा।** *

---

* अशनं भोजनं पानञ्च, ज्ञा ज्ञानम्। शब्दश्च अशनञ्च गतिश्च ज्ञाश्च शब्दाशनगतिज्ञाः, ते अर्था येषां ते शब्दाशनगतिज्ञार्थाः। नास्ति ढं कर्म येषां ते अढाः। शब्दाशनगतिज्ञार्थाश्च अढाश्च पठश्च दृशश्च बुधेति तेषां समाहारस्तस्य। सूतः सारथिः तद्वादिनियन्ता च ञः कर्त्ता यस्य स सूतञः, न सूतञोऽसूतञः, स चासौ पठश्चेति असूतञपठः। न हिंसा अहिंसा, अहिंसायां भक्षः अहिंसाभक्षः। खादश्च नीश्च क्रन्दश्च अदश्च शब्दायश्च ह्वाश्च अदृश्च असूतञपठश्च अहिंसाभक्षश्च तेषां समाहारः, पञ्चम्येकवचने खादनीक्रन्दादशब्दायह्वादृ[illegible]अहिंसाभक्षस्य। अभिवादि: अभिवादिः, अभिवादिश्च दृशश्च अभिवादिदृशौ, ते आत्मनेपदे अभिवादिदृशौ नाभिवादिदृशौ। ह्वश्च ज्ञश्च नाभिवादिदृशौ चेति समाहारे तस्य।

शब्दार्थाः उच्चारणार्थाः, शब्दकर्मका धातव इति यावत्। अशनार्थाः भक्षणार्थाः। गत्यर्थाः गमनार्थाः, प्रवेशारोहणावतरणाद्यर्था अपि। ज्ञार्थाः ज्ञानार्थाः। अढाः अकर्मकार्थाः। ण्यन्तकाले शब्दार्थादीनां धातूनां यः कर्त्ता, स तेषां ण्यन्तकाले कर्म स्यात्, खादादेर्न स्यात्, ह्वादेस्तु वा स्यादित्यर्थः। अत्र दृशबुधयोर्ज्ञानार्थत्वेऽपि पुनर्ग्रहणं क्वचिदण्यन्तकर्त्तुरपि स्यादिति ज्ञापनार्थम्। खाद अद भक्ष—एषामशनार्थत्वात्, नी वह वह—एषां गत्यर्थत्वात्, क्रन्द ह्वा (ह्वे)—एतयोः शब्दार्थत्वात् प्राप्ते निषेधः। शब्दाय इति नामधातुः, शब्द करोतीत्यर्थे (८५१) सिद्धः, तस्य शब्दार्थत्वादकर्मकत्वाद्वा प्राप्ते निषेधः। [illegible] ण्यन्तकर्त्तुः कर्मत्वे सिद्धेऽपि एतत् सूत्रं नियमार्थम्, अन्येषां न स्यादित्यर्थः। अत्र च शब्दार्थादीनाम् एकवारण्यन्तानामेव ग्रहणं, तेन पिता पुत्रेण शिष्यं वेदं पाठयति इत्यादौ पुत्रादीनां न कर्मत्वम्। अत्र अकर्मकधातोः (१८४) देशादेः कर्मत्वेऽपि, (१८१) एककर्मकभोक्तादेरधिकरणस्य कर्मत्वेऽपि, ण्यन्तकालीनकर्त्तुरपि कर्मत्वं स्यादिति वक्तव्यम्, यथा (१९२) मासमास्ते देवदत्तं गमयति। [illegible] इति भट्टिः। एवं अकर्मकधातूनामकर्मकत्वे इति ण्यन्तकालेऽपि कर्मत्वं स्यात्, यथा मथुरायाम् पीडितो भवति, मुहुः मधुरायामपयति। अविवक्षायामपि कर्मत्वं भवति, यथा पार्थं व्याजितै: नृपैरिति रघुः। पाणिनिः १।४।५२,५३, वार्त्तिकानि च।

गेयमध्यापयद् गोपान् याज्ञिकानन्नमभोजयत् ।
स्वधामागमयच्छत्रून् भक्तांस्तत्त्वमबोधयत् ॥
धर्ममस्थापयद् विष्णुर्वेदानध्यापयद् विधिम् ।
दैत्यानदर्शयच्छक्तिं वेणुमश्रावयच्च गाः ॥ *

खादादेषु—रक्षांस्यखादयदनाययदूर्ध्वलोक-
माक्रन्दयत् कपिभिराह्वाययदाशु रामः ।
शब्दाययन् रिपुमकूजयदादयच्च
सैन्यानवाहयदभक्षयदिष्टभक्ष्यम् ॥ †

---

* क्रमेण उदाहरणं दर्शयति—विष्णुः गोपान् गेयम् (गानं) अध्यापयत्, अधीङ् अध्ययने इङ्धातुः णिः, अत्र गत्याद्यर्थकर्तॄणां गोपानां कर्मत्वम्, एवं सर्वत्र । विष्णुः गोपान् याज्ञिकान्नम् अभोजयत्, भुज पालने अभ्यवहारे च णिः । विष्णुः शत्रून् स्वधाम वैकुण्ठम् आगमयत्, गच्छतीति प्रेषः, गम्लृ गतौ णिः । विष्णुः भक्तान् तत्त्वं याथार्थ्यम् अबोधयत्, बुध अवगमने णिः । विष्णुः धर्ममस्थापयत्, ष्ठा गतिनिवृत्तौ णिः । विष्णुः विधिं वेदान् अध्यापयत्, इङ् च अध्ययने णिः । विष्णुः दैत्यान् शक्तिम् अदर्शयत्, दृशिर् प्रेक्षणे णिः । विष्णुः गाः वेणुमश्रावयत्, श्रु श्रवणे णिः । (एतेषां अण्यन्तावस्था क्रमेण प्रदर्श्यते—गोपा गेयम् अध्यैयत, गोपा याज्ञिकान्नमभुञ्जत, शत्रवः स्वधाम अगच्छन्, भक्तास्तत्त्वमबुध्यन्त, धर्मोऽतिष्ठत्, विधिर्वेदानध्यैत, दैत्याः शक्तिमपश्यन्, गावो वेणुमशृण्वन् ।)

† खादादिषूदाहरणं—रामः कपिभिः रक्षांसि अखादयत्, खाद भक्षणे णिः, अत्र अण्यन्तावस्थायां कपीनां आत्मावस्थायां कर्मत्वाभावे अनुक्तकर्तृत्वात् (२८८) तृतीया, एवं सर्वत्र । रामः कपिभिः रक्षांसि ऊर्ध्वलोकम् अनाययत्, णी ञ प्रापणे णिः । रामः कपिभिः रक्षांसि आक्रन्दयत् आह्वयदित्यर्थः, आह्वानपूर्वक-क्रदि तु रोदने आह्वाने णिः । रामः कपिभिः रक्षांसि आशु शीघ्रम् आह्वाययत् आह्वयदित्यर्थः । ह्वेञ् स्पर्धायां शब्दे च णिः । रामः कपिभिः रक्षांसि अशब्दाययत् तथा रिपुम् अकूजयत्, शब्दायतेरिति शब्दायपातोः णौ शब्दायतः । अकूजयदिति कूजे अव्यक्ते शब्दे णिः । रामः कपिभिः रिपुम् आदयत्, अद भक्षणे णिः । रामः कपिभिः सैन्यान् अवाहयत्, वही प्रापणे णिः । रामः कपिभिः इष्टभक्ष्यं (फल-मूलादि) अभक्षयत्, भक्ष भक्षणे णिः । (एतेषामण्यन्तावस्था क्रमेण यथा—कपयः रक्षांसि

सारथित्व-हिंसार्थयोस्तु—

वाहानवाहयत् पार्थमरीनाभक्षयद्धरिः । *

क्रादेस्तु—शैलानहारयत् कीशान् ऋक्षैर्वृक्षानजीहरत् ।
कपीनकारयत् सेतुं वानरैरपि राघवः ॥
अभिवादयते वृद्धान् जानकीं लक्ष्मणेन च ।
सीतां रामेण चात्मानमदर्शयत लक्ष्मणः ॥ †

## २८५ । याच्-अर्थ दुह चि प्रच्छ रुध् ब्रू शास जि नी वहः ।

---

अखादन्, कपयः रक्षांसि जङ्गलीकमगमयन्, कपयः रक्षांसि आक्रन्दन्, कपयः रक्षांसि आयन्त, कपयः अध्यायमानाः रिपुम् आह्वन्, कपयः शैलान् अवहन्, कपयः रक्षभक्ष्याम् अभक्षन् [भक्षधातोश्चुरादित्वेऽपि मतान्तरे भ्वादित्वात्] इति ।)

* सारथ्य-हिंसार्थभक्षयोरुदाहरणं—हरिः वाहान् घोटकान् पार्थमर्जुनम् अवाहयत् सारथिर्भूत्वा इत्यर्थः, हरिः वाहान् अरीन् अभक्षयत् अहिंसयत् ; अत्र अवाहयदित्यत्र सारथि-कर्तृकत्वात्, अभक्षयदित्यत्र च हिंसार्थत्वात् अण्यन्तकालीनकर्तॄणां वाहानां कर्मत्वम् । (वाहाः पार्थमवहन्, वाहा अरीनभक्षन् इत्यण्यन्तावस्था ।)

† क्रादेरुदाहरणम्—राघवः कीशान् वानरान् शैलानहारयत्, पक्षे—ऋक्षैर्भल्लूकैः वृक्षानजीहरत् । राघवः कपीन् सेतुमकारयत्, पक्षे—वानरैरपि, सेतुमकारयदिति शेषः । राघवो जानकीं वृद्धानभिवादयते च, पक्षे—लक्ष्मणेन च, वृद्धानभिवादयते इति शेषः, अभि-वादयते इति अभिपूर्व्वो वदधातुः ज्ञानो नमस्कारे वर्त्तते, पुनः णी कृते, (६४१) पुंस्त्वेऽपि, (९१९) फलवत्कर्त्तर्य्यात्मनेपदम् । एकवार-णी कृते अभिवादिधातोर्नमस्कारार्थकत्वात् शिष्यो गुरुमभिवादयतीत्यादौ (२८१) नित्यमेव कर्मत्वम् । लक्ष्मणः सीताम् आत्मानम् अदर्शयत, पक्षे—रामेण च, आत्मानमदर्शयतेति शेषः । अदर्शयतेति, अण्यन्तकालीन-कर्मणो लक्ष्मणस्य ण्यन्तकालीनकर्तृत्वात् (८९९) कर्त्तरि इत्यात्मनेपदम् । पिता पुत्रं चन्द्रं दर्शयतीत्यादौ अण्यन्तकालीनकर्त्तुः पुत्रस्य नित्यमेव कर्मत्वम् । (कीशाः शैलानहरन्, ऋक्षाः वृक्षान् अहार्षुः, कपयः सेतुमकुर्व्वन्, वानरा अपि, जानकी वृद्धानभिवादयति च, लक्ष्मणश्च, सीता लक्ष्मणमपश्यत्, रामश्च लक्ष्मणमपश्यदित्यण्यन्तावस्था) ।

ह्व दण्डि ग्रह लष् मन्थ

मुष् पचाद्या धवो द्विढाः ॥ *

(याच्ञार्थ—वच: १॥, ह्व—पचाद्या: १॥, धव: १॥, द्विढा: १॥) ।

तमर्थयेऽहं मोक्षं, यो गोपैर्दुग्धमदुग्ध गाः ।
फलान्यवाचिनोद् वृक्षात्, वार्त्ताः पप्रच्छ वल्लवान् ॥
ररोध गोकुलं गोपीरब्रवीच्च मनोहरम् ।
गोपालानन्वशात् केलींस्तथाजय्यं जिगाय तान् ॥
वृन्दावनमनैषीद् गा-स्तच्छिशूनवहद् व्रजम् ।
जहारारण्यमाभीरी-र्दैत्यान् प्राणानदण्डयत् ॥
अयाह यज्वनो भोज्य-मकर्षत् पूतनां बलम् ।
ममन्थामृतमम्भोधिं मुमोष दितिजांश्च तत् ।
योऽसौ पचति लोकानां पुण्यपापं सुखासुखम् ॥ †

---

* याच्ञा अर्थो येषां ते याच्ञार्थाः—याच अर्थ नाथ भिक्ष प्रभृतयः । पचात् इत्ये वहपर्यन्तम् एकं पदं, श्लोकार्द्धविरामार्थं पृथक्पदकरणम् । पच आद्यो येषां ते पचाद्याः, पचात् इच दण्डिच इत्यादि द्वन्द्वः । द्वे द्वे येषां ते द्विढाः । एते धातवः स्वभावात् द्विकर्मका भवन्तीत्यर्थः । कर्तुः क्रियाव्याप्यत्वात् मुख्यस्य कर्मत्वं सिद्धम्, अनेन तु गौणस्य कर्मत्वं विधीयते । साक्षात् क्रियान्वयित्वं मुख्यत्वं, परम्परया क्रियान्वयित्वं गौणत्वमिति । पाणिनीये वार्त्तिके ह्वेञस्य दुहादिगणस्य मध्ये प्रच्छधातोः पाठाभावात् "अजिज्ञपत्तं जनकं प्रसुतम्" इत्यादिकमसाधु इति भट्टोजिदीक्षितः (क्रमदीश्वरः) । पाणिनिः १।४।५१ ।

† तमर्थये इत्यादि । अहं तं श्रीकृष्णं मोक्षम् अर्थये याचे, यः गोपैः सह गाः दुग्धम् अदुग्ध । यो वृक्षात् फलानि अवाचिनोत् । यो वल्लवान् वार्त्ताः पप्रच्छ, गोपान् कुशलं जिज्ञासितवानित्यर्थः । यो गोकुलं गोपीः ररोध, गोपीरन्तः स्थापयन् गोकुलमावृणोदित्यर्थः । यो गोपीः मनोहरं (वच इति शेषः) अब्रवीच्च । यो गोपालान् केलीन् अन्वशात् शिक्षितवान् । तथा च केलिविषये तान् गोपालान् अजय्यं जेतुमशक्यं जिगाय । यो वृन्दावनं गाः अनैषीत् प्रापयामास । तच्छिशून् गोवत्सान् व्रजम् अवहत् नीतवान् । यः आभीरीररण्यं जहार

**२८६। धिङ्समयानिकषाहान्तरान्तरेणा-तियेनतेनाभ्युभयपरिसर्वतोविनतेऽभिपरिप्रत्यनूप-ह्युपर्य्यधोऽधिभिः।** (धिक्—अधिभिः द्वा)।

**एभिर्योगे द्वी स्यात्।**

**वीप्सेत्थम्भावचिह्नेऽभिस्तेषु भागे परिप्रती।**
**अनुस्तेषु सहार्थे च हीनेऽनूपो मताविह॥ ***

निनाय। यो देवान् प्रायान् अन्वचयत्, प्रायान् गृहीत्वा प्रचासीत्यर्थः। यो कन्यनां भोज्यं जग्राह। यः पूतनां वधम् अकर्षत्, पूतनां विलक्ष्य वध गृहीतवानित्यर्थः। योऽम्भोधिम् अमृतं ममन्थ, समुद्रमुन्मथ्य अमृतमुत्थापितवानित्यर्थः। यस्तत् अमृत दितिजान् मुमोष वञ्चितवान्। योऽसौ कृष्णः लोकानां पुण्यपापं सुखासुखं पचति—पुण्य सुख, पापम् असुखं, पचति परिणमयतीत्यर्थः।

अत्र पचाद्या इत्यादि-पदेन गुहः शिष्यं धर्म्मं प्रतिपादयतीत्यादि। दू इत्यनेन सुवर्णं यवर्णं, तेन नद कथ मनस प्रभृतीनां संग्रहः। इयं नौका करोति, सुवर्णं कुण्डलं करोतीत्यादौ प्रकृतिविकृतिभावेन एकमेव कर्म्म, तेन द्वयो नौका क्रियते इत्यत्र द्वयोरेव कर्त्तत्वात् न गौणमुख्यव्यवहारः, किन्तु प्रकृतेः सञ्ज्ञानुसारेणैव क्रियाप्रयोगः, तदुक्तं—प्रकृतौ विकृतौ वापि कर्म्मत्वं द्वयोरपि। बाधकः प्रकृतेः सञ्ज्ञा गृह्णाति विकृतेर्न तु॥ इति। पचादिच पच वच वप वद चल पत नद भष चर गाह देव मद जप शीव भेष इत्यादि, आकृतिगणः।

* अभित उभयत परित सर्वत नेऽव्ययम्। उपरिच अधस च अधिच ते, इयस ते उपर्यधोऽध्यय स्येति ते उपर्युपरि अधोऽधः अध्यधि इति विकृताः, पश्चात् द्वन्द्वः। द्व्युपरीति किं, मस्तकस्योपरि विस्फोटक इत्यादौ षष्ठी स्यादेव, न तु द्वितीया। धिक्—निर्भर्त्सननिन्दयो-रित्यमरः। समया—अन्तिकमध्ययोरित्यमरः। निकषा—अन्तिके इत्यमरः। हा—विषादशुगर्त्तिषु इत्यमरः। अन्तरा—मध्ये इत्यमरः। अन्तरेण, विना, ऋते—वर्ज्जने इत्यमरः। इन—(५१८) येनोऽपीत्यनेन विहित एनप्रत्ययान्तः। अति—अतिक्रमणार्थः, प्रकर्षे लङ्घ-नेऽप्यतीत्यमरः। येनतेनौ—यादृक्तादृगर्थौ। अभितः—समीपोभयतःशीघ्रसाकल्याभिमुखे इत्यमरः। उभयतः—उभयदिशोः। परितः, सर्वतः—समन्तादर्थम्, समन्ततस्तु परितः सर्वतो इत्यमरः।

अत्र अभिपरिप्रत्यनूपानामर्थविशेष एव कर्म्मप्रवचनीयत्वमिति। तत्र द्वितीयाविधाने,

धिग्लोकमीश्वरामक्तं, समया माधवं रमा ।
निकषा गिरिशं गौरी, हा लोकं दैत्यवञ्चितम् ॥
कृष्णोऽन्तरा प्रद्युम्नौ, नान्तरेणाच्युतं सुखम् ।
दक्षिणेन हरिं वज्री, गोविन्दमति नेश्वरः ॥
येनेयं हरिरीशस्तं तेनेयमभितोऽर्चकाः ।
रामकृष्णावुभयतो गोपेशं, परितः परे ॥
प्रमथाः सर्वतः शर्वं, धर्मं नेशार्चनं विना ।
भुक्तिर्नर्तेऽच्युतोपास्तिं, भूतं भूतमभि प्रभुः ॥
भक्तो विष्णुमभि, प्राज्ञो गोविन्दमभि तिष्ठति ।
हरिं पर्यभवल्लक्ष्मी-र्हरं प्रति हलाहलम् ॥
विष्णुमन्वर्च्यते भर्गः, ब्रह्मादय उपाच्युतम् ।
लोकानुपर्युपर्यास्तेऽधोऽधोऽध्यधि च माधवः ॥ *

---

अभिः वीप्सेत्थम्भावचिह्ने भवः, परिप्रती तेषु वीप्सेत्थम्भावचिह्नेषु भागे च भवतो, अनुः तेषु वीप्सेत्थम्भावचिह्नभागेषु सहार्थे च भवः, अनूपौ हीने भवतावित्यन्वयः । द्रव्यगुणक्रियाभिर्युगपत् व्याप्तुमिच्छा वीप्सा । कञ्चित् प्रकारमापन्नस्येत्थम्भावः । चिह्नं लक्षणम् । भागः अंशः । अभ्यादिरिह अनुपसर्ग एव । चिह्नप्रवर्तिनिर्योगे द्वितीया स्यादिति सूत्रार्थः, कर्मप्रवचनीयैः, न तु प्रवेश । पाणिनिः १।४।८६—८७,९०,९१,९५, २।३।८, भाष्यञ्च । उपान्वध्याङ्वसः (१।४।४८) इति पाणिनिसूत्रव्याख्यानमतं धिक्समयेत्यादियोगादुपपदविभक्तिनाड द्वितीयेति ।

* ईश्वरासक्तं लोकं धिक्, स निन्द्य इत्यर्थः । रमा लक्ष्मीः माधवं समया, माधवस्य समीपे । गौरी गिरिशं निकषा, गिरिशस्य समीपे । दैत्यवञ्चितं लोकं हा, स विषादार्हः शोकार्हो वा । हा राम ! हा तात ! इत्यादौ हा-शब्दस्य वस्तुः शोकादिव्यञ्जकत्वात् राजादौ न द्वितीया, सम्बोधने प्रथमैव । कृष्णः प्रद्युम्नौ अन्तरा, प्रद्युम्नयोर्मध्ये । अच्युतं अन्तरेण विना सुखं न भवतीति शेषः । वज्री हरिं दक्षिणेन, हरेर्दक्षिणे स्थितः । गोविन्दम् अति ईश्वरो न, गोविन्दस्य अतिक्रमिता ईश्वरो नास्तीत्यर्थः । हरिरीशो येन ईश्वरो हरि तेन, हरिरीशस्य समीपः ईशो हरिसदृश इत्यर्थः, हरीशौ अभिन्नावित्यर्थः मानात् । अर्चकाः

## २८७ । दिवो धं वा । (दिवः ६।, ध १।, वा ।१।)।

दिवो धं ठं स्याद्वा । अक्षै-रक्षान् वा दीव्यतीशः । *

## २८८ । साधनहेतुविशेषणभेदकं घं कर्त्ता घस्तौ । (साधन—भेदकं १।, घं १।, कर्त्ता १।, घः १।, घौ ।१।)।

नेत्रैः पुष्पेण भूषाभि-र्नाम्ना हृष्टः शिवो जनैः । †

---

ईशमभितः समीपे । रामकृष्णौ गोपेशं नन्दम् उभयतः, गोपेशस्य उभयोः पार्श्वयोः उपरि अन्ये गोपबालकाः गोपेशं परितः, गोपेशस्य समन्तात् । प्रमथाः शिवगणाः सर्वं शिवं सर्वतः, शिवस्य सर्वासु दिक्षु । ईशाराधनं विना अन्यं सुखं न स्यादित्यर्थः । अच्युतोपास्ति विष्णु-पासनाम् ऋते मुक्तिर्न स्यादित्यर्थः । प्रभुरीश्वरः भूतं भूतम् अभि, सर्वप्राणिषु वर्त्ततीत्यर्थः, अत्र वीप्सायां द्वित्वम् । भक्तः विभुम् अभि, इत्थम्भावापन्नः, विभुविषये भक्तिभावापन्न इत्यर्थः । प्राज्ञः गोविन्दम् अभि, अभिलक्ष्यीकृत्य तिष्ठतीत्यर्थः, अत्र चिह्नार्थः । लक्ष्मीः हरिं प्रति अभवत्, समुद्रे मथिते लक्ष्मीः हरेर्भागेऽभवदित्यर्थः । हलाहलं विषं हरं प्रति, हरस्य भागे अभवदित्यर्थः । भर्गः शिवः विष्णुम् अनु विष्णुना सह वर्त्तते । ब्रह्माद्यो देवाः अच्युतम् उप, अच्युतात् हीना इत्यर्थः । माधवः लोकान् उपरि उपरि लोकानाम् उपरि उपरि वर्त्तते, एवं लोकान् अधोऽधः समीपे, अध्यधि ततस्ततः समीपे आस्ते इत्यर्थः, अत्र सामीप्ये द्वित्वम् । उपर्य्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः इत्यत्र उपरिबुद्धीनां श्रेष्ठबुद्धीनाम् उपरीत्यर्थः, तेन न द्वि-उपरि-योगः । अत्र व्याप्त्यर्थे यावत्शब्दयोगे द्वितीया वक्तव्या ; मही याव-दरण्यानीत्यादि ।

* क्रीडार्थस्य दिवधातोः करणं कर्म्मसंज्ञं स्याद्वा । अत्र वाशब्दो व्यवस्थावाची, तेन दीव्यतेः करणं नित्यं कर्म्मसंज्ञं स्यात्, द्वितीया तु वा स्यादित्यर्थः । अतएव दिवः सदैव सकर्म्मकत्वात् अक्षा दीव्यन्ते इति कर्म्मणि प्रत्ययः, अक्षाणां देविता इति (३०५) कृद्योगे कर्म्मणि षष्ठीत्यादि । पाणिनिः १।४।४३ ।

† साध्यते कर्म्म निष्पाद्यतेऽनेनेति साधनं करणम् । तथाच क्रियायां साध्यायां बहूनां कारकाणां मध्ये यद्वस्तु अव्यवधानेन क्रियानिष्पत्तिकारणं विवक्षितं तदेव साधनं भवति, अतएव "साधकतमं करणम्" इति पाणिनिः (१।४।४२) । तथाच— कारणाव्यवधाने तु क्रियानिष्पत्तिकारणम् । यद्विवक्षितं तेषु करणं तत् प्रकीर्त्तित-

## २८९। सहवारणसमोनार्थार्थविनाएथङ्-नानाद्यैः। (सह—नानाद्यैः ३॥)।

एभिर्योगे भो स्यात्।

सहेशार्थोऽच्युतो, भेदेनालं, तेन समोऽस्ति कः।
विकारे रहितः शम्भुः, सतामर्थः शिवार्चया॥
श्रीनेशेन विना, शम्भुः पृथक् विश्वेन, तत् पुनः।
न नाना शम्भुना, रामात् वर्षणाधीशजोऽवरः॥ *

---

मिति। यथा "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम्॥ वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्। स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥" इति हरिकारिका। कायेन मनसा वाचा इत्यादौ—बहूनामपि करणत्वम्। फलसाधनयोग्यः पदार्थो हेतुः, यथा—विद्यया यशः, धनेन कुलमित्यादि। कर्त्रधीनं साधनं, यदधीना कर्तुः प्रवृत्तिः स हेतुरिति साधनहेत्वोर्भेदः। "द्रव्यादिसाधारणं निर्व्यापार-साधारणञ्च हेतुत्वम्, करणत्वन्तु क्रियामात्रविषयं व्यापारनियतञ्च" इति सिद्धान्तकौमुदी। "द्रव्यगुणक्रियानिरूपितं निर्व्यापार-सव्यापारवृत्ति च यत्तद्धेतुत्वम्। क्रियामात्रनिरूपितं व्यापारवद्वृत्ति च यत्तत् करणत्वम्।" इति तत्त्वकौमुदी। विशिष्यतेऽनेनेति विशेषणं, जटाभिस्तापस इत्यादि। भेदयति सामान्यावगतं इतरेभ्यो व्यवच्छिनत्ति यत् तत् भेदकं व्यवच्छेदकं, नाना शिव इत्यादि। विशेषणं विद्यमानं, भेदकन्त्वविद्यमानमित्यनयोर्भेदः। प्रकृत्या पटः, जात्या ब्राह्मणः, नाम्ना चन्द्रः, स्वभावेन दाता, सुखेन याति, साकल्येनादत्ते, प्रायेण वैष्णवः, दशाहेन गृह्णीयात्, चक्षुषा काणः इत्यादौ पटत्वभवनादीनां प्रकृत्यादेः साधनत्व-विवक्षया करणे तृतीयेति दुर्गसिंहः। प्रकृत्यादिभ्य उपसंख्यानमिति वार्त्तिकम्। यः करोति स कर्त्ता, कृत्याश्रयः कर्त्ता इति तार्किकाः। "स्वतन्त्रः कर्त्ता" इति पाणिनिः (१।४।५४)। "क्रियामुख्यप्रयोजको कर्त्ता" इति क्रमदीश्वरः।

साधनहेतुविशेषणभेदकम् इति समाहारद्वन्द्वः। भ करणं, भः कर्त्ता। साधनादीनि भ-संज्ञानि स्युः, कर्त्ता भसंज्ञः स्यात्, उभयत्र च तादित्यर्थः। भैर्भैरिति। भैः करणैः, पुत्रेण हेतुना, भूषाभिर्विशिष्टः, नाना भेदकेन, शिवः, जनैः कर्त्तृभिर्दृष्टः इत्यन्वयः। पाणिनिः २।३।१८,२१,२२।

* सहः प्रयोजनम्; सह च वारणञ्च समश्च ऊनश्च अर्थश्च ते, अर्थाः अभिधेयाः येषां ते सहवारणसमोनार्थार्थाः। नाना (शब्दः) आद्यो येषां ते नानाद्याः। ततः, सहवारणसमो-

## २९० । कालभाड्‌ङे वा ।

(कालभात् ५।, ङे ७, वा ।१।) ।

कालवाचिनो भसंज्ञात् ङे त्री स्याद्वा । *

रोहिण्यामभवत् कृष्णो रोहिण्यासीत् चण्डिका ।

## २९१ । मानाद्वीप्सायां ढे ।

(मानात् ५।, वीप्सायां ७।, ढे ७।) ।

शतं शतं पयोऽपीप्यत् वत्सान् विष्णुः शतेन गाः ।

---

नार्थार्थाश्च विना च पृथक् च नानाद्याश्च ते तैः । एभिर्योगे तृतीया स्यादित्यर्थः । अत्र अर्थेनैव योगे, न तु शब्देन, तेन सहागतः पित्रा इत्यादौ व्यवधानेऽपि स्यात् ; एवं सहार्था-दिभिर्गम्यमानेऽपि स्यात् । सहेत्यादि—अच्युतः ईशा शिवेन सह अर्च्यः, ईशेति ईशधातोः क्विपि ईश्‌शब्दः, एवं साकं सार्धं समभित्यादिभिः । अच्युतेशयोः भेदेन भक्तं भेदो व्यर्थ इत्यर्थः, एवं नाना मा इत्यादिभिः । तेन अच्युतेन समः कोऽस्ति, एवं समान तुल्य इत्यादिभिः । इवशब्दस्य तु सादृश्यद्योतकत्वेन वाचकत्वाभावात् तेन योगे न स्यात् ; एवं तुला-उपमाशब्दयोर्योगेऽपि न स्यात्, यथा कृष्णस्य तुला नास्ति इत्यादि । अत्र तुल्यार्थैः षष्ठ्यपीति (२०२) सूत्रे वक्ष्यति । अन्तर्विकारैः कामक्रोधादिभिः रहितः शैव इत्यर्थः, एवमन्यादिभिः । सतां साधूनां विवादेन अर्थः प्रयोजनम् । ईशेन विना श्रीः श्रिर्गसम्पत्तिर्न स्यादित्यर्थः । प्रभुविष्णुना पृथक्, विश्वस्य नश्वरत्वादित्यर्थः । तत् विश्वं ध्रुवः प्रभुणा न नाना न भिन्नं विश्वस्य प्रभुमयत्वात् । पृथग्विनानानाभिस्तृतीया द्वितीया पञ्चमी चेति पाणिनिः (२।३।३२) । अयं ग्रन्थे तु पृथक्‌नानाशब्दाभ्यां तृतीयैव ; अन्यार्थेन तु पञ्चमी च । आद्यशब्दात्— अधोऽवरः कृष्णः रामात् बलदेवात् वर्षेण अवरः कनिष्ठ इत्यर्थः, अत्र अवरशब्दयोगे वर्षेणेति तृतीया । एवं मासेन पूर्वः, अक्षेण काणः, गुणेन भिन्न इत्यादि । अत्र, प्रतिनिधिप्रत्यये वीप्सा तृतीयासमासौ आतामिति (पाणिनिः २।१।३४) अत्रापूर्वम् । पाणिनिः २।३।१८,१९,०७, वार्त्तिकञ्च ।

* नक्षत्रवाचकाः अश्विन्यादयः शब्दाः—नक्षत्रेषु तत्तत्नक्षत्रविशिष्टकालेषु च वर्तन्ते । अत्र च, काले वर्तमानादश्विन्यादिशब्दादधिकरणे तृतीया वा स्यादित्यर्थः । कृष्णः रोहिण्यां रोहिणीनक्षत्रयुक्तकाले अभवत् भवतवान्, चण्डिका च रोहिण्यां तादृशे काले आसीदुत्पन्ना । अत्र रोहिण्यामिति अधिकरणे रोहिण्या इति तृतीया वा । एवं पुष्ये पुष्येण वा भवेदित्यादि । काले किं, रोहिण्यां प्रीतिश्चन्द्रस्य । पाणिनिः २।३।४५ ।

द्विद्रोणेन क्रीणाति, पञ्चकेन क्रीणाति, द्विद्रोणं पञ्चकं । *

## २९२ । संज्ञोऽस्मृतौ । (संज्ञ: ६।, अस्मृतौ ७) ।

अरथादन्यस्मिन्नर्थे वर्त्तमानस्य संपूर्व्वस्य जानातेर्डे वी स्याद्वा ।

संजानीध्व स्वमीशा च संजानीहि ततः श्रियम् ।†

## २९३ । संदानो भेऽधर्म्मे नित्यम् ।

(संदान: ६।, भे ७, अधर्म्मे ७, नित्यं १) ।

संपूर्व्वदानसम्बन्धिनि अधर्म्मे भे वी स्यान्नित्यम् ।

संयच्छते स्वं गोपीष्टं श्रीशः संयच्छति श्रिये । ‡

---

* डे कर्म्मणि प्रयुज्यमानात् मानवाचकात्, कर्म्मणो विशेषणीभूतादिति यावत्, वीप्सायां वाच्यायां तृतीया वा स्यादित्यर्थः । मानम् इयत्तापरिच्छेदकं, तेनात्र परिमाणवाचकस्य सङ्ख्यावाचकस्य च ग्रहणमिति । निदर्शनः शतं शतं वत्सान् पयोऽपाययत्, शतेन शतेन वत्सान् पयोऽपाययदिति शेषः । अत्र शतं शतमिति कर्म्मणि शतेन इति तृतीया वा । शतं शतमिति अनुक्तवीप्सायां द्वित्वं, शतेन इति तृतीयया वीप्साया उक्तत्वात् न द्वित्वम् । (शतं शतं वत्साः मानस्य अमुः अमुः इति अध्याहृतवाक्यं, वत्सान् इति गा इति च अध्याहृतकर्तुः कर्मत्वम् ।) द्विद्रोणेन क्रीणाति द्विद्रोणं क्रीणाति, द्विद्रोणपरिमितं द्रव्यं क्रीणातीत्यर्थः । पञ्चकेन क्रीणाति पञ्चकं क्रीणाति, पञ्च पञ्च पशून् क्रीणातीत्यर्थः । द्विद्रोणमिति पञ्चकेनेति च कर्म्मणि तृतीया वा । द्वौ द्वौ द्रोणौ परिमाणमस्य इति समासेन, पञ्च पञ्च परिमाणमस्य इत्यर्थे विहित प्रत्ययेन च उक्तत्वात् न द्वित्वम् । अत्र "गम्यमानापि क्रिया विभक्तौ प्रयोजिका इति शतेन शतेन वत्सान् पाययति पयः, शतेन परिच्छिद्येत्यर्थः ।" इति सिद्धान्तकौमुदी । "द्विद्रोणेन धान्यं क्रीणातीति" प्रकृत्यादिभ्य उपसंख्यानमित्यस्योदाहरणमिति तत्रैव ।

† अरथो धीः संज्ञकस्य, न स्मृतिरस्मृतिस्तस्याम् । हे साधो त्वं समात्मानम् ईशा श्रिया च संजानीहि समर्थं जानीहि, (८९८) संप्रतिभ्यामनाध्याने इत्यात्मनेपदम् । अत्र ईशा इति कर्म्मणि तृतीया, स्वमिति विकल्पपक्षः । स्मृतौ तु—मातरं स्मरन् श्रियं संजानीहि इत्यत्र द्वितीयैव । पाणिनिः २।३।२२ ।

‡ संपूर्व्वस्य 'दा-ञ् दाने' इत्यस्य प्रयोगे अधर्म्मे सम्प्रदाने भे सम्प्रदाने नित्यं तृतीया स्यादित्यर्थः । श्रीशः श्रीपतिः गोप्या परकीयया इष्टं वाञ्छितं संयच्छते न ददाति । अत्र

## २९४। यस्मै दित्सासूयाक्रोधेर्ष्यारुचिद्रोह-श्लाघ्कुस्नाघस्पृहिश्रप्राधीक्षाप्रतिश्रुप्रत्यनुगृधार्य्यर्थाः भं चौ तादर्थ्ये च।

(यस्मै ४।, दित्सा—धार्य्यर्थाः १।॥।, भं १।, चौ ।१।, तादर्थ्ये ७।, च ।१।)।

**यस्मै दातुमिच्छा, असूयादयः श्लाघादिरर्थश्च यस्मै, तद् भ-संज्ञं स्यात्, तत्र चौ, तादर्थ्ये च। ***

---

मोघ्या इति अधर्म्मसम्प्रदाने तृतीया। (९०८) दाणः सा चेच्चार्थे इत्यात्मनेपदम्। अधर्म्मे किं—श्रीशः श्रियै निजपदौ संयच्छति इष्टमिति शेषः। "अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया" इति वार्त्तिकम्।

* आप्रतिभ्यां श्रुः आप्रतिश्रुः, प्रत्यनुभ्यां गृः प्रत्यनुगृः, श्लाघ च कुश्च स्नाघश्च स्पृहिश्च श्रप च राध च ईक्ष च आप्रतिश्रुश्च प्रत्यनुगृश्च धारिश्च ते, तेषामर्थाः श्लाघ्कुस्नाघस्पृहिश्रप्राधीक्षाप्रति-श्रुप्रत्यनुगृधार्य्यर्थाः। ततः, दित्सा च असूया च क्रोधश्च ईर्ष्या च रुचिश्च द्रोहश्च श्लाघ्कुस्नाघ-स्पृहिश्रप्राधीक्षाप्रतिश्रुप्रत्यनुगृधार्य्यर्थाश्च ते। दानस्य पात्रं सम्प्रदानम्। "कर्म्मणा यमभिप्रैति स सम्प्रदानम्" इति पाणिनिः १।४।३२। "क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्" इति वार्त्तिकम्। "प्रदानाभिसम्बध्यमानं सम्प्रदानम्" इति पद्मनाभः।

दातुमिच्छा दित्सा, आशीस्त्वविप्राय गां ददातीत्यादि-सिद्धार्थम् इच्छापर्य्यन्तग्रहणम्। दानन्तु स्वस्वत्वध्वंसानन्तर-परस्वत्वोत्पत्त्यनुकूलव्यापारः, अतएव रजकस्य वस्त्रं ददातीत्यादौ न सम्प्र-दानत्वम्। अथवै भयं ददातीत्यादिप्रयोगस्तूपचारात्। एवञ्च "ददात्यर्थस्य गौणत्वेऽपि सम्प्रदानं भवत्येव, खण्डिकोपाध्यायः शिष्याय चपेटं ददातीति भाष्यप्रयोगात्"। इति सिद्धान्त-कौमुदीटीका। समनन्तरार्थं दानमित्यादिषु तु विवक्षाभावात् न सम्प्रदानत्वम्।' त्रिविधं हि सम्प्रदानम्—"अनिराकरणात् कर्त्तुस्त्यागाङ्गकर्म्मणेप्सितम्। प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्॥" इति हरिकारिका। तत्र अनिराकर्तृ सम्प्रदानं यथा, देवाय वस्त्रं ददाति; प्रेरकं सम्प्रदानं यथा, याचकाय धनं ददाति; अनुमन्तृ सम्प्रदानं यथा, गुरवे गां ददाति। असूया गुणेषु दोषारोपः, क्रोधश्चित्तविकारविशेषः, ईर्ष्या अक्षमा, रुचिरनुरागः, द्रोहोऽनिष्टा-चरणम्। असूयाद्यर्थानां धातूनां कर्त्तुर्यं प्रति असूयादिकं तत् सम्प्रदानमिति। "क्रुधद्रुहो-रुपसृष्टयोः कर्म्म" इति पाणिनिसूत्रेण (१।४।३८) देवदत्तं संक्रुध्यति। राजानमभिद्रुह्यतीत्यत्र कर्म्मणि द्वितीयैव, न तु चतुर्थी। श्लाघात्वर्थ इह स्थित्वा स्वाभिप्रायज्ञापनेच्छा, एवं कुस्नाघ-

ददातु सद्भ्यः स सुखं हरिः, स्मरात्
गोपीगणोऽसूयति कुप्यतीर्ष्यति।
स्म रोचते द्रुह्यति तिष्ठते ह्नुते-
ऽश्लाघिष्ट यस्मै स्पृहयत्यशप्त च ॥ *

गर्गो राध्यति रामाय कृष्णाय ईक्षते व्रजे।
शुभाशुभं पर्य्यालोचयदित्यर्थः।

---

शप-धातूनां यथाक्रमं ह्नवन-स्थापन-शपनैः स्वाभिप्रायज्ञापनेच्छा अर्थः। अतएव "श्लाघाद्यैर्ज्ञीप्सा" इति क्रमदीश्वरः। "श्लाघहृङ्स्थाशपां प्रयोगे यत् ज्ञापयितुमिच्छा तत् सम्प्रदानं स्यात्" इति गोयीचन्द्रः। श्लाघादीनां प्रयोगे यं प्रति स्वाभिप्रायज्ञापनेच्छा तत् सम्प्रदानमित्यर्थः। स्पृहिधातोः कर्म्मैव सम्प्रदानम्। राध इति दैवादिकस्य स्वादेश्च ग्रहणं, राध ईक्ष इति अनयोरत्र शुभाशुभपर्य्यालोचनमर्थः, यस्य शुभाशुभपर्य्यालोचनं तत् सम्प्रदानमिति। आप्रति-पूर्व्वशृणोतेरङ्गीकारोऽर्थः, स च यस्य सम्बन्धे क्रियते तत् सम्प्रदानम्। प्रत्यनुपूर्व्वगृणातेः (नतु गिरतेः) पूर्व्ववक्तुः प्रोत्साहनमर्थः, तत्र पूर्व्ववक्ता सम्प्रदानम्। धारीति धृधातोर्ण्यन्तः, तस्य गृहीतापरिशोधनमर्थः, तत्र यस्य धनं गृहीतं तत् सम्प्रदानमिति। ततश्च दित्सादि-धार्य्यर्थपर्य्यन्तानां यो विषयः स सम्प्रदानसंज्ञः स्यात्, तत्र च चतुर्थी स्यादित्यर्थः। तादर्थ्ये इति—स चासौ अर्थश्चेति तदर्थः तस्य भावस्तादर्थ्यं, एवञ्च तस्यार्थो निमित्तस्तदर्थः, तदर्थ एव तादर्थ्य, ततश्च, तादर्थ्यञ्च तादर्थ्यञ्च इत्येकशेषे तादर्थ्यं तस्मिन्, यत् प्रयोजनं तस्मात्, यस्य निमित्तस्तस्मादपि चतुर्थीत्यर्थः। यथा—ज्ञानाय पाठः, मशकाय धूम इत्यादि। पाणिनिः २।३।१२, १।४।३२—४१, वार्त्तिकञ्च।

* स हरिः सद्भ्यः साधुभ्यः सुखं ददातु। सद्भ्य इति दित्सया सम्प्रदानत्वम्। यस्मै हरये गोपीगणः स्मरात् कामाद्धेतोः असूयति स्म, यस्य गुणेषु दोषारोपणमकरोदित्यर्थः, असूं करोतीति कण्ड्वादित्वात् (८५४) यक्, स्मशब्दयोगे (९२४) अतीते लट्। एवं यस्मै कुप्यति स्म ईर्ष्यति स्म। यस्मै रोचते स्म यस्यानुरागपात्रमासीदित्यर्थः। यस्मै द्रुह्यति स्म। गोपीगणो यस्मै तिष्ठते स्म यं स्वाभिप्रायं विज्ञापयितुमैच्छदित्यर्थः, तिष्ठते इति (८६९) आत्मनेपदम्। यस्मै ह्नुते स्म- अपह्नवेन यं स्वाभिप्रायं विज्ञापयितुमैच्छदित्यर्थः। यस्मै अश्लाघिष्ट श्लाघनेन यं स्वाभिप्रायं विज्ञापयितुमैच्छदित्यर्थः। यस्मै स्पृहयति स्म। यस्मै अशप्त च शपथेन यं स्वाभिप्रायं विज्ञापयितुमैच्छदित्यर्थः, अशप्तेति (८६८) आत्मनेपदम्।

विभीषणायाशुश्राव राज्यं प्रत्यशृणोद्यशः।

प्रतिज्ञातवानित्यर्थः।

रामः प्रत्यसूयत्तस्मै लक्ष्मणोऽभ्यसूयत् कपिः।

रामं वदन्तं प्रोत्साहयामास इत्यर्थः।

सर्व्वो धारयते सर्व्वं संस्तं भज मुक्तये। *

२९५। अलमर्थं वषड्हित सुख स्वाहा स्वधा स्वस्ति नमोभिः। (अलमर्थं—नमोभिः ३॥)।

एभिर्योगे चौ स्यात्।

दैत्येभ्योऽलं हरिः, पूष्णे वषट्, सन्नो हितं सुखम्।
स्वाहाग्नये, स्वधा पित्रे, स्वस्ति धात्रे, नमः सते॥ †

---

* नवौ मुनिः व्रजे गोष्ठे रामाय बलदेवाय राध्यति च, कृष्णाय ईक्षते च, रामस्य कृष्णस्य च शुभाशुभं पर्य्यालोचयदित्यर्थः (पर्य्यालोचयदिति, चक्षितो वा चुरादय इति ज्ञापकात् ईक्षृ दर्शने इति भौवादिकात् स्वार्थे णिः)। रामः विभीषणाय राज्यम् आशुश्राव यशश्च प्रत्यशृणोत् दातुं प्रतिज्ञातवानित्यर्थः। लक्ष्मणस्तु रामाय प्रत्यसूयत्, कपिः सुग्रीवः (तस्मै रामाय) अभ्यसूयत्, विभीषणाय राज्यं यशश्च दास्यामीति वदन्तं रामं साधुवादैः प्रोत्साहयामासेत्यर्थः। सर्व्वः शिवः भक्तो भक्तेभ्यः सर्व्वं (वाञ्छितं) धारयति, दयालुतया शिवस्य ऋण-मर्षणेन निर्देशः, धारयते इति फलवत्कर्त्तरि (११८) आत्मनेपदम्। हे साधो मुक्तये मुक्त्यर्थं तं सर्व्वं भज, अत्र मुक्तये इति तादर्थ्ये चतुर्थी। यत्र निमित्तस्य कर्म्मकारकेण सह-योगो वर्त्तते तत्र (२११) सप्तम्येव, यथा वस्त्रेषु रजकमवधीदिति। अत्र तु सर्व्वेण सह मुक्तेर्न योगः।

† अलम् अर्थो येषां ते अलमर्थाः पर्य्याप्तसमर्थशक्तप्रभृतयः, ते च वषट् च हितञ्च सुखञ्च स्वाहा च स्वधा च स्वस्ति च नमश्च तैः। अत्र हित सुख इत्यनेन हितार्थसुखार्थयो-र्ग्रहणम्। वषट् स्वाहा स्वधा स्वस्ति नमः इत्येतेषां शब्दानां स्वरूपस्यैव ग्रहणम्। अत्र "अर्थग्रहणेन पर्य्याप्तार्थानां ग्रहणम्; हितशब्देन कल्याणपथ्यादिपर्य्यायानां ग्रहणम्; सुखशब्देन सुप्रीत्यादीनां ग्रहणम्" इति भरतः। नारायणे

## २९६। ढेनाशिषि वा।

(ढेन ३।, [अथवा ढे ७, न ।१।], आशिषि ७।, वा ।१।)।

सद्भ्यः सतां वा शं भूयात्। *

## २९७। परिक्रियो घे वा।

(परिक्रियः ६।, घे ७।, वा ।१।)।

भक्त्यै मुक्तिः परिक्रीता सद्भिर्विष्णो कषारिभिः। †

---

नमस्कृत्य इत्यादौ उपपदविभक्तेः कारकविभक्तिर्गरीयसीति (बलीयसीति वा) न्यायात् कर्मत्वम्। पाणिनिः २।३।१६, वार्त्तिकञ्च।

हितेभ्य इति—हरिर्देवेभ्योऽलं समर्थः। पूष्णे सूर्याय वषट्, पूष्णे यद्दातव्यं तत् वषट् इत्युच्चार्य्य दातव्यमित्यर्थः। स्वस्ति साधुभ्यो हितं सुखञ्च भवतीति शेषः। अग्नये स्वाहा, पितृभ्यः स्वधा, धात्रे स्वस्ति, सते विष्णवे नमः, अग्न्यादिभ्यो यत् दातव्यं तत् क्रमेण स्वाहा इत्यादि उच्चार्य्य दातव्यमित्यर्थः। अत्र शक्तार्थैर्हितसुखैश्च (२०२) योगे षष्ठ्यपीति वक्तव्यम्; "शक्तार्थैः षष्ठ्यपीष्यते" इति क्रमदीश्वरः। तेन नाप्नोषीदस्य कथनेत्यादि साधु। "प्रभुशब्दो यदा ईश्वरवाची तदा सम्बन्धषष्ठ्येव चतुर्थ्यविषयत्वात्—प्रभुर्बुभुर्भुवनत्रयस्य" इत्यादौ (गोयीचन्द्रः)।

* ढ-शब्देन अर्थे क्रिया चोच्यते, ढशब्दस्य क्रियावाचकत्वं ये चादिढे तः (१०९२) इत्यत्र चादिढे चादिक्रियायामित्यर्थेन स्पष्टं वक्ष्यति। ततश्च प्रयुज्यमानेन क्रियावाचकपदेन योगे आशिषि (इष्टार्थाविष्करणे) गम्यमानायां चतुर्थी वा स्यादित्यर्थः। अथवा—आशिषि गम्यमानायां चतुर्थी वा स्यात् न तु ढे कर्मणि प्रयुज्यमाने इत्यर्थः। कर्मणि तु—कृष्णः सतां शं करोतु इत्यादौ न स्यात्। आशिषि किं, तेषां कुशलं जातम्, आयुष्यं प्राणिनां घृतमित्यादि। सद्भ्यः सतां वा इति पक्षे षष्ठीविधानात् षष्ठ्यर्थे एवायं विधिरिति, तेन ग्रामे कुशलं भूयादित्यादौ न स्यात्। अत्र स्वस्तिवचनकुशलायुष्यप्रयोजनमद्रभद्रहितसुखपथ्यशोभनार्थैरेव योगे ज्ञेयम्। पाणिनिः २।३।७३।

† परिपूर्व्वस्य क्रीणातेः प्रयोगे घे करणे चतुर्थी स्याद् इत्यर्थः। भक्त्यै इति—सद्भिः साधुभिः विष्णोः सकाशात् भक्त्यै मुक्तिः परिक्रीता, अरिभिः शत्रुभिः कषा देवेन, मुक्तिः परिक्रीतेति शेषः। उदाहरणद्वयेन विकल्पो दर्शितः। एवं द्रोणाय द्रोणेन वा परिक्रीतो ध्वजः। परेः किं, शतेन क्रीतोऽश्वः। वेतने एवायं विधिरिति क्रमदीश्वरः। "चतुर्थी च परिक्रीणो वेतनादौ करणे" इति तत् सूत्रम्। तृतीया सिद्धैव, चतुर्थ्यर्थं विधानमिति गोयीचन्द्रः। अल्पकालार्थं परस्वे स्वाम्येऽवस्थापनमवचनपरिक्रयणात् नियतकालम्, वेतनादिना स्वीकरणम्। पाणिनिः १।४।४४।

## २९८। गत्यर्थमन्यढे चेष्टावज्ञेऽनध्वाकाकशुकशृगालनावन्ने वा ।

(गत्यर्थमन्यढे ७, चेष्टावज्ञे ७, अनध्वा—वन्ने ७, वा ।१।) ।

गत्यर्थमन्यत्योर्ढे क्रमादमार्गकाकादिवर्जे चेष्टावज्ञयोश्चो स्याद्वा ।

व्रजाय व्रजति शौरी व्रजं व्रजति केशवः ।
न त्वा तृणाय मन्येऽहं न त्वा मन्ये तृणं खलु ॥

चेष्टावज्ञे किं—मनसा द्वारकामेति, त्वां मन्येऽहं जनार्दनम् ।
अध्वादौ तु— गच्छत्यनन्तः पन्थानं, न त्वा काकं स मन्यते । *

---

* गतिरर्थो यस्य स गत्यर्थः, स च मन्यश्च तत् तस्य ढं तस्मिन् । चेष्टा च अवज्ञा च तत्तस्मिन् । न अध्वा अनध्वा, काकश्च शुकश्च शृगालश्च नौश्च अन्नञ्च तत्, न तत् अकाकशुकशृगालनावन्नं, अनध्वा च अकाकशुकशृगालनावन्नञ्च द्वयोः समाहारस्तस्मिन् । यथाक्रमदर्शनार्थं नञ्द्वययोगः । चेष्टा कायकृतव्यापारः, अवज्ञा अपकृष्टत्वेन ज्ञानम् । ततश्च—गत्यर्थधातोरध्ववर्जिते कर्मणि चेष्टायां गम्यमानायां, मन्यतेः काकादिवर्जिते कर्मणि अवज्ञायां गम्यमानायां, चतुर्थी वा स्यादित्यर्थः । मन्य इत्यत्र श्यना निर्देशात् मनु अवबोधने इति तनादिपठितो न गृह्यते ; यथा न त्वां तृणं मन्वे । अतः तृणाय न गणयतीत्यादि असाधु । "अध्वन्यर्थग्रहणं कर्तव्यम्" इति वार्त्तिकात् अध्वशब्दोऽत्र पथिवाचकः । "गन्त्राधिष्ठिते अध्वन्येवायं निषेधः, यदा तूत्पथात् पन्थानमेवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव । उत्पथेन पथे गच्छति ।" इति सिद्धान्तकौमुदी । व्रजायेति—शौरिः व्रजाय व्रजति, केशवः व्रजं व्रजति, पादचारेण गच्छतीत्यर्थः । हे खल अहं त्वा त्वां तृणाय न मन्ये, त्वा त्वां तृणं न मन्ये, तृणादप्यपकृष्टं मन्ये इत्यर्थः । मनधातोर्येन कर्मणा अवज्ञा गम्यते तस्मैव चतुर्थी वा स्यात्, अतएव त्वा इत्यत्र न चतुर्थी ; इदमेव क्रमदीश्वरेण "युष्मदादेरनभिधानान्न स्यात्" इति निरूपणात् स्पष्टीकृतम् । मनसा द्वारकामेतीत्यत्र चेष्टाभावात्, त्वां मन्येऽहं जनार्दनमित्यत्र च अवज्ञाभावात् न चतुर्थी । अनन्तः पन्थानं गच्छतीत्यत्र अध्वकर्मकत्वात्, स त्वा त्वां काकं न मन्यते इत्यत्र काककर्मकत्वाच्च न चतुर्थी । एवं शुकादिकर्मस्वपि न चतुर्थी स्यात् । भाष्ये वार्त्तिके सुपद्मे सारस्वते च 'शुक' इति पाठो दृश्यते ; काशिकायां सिद्धान्तकौमुद्यां संक्षिप्तसारे कलापे प्रयोगरत्नमालायाञ्च श्वा इति पाठस्तु दृश्यते । अतः 'शूक' इति पाठो लिपिकरप्रमाद इति उपेक्षितः । अत्र तादर्थ्ये चतुर्थीसिद्धावपि, ग्रामाय गच्छतीत्यादिषु (८७५) सनो गमृच्छेत्यादिना अदन्तादात्मनेपदप्राप्तेर्निरासार्थमिदमित्याहुः । पाणिनिः २।३।१२, १७ ; वार्त्तिकञ्च । प्रयोगपारिजातसूत्रे "अप्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्" इति सिद्धान्तकौमुदी ।

२९९। यतोऽपायभीजुगुप्सापराजयप्रमादा-दानभूत्राणविरामान्तर्द्धिवारणं अं पौ।

(यत: ५।, अपाय—वारणं १।, अं १।, पौ ।१।)।

यत एते तत् अंसंज्ञं स्यात्, तत्र पौ। *

विभीषणः पदाद्भ्रष्टो, भ्रातुर्भीतो, जुगुप्सितः।
पापात्, पराजितो दुःखा-दप्रमत्तो विधेः, सतः॥
शास्त्रविद्यो, मुनेर्जातो, भ्रातुस्त्रातो निजैर्भवात्।
विरतोऽन्तर्हितो दुष्टात्, शोकात् रामेण वारितः॥ †

---

* अपायश्च भीश्च जुगुप्सा च पराजयश्च प्रमादश्च आदानश्च भूश्च त्राणश्च विरामश्च अन्तर्द्धिश्च वारणञ्चेति समाहारः। एते यस्मात् भवन्ति तदपादानसंज्ञं स्यात्, तत्र पञ्चमी स्यादित्यर्थः। अपायश्चलनं, भीर्भयं, जुगुप्सा निन्दया मनोनिवृत्तिः, पराजयः सोढुमशक्त्या निवृत्तिः, प्रमादः शास्त्रविहितकर्माकरणम्, आदानं ग्रहणं, भूरुत्पत्तिः प्रादुर्भावश्च, त्राणं रक्षणं, विरामो विरतिः, अन्तर्द्धिरन्तर्धानं, वारणं निवारणम्। अपादानं त्रिविधम्—"निर्दिष्ट-विषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियञ्चेति त्रिधापादानमिष्यते॥" इति हरि-कारिका। "ध्रुवमपायेऽपादानम्" इति पाणिनिः १।४।२४। अपादाने पञ्चमी २।३।२८। भीः त्राणम् १।४।२५। पराजयः १।४।२६। वारणम् १।४।२७। अन्तर्द्धिः १।४।२८। भूः १।४।३०,३१। आदानम् १।४।२९ ; एवं पठनं, श्रवणं, ग्रहणमध्ययनमित्यादि। अत्र सूत्रे उप-योगे इति कथनात्—नटस्य गाथां शृणोति, न तु नटात् ; अतएव "षष्ठीतत्त्वे षष्ठी" इति क्रमदीश्वरः। जुगुप्सा, प्रमादः, विरामश्च—वार्त्तिकम्।

† विभीषण इत्यादि—विभीषणः पदात् स्थानात् भ्रष्टश्चलितः, भ्रातुः रावणात् भीतः, पापात् जुगुप्सितः पापं निन्दन् तस्मात् निवृत्त इत्यर्थः, दुःखात् पराजितः दुःखं सोढुमशक्त्या निवृत्तः, विधेः शास्त्रविहितकर्मणः अप्रमत्तः अनिवृत्तः, सतः पण्डितात् शास्त्रविद्यः शास्त्रा अधीता विद्या येन तादृशः, मुनेर्विश्रवसो जातः उत्पन्नः, भ्रातुः रावणात् (कनीयसात्) निजैरात्मीयैस्त्रातो रक्षितः, भवात् संसारव्यापारात् विरतो निवृत्तः, दुष्टात् (रावणात्) अन्तर्हितो लुक्कायितः, रामेण शोकात् वारितः त्वामहं लङ्काराज्ये करिष्यामीत्यादि प्रियवचन-शङ्का शोकात् निवारित इत्यर्थः। एवं यवेभ्यो गां वारयति, कूपादन्धं वारयतीत्यादि।

२०१ । अन्यारभ्यार्थारात्बहिर्विनर्त्ते प्रति-पर्य्यपाङ्दिक्शब्दैर्हेत्वयवर्गे च ।

(पञ्च —अङ्कैः २४, हेतुवर्गे ७, च ।२।) ।

एभिर्योगे हेतौ यवर्गस्यार्थे च पौ स्यात् । *

आङ् व्याप्तिसीमा-स्वार्थेऽष्मो, प्रतिदाननिधौ प्रति । †

नेतरो विष्णुरीशानात्, भवात् प्रभृति सोऽर्च्यते ।

सोऽन्यदारात् बहिस्तत्, यं विना नार्यो ह्युपाहृते ॥

भक्तेः प्रत्यकृतं भवेः, प्रद्युम्नः केशवात् प्रति ।

पर्य्यनन्तात् भवस्तापाः, चाङ्मुक्तेः सेव्यतां हरिः ॥

ब्रह्मास्थासकलात्, पूर्व्वः कृष्णाद्रामोऽपरो गदः ।

आतन्वाद्दीश्वरः प्रेमादासनाद्दीयतेऽसकाम् ॥

प्रेमसमारुह्य आसने उपविश्येत्यर्थः । ‡

---

* अन्यश्च आरभ्यश्च अन्यारभ्यौ, तौ अर्थौ येषां ते अन्यारभ्यार्थाः । दिशि वर्त्तमानाः शब्दाः दिक्शब्दाः, अन्यारभ्यार्थाश्च आराच्च बहिश्च विना च ऋते च प्रति च परि च अप च आङ् च दिक्शब्दाश्च ते तैः । अप् इति प्राप्त्यानि यथादिशः, तथा शैवकसाहचर्यात् तद्भावस्य ग्रहणम्, यवर्गार्थो यवर्गः, हेतुश्च यवर्गश्चेति हेतुयवर्गं तस्मिन् । दिक्शब्दा इति दिग्देशकालवाचकानां निर्देशः, ते च पूर्व्वपरादयः प्रागुदक्प्रभृत्यादयश्च । दिक्शब्द दिग्देशकालानां यथायथमेव वै वाचकाद्योगमेव ग्रहणं, तेन आयम्मात्सरकत्वात् कालादिर्न ग्रहणः । अन्यार्थैरारभ्यार्थैरारादार्थैरपतिः दिग्वाचकशब्दैश्च योगे, इतरो भगवत्प्रसादात् विष्णुम्, अन्यान्यार्थे नग्नमात्रे च, पञ्चमी स्यादित्यर्थः ।

† प्रति परि अप आङ्—चतुर्णामर्थविशेषेषु प्रयुक्तानाम् आङ् व्याप्तिसीमायाम्—आङ् व्याप्तिसीमावर्णयोर्वर्त्तते, व्याप्तिरभिविधिः, सीमा अवधिः । प्रति प्रतिदाननिधौ वर्त्तते, दानञ्च निधिश्चेति समाहारे दाननिधिः, प्रतिदानं पुनः, प्रतिप्रतिनिधिः प्रतिदाननिधिस्तस्मिन्, प्रतिदाने प्रतिनिधौ चेत्यर्थः । प्रतिदानं निर्व्यानम्, प्रतिनिधिर्विधायकः । परि अपौ वर्ज्जने वर्त्तेते । पाणिनिः १।४।८८,९२,९१ ।

‡ नेतर इति—विष्णुः ईशानात् इतरश्च न अन्यः च इतरः, स विष्णुः भवात् प्रभृति भवात् आरभ्य अर्च्यते । अन्यदारात् समारभ्य इत्यादिवत्,

३०१ । आरादर्थैः । (आ।११, आरादर्थैः ३।३) ।

दूरान्तिकार्थैः पौ स्याता ।

रामाद्दूरस्य यो दूरं पापाद्दुःखस्य सोऽन्तिकम् । *

३०२ । समार्थैनान्यसमाद्वितसुखैर्निर्द्धारे

सम्बन्धे ढे च पौ ।

(समार्थ—सुखैः ३।३, निर्द्धारे ७।१, सम्बन्धे ७।१, ढे ७।१, च ।१।, पौ ।१।) ।

एभिर्योगे एषु च पौ स्यात् ।

---

पदविभक्तेः कारकविभक्तिर्गरीयसीति न्यायात् कर्मणि द्वितीया । स भिक्षुः ग्रामात् आरात् ग्रामस्य निकटे इत्यर्थः; त्वत् बहिः तव बहिरित्यर्थः । धर्मात् अर्थात् विना ऋते च सुखम् धर्मेण न भवतीत्यर्थः । विना ऋते इति अन्यार्थ योगे (२८६) द्वितीया च, विना शब्देन योगे (२८८) तृतीया च भवतीति बोध्यम् । भक्तो भक्तेः प्रति प्रतिदानम् अमूल्यं मोक्षः, यः भक्तो भक्तिं करोति प्रभुस्तस्मै मुक्तिं ददातीत्यर्थः । प्रद्युम्नः कामदेवः केशवात् प्रति केशवस्य पुत्रः इत्यर्थः । त्रयस्तापाः आध्यात्मिकाधिदैविकाधिभौतिकसंज्ञकाः अनन्तात् परि अनन्तेन वर्जिता इत्यर्थः । एवं अपानन्तात् त्रयस्तापा इत्यपि । आ मृत्योः मृत्युपर्यन्तं हरिः सेव्यताम् । आ सकलात् सकलं जगत् व्याप्य कृष्ण परमेश्वरः अस्ति । रामो बलरामः कृष्णात् पूर्वः पूर्वकालीनः ज्येष्ठः इत्यर्थः । गदो गदनामको यादवः कृष्णात् अपरः पश्चिमकालीनः कनिष्ठः इत्यर्थः । ईश्वरः शिवः आनन्दात् ईशेः कैलासात् कैलासपर्वतस्य आसनात् आसने उपविश्य अलकां कुबेरपुरीम् ईक्षते पश्यति; अत्र आसनेति कैलासार्थे कैलासादिति कर्मणि पञ्चमी, उपविश्येति ल्यबन्तार्थे आसनादिति अधिकरणे पञ्चमी । कर्माधिकरणाभ्यामन्यत्र ल्यबर्थे पञ्चमी न स्यादिति भावः । पाणिनिः २।३।१०,११,२६,२९,३२; वार्त्तिकञ्च । अत्र यद्यपि "करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य" (पाणिनिः २।३।३३) इति सूत्रेण "स्तोकान्मुक्तस्तस्कराः" इत्यादौ पञ्चमी तृतीया च । एवमेव "स्तोकाल्पकृच्छ्रकतिपयेभ्यः करणात्" इति क्रमदीश्वरः ।

* आरात् शब्दस्यार्थः एव अर्थौ येषां ते आरादर्थास्तैः । आरात् दूरसमीपयोरिति अमरः, अतः आह दूरान्तिकार्थैरिति । यः रामाद्दूरस्य च दूरं रामस्य दूरस्य च दूरं तिष्ठतीति शेषः; स पापात् दुःखस्य च अन्तिकं पापस्य दुःखस्य च अन्तिके तिष्ठतीत्यर्थः । अत्र दूरान्तिकार्थैः षष्ठी । दूरम् अन्तिकञ्च सप्तम्यर्थे द्वितीया । पाणिनिः २।३।३४ ।

यः सर्व्वस्य समो यश्च दक्षिणेनोत्तरा स्थितः ।
उपर्य्यधः पूर्व्वतश्च पश्चात्, यस्माखिलं हितम् ।
सुखञ्च, तस्य देवानां वर्य्यस्य, पदयोर्भजे ॥ *

२०३ । ष्ठोऽज्ञाने ञे । (ष्ठः ६।, अज्ञाने ७, ञे ७) । †

मधोर्मुकुन्दे जानीते भक्त्या जानाति शङ्करम् ।

---

* समोऽर्थो येषां ते समार्थाः, समानसमतुल्यसदृशादयः । समार्थाश्च एनश्च आश्च रिश्च अस् च तस् च तात् च हितञ्च सुखञ्च तानि तैः । एन आ रि अस् तस् तात् प्रत्यये तद्धिताः, तेषाञ्च केवलानामसम्भवात् तदन्तानां ग्रहणम् । एन इति (५१९) येनोऽपौत्यनेन, आ इति (५२०) दक्षिणोत्तरादाद्वौत्यनेन, रि इति (५२४) निपातनात्, अस् इति (५२२) अतएव अस्, तस् इति (५११) तस् ञ्से रित्यनेन, तात् इति (५१८) दिक्शब्दादित्यनेन । जातिगुणक्रियाद्यातुल्यत्वेनापकर्षेण वा सजातीयात् पृथक्करणं निर्द्धारः । सम्बन्धश्च स्वस्वामिभाव-जन्यजनकत्वादि-रनेकविधः । समार्थैः, एनादिषट्तद्धितान्तैर्हितसुखाभ्याञ्च योगे, निर्द्धारणे, सम्बन्धे, कर्म्मणि च, षष्ठी स्यादित्यर्थः । हितौ यद्यपि सम्बन्धः पक्षुर्य्यपिसिद्धा, भेदकादिति प्रेयम् । यः सर्व्वस्येत्यादि—तस्य पदयोर्भजे इत्यन्वयः, यः सर्व्वस्य जगतः समस्तुल्यः, यश्च सर्व्वस्य दक्षिणेन स्थितः, स्थित इति वर्त्तमाने क्तः, दक्षिणे तिष्ठतीत्यर्थः ; एवम् उत्तरा उत्तरस्यां दिशि; उपरि ऊर्द्धभागे, अधः निम्नदेशे, पूर्व्वतः पूर्व्वकाले, पश्चादुत्तरकाले च, सर्व्वस्य इत्यनेन स्थित इत्यनेन च सर्व्वत्रान्वयः । यस्य अखिलं जगत् हितं मितं, सुखं सुखजनकञ्च, तस्य देवानां वर्य्यस्य श्रेष्ठस्य ईश्वरस्य पदयोर्भजे भजामीति शेषः । अत्र यथाक्रमं तत्तत्प्रयोगो बोध्यः । सामान्यतः कर्म्मणि विहितापि षष्ठी धातुविशेषाणामिति बाध्यम्, अन्यथा सर्व्वत्र कर्म्मणि षष्ठ्यापत्तेः । तथाच, "अधीगर्थदयेशां कर्म्मणि" (पा. २।३।५२), "कृञः प्रतियत्ने" (पा. २।३।५३), "रुजार्थानां भाववचनानामज्वरेः" (पा. २।३।५४), "आशिषि नाथः" (पा. २।३।५५), "जासिनिप्रहणनाटक्राथपिषां हिंसायाम्" (पा. २।३।५६), "व्यवहृपणोः समर्थयोः" (पा. २।३।५७), "दिवस्तदर्थस्य" (पा. २।३।५८), इत्यादि । अतएव क्रमदीश्वरः—"कर्म्मादिविवक्षायामविवक्षिते कारकादौ सम्बन्धविवक्षायां षष्ठ्येव"—इति सूत्रम् । "मातापित्रोरीयादिति भाष्यम् । न च स्मिरति यत्रविदिति, यदिः । सा कर्म्मोपकृतो यत्र परीचायामिति विरामः । मातापित्रादपकारीत्यादि ।" सूत्रे पदयोर्भजे इत्यादौ तु विवादः । पाणिनिः २।३।५०,४६,४१,४०,७२ ।

† अज्ञानार्थस्य वर्त्तमानस्य जानाते र्ज्ञः करणे षष्ठी स्यादित्यर्थः । पाणिनिः २।३।५१ ।

मधुना सावधेन मुकुन्दे प्रवर्त्तते इत्यर्थः, प्रवृत्त्यर्थश्च जानातिः ।*

३०४। हृस्मरर्थानां वा। (हृस्मरर्थानां ६॥, वा ।१।)।

मृद्धारस्य हरिस्मृतः, पूर्णः शान्तेन शङ्करः। †

३०५। ठघे कृत्यव्यक्यक्तक्तवतुखलर्थक्तोच्छ-शानवसुधीलार्थतृन्अव्ययखार्थघिनि। (ठघे ७।, क्रति ७, च-अ कि उक क्तवतु खलर्थ क्त उत् शत शान वसु धीलार्थतृन् अव्य-खार्थघिनि ७।)।

व्यादिविषये कृति प्रयुज्यमाने ठे घे च षो स्यात्। ‡

---

* मधोरिति। मधोः मधुना मुकुन्दे विष्णौ जानीते प्रवर्त्तते भक्त इति शेषः, मधौ तुष्टे सति मुकुन्दे भक्तिर्भवतीति मधोः साधनत्वम्। धातूनामनेकार्थत्वात् ज्ञाधातुरत्र प्रवृत्त्यर्थः। (८९७) षडादित्वादात्मनेपदम्। ज्ञाने किं, भक्त्या शङ्करं जानाति, स्वरेण पुत्रं जानातीत्यादौ न करणे षष्ठी।

† हृस्मरर्थौ येषां ते हृस्मरर्थाः तेषां, हृस्मरर्थधातूनां करणे षष्ठी वाच्या इत्यर्थः। हरिः मृद्धारस्य हृतः मृद्धारेण सन्तुष्ट इत्यर्थः, हृत इति कर्त्तरि क्तः। पूर्णे शङ्करः शान्तेन शान्त्या पूर्णः, पूरयाञ्चः कर्त्तरि क्तः, पूर्णेरिव व्याप्तिरमम् अतएव हर्षिविशेषः। (नाथिस्मृतवि कानां नायमानां मसोहषि। नाथकः सर्वभूतानां च पुंसां कामयोषणा॥) "करणे पुष्कलार्थयोः" इति कातन्त्रपरिशिष्टम्। "हृस्मरर्थस्य च" इति क्रमदीश्वरः।

‡ ठच घच ठघं तस्मिन्। अं—अतुम् क्राप् चपम्। क्तः चार्थ इव चार्थौ यस्य स खलर्थः, (११८१) ईषद्दुःसुष्वित्यनेन खल्, (११८२) आतोऽन इत्यनेन अनः, इति द्वयं खलर्थः। उत् उकारान्तप्रत्ययः—चव् इच षु नु चाशु चाव इषु इत्यादि। शह इत्यनेन उपलक्षणात् तुमन्त अन्तुरपि वक्तव्यम्। एवम् चान इत्यनेन शान कान स्यमान् इत्येषां ग्रहणम्। शीलमर्थो यस्य स शीलार्थः, स चासौ तृन् चेति शीलार्थतृन्; अव्यं अविपरीतार्थः, खार्थं प्रतिदिवसमधा धर्मीतं, अव्यय खयच अव्यर्थे, ते चार्थौ यस्य स अव्यखार्थः, स चासौ घिन् चेति अव्यखार्थघिन्। ततः अच किंच उकच क्तवतुच खलर्थच क्तच उतच शतच शानच वसुच शीलार्थतृन् च अव्यखार्थघिन् च ते, न विद्यन्ते ते यत्र कृति सः, अव्यक्तवतुखलर्थक्तोच्छ-शानवसुशीलार्थतृन्अव्यखार्थघिन् तस्मिन्। अव्यवादिविषये कृति प्रयुज्यमाने ...

जगतां कारकः कृष्णः कृतिर्मुररिपोरियम् ।

व्यादौ तु——कृष्णा दधि माधकमेतदर्भकान्
उन्नीतवन्तं, यतिभिः सुदर्शनम् ।
व्रातं, हरिं, जिष्णुरघानि संस्तुवन्
मुदं दधानोऽर्थिनमीयिवान् न कः ॥
श्रं दाता कृत् कन्यानामो दासो मोक्षस्यं श्रियः । *

---

कर्मणि कर्त्तरि च षष्ठी स्यात् न तु उक्ते, उक्ते तु (२८०) प्रथमा स्यादेव । पाणिनिः २।३।६५,६९,७०, वार्त्तिकञ्च ।

* कृष्णः जगतां कारकः, करोतीति कृधातोः (९९०) वृन्-वक्षौ णै इति अकः, अत्र कर्मणि जगतामिति षष्ठी । इयं जगदित्यर्थः (विशेषप्राधान्यात् स्त्रीलिङ्गता) मुररिपोः कृतिः, क्रियते या सा इति (११४७) कर्मणि क्तिः, कृतेत्यर्थः, अत्र कर्त्तरि मुररिपोरिति षष्ठी । व्यादीनामुदाहरणानि कृष्णेत्यादि—एतत् जगत् कृष्णा निर्माय दधि चोरयन्तं माधकं हिंसन्तञ्च, अर्भकान् उन्नीतवन्तम् ऊर्द्धं प्रापितवन्तं, यतिभिर्योगिभिः सुदर्शनम् अनायास-दृश्यमानं व्रातञ्च, हरिं संस्तुवन्, अघानि पापानि जिष्णुः, मुदं दधानः को जनः अर्थिनं याचितं न ईयिवान् न प्राप्तवान् अपि तु सर्व्व एव ईयिवानित्यर्थः । अत्र (११६४) कृष्णा इत्यव्ययस्य कर्मणि एतत् जगदित्यत्र न षष्ठी, एवं कृष्णं द्रष्टुं याति, कृष्णं चारं चारं नमति । (१११८) दधिम् इति किमव्ययान्तस्य कर्म्म जगत्, अत्र न षष्ठी । (१११०) माधकमित्यत्र कर्म्म जगत्, अत्र न षष्ठी । (१०५०) उन्नीतवन्तमित्यस्य कर्मणि अर्भकानित्यत्र न षष्ठी । (११६२) सुदर्शनमित्यस्य (१०५०) व्रातमित्यस्य च कर्त्तरि यतिभिरित्यत्र न षष्ठी । (११०७) जिष्णुरित्यस्य कर्मणि अघानीत्यत्र न षष्ठी । एवं कृष्णं दिदृक्षुः, धनं लभ्याशुः, कन्यां दिदृक्षुरित्यादि । (११००) संस्तुवन् इत्यस्य कर्मणि हरिमित्यत्र न षष्ठी । (१०८६,११०७) दधान इत्यस्य कर्मणि मुदमित्यत्र न षष्ठी, एवं हरिं शोभमान इति । (१०८६) ईयिवान् इत्यस्य कर्मणि अर्थिनमित्यत्र न षष्ठी । श्रं कल्याणं दाता कल्याणप्रदानशीलः, श्रीकृष्णः कन्यां दासी अधमर्णस्य ऋणीयमानं दासी श्रियः कर्त्ता इत् वर्त्तनम् धारयति धारयितव्यमित्यर्थः । अत्र शीलार्थकतृन्नन्तस्य दाता इत्यस्य श्रमिति कर्मणि न षष्ठी, दासी इत्यस्य ऋणार्थकणिन्नन्तस्य श्रीमिति कर्मणि न षष्ठी, अवश्यार्थकणिन्नन्तस्य धारयितव्यमित्यस्य इत्याहि कर्मणि न षष्ठी ।

त्रिकर्मकाणां धातूनां कर्मणि षष्ठी, त्रिविधार्थस्य आचार्य इत्यादि । बहुषु द्विकर्मकेषु, यथा त्रिचोर्थस्य आचार्या गुरु इत्यादि । शीलार्थकतृन्नन्तस्य कर्त्तरि इति त्रिकर्मकाः

२०६ । कामुकसङ्ज्ञार्थक्तेन । (कामुक-सं[ज्ञार्थ]-क्तेन ३।) ।

कामुकशब्देन वर्त्तमानक्तयोर्विहितेन क्तेन च योगे ङे घे च षी स्यात् ।

यो लक्ष्म्याः कामुको ज्ञातः सतां तस्येदमासितम् । *

२०७ । स्वभावक्ताव्ययाकसट्ठे घे वा ।

(स्व—सट्ठे ७, घे ७, वा ।१।) ।

स्वे भावार्थ-क्ते क्तीविहितं घं वकञ्च हित्वा अव्यय सट्ठे घे षी स्यात् ।

त्वया मम च कृष्णोऽर्थः ज्ञातं ध्रुव, स यस्य तु ।
स्रष्टः कृति-हृति-र्येन, चिकीर्षा यस्य भेदिका ॥ †

---

द्वयोः एव षष्ठीं वदन्ति, यथा गां दुग्धस्य दोग्धा गोप इत्यादि । अत्र क्रमदीश्वरसूत्रम्—"कर्मण्यं दुहादीनामनुक्तं स्यात् क्वचित् यदि । कथित्वा समासार्थे षष्ठीं प्रधानकर्मणि ॥" अत्र तदर्थं—[illegible] प्रयोगानुसारेण कर्त्तृकर्मणोः षष्ठी स्यादिति । यथा "[illegible]" इति क्रमदीश्वरः ।

* पूर्वसूत्रे [illegible] ङे घे च षष्ठीनिषेधात् [illegible] परसूत्रमयेन । [illegible] मानवाचः, [illegible], [illegible] [illegible], ते षष्ठीं [illegible] [illegible], [illegible] [illegible], कामुकस्य [illegible] । यः [illegible] लक्ष्म्याः कामुकः लक्ष्मीं कामयते, यः सतां ज्ञातः [illegible] [illegible] । अत्र कामुक इति कम-धातोः (१११०) कर्त्तरि उकः, अतः कर्मणि लक्ष्म्या इति षष्ठी । ज्ञात इति (१०९६) वर्त्तमाने क्तः, अतः कर्त्तरि [illegible] षष्ठी । आसितमिति (१०९४) अधिकरणे क्तः, अतः कर्त्तरि सतामिति षष्ठी । इह [illegible] [illegible] [illegible] (१०४४) कर्त्तरि षष्ठी न स्यात्, तेन [illegible], [illegible] इत्यादि । [illegible] "[illegible] [illegible]" इति सूत्रे [illegible] । [illegible] [illegible] ।

† [illegible], भावे क्तः [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] ।

## ३०८। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतकुशलायुक्तनिपुणसाधुसुजर्थैर्नादरे ष्णी च।

(स्वामि—सुजर्थैः ३॥, नादरे ७।, ष्णी ।१।, च ।१।)।

---

प्रयुज्यमाने स्त्री-विहितौ च-णकौ हित्वा यस्मिन् स्त्रीविहिते सकर्मके कृति प्रयुज्यमाने च कर्त्तरि षष्ठी स्यात् इत्यर्थः। त्वयेत्यादि। हे साधो इत्युक्तम्, त्वया मम च स कृष्णोऽर्च्यः, अर्च-धातोः कर्मणि वाच्ये (८७१) घ्यण्, कर्त्तरि त्वयेति तृतीया, पक्षे ममेति षष्ठी। हि यस्मात् अत्र तीर्थे त्वया मम च स्नातं, स्नाधातोर्भावे क्तः, त्वया मम च तृतीया-षष्ठ्यौ। यस्य कृष्णस्य दृष्टेः कृतिः करणं, येन दृष्टेः हृतिः हरणं, कृतिः हृतिश्च कृहृधातुभ्यां भावे (११४७) क्तिः, अस्य कर्त्तरि यस्येति षष्ठी, पक्षे येनेति तृतीया। उभयत्र दृष्टेरिति कर्मणि (२०५) षष्ठी। एवं (११४८) हानिः सुखानां दरिद्रस्य दरिद्रेण च, (११५०) परिचर्या गुरोः शिष्यस्य शिष्येण च, (११५८) वन्दना विष्णोः भक्तस्य भक्तेन इत्यादि। सद इति किं, साधोर्हरिस्मादौ कर्त्तरि पूर्व्वेण (२०५) नित्यं षष्ठी। अच्चणक इति किं, यस्य कृष्णस्य दृष्टेश्चिकीर्षा कर्तुमिच्छा, भेदिका च भेदनं नाम इति यावत्। चिकीर्षेति सन्नन्तकृधातोः (११५३) स्त्रीविहितः अ-प्रत्ययः। भेदिकेति (९९०) स्त्रीविहितो णकप्रत्ययः। उभयत्र यस्येति कर्त्तरि (२०५) नित्यं षष्ठी। एवं (११५५) इच्छा सुखेलप्सिनः, (११५६) कथा कृष्णस्य भक्तानामित्यादि। पाणिनिः २।३।७१, वार्त्तिकञ्च। अथ अच्चणकसदे इत्यस्य व्याख्यान्तरे कृते (स्त्री-विहितौ च-णकौ हित्वा यस्मिन् स्त्रीविहिते अस्त्रीविहिते वा सकर्मके कृति प्रयुज्यमाने) "शेषे विभाषा" इति वार्त्तिकानुसारेण शब्दानामनुशासनमाचार्य्येण आचार्य्यस्य वा इति सिध्यति।

कर्म्मणि कर्त्तरि च षष्ठीविधाने वक्तव्यमेतत्—

अस्त्रीविहित-कृद्योगे षष्ठी नियम्यते (कर्म्मणीति शेषः)।
एकदा तूभयप्राप्तौ कर्म्मण्येव न कर्त्तरि (पाणिनिः २।३।६६)।
तव्यादीनां प्रयोगे तु द्वयोरेव हि नेष्यते॥
कर्त्तुर्विभाषया केचित् (पाणिनिः २।३।७१) कर्म्मणोऽपि तदिष्यते।
प्रधाने नियता षष्ठी गुणे तूभयथा स्मृता॥

यथा वेदस्य पाठश्छात्रेण, ग्रामस्य गमनं पान्थेन इत्यादि। कर्म्मणोऽप्याकारेऽपि न कर्त्तरि, यथा भोजनमनेन इत्यादि। तव्यादौ तु वाच्यतया कृष्णो सेव्यो भक्तेन (भक्तस्य वा) इत्यादि। द्विकर्मकस्थले तु यत्र कृता द्वे कर्मणी अनुक्ते तत्र द्वयोरपि षष्ठी, केचित् मुख्ये एव; केचिच्च गौणे एव, अतः प्रयोगानुसारेणैव ज्ञेयमिति निष्कर्षः।

गां दिग्धं वा न गन्तव्यं, ग्रामं वा न प्रवेष्टव्यं, इत्यादौ कर्मणि विषयादिष्वपि अपि कृत्प्रत्ययः स्यादिति भाष्यादीनां मतम्।

**स्वामी मुकुन्दः सर्व्वेषां, साक्षी सर्व्वेष्वधोक्षजः।**
**निम्नक्षिरगुर्गोप्योऽपत्ये मातुर्वदत्यजम् ॥ ***

**३०९। कालभावाधारं ङं मौ।**

(काल-भाव-आधारं १।, ङं १।, मौ ।१।)।

**एते ङसंज्ञाः स्युः, तत्र मौ। †**

---

* सुपोऽर्थो भावः, सुपोऽर्थ इव अर्थो यस्य स सुबर्थः। भावार्थैरेवेष्टसिद्धौ सुबर्थग्रहणं सुबर्थप्रत्ययान्तानां ग्रहणार्थम्। अन्यथा दायादिशब्देरपि षष्ठीसप्तम्यापत्तः। सुबर्थप्रत्ययश्च कृदन्तस्य सुप् (४८४,४८५) इति ज्ञेयम्। "धात्वर्थयोरपि कालसर्ग:" इति गोयीचन्द्रः। स्वामी च ईश्वरश्च अधिपतिश्च दायादश्च साक्षी च प्रतिभूश्च प्रसूतश्च कुशलश्च आयुक्तश्च निपुणश्च साधुश्च सुबर्थश्च ते तैः। न आदरो अनादरस्तस्मिन् स्वाम्यादिभिरेकादशभिः शब्दैः कृदन्तस्-सुबन्ताभ्याञ्च योगे षष्ठी-सप्तम्यौ स्याताम्, अनादरे गम्यमाने च षष्ठी-सप्तम्यौ स्यातामित्यर्थः। अत्र वक्तव्यम्—"अनादराधिके भावलक्षणे भाववतः षष्ठीसप्तम्यौ विभक्ती भवतः" इति काशिका। वस्तुतस्तु "केवलभावलक्षणे सप्तम्येव, अनादराधिक्ये तु षष्ठीसप्तम्यौ" इति तत्त्वबोधिनी। मुकुन्दः सर्व्वेषां स्वामी, सर्व्वेष्विति च। अधोक्षजः (अधोकृतम् अक्षजमिन्द्रियजन्यं ज्ञानं यस्मात् सः) सर्व्वेषु साक्षी, सर्व्वेषामिति च। एवं कृष्णः सर्व्वेषां सर्व्वेषु च ईश्वरः, सर्व्वेषां सर्व्वेषु च अधिपतिः। स्वामीश्वराधिपतीनामेकार्थत्वेऽपि पृथग्ग्रहणात् तत्पर्य्यायभूतशब्दान्तरैर्योगे न स्यात्, तेन कृष्णः सर्व्वेषां पतिरित्यादौ सम्बन्धे षष्ठ्येव, न तु सप्तमी। एवं, कृष्णः यादवेषु यादवानां वा दायादः प्राप्तिरित्यर्थः। चैत्रो मैत्रे मैत्रस्य वा प्रतिभूर्लग्नक इत्यर्थः। कृष्णो यादवे यादवस्य वा प्रसूतः जात इत्यर्थः। कुशलायुक्ताभ्यां योगे तत्परत्वे एव (आसेवायामिति पाणिनिः, तात्पर्य्ये इति भट्टोजिदीक्षित-क्रमदीश्वरौ), यथा छात्रः पाठे पाठस्य वा कुशलः आयुक्तो वा, तत्पर इत्यर्थः। अन्यत्र कलासु कुशलः सुशिक्षित इत्यर्थः, रथे आयुक्तः बद्ध इत्यर्थः, इत्यादिषु सप्तम्येव। एवं निपुणसाधुभ्यां प्रशंसायामेव। अत्र "अप्रत्यादिभिरिति वक्तव्यम्"—तेन साधुर्निपुणो वा मातरं प्रति, परि, अनु वा। सुबर्थैः कालाधिकरणादेव (अतएव "कालसर्ग: कालादधिकरणात्" इति क्रमदीश्वरसूत्रम्)। यथा—गोप्यः, अपत्ये वदति, मातुः। वदत्याम, वदत् अपत्यं वदतीं मातरञ्च अवाहक्षेति शेषः, चिरि चिः अङ्कः चिः चिरकालमित्यर्थः, अथं कृष्णम् अजुः प्रापुः। चिरिति (४८५) सुप्प्रत्ययः। अजुरिति अजधातोः ज्या अत् (६८२,६७५)। एवं दिने दिनस्य वा पचकृतः पठतीत्यादि। कालाधिकरणात् किं, रथे स्थितः दृष्टः। पाणिनिः २।३।३८—४०,४१, भाष्यञ्च।

† कालश्च भावश्च आधारश्च तेषां समाहारः। ङम् अधिकरणं, मौ सप्तमी। कालः

सामीप्याश्लेषविषयैर्व्याप्त्याधारश्चतुर्विधः।
रेमे शरदि गोविन्दो गोपीभिरुदिते विधौ।
कालिन्द्यां, कानने, केलौ कुशलः, सकले स्थितः॥ *

## ३१०। अधिकेशार्थोपाधिभ्याम्।

(अधिक-ईश-अर्थ-उप-अधिभ्यां ३॥)।

अधिकार्थेनोपेन स्वाम्यर्थेनाधिना च योगे मी स्यात्।
गुणा उप परार्द्धे स्युर्विष्णोरधि हरौ सुराः। †

---

अथवदक्षसुहृत्तादिः। भावो धात्वर्थः, यस्य क्रियानन्तरं क्रियान्तरं लक्ष्यते स इह भावः। "तद्वैपरीत्ये च" इति वार्त्तिकम्। पाणिनिः २।३।३६,३७। "कालभावयोः सप्तमी" इति कातन्त्रम्।

* आध्रियते पदार्थोऽस्मिन् इति आधारः (१।४।४५ सूत्रस्य व्याख्याने आध्रियन्तेऽस्मिन् क्रियाः इति आधार इति काशिका)। यदुक्तं—कर्तृकर्मव्यवहितामसाक्षात् धारयत् क्रियाम्। उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्॥ इति हरिकारिका। स तु चतुर्विधः, यथा—सामीप्येति। समीपस्य भावः सामीप्यम्, आश्लेष एकदेशसम्बन्धः, विषयः प्रतिपाद्यादिः, व्याप्तिः व्यापकत्वेन सम्बन्धः। (सिद्धान्तकौमुद्यान्तु "औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा" इति लिखितम्।) क्रमेणोदाहरति रेमे इति—गोविन्दः शरदि शरत्काले, विधौ चन्द्रे उदिते सति विधोरुदयक्रियानन्तरमित्यर्थः, विधौ इति भावे सप्तमी, उदिते इति तद्विशेषणत्वात् सप्तमी। यदुक्तं—विशेष्यस्य हि यल्लिङ्गं विभक्तिवचने च ये। तानि सर्वाणि योज्यानि विशेषणपदेऽपि चेति॥ कालिन्द्यां कालिन्द्याः समीपे यमुनायाः तीरे इत्यर्थः, कानने काननैकदेशे, गोपीभिः (सह) रेमे क्रीडितवान्। गोविन्दः कीदृशः—केलौ क्रीडाविषये कुशलः समर्थः, सकले जगति स्थितः सकलं व्याप्य स्थित इत्यर्थः।

† अधिकश्च ईशश्च तौ अर्थौ ययोः तौ अधिकेशार्थौ, उपश्च अधिश्च तौ उपाधी, अधिकेशार्थौ च तौ उपाधी चेति तात्पर्यम्। स्वाम्यर्थेनेत्यस्य उभयार्थत्वं स्वस्वामिसम्बन्धस्य उभयनिष्ठत्वात्—तथाच अधिना योगे यत्र परिचार्यत्वात् यस्य स्वामी तत्रापि सप्तमी स्यादित्यर्थः। गुणा इति—विष्णोर्गुणाः परार्द्धे उप स्युः परार्द्धादधिकाः असंख्या इत्यर्थः। परार्द्धं चरमसंख्या,—तथाचोक्तम्, एकं दश शतञ्चैव सहस्रमयुतं तथा। लक्षञ्च नियुतञ्चैव कोटिरर्बुदमेव च॥ वृन्दः खर्वो निखर्वश्च शङ्खपद्मौ च सागरः। अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथोत्तरमिति॥ सुरा देवाः हरौ अधि हरिः परिचार्य इत्यर्थः, एवम् अधि सुरेषु हरिरित्यपि, हरिः सुराणां स्वामीत्यर्थः। पाणिनिः २।३।९।

३११ । ङेनार्थात् । (ङेन ३।, अर्थात् ५।) ।

ङेन योगे निमित्तात् ङी स्यात् ।
वस्त्रेषु रजकमवधीत् व्याघ्रः । *

३१२ । क्तेना ङे । (क्तेना ३।, ङे ७।) ।

क्तादिष्टितेन इना योगे ङे ङी स्यात् । वेदेऽधीती । †

३१३ । निर्द्धारेऽधिकेन क्रियान्तःकालाध्वनोश्च पी च । (निर्द्धारे ७।, अधिकेन ३।, क्रियान्तःकालाध्वनोः ७।, च ।१।, पी ।१।, च ।१।) ।

श्रेष्ठं कपालुष्वर्क्कादिः वट्टैकादशकेऽधिकम् ।
मुहूर्त्तेष्टवात्, शिवं ध्यायन्, मुच्यते क्रोशे वा चरन् ॥
भूयो योजनकन्नेऽर्कं पश्येज्जन्हयात् विभुम् । ‡

---

* अर्थो निमित्तम् । क्रियाया निमित्तं यदि कर्म्मणा संयुक्तं स्यात् तदा तस्मात् निमित्तात् सप्तमी स्यादित्यर्थः । अवधीदिति क्रियाया निमित्तस्य वस्त्रस्य हननक्रियाकर्म्मणा रजकेन सह संयोगात् वस्त्रेषु इति सप्तमी । एवं, चर्म्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति, सीम्नि पुष्कलको हतः ॥ इति महाभाष्ये । (सीमा अण्डकोषः, पुष्कलको गन्धमृगः ।) कोपेन द्वीपिनं हन्ति इत्यादौ कर्म्मणा संयोगाभावात् न सप्तमी । मुक्ताफलाय करिणं हन्तीत्यादौ तु, तादर्थ्ये चतुर्थी (२८४) । "निमित्तात् कर्म्मयोगे" इति वार्त्तिकम् ।

† क्तादिष्टितेन इना योगे क्तेना । अधीतमनेनेति अधीती, अधीतमस्यास्तीति अधीती, अत्र ङेन ङे इति कर्म्मणि सप्तमी । एवं कृती श्रुती इष्टमनेन योगेनेति भट्टिः । क्तादिष्टितेन इना योगे एवायं विधिः, तेन कृतमनेन पूर्व्वमिति कृतपूर्व्वं कटमनेनेति कृतपूर्व्वी, कटं कृतपूर्व्वी, वेदमधीतपूर्व्वी इत्यादौ न स्यात् । किञ्च सुपि कर्म्मण्येवायं विधिः, तेन मासमधीतीत्यादौ न स्यात् । "क्तस्येन्विषयस्य कर्म्मण्युपसंख्यानम्" इति वार्त्तिकम् ।

‡ क्रिययोरन्तः क्रियान्तः (मध्यं), कालश्च अध्वा च तौ कालाध्वानौ, क्रियान्तस्य तौ कालाध्वानौ इति तयोः । जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य वा सजातीयात् पृथक्करणं

## ३१४ । सीमान्तमार्गात् प्री चान्ते ।

(सीमान्तर्-मार्गात् ५।, प्री ।१।, च ।१।, अन्ते ७।) ।

सोमनाथाच्छतं क्रोशाः कृष्णः क्रोशेषु चायुते ।
गङ्गायमुनयोर्मध्ये कति क्रोशाश्च जाह्नवी ॥ *

---

निर्द्धारः । कालः पक्षदण्डमुहूर्त्तप्रहरादिः । अध्वपरिमाणं गव्यूतिक्रोशादिः । निर्द्धारे गम्यमाने, एवम् अधिकशब्देन योगे, तथा क्रियाद्वयमध्यवर्त्तिनि काले अध्वनि च पञ्चमी-सप्तम्यौ स्तामित्यर्थः । उदाहरण—कृपालुषु पार्थेषु श्रेष्ठं, रुद्रैकादशके मूर्त्त्यष्टकाच्च अधिकं शिवं ध्यायन् द्व्यह्नि द्व्यहात् भुङ्क्ते, हे साधो इति शेषः । अत्र निर्द्धारे कृपालुषु पार्थेषु इति सप्तमी-पञ्चम्यौ, (२०२) षष्ठी च भविता । काकात् कोकिलः कृष्णः इत्यादि निर्द्धारणे पञ्चम्येव, न तु षष्ठी-सप्तम्यौ इति वक्तव्यम् । रुद्रैकादशके मूर्त्त्यष्टकात् इति अधिकशब्देन योगे सप्तमी-पञ्चम्यौ । द्व्यह्नि द्व्यहात् इति ध्यानक्रिया-भोजनक्रिययोर्मध्यवर्त्तिनः कालात् सप्तमी-पञ्चम्यौ । अतः भूयः सन् योजनशते योजनशतात् वा पश्येत्, तत्रस्थान् विष्णु पश्येदिति, अत्र भूस्थितिक्रिया-दर्शनक्रिययोर्मध्यवर्त्तिनि अध्वनि योजनशते योजनशतादिति च सप्तमी-पञ्चम्यौ । [एकादशानां समूहः एकादशकं रुद्राणामेकादशकं रुद्रैकादशकं तस्मिन् । अष्टानां समूहोऽष्टकं मूर्त्तीनामष्टकं मूर्त्त्यष्टकं तस्मात् । द्वयोरह्नोर्भवः काल इति तद्धितार्थे द्विगौ द्व्यहः, ततः सप्तमी-विभक्तौ (११८) द्व्यह्नि । यथास्थानस्थ उपचारः सत्त्वस्यात् भुवि तिष्ठतीति भूस्थः ।] पाणिनिः २।३।७, २।३।४१,४२, ५।२।४५ ।

* सीमा अन्तः, स चासौ मार्गश्चेति सीमान्तमार्गस्तस्मात् । मार्गोऽध्वपरिमाणं क्रोश-योजनादिः । सीमाद्वयमध्यवर्त्ति-मार्गपरिमाणवाचकात् शब्दात् अन्ते गम्यमाने प्रथमा, चकारात् सप्तमी च स्यादित्यर्थः । अन्तगम्यमानाभावे तु केवलं प्रथमा स्यादित्यर्थेन वक्तव्यः । सोमनाथात् शतं क्रोशाः कृष्णः, शतक्रोशान्ते वर्त्तते इत्यर्थः ; एवम् अयुते क्रोशेषु च, अयुत-क्रोशान्ते च वर्त्तते इत्यर्थः । अत्र सोमनाथकृष्णयोः सीमयोर्मध्यवर्त्तिमार्गात् शतं क्रोशाः इत्यस्मात् अन्ते गम्यमाने प्रथमा, अयुते क्रोशेषु च इत्यस्मात् सप्तमी च । शतमिति अयुते इति च बहुवचनविशेषणेऽपि अभिधानादेकत्वं, विंशत्याद्याः सदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययो-रित्यमरात् । अन्ते किं—गङ्गायमुनयोर्मध्ये जाह्नवी कति क्रोशाः, कति क्रोशान् व्याप्य तिष्ठतीत्यर्थः, अत्र केवलं प्रथमा । द्वितीयार्थाकरणे अत्र (२८६) द्वितीया भवितुमर्हतीति । हिमालयमारभ्य आ समुद्रात् गङ्गा, यत्र च देवी जह्नुमुनिना पीतोज्झिता अत आरभ्य आ समुद्रात् जाह्नवीति गङ्गाया नामान्तरम् । जाह्नव्या मध्यदेशे यमुना मिलितेति । कार्त्तिकम्)

## ३१५। ष्याद्योऽर्थ्यैक्ये: त्वेसु सर्व्वाः।

(ष्यी-आदयः १॥, अर्थ्यैक्ये: ७।, तु ।१।, सर्व्वाः १॥)।

अर्थ्यार्थेनैकत्वे तं ष्यादयः स्युः, त्वेसु सर्व्वाः।

भुक्त्यार्थेनार्थस्य भुक्तेः किं कार्य्यं नार्थ्यतेऽच्युतः।*

## ३१६। संज्ञाः क। (संज्ञाः १॥, कं ।१)।

ट ध घ भ ज ङ्याः कसंज्ञाः स्युः।†

इति कपादः।

---

* ष्यौ आद्विर्यासां ताः, अर्थो निमित्तं, स एव अर्थोऽभिधेयो यस्य सोऽर्थ्यः, एका (अभिन्ना) स्थितिर्यस्मात् स एकत्वः, अर्थ्येन सह एकत्वः अर्थ्यैकत्वस्तस्मात्। निमित्तार्थ-विशेषस्य विशेषणात् विशेष्यात् तृतीयादयः पञ्च विभक्तयः स्युः, तादृशात् सर्व्वनामस्तु सर्व्वाः प्रथमादयः सुपित्यर्थः। भुक्त्या अर्थेन भुक्तेरर्थस्य अच्युतोऽर्थ्यते पूज्यते, किं कार्य्यं न अर्थ्यते अपि तु सर्व्वमेव कार्य्यम्, अर्जनीरिति शेषः। अत्र निमित्तार्थस्य अर्थशब्दस्य विशेषणात् भुक्त्या इति तृतीया, भुक्तेरिति षष्ठी, एवं भुक्त्यै अर्थाय, भुक्तेरर्थात्, भुक्तौ अर्थे इत्यपि। किं कार्य्यमित्यत्र कार्य्यमित्यस्य निमित्तार्थस्य विशेषणात् किमित्यस्मात् सर्व्वनामः प्रथमा, एवं द्विती-यादिकमपि। एवं हेतुकारणनिमित्तादिशब्दविशेषणादपि—तथाच अन्नस्य हेतोर्वसतु धातु-मित्यादिरिति दृष्टः। पाणिनिः २।३।२६,२७। २।३।२१ सूत्रे “निमित्तकारणहेतुषु सर्व्वासां (विभक्तीनां) प्रायदर्शनम्। प्रायग्रहणादसर्व्वनाम्नः प्रथमाद्वितीये न भवतः।” इति वार्त्तिकञ्च।

† अस्मिन् पादे या या संज्ञा उक्ता सा कसंज्ञा स्यात्। ताः संज्ञाः—ट ध घ भ ज ङ्या इति। कर्मकरणकर्तृसम्प्रदानापादानाधिकरणानामिदमेकं कारकमिति यावत्। “करोति कर्तृत्वादिव्यपदेशानिति कारकम्” इति भाष्यम्। “क्रियानिमित्तं कारकम्” इति दुर्गसिंहः पञ्जिकायाम्। क्रियान्वयित्वं कारकत्वमित्यपि कश्चित्। येनास्य ग्रामनिकटादौ ग्रामादिकमेव कारका-न्वितं स्यात् न तु अध्यातीत्यादिकं, तेन सम्बन्धस्य क्रियानिमित्तत्वाभावात् कारकत्वम्, एवं विशेषणसम्बोधनयोरपि। यद्वै अभिमतीत्यादौ मद्यादिः कर्म्मतया द्वितीयाप्राप्तौ अधिकरण-विवक्षया सप्तमी, विवक्षायत्ताहि कारकाणि भवन्तीति न्यायात्। एवं नद्याः अभिमतीत्यादौ विवक्षया सम्बन्धानीयाः, स्थितेर्मतिविमतीयेति न्यायात्। तेन कोऽन्यथा सामि अध्यातीत्यादि-प्रयोगो न कर्त्तव्य इति साम्प्रदायिकाः। उभयोर्युगपत् प्राप्तौ तु—कर्त्ता कर्म्माधिकरणं करणं सम्प्रदानकम्, अपादानञ्च सर्व्वेषु परं पूर्व्वेण बाध्यते इति वचनात् व्यवस्था। यथा,

यत्र मृगी धावतीत्यादि। एवं क्रमदीश्वरोऽपि—अपादान-सम्प्रदान-करणाधारकर्मणाम्। कर्तुश्चान्योन्यसन्देहे परमेकं प्रवर्तते॥ इति।

अथ वक्तव्यानि सूत्राणि लिख्यन्ते—

१। “जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्” (पाणिनिः १।२।५८)। जातिप्रतिपादक एकोऽपि जातिरूपोऽर्थो बहुवद्वा स्यात्। यथा ब्राह्मणः पूज्यः, ब्राह्मणाः पूज्याः। अत्र असंख्याप्रयोगे इति वक्तव्यम्। यथा पद्मनाभः—“जात्यर्थे चैकस्मिन् बहुवचनमसंख्याप्रयोगे” (कारकप्रकरणे १७ सूत्रम्)। क्रमदीश्वरोऽप्येवम्—“जात्युक्तावसंख्याविशिष्टस्यैकत्वे” (कारकपादे ४८ सूत्रम्)।

२। “अस्मदो द्वयोश्च” (पाणिनिः १।२।५९) अस्मद एकत्वे द्वित्वे च बहुवद्वा स्यात्। यथा अहं ब्रवीमि, आवां ब्रूवः इत्यादौ वयं ब्रूमः। अविशेषणादिति वाच्यम्। यथा पद्मनाभः—“अस्मदो द्वयोश्चाविशेषणात्” (कारकप्रकरणे १८ सूत्रम्)। एवं क्रमदीश्वरः यथा—“अस्मदोऽविशेषणस्य द्वित्वे च” (कारकपादे ४९ सूत्रम्)। यथा कविरहम्।

३। “युष्मदो गुरुविशेषणस्य” (संक्षिप्तसारे कारकपादे ५० सूत्रम्)। “युष्मदो गौरवे” (सुपद्मे कारकप्रकरणे १९ सूत्रम्)। यथा त्वं मे गुरुः, यूयं मे गुरवः। एवमेव जयादित्यः, यथा, “युष्मदि गुरावेकेषाम्” इति।

४। “अन्यत्र च गौरवे” (संक्षिप्तसारे कारकपादे ५१ सूत्रम्)। यथा जीवन्तु तातपादाः।

५। “विंशत्यादिरानवतेर्बहुत्वेऽप्येकवचनम्” (संक्षिप्तसारे कारकपादे ४४ सूत्रम्)। एवं सुपद्मेऽपि “विंशत्यादेरेकत्वमानवतेः” (कारकप्रकरणे १६ सूत्रम्)। यथा विंशतिः पुरुषाः। आनवतौ तु द्वे विंशती मनुष्याणाम्।

६। “दारादेर्नित्यम्” (सुपद्मे कारकप्रकरणे ७२ सूत्रम्)। “आपो दारा वर्षाः सिकता-मतीकस्य इत्यादिरेकत्वेऽपि बहुवचनम्” (संक्षिप्तसारे कारकपादे ४५ सूत्रम्)। “पुंसि, प्रत्ययः” “सुमनोऽप्सरोवर्षादीनां” (पूर्व्वोक्ते ४६,४७ सूत्रे)।

७। “फल्गुनी-प्रोष्ठपदानाञ्च नक्षत्रे” (पाणिनिः १।२।६०)। पूर्व्वफल्गुन्य इत्यत्र द्वित्वे बहुत्वम्। तिष्यपुनर्वस्वोः द्वन्द्वे तु बहुत्वे द्वित्वम् (पाणिनिः १।२।६३)।

**३१७। द्वैक्यं सोऽन्वये।** (द्वैक्यं १।, सः १।, अन्वये ७)।

द्वयोर्बहूनां वा द्वानामैक्यं स-संज्ञं स्यात्। तच्चान्वये सति कार्य्यम्। यथा—वन्द्यौ चरणौ कृष्णस्य इत्यर्थे, कृष्णचरणौ वन्द्यौ इति स्यात्, नतु कृष्णवन्द्यौ चरणाविति। *

**३१८। भिन्नान्यैकार्थद्व्यादिसङ्ख्याव्यादीनां च-ह्र-य-ष-ग-वाः।** (भिन्न—व्यादीनां ६॥, च—वाः १॥)।

भिन्नार्थानां द्वानां स-चसंज्ञः, अन्यार्थानां द्वानां ह्रसंज्ञः,

---

* स्यादीनामर्थान् निरूप्य स्याद्यन्तानामेकपदीकरणार्थमाह—द्वैक्यमिति। द्वश्च द्वश्च तौ द्वौ, द्वश्च द्वश्च द्वश्च तानि द्वानि; द्वौ च द्वानि च तानि द्वानि, द्वानामैक्यं द्वैक्यम्, ऐक्यम् एकता। द्वं पदं, तच्च स्याद्यन्तमेव। तथाच—"नाम्नां समासो युक्तार्थः, तद्धिता नामविभक्तयः" इति सर्व्ववर्म्मा। नाम्नां स्याद्यन्तलिङ्गानामित्यर्थः। "समर्थः पदविधिः" इति पाणिनिः (२।१।१)। "समर्थानां समासः" इति पद्मनाभः। "समासोऽनेकपदस्यैकपदता" इति क्रमदीश्वरवृत्तिः। प्रथमतोऽव्यादौ समासस्तु (५४८) व्यस्त न्यग्वुकारीत्यादि-विधानतरात् भवति। द्वयोः पदयोः बहूनां वा पदानाम् ऐक्यम् एकपदीकरणं ससंज्ञं स्यादित्यर्थः। सः समासः। तच्च ऐक्यम् अन्वये सति कर्त्तव्यमिति। अन्वयः अभिप्रेत-सम्बन्धः, स च क्वचित् विशेष्यरूपेण, क्वचित् विशेषणरूपेण, द्वन्द्वे तु सर्व्वेषां विशेष्यतया साहित्यरूपेण अन्वयः। कृष्णचरणौ इत्यत्र अवयवावयविभावः सम्बन्धः। कृष्णस्य इत्यस्य वन्द्यौ इत्यनेन सम्बन्धाभावात् न कृष्णवन्द्यौ इति समासः। यदा तु कृष्णेन वन्द्यौ कस्यचित् चरणौ इत्यर्थो भवति, तदा कर्त्तृसम्बन्धेन कृष्णवन्द्यौ इति स्यादेव।

किञ्च यत्र प्रतियोगिपद-कारकपद-भिन्नपदापेक्षा वर्त्तते तत्र समासो न स्यात्, यथा—महतः राज्ञो मातङ्गाः इत्यत्र महतः राजमातङ्गा इति न स्यात्। यत्र च प्रतियोगिपद-कारकपदयोरपेक्षा वर्त्तते तत्र स्यादेव, यथा—रामस्य दासभक्तिमान्, कृष्णमाश्रितमनाः, धार्म्मिक भिक्षुदत्त इत्यादिः स्यादेव। देवदत्तः कृतपूर्व्वी कटमित्यत्र कारकपदम्। तथाच—"प्रति-योगिपदादन्यत् यदन्यत् कारकादपि, वृत्तिशब्दैकदेशस्य सम्बन्धेन गम्यते इति, सापेक्षत्वेऽपि गमकत्वात् समास इति, समस्तमाश्रमपदेन निरपेक्षैव संकीर्त्तितमिति च प्राञ्चः। एवञ्च

**एकार्थानां दानां यसंज्ञः, द्व्यादितद्धितपूर्वदानां वसंज्ञः, सङ्ख्या-पूर्वदानां गसंज्ञः, अपूर्वदानां बसंज्ञः, स्यात्। ***

---

नित्योऽनित्यो विकल्पश्च समासः कर्त्तुरिच्छयेति। समासः चतुर्विधः—"पूर्वपदार्थप्रधानो-ऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्वः। इति प्रायो प्रवादः।" "तत्पुरुषविशेषः कर्मधारयः, तद्विशेषो द्विगुः। अनेक-पदत्वं द्वन्द्वबहुव्रीह्योरेव, तत्पुरुषस्य क्वचिदेव।" इति सिद्धान्तकौमुदी। हरिणा तु "सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा। सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥" इति सूत्रे षड्विधमेव समासमाचष्टे। पाणिनिः २।१।१।

* भिन्नश्च अन्यश्च एकश्च ते, ते अर्था येषां तानि भिन्नान्यैकार्थानि। द्वौ (द्वितीया) आदिर्यासां ता द्व्यादयः, तासाञ्च केवलानामसम्भवात् तदन्ता एव गृह्यन्ते। द्व्यादयश्च सङ्ख्या च अथ द्व्यादिसङ्ख्याव्ययानि, तानि आदयो येषां तानि। भिन्नान्यैकार्थानि च द्व्यादिसङ्ख्याव्ययादीनि च तेषाम्। यथ डय गय बय नय मय ते।

संज्ञि-संज्ञानां समसङ्ख्यत्वात् यथासङ्ख्यं दर्शयति भिन्नार्थानामित्यादि। भिन्नार्थानां पृथक्-पृथगभिधेयानां पदानां समासः यसंज्ञः स्यात्। यो द्वन्द्वः। हरिहरावित्यत्र यद्यपि अभेदः शिवरामयोरित्यादिवचनात् वस्तुतः पदार्थयोरभेदेऽपि भेदविवक्षया द्वन्द्वः। अतएव विना-यकौ विघ्नराजद्वैमातुरगणाधिपा इत्यादिप्रयोगः। पदार्थतावच्छेदकभेदादित्यन्ये। पदजन्य-प्रतिपत्तिविषयभेदादिति च केचित्। एवमेव बोपदेवः—"शब्दप्रतिपाद्यसम्बन्धमात्रे एव परस्परापेक्षा कर्त्तव्या" इति। किञ्च द्वन्द्वः सर्वपदार्थप्रधानोऽपि परपदस्यैव लिङ्गं भज-तीति यथा—घटश्च कलशश्च घटकलशौ, कलसश्च घटश्च कलसघटौ, स्त्री च पुमांश्च स्त्रीपुंसौ इत्यादि। सिद्धान्तकौमुद्यां "समुच्चयान्वा-चयेतरेतरयोगसमाहाराश्चार्थाः" इति चत्वारोऽर्थाः दर्शिताः। "परस्परनिरपेक्षस्यानेकस्य एकस्मिन्नन्वयः समुच्चयः, अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः, मिलि-तानामन्वयः इतरेतरयोगः, समूहः समाहारः।" पाणिनिः २।२।२९।

अन्यार्थानां समस्यमानपदात् भिन्नार्थानां पदानां समासः डसंज्ञः, डो बहुव्रीहिः। स-तु सर्वपदार्थाप्रधानः। स च द्विविधः—तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च। यत्र समस्यमानपदार्थः समासवाच्ये वर्त्तते स तद्गुणसंविज्ञानः, यथा लिम्बोदरः शिवः। तदन्यो-ऽतद्गुणसंविज्ञानः, यथा दृष्टसंसारः कृष्णः। अन्यापरौ भेदौ यथा—समानाधिकरणो व्यधिक-रणश्च; पीताम्बर इत्यादौ सामानाधिकरण्यम्, चक्रपाणिरित्यादौ व्यधिकरणत्वम्। पाणिनिः २।२।२३,२४।

एकार्थानां समानाधिकरणानां विशेष्य-विशेषणभावापन्नानामिति यावत् पदानां समासः गसंज्ञः, गः कर्मधारयः। पाणिनिः १।२।४२।

## ३१८ । स्नोर्लुक् त्ये च । (स्नो: ६।, लुक् ।१।, त्ये ७।, च ।१।)।

**से स्थितायाः स्नोर्लुक् स्यात्, त्ये च परे । ***

---

द्वितीयादिविभक्त्यन्तपदपूर्व्वकाणां पदानां समासः षसंज्ञः, षस्तत्पुरुषः, स चोत्तरपदप्रधानः । पाणिनिः २।१।२२ ।

सङ्ख्यापूर्व्वपदानां तद्धितार्थे इत्यादि-वचनमात्रनियमात् तद्धितार्थे समाहारे उत्तरपदे परे च सङ्ख्यावाचकपदपूर्व्वकाणां पदानां समासो गसंज्ञः, गो द्विगुः । तद्धितार्थे उत्तरपदे परे च द्विगुरन्यपदार्थप्रधानः, समाहारद्विगुरुत्तरपदप्रधानः । पाणिनिः २।१।५२ ।

व्यपूर्व्वदानां—यः समीपसामीप्येत्यादि-नियमात् कारकाद्यर्थे अव्ययपदपूर्व्वकाणां पदानां समासो यसंज्ञः, योऽव्ययीभावः, स च पूर्व्वपदप्रधानः । पाणिनिः २।१।५,६ ।

अथ कातन्त्रोक्तं छन्दोबद्धं समासविवरणं प्रदर्श्यते—

पदे तुल्याधिकरणे विज्ञेयः कर्म्मधारयः ।
संख्यापूर्व्वो द्विगुरिति ज्ञेयः, तत्पुरुषावुभौ ॥
विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु ।
समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषः स च ॥
स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि ।
तान्यन्यस्य पदस्यार्थे बहुव्रीहिः—विदिक् तथा ॥
द्वन्द्वः समुच्चयो नाम्नोर्बहूनां वापि यो भवेत् ।
अल्पाक्षरतरं तत्र पूर्व्वं यच्चार्च्चितं द्वयोः ॥
पूर्व्वं वाच्यं भवेद्यस्य सोऽव्ययीभाव इष्यते ।
स नपुंसकलिङ्गं स्यात् द्वन्द्वैकत्वं तथा द्विगोः ॥

* सर्व्वसमासेषु स्थितायाः स्नोः स्यादेः लुक् स्यात्, सर्व्वप्रत्ययेषु परेषु च स्यादेर्लुक् स्यादित्यर्थः । समासे यथा—हरिहरौ, पीताम्बरः, परमात्मा, कृष्णाश्रितः, पञ्चगुः, उपकृष्णम् । प्रत्यये यथा—श्रीमान्, पुत्रकाम्यति, पार्थिवं, क्षत्रियः, माथुरः, हैमः, ग्राम्यम्, इत्यादौ प्रथमादेर्लुक् । किन्तु तपस्यः सार्व्वभौमः इत्यादौ नादेर्नस्य लोपाभावस्तु स्यादिप्रकरणं हित्वा तद्धितप्रकरणे नादेर्नविधानसामर्थ्यात् । स्यादेरिति किं, पचतितरामित्यादौ तिबादेर्न लोपः । लुग्ग्रहणेन, स्लोपेऽपि स्लक्षणमिति न्यायात् प्राप्तस्य विभक्तिनिमित्तकं कार्यं (९१) लुकि न तदिति निषेधान्न स्यादिति, तेन कस्य पुंसः किंपुंसः इत्यादौ (११२) टेरकारो न स्यात्, धातारं नतः धातृनत इत्यादौ (१२८) न वृद्धिः, वज्रं पाणौ यस्येति वज्रपाणि इत्यादौ (१६४) न दीर्घः । विरामे परे विहितस्तु स्यादेव, तेन ब्रह्माच्युतेशा इत्यादौ (११८) नस्य लुप्, पयोनिधार इत्यादौ (१०२) सस्य विसर्गः । किन्तु तथा कृतं तत्कृतमित्यादौ (२१५) एकत्वेऽपि

## द्वन्द्व समासः (च)।

### इतरेतरयोगे च समाहारे च चो द्विधा।

हरिश्च हरश्च हरिहरौ। ब्रह्मा च अच्युतश्च ईशश्च ब्रह्माच्युतेशाः।*

**३२०। पुंवत् स्त्रः।** (पुंवत् ।१।, स्त्रः ६।)।

त्वे स्त्रितायाः स्त्रः पुंवत् स्यात्, त्वे च परे। पूर्व्वपश्चिमे।†

---

मदादेशः स्यादेव, तदयोरर्थस्यापि बहुत्वादित्युक्तेः। युवावादेशौ तु द्विवचने परे एव स्यातां, न तु द्वित्वेऽर्थे इति वक्तव्यम्, तेन युवाभ्यां कृतं (१८० पृष्ठं द्रष्टव्यं) युष्मत्कृतमित्यादि। पाणिनिः २।४।७१।

* चो द्वन्द्वः इतरेतरयोगे च समाहारे च भवन् द्विधा भवति। इतरेतरयोगोऽवयवप्रधानः, तेन अवयवकृते द्वित्वबहुत्वे भवतः। समाहारः संहतिप्रधानः, तेन संहतेरेकत्वादेकवचनमेव इति भेदः। हरिश्च हरश्च इति वाक्ये द्वि-वचनस्य लुकि हरिहर इति समुदायस्य लिङ्गसंज्ञायाम् अवयवद्वयघटितत्वात् द्विवचनम्। राजदन्तिनाविकादौ तु पूर्व्वपदस्य विभक्तेर्लुकि (११८) विरामे परे विहितनकारलोपः स्यात्, परपदस्य विभक्तिलोपेऽपि पुनर्लिङ्गसंज्ञायां विभक्त्युत्पत्तौ विरामविहितं नकारलोपादिकं न स्यादेव। ब्रह्माच्युतेशा इत्यत्र अवयवत्रयघटितत्वात् बहुवचनम्। एवं घटी च घटी च घटाः, अत्र अवयवचतुष्टयघटितत्वात् बहुवचनम्। समस्तपदलिङ्गन्तु परपदस्य यत् तदेव भवतीति।

† पुमानिव पुंवत्, त्वे च इति अनुवर्त्तते। स्त्रिया आत्मनेभाव विभक्तिभिन्नप्रत्ययो बाध्यः, किन्तु विभक्तिस्थाने वहितप्रत्यये कृते तु पुंवत् स्यादेव, यथा सर्व्वस्यां सर्व्वतः इत्यादि। सर्व्वस्यादौ सर्व्वमयवे च परे सर्व्वनामकः पुंवद्भावः स्यादित्यर्थः। अत्र समासेऽनन्तपूर्व्वपदस्यैव स्त्रः पुंवत् स्यात् न तु परपदस्य, अतएव पश्चिमा च पूर्व्वा च पश्चिमपूर्व्वे इत्यत्र पूर्व्वा इति परपदस्य स्त्रः न पुंवद्भावः। न च, (८०) न दीर्घाच्चोऽव्ययेन विसंज्ञानिषेधात् पूर्व्वपश्चिमे इत्यत्र कथं पुंवद्भाव इति वाच्यं, न दीर्घाच्चोऽव्ययेन चद्रसमासे कृते पर विसंज्ञा निषिध्यते, पुंवत् स्त्रेरित्यनेन समासे जातत्वेव पुंवद्भावो विधीयते, तत्त्वविरोधात्। सर्व्वा प्रिया यस्य स सर्व्वप्रियः इत्यादौ अनेन पुंवद्भावः। (३२८) सूत्रोक्तिनियमेन तु।(३२०) पुंवत् स्त्रेरेत्यादिना विहितस्यैव पुंवद्भावस्य निषेधः। एवं सर्व्वाणां पतिः सर्व्वपतिरित्यादि। समासे यथा— सर्व्वामिच्छति सर्व्वकाम्यतीत्यादि। "सर्व्वनाम्नो वृत्तिमात्रे पुंवद्भावः" इति भाष्यम्।

## ३२१। ऋतो ङा तत्पुत्रे सगोत्रविद्ये चे।

(ऋतः ६।, ङा ।१।, तत्पुत्रे ७।, सगोत्रविद्ये अ, चे ७।)।

चे स्थितस्य ऋदन्तस्य ङा स्यात् ऋदन्ते पुत्रे च परे सगोत्रविद्ये। मातापितरौ पितापुत्रौ, होतापोतारौ। *

## ३२२। चगैक्यं क्लीवं। (चगैक्यं १।, क्लीवं १।)।

चस्यैक्यं गस्यैक्यं वा क्लीवं स्यात्। †

## ३२३। चैक्याच्चुदषहोऽः। (चैक्यात् ५।, चुदषहः ५।, अः १।)।

चवर्गान्ताद्दषहान्तात् चैक्यात् अः स्यात्।

---

* स च पुत्रश्च तत्पुत्रं तस्मिन्। तत्शब्देनेह पूर्व्वस्थित-ऋदन्त एवोच्यते। गोत्रञ्च विद्या च ते, समाने गोत्रविद्ये यस्य तत् सगोत्रविद्यं तस्मिन्। द्वन्द्वसमासस्य पूर्व्ववर्त्ति-ऋदन्त-शब्दस्य ङा स्यात् ऋदन्ते पुत्रे च परे, पूर्व्वोत्तरपदयोः समानगोत्रत्वे समानविद्यत्वे च सतीत्यर्थः। मातापितरौ पितापुत्रौ इत्युभयत्र समानगोत्रत्वम्, होतापोतारौ इत्यत्र समान-विद्यत्वम्। ऋदन्ते किं—पितृपितामहौ। सगोत्रविद्यं किं—जामातृपुत्रौ दातृभोक्तारौ इत्यादि। अत्र पुत्रशब्देन पुत्रार्थशब्द उच्यते इति क्रमदीश्वरः, तेन दुहितामातरौ इत्यादि। पूर्व्वपदस्य समानगोत्रत्वे परपदस्य च समानविद्यत्वे न भवति, यथा पितृहोतारौ। किञ्चात्र द्विपदत्वे एव ङा भवति, तेन होता च पोता च यष्टा च ते होतृपोतृयष्टारः इत्यत्र न स्यात्। द्विपदवाक्ये तु स्यादेव, तेन होतापोतारौ च अष्टोद्गातारौ च ते होतापोताअष्टोद्गातारः इति। होतापोतारौ च यष्टा चेति वाक्ये तु होतापोतायष्टारः इति। अत्र मातापितरौ इत्युदाहरता प्रभुना चस्य कौलिकत्वेन पूर्व्वस्थितिरिति सूचितम् (पाणिनिः २।२।३०)। "मातरपितरावुदीचाम्" (६।३।३२) इति पाणिनिसूत्रेण मातापितरौ इत्यस्य रूपान्तरम्। पाणिनिः ६।३।२५।

† चस्य गस्य तौ तयोरैक्यं, चगैक्यञ्च यत्र तत्। ऐक्यं समाहारः। चगयोरेकत्व-क्लीवत्वयोस्तु उपकण्ठं उपकाकि इत्यादौ (२६७) उक्तः। मुखपत्रं इत्यश्वानं रथःखरं तुषखरं दासीसखं स्त्रीसखं गौखराम् (पाणिनिः २।४।२१—२५) इत्यादिकमपि क्लीवलिङ्गं ज्ञातव्यमेवेति ग्रन्थकृत्। पाणिनिः २।४।१,२,१७,१८।

वाक् च त्वक् च इयोः समाहारः वाक्त्वचं, त्वक्स्रजं, शमी-दृषदं, वाक्त्विषं, पीठच्छत्रोपानहं । *

३२४ । ऊर्व्वष्ठीवं पदष्ठीवं धेन्वनडुहौ अहो-रात्रः स्त्रीपुंसौ वाङ्मनसे ऋक्सामे दारगवं अक्षिभ्रुवं इत्यादयः साध्याः ।

(ऊर्व्वष्ठीवं १।, पदष्ठीवं १।, धेन्वनडुहौ १॥, अहोरात्रः १।, स्त्रीपुंसौ १॥, वाङ्मनसे १॥, ऋक्सामे १॥, दारगव १।, अक्षिभ्रुव १।, इत्यादयः १।॥, साध्याः १।॥) । †

इति षः ।

---

* चुष दष मूर्द्धन्य-षष ह पीति चुदषह तस्मात् । समाहारद्वन्द्वं स्थितात् चवर्गान्त-दान्त-षान्त-हान्तात् षः स्यादित्यर्थः । (५२७) षादित इत्यनेन एतद्-ष-प्रत्ययादीनां तद्धितत्वात्, (४११) न टं तसावित्यनेन दान्तत्वनिषेधे वाक्त्वचमित्यादौ विराममाश्रित्य (२११) कुत्वादिकं न स्यात् । एवञ्च समासपादोक्तप्रत्यया अन्त्यपदादेव स्युरिति, तेन त्वक्पयं सखि-पुत्रः इत्यादौ पूर्व्वपदात् न कश्चित् प्रत्ययः । ऐं किं, पञ्चानां वाचां समाहारः पञ्चवाक् इति द्विगौ न स्यात् । ऐक्यमिति किं, प्रावृट्शरदौ इति इतरेतरे न स्यात्, समाहारे तु प्रावृट्शरदमिति स्यादेव । पाणिनिः ५।४।१०६ ।

† ऊर्व्वष्ठीवमित्यादयः साध्याः निपात्या इत्यर्थः । ऊरू च अष्ठीवन्तौ च ऊर्व्वष्ठीवं, पादौ च अष्ठीवन्तौ च पदष्ठीवं, उभयत्र अप्रत्ययः, पादस्य पदादेशश्च । धेनुश्च अनड्वांश्च धेन्वनडुहौ, एतदादिभ्योऽपि अप्रत्ययः । अहश्च रात्रिश्च अहोरात्रः, समाहारेऽपि पुंस्त्वम् । सङ्ख्यापूर्व्वत्वे तु क्लीवत्वं, यथा त्रिरात्रमित्यादि । स्त्री च पुमांश्च स्त्रीपुंसौ । वाक् च मनश्च वाङ्मनसे । ऋक् च साम च ऋक्सामे । दाराश्च गावश्च दारगवम् । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् । इत्यादयः इति आदिशब्देन षट्समासेषु अनुक्तानि उच्यन्ते । तत्र समासान्तरेऽनुक्तं तत्रैव वक्तव्य, द्वन्द्वे अनुक्तानि तु अत्र उच्यन्ते । नक्तन्दिवं रात्रिन्दिवम् अहर्दिवम् ऋग्-यजुषम् ; अग्नीषोमौ सूर्य्याचन्द्रमसौ मित्रावरुणौ—इत्यादिकः प्रयोगानुसारेण इतरेतरयोगः समाहारश्च ज्ञेयः । पाणिनिः ५।४।७७ ।

अत्र समाहारविषयकाणि कतिचित् पाणिनिसूत्राणि लिख्यन्ते—"द्वन्द्वश्च प्राणितूर्य्य-सेनाङ्गानाम्" (२।४।२), यथा पाणिपादं मुखनासिकं, मार्दङ्गिकपाणविकम्, रथिकाश्वारोहम् । "जातिरप्राणिनाम्" (२।४।६), यथा धानाशष्कुलि । "विशिष्टलिङ्गो नदीदेशोऽग्रामाः"

**पीतमम्बरं यस्यासौ पीताम्बरो हरिः। नीलमुज्ज्वलं वपुर्यस्यासौ नीलोज्ज्वलवपुः कृष्णः। ***

---

(२।४।७), यथा गङ्गाशोणं, कुरुकुरुक्षेत्रम्। "क्षुद्रजन्तवः" (२।४।८), यथा दंशमशकम्। आनकुलात् क्षुद्रजन्तवः। "येषाञ्च विरोधः शाश्वतिकः" (२।४।९), यथा, गोव्याघ्रम्। "गवाश्वप्रभृतीनि च" (२।४।११), यथा गवाश्वं, दासीदासं, पुत्रपौत्रं, स्त्रीकुमारं, मूत्रपुरीषं, मांसशोणितमित्यादि। "विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्" (२।४।१२), यथा प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः, रुरुपृषतं रुरुपृषताः, कुशकाशं कुशकाशाः, दधिघृतं दधिघृते, गोमहिषं गोमहिषाः, तित्तिरिकपिञ्जलं तित्तिरिकपिञ्जलाः, अश्ववडवम् अश्ववडवौ (२।४।२७), इत्यादि।

निपातनादेकशेषोऽपि (वृत्तिः) भविता। दिङ्मात्रं यथा—अश्वा च अश्वश्च अश्वौ, हंसी च हंसश्च हंसौ, युवती च युवा च युवानौ (पा. १।२।६७), स्वसा च भ्राता च भ्रातरौ, दुहिता च पुत्रश्च पुत्रौ (पा. १।२।६८), श्वश्रूश्च श्वशुरश्च श्वशुरौ (पा. १।२।७१), माता च पिता च पितरौ (पा. १।२।७०), जाया च पतिश्च दम्पती जम्पती च। रामश्च रामश्च रामौ, रामश्च रामश्च रामश्च रामाः (पा. १।२।६४) इत्यादि। [अत्र वक्तव्यम्—एकशेषस्य पदनिमित्तकत्वाभावे समासत्वं नास्ति, अतः कृत्तद्धितसमासैकशेषेत्यादिवृत्तिभेदवचने पृथङ्निर्देशः कृतः। पद-निमित्तक-द्वन्द्व-बाधकोऽयमित्येके।" इति सिद्धान्तकौमुदी। तत्र सर्व्व-समास-शेष-प्रकरणं द्रष्टव्यम्।]

* पीताम्बर इत्यत्र समस्यमानाभ्यां 'पीतम्' 'अम्बरम्' इति पदाभ्याम् अन्यो हरिर्बुध्यते, एवं त्रिपदबहुव्रीहौ नीलोज्ज्वलवपुरित्यत्र समस्यमानेभ्यो 'नीलम्' 'उज्ज्वलं' 'वपुः' इति पदेभ्योऽन्यः कृष्णो बुध्यते। एवं चतुःपदबहुव्रीहिरपि, यथा आरूढा बहवो वानरा यं स आरूढबहुवानरो वृक्षः इत्यादि। प्रायशः समानाधिकरणानां पदानाम् अन्यार्थत्वे बहुव्रीहिः स्यादिति बोध्यम्। (२२२) यस्य नाना वर्त्तते सोऽसौ सनाटकः इति उदाहरता ग्रन्थकारेण तु कदाचित् भिन्नाधिकरणानां पदानामपि बहुव्रीहिः स्यादिति सूचितम्, अतएव धर्म्मे रुचिर्यस्यासौ धर्म्मरुचिरित्यादि। (सिद्धान्तकौमुद्यान्तु पा. २।२।२४ इति सूत्रव्याख्याने "व्यधिकरणानामपि न, पञ्चभिर्भुक्तमस्य"। इति उक्त्वा २।२।३५ सूत्रव्याख्याने "कण्ठेकालः अतएव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः" इत्युक्तम्। एवमेव गोयीचन्द्रः।) अपि च पीताम्बरमित्युदाहरता विशेषणविशेष्ययोः समासे विशेषणमेव पूर्व्वं स्यादिति सूचितं, तेन पीताम्बर इत्यत्र अम्बरपीत इति न स्यात्। (२६८) खड्गभिन्नेत्यादि उदाहरता क्वचित् सान्तविशेषणं परमपि स्यादिति सूचितं, तेन अग्न्याहितः आहिताग्निः (वाहिताग्न्यादिषु २।२।३७) इत्यादि। वस्तुतः पूर्व्वपदोत्तरपदव्यवस्था प्रयोगानुसारेण ज्ञेया। द्वितीयादिविभक्त्यन्तान्यपदार्थो बहुव्रीहिरिति आचार्य्यैर्मन्यते यथा—आरूढो वानरो यं स आरूढवानरो वृक्षः। जितः कामो येन स

(१०७) पूर्वोऽदान्ते न इति हरिभाविणी हरिभाविनी, श्रीभावेण श्रीभावेन। रम्यविणा श्रीकामेण। रम्यपक्वेन रम्ययूना रम्याह्ना।*

३२५। नञोऽनौ वाज्झसोः।

(नञः ६।, अनौ १॥, वा ।१।, अच्झसोः ७॥)।

नञोऽचि परे अन् झसे च अः स्यात् से वा।

नास्त्यन्तो यस्यासौ अनन्तः नान्तः। अच्युतः नच्युतः।†

---

जितकामस्तपस्वी। उपनीतं भोजनं यस्मै स उपनीतभोजनोऽतिथिः। निर्गतो जनो यस्मात् स निर्गतजनो देशः। पीताम्बर इति षष्ठ्यन्यपदार्थः। उषितो विहगो यस्मिन् स उषितविहगो वृक्ष इत्यादि। "प्रथमार्थे तु न, यथा वृष्टे देवे गतः" इति सिद्धान्तकौमुदी। स्वमते तु प्रथमान्यपदार्थोऽपि, यथा समागत इत्यादि।

* हरिं भावयितुं शीलमस्याः इति भूण् धातोर्णिजन्तात् (९९२) णिन् कृते, (६४१) ईपि, (२५०) नान्तत्वादीपि, समासोत्तरविहितेन ईपा सहितस्य नस्य (१०७) वा णत्वम्। अथ, (२६६) धातु प्रीतादिति ज्ञापकात् प्रागुत्पत्तेः प्रागपि कारकाणां समासः, तथाच प्रति कारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेरिति भाष्यम्। श्रियो भावो यस्यासौ श्रीभावः तेन श्रीभावेण श्रीभावेन, अत्र समासोत्तरविहितत्वादिसम्बन्धिनो नस्य वा णत्वम्। उभयत्र एकाच्कवर्गयुक्तशब्दसम्बन्धिभिन्नत्वात् विकल्पः। रम्यो विः पक्षी यस्य तेन रम्यविणा, श्रियः कामो यस्य तेन श्रीकामेण, उभयत्र एकाच्कवर्गयुक्तशब्दसम्बन्धित्वात् नित्यं णत्वम्। रम्यं पक्वं यस्मिन् तेन रम्यपक्वेन, रम्यो युवा यस्मिन् तेन रम्ययूना, रम्यम् अहर्यस्मिन् तेन रम्याह्ना, एतेषु पक्वयुवाहर्वर्जनात् न णत्वम्।

† अन् च अश्च अनौ। अच् च झस् च अज्झसौ तयोः। समासे स्थितस्य नञः स्थाने अचि परे अन् झसि च अः स्यात् वा। नास्ति अन्त इति अनन्तो नान्तः। नास्ति च्युतं च्यावो यस्य सः अच्युतः नच्युतः। च्युतमिति च्युधातोर्भावे क्तः। च्युतधातोः कर्तरि (२९६) क्तप्रत्यये च्युतो नश्वर इति केचित्, तन्मते न च्युतोऽच्युतः च्युतभिन्न इत्यर्थः। तथाच—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥ इति प्राञ्चः।

उदाहरणं यथा—न ब्राह्मणोऽब्राह्मणः ब्राह्मणसदृश इत्यर्थः। पापस्याभावोऽपापम्। न पटोऽपटः पटभिन्न इत्यर्थः। अनुदरी कृशोदरीत्यर्थः। अकेशी अप्रशस्तकेशीत्यर्थः। असुरः सुरविरोधीत्यर्थः। पाणिनिः ६।३।७३,७४। "[illegible]" इति पाणिनि-

**३२६। महत्तैकार्थे जातीयघासकरविशिष्टे तु तौ च।** (महत् ।६।, त ।१।, आ ।१।, एकार्थे ७।, जातीय—विशिष्टे ७।, तु ।१।, तौ ।१।, च ।१।)।

**महतस्त आ स्यात् एकार्थे, जातीयादौ तु तौ च।**

**महाबलः। ***

**३२७। पुंवत् स्त्र्युक्तपुंस्कः स्त्रियां ङ्यमानि-तत्वघसन्ततरादौ चारूप्ये।** (पुंवत् ।१।, स्त्री ।१।, उक्तपुंस्कः १।, स्त्रियां ७।, ङ्य—तरादौ ७।, च ।१।, अरूप्ये ७)।

---

सूत्रे (६।३।७७) प्राणिभिन्नेषु नञ् वा स्यात्, यथा नगाः अगाः पर्व्वताः। प्राणिषु तु, अगो-वृषलः शीतेन।

अत्र नाशब्दस्य व्यवस्थावाचित्वात् नाकादिषु नादेशो न स्यात् यथा—

नाको नवेदा नकुलश्च नक्रो नासत्य-नक्षत्र-नपाच्च नभ्राट्।

नपुंसकं वै नमुचिर्नखश्च नादेशमेतेषु वदन्ति धीराः॥ इति पाणिनिः ६।३।७५।

एषामर्थाः—न अकम् (दुःखम्) अस्मिन्निति नाकः। न वेत्तीति नवेदाः असुन्प्रत्ययान्तः। न कुलमस्येति नकुलः। न क्रामतीति नक्रः, कुम्भीरः। न सत्यः असत्यः, न असत्यः नासत्यः। न क्षरतीति नक्षत्रम्, क्षीयतेः क्षरतेर्वा क्षत्रमिति निपातः। न पातीति नपात् शतृप्रत्ययान्तः। न भ्राजते इति नभ्राट् क्विबन्तः। न स्त्री पुमान् नपुंसकं, स्त्री-पुंसयोः पुंसकभावो निपातनात्। न मुञ्चतीति नमुचिः। न खमाकाशमस्येति नखम्।

* एकोऽर्थो यस्य स एकार्थस्तस्मिन्। जातीयश्च घासश्च करश्च विशिष्टश्च समाहारे तस्मिन्। महत्शब्दस्य तकारस्य आकारः स्यात् एकार्थे विशेष्यशब्दे परे, जातीयादौ परे तु महत्शब्दस्य (स्त्रीलिङ्गे) तीकारस्य आकारः स्यादित्यर्थः। जातीय इति (४८०) प्रत्ययः, घास कर विशिष्ट इति शब्दाः। महत् बलं यस्यासौ महाबलः। एवं महती कीर्त्तिर्यस्यासौ महाकीर्त्तिः। विशेष्यशब्दपरत्वं कर्म्मधारयेऽपि सम्भवति। तेन महांश्चासौ देवश्चेति महादेवः, महती चासौ कीर्त्तिश्चेति—महाकीर्त्तिरिति। एकार्थे किं, [illegible], महतः पुत्रः महत्पुत्र इत्यादौ न स्यात्। जातीयादौ तु महतो महत्या वा प्रकारः इत्यर्थे (४८०) महाजातीयः। महतो महत्या वा घासो महाघासः। महतो महत्या वा करो महाकरः। महतो महत्या वा विशिष्टः महाविशिष्टः। अमहान् महान् भूतः महद्भूतश्चन्द्रः, अमहती महती भूता महद्भूता ब्राह्मणी, इत्यादावभूततद्भावे न आत्वमिति वक्तव्यम्। पाणिनिः ६।३।४६, वार्त्तिकञ्च।

उक्तपुंस्कः स्त्रीलिङ्गः पुंवत् स्यात् एकार्थे स्त्रीलिङ्गे, ज्यादौ च, न तु रूप्ये । *

## ३२८ । नोङाककोङ्कूरण्याख्यायुक्तविकारार्थणित्त्वं जातिस्वाङ्गेप् त्वमानिनि ।

(न ।१।, ङप्—णित्त्वं १।, जातिस्वाङ्गेप् ।१।, तु ।१।, त्वमानिनि ७।) ।

---

* पुमानिव पुंवत् । उक्तः पुमान् येन स उक्तपुंस्कः, एकस्मिन्नर्थे यः स्त्रीपुंसयोर्वर्त्तते स उक्तपुंस्क इति यावत् । "भाषितः पुमान् येन समानायामाकृतावेकस्मिन् प्रवृत्तिनिमित्ते भाषितपुंस्कः शब्दः । तदेतदेव कथं भवति । भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते । तस्य प्रतिपादको यः शब्दः सोऽपि भाषितपुंस्कः ।" इति काशिका । प्रत् अन्ते यस्य स प्रसन्तः, तर आदिर्यस्य स तरादिः, प्रसन्तश्चासौ तरादिश्चेति प्रसन्ततरादिः । ज्याच मानिन् च तच त्वच प्रसन्ततरादिच तत् तस्मिन् । न रूप्येऽरूप्य-स्तस्मिन् । एकार्थे इत्यनुवर्त्तते । उक्तपुंस्कः स्त्रीलिङ्गशब्दः पुंवत् स्यात् विशेष्यस्त्रीलिङ्गशब्दे परे, ज्यादौ च परे, न तु रूप्ये इत्यर्थः । यथा—सुन्दरी भार्य्या यस्य स सुन्दरभार्य्यः, एवं सुन्दरी चासौ भार्य्या चेति सुन्दरभार्य्या । ज्यादौ तु सुन्दरीवाचरति (८४८) सुन्दरायते । आत्मानं सुन्दरीं मन्यते या सा (९९१) सुन्दरमानिनी । सुन्दर्य्या भावः (४२८) सुन्दरता सुन्दरत्वम् । प्रसन्ततरादिस्तु (४६२—४८१)—तरतमश्च रूपश्च चतरां चतमां तथा । कल्पस् कल्पन्देश्यो देशीय इत्यपि । बहुः प्राक्चरी रूप्यप्रसन् चैते तरादय इति ॥ यथा—(४६२) द्वयमनयोरतिशयेन शुभ्रा शुभ्रतरा, द्वयमासामतिशयेन शुभ्रा शुभ्रतमा । (४६४) अतिशयेन शुभ्रा शुभ्ररूपा । (४६५) अनयोरतिशयेन का किन्तराम्, आसामतिशयेन का किन्तमाम् । (४६६) अतिशयेन लघ्वी लघिष्ठा लघीयसी । (४७५) लघ्व्या भावो लघिमा । (४७७) ईषदूना शुभ्रा शुभ्रकल्पा शुभ्रदेश्या शुभ्रदेशीया । (४७८) ईषदूना शुभ्रा बहुशुभ्रा । अत्र बहोः परस्मिन्नसम्भवात् न पुंवद्भावः । बहोश्च प्रसन्ततरादावुपन्यासस्तु वक्ष्यमाणतद्धितप्रकरणे प्रसन्ततरादिविधायकसूत्रवर्गमध्यपातानुरोधात् । (४७९) कुत्सिता शुभ्रा शुभ्रपाशा । (४८०) भूतपूर्व्वा शुभ्रा शुभ्रचरी । (४८१) शुभ्राया भूतपूर्व्वो गौः शुभ्रारूप्यः, अत्र रूप्यवर्जनात् न पुंवत् । (४८२) बह्वोर्द्दिक्षु बहुशो दिक्षु इति । उक्तपुंस्कः किं, गङ्गाभार्य्यः । तस्याः, तस्ये, तस्यां, तत्र, तदा, तर्हि इत्यादौ तु (३२०) पुंवत् कौरिति पुंवत् । हस्तिनीनां समूहः हास्तिकं, अग्नायी देवता अस्य आग्नेयः, कुक्कुट्या अण्डं कुक्कुटाण्डं, मृग्याः क्षीरं मृगक्षीरं, मृग्याः पदं मृगपदं, काक्याः शावकः काकशावकः इत्यादौ च पुंवद्भावो वक्तव्यः । पाणिनिः ६।३।३४, ३५,३६,४२,६४, ङ्ये परे तु विभाषा ; वार्त्तिकानि च ।

ऊबन्तं, तद्धितस्य वा केन ककारोङ्, पूरणीत्यान्तं, संज्ञाभूतम्, इम्-उम्-रक्तार्थ-विकारार्थ-वर्जं चित्तान्तञ्च पुंवन्न स्यात्, जाति-स्वाङ्गविहितेबन्तञ्च मानिन्वर्जं। *

**३२९। पूरणी प्रिया मनोज्ञा सुभगा दुर्भगा क्षान्ता कान्ता वामना वामा चपला बाला समा सचिवा तनया दुहिता स्वा कल्याणी भक्तौ।**

(पूरणी—भक्तौ ७)।

एषु परेषु पुंवन्न स्यात्। †

---

* तश्च चश्च तचौ, तयोः कः तचकः, स ऊङ् यस्य स तचकोङ्। इश्च उश्च यू ताभ्यां म् युम्, (४१०) (मकारस्य प्रत्येकसम्बन्धेन इम् उम् इत्यर्थः), रक्तश्च विकारश्च तौ रक्तविकारौ, तौ अर्थौ येषां ते रक्तविकारार्थाः, युम् च रक्तविकारार्थाश्च ते, न विद्यन्ते ते यत्र सोऽयुमरक्तविकारार्थः, मूर्द्धन्य च ष् यस्य स चित्, चित्वासौ तश्चेति चित्तः, अयुमरक्त-विकारार्थश्चासौ चित्तश्चेति अयुमरक्तविकारार्थचित्तः। पश्चात् ऊप् च तचकोङ् च पूरणी च आख्या च अयुमरक्तविकारार्थचित्तश्च समाहारे तत्। जातिश्च स्वाङ्गञ्च जातिस्वाङ्गे, ताभ्यामीप् जातिस्वाङ्गेप्। न मानिन् अमानिन् तस्मिन्। ऊबन्तं पदं, तद्धितस्य केन चकप्रत्ययस्य वा केन ककारोङ् पदं, द्वितीयादिपूरणीप्रत्ययान्तं पदं, दत्ताभद्रादि संज्ञारूपं पदम्, इम्-उम्-रक्तार्थ-विकारार्थ-वर्ज-चकारेत्-तद्धितप्रत्ययान्तं पदञ्च पुंवन्न स्यात्। जातिविहितेबन्तं स्वाङ्ग-विहितेबन्तञ्च मानिन्वर्जे अन्ये परे पुंवन्न स्यादित्यर्थः। पाणिनिः ६।३।३९—४१।

† पूरणी पञ्चादि पदे सप्तमी। पूरणीति पूरणीप्रत्ययान्तः स्त्रीलिङ्गशब्दः द्वितीयादिः। एषु पञ्चदशसु परेषु पुंवत् न स्यादित्यर्थः। अत्र केचित् वामातनययोः स्थाने समातनयौ, क्षा इत्यत्र क्षमा इति, वामा इत्यत्र अबला इति च आहुः, वामा-वामा-शब्दौ च आहुः। जातिवाचकत्वात् भार्या इत्यधिकं दृश्यते। भक्तिशब्दस्य कर्मविहितक्तिप्रत्ययान्तो भज्यमान-द्रव्यवाची स्त्रीशब्दः, भाववाचिनि तु पुंवद् स्यादेव। अतएव मेघदूते दृढभक्तिर्भवान्या इति, रघौ च भवति विरलभक्तिर्मानपुष्पोपहारः इति दृढभक्तिरिति ज्येष्ठे इति च, भाववाचित्वात् पुंवद्भावः। "स्त्रीत्वविवक्षायान्तु दृढाभक्तिः" इति सिद्धान्तकौमुदी। प्रसूततनया इति तु प्रसूतं तनयया यया इति व्यधिकरणबहुव्रीहिः। पाणिनिः ६।३।३४।

३३०। गवाबादेः स्त्रोऽन्ते गौण्येऽनीयसः।

(गवाबादेः ६।, स्त्रः १।, अन्ते ७, गौण्ये ७, अनीयसः ५।)।

अन्ते स्थितस्य गोः आप ईप ऊयश्च स्त्रः स्यात् अप्रधानत्वे सति, नत्वीयसः।

शीतगुः अल्पमायः कान्ततनुः। ईयसस्तु बहुप्रेयसी।*

जयादेस्तु (२२८)—वामोरूभार्य्यः रसिकाभार्य्यः पाचिका-भार्य्यः षष्ठीजायः दत्ताजायः मैथिलीभार्य्यः। ब्राह्मणीभार्य्यः सुकेशीभार्य्यः। अमानिनि किं—ब्राह्मणमानिनी। गुणादेस्तु वैयाकरणभार्य्यः सौवश्वभार्य्यः काषायकन्यः हैममुद्रिकः।†

---

* आप् आदिर्यस्य स आबादिः, गौश्च आबादिश्च तयोः। गुणस्य भावो गौण्यं तस्मिन्। न ईयस् अनीयस् तस्मात्। ईयसः परस्य ईपः स्त्रो न स्यादित्यर्थः, एष निषेधः बहुव्रीहावेव, (ईयसो बहुव्रीहौ नेति वाच्यमिति वार्त्तिकम्) तेन प्रेयसीमतिक्रान्तः अतिप्रेयसिः पुमान् इत्यादि। अर्द्धं पिप्पल्याः अर्द्धपिप्पली, एवं अर्द्धखारी अर्द्धनगरी इत्यादिषु स्त्रनिषेधो वक्तव्यः। अत्र आबादिशीत्वानां ग्रहणात् न [illegible] ह्रस्वः, तेन अतिनौः, अतिश्रीरित्यादि। पुंवद्भावस्य विधिनिषेधौ निरूप्य उदाहरति शीतगुरित्यादि। शीता शीतला गौः किरणो यस्यासौ शीतगुश्चन्द्रः, अल्पा माया यस्य स अल्पमायः, उभयत्र पूर्वस्य पुंवद्भावः, परस्य ह्रस्वः। ईदन्तं बहुव्रीहौ (२२२) इत्यनेन [illegible]। कान्ता तनुर्यस्यासौ कान्ततनुः, पूर्वस्य पुंवत्, परस्य ह्रस्वः। एवम् अन्यत्रापि गौण्ये [illegible] अतिलक्ष्मीरित्यादि। बह्व्यः प्रेयस्यो यस्य स बहुप्रेयसी पुमान्, पूर्वस्य पुंवद्भावः, परस्य ईयसो वर्जनात् न ह्रस्वः, (१४८) ईपः [illegible]। [illegible] न (२२२) [illegible], (अत्र पाणिनिसूत्रं यथा "ईयसश्च" ५।४।१५६)। अत्र ह्रस्वनिषेधात् सुमेधसो [illegible] (१६०) [illegible] ह्रस्वो न स्यादिति। एवं [illegible]। अत्र [illegible], यथा, [illegible]; एवं [illegible]। अपरे तु [illegible]; [illegible]। कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत्, यथा [illegible]। पाणिनिः ५।४।१५६, वार्त्तिकञ्च।

† वामौ सुन्दरौ ऊरू यस्याः सा वामोरूः (१०८), वामोरूः भार्या यस्य सः। रसं वेत्तीति रसिका (७२९), रसिका भार्या यस्य सः। पचतीति (९९०) पाचिका, पाचिका

पूरण्यादौ तु (२२८)—*

## २२१ । हे पूरणीप्रमाणीभ्यामप् ।

(हे ७।, पूरणी-प्रमाणीभ्यां ५।।, अप् १।) ।

आभ्याम् अप् स्याद् हे ।

(२५८) यस्येतिलोपोऽयुक्तो यो । कल्याणीपञ्चमा रात्रयः, कल्याणीप्रियः । मुख्या च पूरणी ग्राह्या, तेन—†

---

भार्या यस्य सः । षण्णां पूरणी (४५५) षष्ठी, षष्ठी जाया यस्य सः । दत्ता (इति संज्ञा) जाया यस्य सः । मिथिलायां भवा मैथिली (४२८), मैथिली भार्या यस्य सः । एषु पूर्वपदानाम् ऊङन्तादीनां पुंवद्भावनिषेधः । ब्राह्मणी (२६२) भार्या यस्य सः ब्राह्मणीभार्यः, सुकेशी (२६५) भार्या यस्य सः सुकेशीभार्यः, उभयत्र जाति-स्वाङ्गविहितेकन्तं न पुंवत् । आत्मानं ब्राह्मणीं मन्यते या सा ब्राह्मणमानिनी, मन्यतेः (९९२,२५०) णिन्, ङीप् च । अत्र मानिनि परे पुंवद्भावः । व्याकरणं वेत्ति अधीते वा या सा (४२८,४१७) वैयाकरणी, सा भार्या यस्य सः । सु सुन्दरः स्वरो यस्य सः स्वरः, सुस्वरस्येयं (४१७,४१०) सौस्वरी, सा भार्या यस्य सः । काषायेण रक्ता काषायी (४९८), काषायी कन्था यस्य सः । हेम्नो विकारः (४५०) हैमी, सा मुद्रिका यस्य सः । एतेषु इक्-छ-रक्त-विकारार्थकवर्जनात् पुंवद्भावः । सर्वत्र परपदानां क्रमः । (६।३।४३) पाणिनिसूत्रेण ब्राह्मणिकल्पा, ब्राह्मणिब्रुवा, ब्राह्मणिचेलता इत्यादौ ङीषन्तस्यानेकाचो ह्रस्वः इति वक्तव्यम् ।

* पूरण्यादौ परे (२२८) उदाहरिष्यते तत्रैव ।

† पूरणी द्वितीयादिः । प्रमीयतेऽनया इति प्रमाणी । पूरणी च प्रमाणी च ताभ्याम् । पूरणीवाचकात् प्रमाणीशब्दाच्च अप् स्यात् बहुव्रीहौ इत्यर्थः । पञ्चानां पूरणी पञ्चमी (४५१) । कल्याणी प्रशस्ता पञ्चमी रात्रिर्यासु रात्रिषु ता रात्रयः कल्याणीपञ्चमाः, अत्र पञ्चमीशब्दे परे (२२८) पुंवद्भावो माभूत्, पञ्चमीशब्दादनेन अप्प्रत्यये यस्येति च इति ईलोपे, (२४९) टाप् । कल्याणी प्रिया यस्य सः कल्याणीप्रियः, (२२८,२२०) । एवं कल्याणीप्रियोऽयम् इत्यादि । मुख्या चेति अत्र पूरणीपरे पुंवद्भावनिषेधे पूरणीपरात् अप्प्रत्यये च तत्रैव मुख्या पूरणी ग्राह्या । मुख्यत्वञ्च समासवाच्यानामसाधारणधर्मवत्त्वम् । कल्याणीपञ्चमा इत्यत्र समासवाच्यानां रात्रीणां योऽसाधारणधर्मः रात्रित्वं तत्र तासु रात्रिषु पञ्चमी

३३२। द्यृतः कः। (दी-ऋतः ५।, कः १।)।

दीसंज्ञकादृदन्ताच्च कः स्यात् हे। कल्याणपञ्चमीकः पक्षः। रात्रिः पूरणी वाच्या चेति पूर्व्वस्य मुख्यत्वम्। स्त्रीप्रमाणः। *

३३३। सहः सो वा। (सहः ६।, सः १।, वा ।१।)।

सहस्य हे सः स्याद्वा।

सह मात्रा वर्त्तते योऽसौ समात्रकः सहमात्रकः। †

३३४। सक्थ्यक्ष्णः षः स्वाङ्गे।

(सक्थ्यक्ष्णः ५।, षः १।, स्वाङ्गे ७।)।

आभ्यां हे षः स्यात् स्वाङ्गे। दीर्घसक्थः, पुण्डरीकवदक्षिणी

---

रात्रावपि वर्त्तते, अतो मुख्यत्वम्। तेन इह परसूत्रोदाहरणे कल्याणपञ्चमीकः पक्षः इत्यत्र, न पुंवद्भावनिषेधः, नापि अप्रत्ययः, इत्यनेन सम्बन्धः। पाणिनिः ५।४।११६।

* दी च ऋत् च दृत् तस्मात्। (८६) नदीसंज्ञकशब्दात् ऋदन्तशब्दाच्च बहुव्रीहौ कप्रत्ययः स्यादित्यर्थः। इति सूत्रस्यार्थमात्रम्, अन्येभ्योऽपि उरःप्रभृतिभ्यः शब्देभ्यो बहुव्रीहौ प्रयोगानुसारेण कप्रत्ययो वक्तव्यः (पाणिनिः ५।४।१५१ नित्यं, ५।४।१५४ वा)। कल्याणी पञ्चमी यस्मिन् पक्षे, सः कल्याणपञ्चमीकः पक्षः, अत्र समासवाच्यस्य अन्यपदार्थस्य पक्षत्वं, तत्तु पञ्चम्यां रात्रौ न वर्त्तते, अतो मुख्यत्वाभावात् न पुंवद्भावनिषेधः (२२८), नापि अप्रत्ययः (२३१)। कल्याणीत्यत्र (२२०) पुंवद्भावे, पञ्चमीत्वस्यात् नदीसंज्ञकादनेन कप्रत्ययः। रात्रिः पूरणी वाच्या चेति पूर्व्वस्य कल्याणीपञ्चमा रात्रयः इत्युदाहरणे रात्रिः समासवाच्योऽन्यपदार्थः, पूरणीवाच्या पञ्चमीवाच्या चेत्यर्थः, अतः पञ्चमीशब्दस्य मुख्यत्वमिति। स्त्री प्रमाणी यस्य सः स्त्रीप्रमाणः, स्त्रीशब्दस्य अनूङ्पुंस्कत्वात् न (२२०) पुंवद्भावः, प्रमाणीशब्दात् (२३१) अप्रत्ययः। पाणिनिः ५।४।१५१।

† समात्रक इति (३३२) कः, अनेन वा सहस्थाने सः। केचित्तु मात्रा सहितः समात्रक इति वाक्यं कृत्वा तृतीयातत्पुरुषं वदन्ति। एवं सह समानम् उदरं यस्य सः सोदरः सहोदर इत्यादि। हे किं, सहकृत्वा, सहयुध्वा। वाधिः साक्षम् साकल्यं सपक्षाणां सपिण्डाच्यम् इत्यादि नित्यं वक्तव्यमिति। पाणिनिः ६।३।८२।

यस्याक्षी पुण्डरीकाक्षः । स्वाङ्गे किं, दीर्घसक्थि शकटं । *

२२५ । दारुण्यङ्गुलेः । (दारुणि ७।, अङ्गुलेः ५।) ।

पञ्चाङ्गुलं दारु । †

२२६ । द्वित्रेर्मूर्द्ध्नः । (द्वित्रेः ५।, मूर्द्ध्नः ५।) । ‡

२२७ । म्वोर्लोपौतौ तेऽच्ये ।

(म्वोः ६॥, लोपौतौ १॥, ते ७।, अच्ये ७।) ।

मस्य लोपः स्यात् उवर्णस्य ओत् स्यादचि ये च ते । द्विमूर्द्धः । §

---

* सक्थि च अक्षि च तत् सक्थ्यक्षि तस्मात् । स्वस्य आत्मनः अङ्गं स्वाङ्गं तस्मिन् । स्वाङ्गलक्षणमुक्तम् (२६५) । स्वाङ्गवाचिभ्यामाभ्यामित्यर्थः । ष-प्रत्ययस्य ष इत् (२५०) ईदर्थः, अकारस्थितिः । दीर्घे सक्थिनी (ऊरू) यस्य सः दीर्घसक्थः । पुण्डरीकवदिति, पुण्डरीकं सिताम्भोजं तदिव चक्षुर्न सम्भवति, अतो लक्षणया तत्तुल्यम् अर्थः, अतएव वाक्ये पुण्डरीकवदित्युक्तम्, एवं व्याघ्रपात् (२५८) इति स्वयं विचार्यताम् । उभयत्र उदाहरणे अनेन षप्रत्यये, (२५८) इकारलोपः । षित्वात् स्त्रियां दीर्घसक्थी, सरोजाक्षी । दीर्घसक्थि इति शकटस्य प्राणित्वाभावादिति भावः । एवं स्थूलाक्षिरिक्षुः । ईः किं, (कर्मधारये) परमसक्थि, परमाक्षि । पाणिनिः ५।४।११३ ।

† अङ्गुलिशब्दात् षः स्यात् ई, दारुणि वाच्ये । दारु काष्ठम् । पञ्च अङ्गुलयो यस्य तत् पञ्चाङ्गुलं दारु ; "पञ्चाङ्गुलयो यस्मिन् तत् पञ्चाङ्गुलं दारु अङ्गुलिसदृशावयवं धान्यानां विक्षेपणकाष्ठमुच्यते" इति बोधोपन्यः । स्त्रियान्तु षित्वादीपि पञ्चाङ्गुली समित् । दारुणि किं, पञ्चाङ्गुलिर्हस्तः । एवं पञ्चाङ्गुला स्त्रिया, इत्यत्र (२६७) सङ्ख्याव्यादिति अप्रत्यये, स्त्रियाम् आप् । पाणिनिः ५।४।११४ ।

‡ द्विश्च त्रिश्च तत् तस्मात् । द्वित्रिभ्यां परात् मूर्द्ध्नः षः स्यात् ई । पाणिनिः ५।४।११५ ।

§ म च उश्च म्वू तयोः । लोपश्च ओत् च लोपौतौ । अच् च यश्च अच्यं तस्मिन्, ते इत्यस्य विशेषणम् । द्वौ मूर्द्धानौ यस्य सः द्विमूर्द्धः, (२२६) षप्रत्यये, अनेन मलोपे, (२५८) अलोपः । एवं त्रयो मूर्द्धानो यस्य स त्रिमूर्द्धः । स्त्रियां द्विमूर्द्धी त्रिमूर्द्धी राक्षसी । द्वित्रेः किं, बहुमूर्द्धा । (४११) न ङं तसावित्यनेन दामन्ननिषेधात् (११८) नो लुप् ङ्यभावविकल्पाभावो अलोपार्थमिदम् । ओत् यथा—भाऊचिः, भाजव्यम् इत्यादि । क्वचित् न स्यात् यथा—आयसुवं धाम । पाणिनिः ६।४।१४४,१४६ ।

### ३३८। सङ्ख्याया डोऽबहोः।

(सङ्ख्यायाः ५।, डः १।, अबहोः ५।)।

बहुवर्जायाः सङ्ख्याया डः स्यात् हे। पञ्च षट् परिमाणं येषां ते पञ्चषाः, उपगताः दश येषां ते उपदशाः। बहोस्तु उपबहवः।*

### ३३९। नाभेर्नाम्नि। (नाभेः ५।, नाम्नि ७।)।

पद्मनाभः।†

### ३४०। लोम्नोऽन्तर्बहिर्भ्यां।

(लोम्नः ५।, अन्तर्-बहिर्भ्यां ५।)।

अन्तर्लोमः बहिर्लोमः।‡

---

* नाप्ति बहुर्वेन वा अवतुल्याः। बहुगणस्य (१०१) सङ्ख्यावद्भावेन सङ्ख्यात्वातिदेशात् प्राप्ते निषेधः। पञ्चषाः इति अप्रत्यये (१२६) टिलोपः। एवं त्रिचाः चतुःपञ्चाः इत्यादि। उपगता विंशतिर्येषां त उपविंशाः, (१२६) अप्रत्यये विंशतेस्तिलोपः, (३३८) अनेनोऽपि इत्यकारलोपः। उपगता बहवो येषां ते उपबहवः। एवम् उपबहवाः। बहुव्रीहौ सङ्ख्यैकार्थसङ्ख्याया एव ग्रहणं, तेन गवाभिः सह वर्तते या सा गोदा पञ्चाशत् इत्यत्र सङ्ख्यार्थत्वात् न स्यात्। अतएव पाणिनौ सङ्ख्येये डच् बहुव्रीहौ। पाणिनिः अत्र "अव्ययादेरिति वक्तव्यम्" इति वार्त्तिकात् अप्रत्ययो वक्तव्यः। पाणिनिः ५।४।७३। अत्र "अच्प्रकरणे सङ्ख्यायास्तत्पुरुषस्योपसङ्ख्यानम्" इति वार्त्तिकसूत्रात् निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि, निर्गतस्त्रिंशतोऽङ्गुलिभ्यः निस्त्रिंशः खड्गः इत्यपि वक्तव्यम्।

† नाभिः पद्मे डः स्यात् हे संज्ञायाम्। पद्मं नाभौ यस्य, पद्मवत् नाभिर्यस्य इति वा, पद्मनाभो विष्णुः। एवं कमलनाभः। ऊर्णा नाभौ यस्य स ऊर्णनाभः, ऊर्णनाभिरिव नाभिः, अत्र ऊर्णा इत्यस्य निपातनात् ह्रस्वः। नाभि त्रि, चित्रनाभिः। अरविन्दनाभिरिति तु समासान्तविधेरनित्यत्वात् बोद्धव्यम्। "अच् प्रत्यन्ववपूर्वात् सामलोम्नः" (पाणिनिः ५।४।७५) इति सूत्रे 'अजिति योगविभागादन्यत्रापि, पद्मनाभः' इति सिद्धान्तकौमुदी। अपि इत्यर्थमातीति अनदीश्वरसूत्रम्, "एतदुपलक्षणम्, पद्मनाभिरपि भवति" इति बोधिनीकाः।

‡ इत्यनयोगात् नाभीति नानुवर्त्तते। अन्तर्-बहिर्भ्यां परात् लोम्नो डः स्यात् हे।

## ३४१ । नञ्दुःसोः सक्थ्यो वा ।

(नञ्दुःसोः ५।, सक्थ्युः ५।, वा ।१।) ।

असक्थः असक्थिः ।*

## ३४२ । अस् प्रजायाः । (अस् ।१।, प्रजायाः ५।) ।

अप्रजाः सुप्रजाः ।†

## ३४३ । मन्दाल्पाच्च तु मेधायाः ।

(मन्दाल्पात् ५।, च ।१।, तु ।१।, मेधायाः ५।) ।

अमेधाः सुमेधाः मन्दमेधाः ।‡

---

अन्तर्गतानि लोमानि यस्य सः अन्तर्लोमः, एवं बहिर्लोमः। अन्तर्लोमा नास्तिक इति क्रमदीश्वरः। आभ्यां किं, दीर्घलोमा। ई किं, अन्तर्लोम। पाणिनिः ५।४।११७।

* नञ् च दुश्च सुश्चेति नञ्दुःसु तस्मात्। एभ्यः परात् सक्थ्नो ङः स्याद् वा ई। नास्ति सक्थि यस्य सोऽसक्थः असक्थिः। एवं दुःसक्थः दुःसक्थिः, सुसक्थः सुसक्थिः। अत्र प्रस्तावे एव वचनं, स्वाङ्गे तु (३३४) पूर्वेणैव षः। (अत्र सक्थिशब्दस्थाने शक्तिरिति केचित् पठन्ति इति भट्टोजिदीक्षितः। क्रमदीश्वरस्तु शक्तिरिति पृथक् पदं स्वीकुरुते।) स्वाङ्गवाचिसक्थ्यन्ताद् षोपदेशेन सक्थ्नोऽपि विहितम्। पाणिनिः ५।४।१२१।

† नञ्दुःसुभ्यः परस्याः प्रजायाः अस् स्यात् ई। ईति नानुवर्तते पाणिनिसूत्रे नित्यमिति वचनात्। नास्ति प्रजा यस्यासौ अप्रजाः, असि कृते, (२५८) यस्येति लोपे ह्याकारलोपे, (१८५) अत्वसोऽधोरिति दीर्घः। एवं दुष्प्रजाः, सुप्रजाः। इह नञादिरव्यवहितोऽपेक्षितः, तेन सुतुल्यप्रजा इत्यादौ न स्यात्। पाणिनिः ५।४।१२२।

‡ तत्त्वेव पूर्ववत् व्याख्या। मन्दाल्पाभ्यां चकारात् नञ्दुःसुभ्यश्च परस्या मेधायाः अस् स्यात् ई। नास्ति मेधा यस्य सः अमेधाः, सुन्दरी मेधा यस्य सः सुमेधाः, मन्दा मेधा यस्य सः मन्दमेधाः। एवं दुर्मेधाः। असीन अस्, (२५८) आलोपः, (१८५) दीर्घः। इहापि नञादिरव्यवहितोऽपेक्षितः, तेन अव्ययसुमेधः इत्यादौ न स्यात्। अल्पस्यात् मन्दादीनां ग्रहण [illegible]। "नित्यमसिच् प्रजामेधयोः" (५।४।१२२) इति पाणिनिसूत्रे 'नित्य'ग्रहणात् [illegible], अल्पमेधाः इति [illegible]। "मन्दाल्पाभ्यां मेधायाः" इति [illegible]वार्तिकम्। अतएव "अत्वसोऽधोः" इति क्रमदीश्वरसूत्रम्। [illegible] "श्रीपिपत्तीव ते [illegible]। [illegible] दुर्मेधा [illegible]॥"

## ३४४ । धर्म्मादन् । (धर्म्मात् ५।, अन् ।१।) ।

सुधर्म्मा । *

## ३४५ । नञ्सुवित्र्युपाच्चतुरोऽः ।

(नञ्-सु-वि-त्रि-उपात् ५।, चतुरः ५।, अः १।) ।

एभ्यश्चतुरः अः स्यात् हे । अचतुरः सुचतुरः । †

## ३४६ । भान्नेतुः । (भात् ५।, नेतुः ५।) ।

भवाचात् नेतृशब्दात् अः स्यात् हे । मृगनेत्रा रात्रिः । ‡

---

* पूर्व्वपदाभावे बहुव्रीहिरेव न स्यादित्यतः पूर्व्वपदात् परात् धर्म्मादन् स्यात् हे । सु धर्म्मो यस्य स सुधर्म्मा,—अनेन अन्, (२५८) अकारलोपः, (१६४) दीर्घः । एवं सधर्म्मा विधर्म्मा बहुधर्म्मा इत्यादि । अत्र मतभेदो दृश्यते यथा—"धर्म्मादनिच् केवलात्" (५।४।१२४) इति पाणिनिसूत्रस्य "केवलात् पूर्व्वपदात् परो यो धर्म्मशब्दः तस्मादनिच् भवति न पदसमुदायात्, अतस्त्रिपदे बहुव्रीहौ न भवतीति" वर्द्धमान-जयादित्यादिकृता व्याख्या । भट्टोजिदीक्षितोऽप्येवमाह । तन्मते परमः स्वो धर्म्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् ; किन्तु परमः स्वधर्म्मो यस्येत्यत्र अनिच् भवत्येव, स्वः स्वकीयो धर्म्मः स्वधर्म्म इति कर्म्मधारयेण स्वधर्म्मशब्दस्य धर्म्मान्तत्वात् । क्रमदीश्वरेण तु 'साक्षात्कृतो धर्म्म एतैः साक्षात्कृतधर्म्माणो वेदितव्या' इति भाष्यदर्शनात् "अकृतसमासान्तराद्धर्म्मादन्" इत्येव सूत्रं कृतम् । तन्मते परमः सुधर्म्मो यस्येति परमसुधर्म्मः, अनुपार्जितकुलधर्म्मः इत्येव स्यात् न तु अन् । 'परमः शोभनो धर्म्मोऽस्येति त्रिपदे बहुव्रीहौ तु परमसुधर्म्मा इत्येव भवतीति' गोयीचन्द्रः । वस्तुतस्तु पाणिनिसूत्रस्थकेवलशब्दो धर्म्मादित्यस्य विशेषणं, केवलात् अकृतसमासान्तरादिति तस्यार्थ इति क्रमदीश्वरमतं प्रतिभाति । बोपदेवमतमपि तथेति निरुक्तपदचर्य्यापदप्रयोगादनुमीयते ।

† नञ् च सुश्च विश्च त्रिश्च उपश्चेति तस्मात् । एभ्यः परात् चतुर्शब्दात् अः स्यात् हे । न सन्ति चत्वारि यस्यासौ अचतुरः, सुष्ठु चत्वारि यस्यासौ सुचतुरः । एवं त्रीणि चत्वारि वा परिमाणं येषां ते त्रिचतुराः । विगतानि चत्वारि यस्य स विचतुरः । उपगतानि चत्वारि यस्याः सा उपचतुरा । पाणिनिः ५।४।७७ । "त्र्युपाभ्यामुपसंख्यानम्" इति वार्त्तिकञ्च ।

‡ भवाचात् नक्षत्रवाचकादित्यर्थः परात् नेतृशब्दात् अः स्यात् हे । मृगः मृगशिरो नक्षत्रं नेता प्रापको यस्याः सा रात्रिः मृगनेत्रा, अ-प्रत्यये (२४९) आप् । एवं पुष्यनेत्रा

## ३४७। सङ्ख्यासूपमानात् पात् पादोऽहस्त्यादेः।

(सङ्ख्या-सु-उपमानात् ५।, पात् ।१।, पादः १।, अहस्त्यादेः ५।)।

एभ्यः पादस्य पात् स्यात् हे, न तु हस्त्यादेः।

द्विपात् सुपात् व्याघ्रपात्। हस्त्यादेस्तु हस्तिपादः। *

## ३४८। कुम्भादेरीपि। (कुम्भादेः ५।, ईपि ७।)।

कुम्भादेः परस्य पादस्य पात् स्यात् हे ईपि परे।

(२२१) पात् पत् घौ। कुम्भपदी शतपदी। ईपि किं, कुम्भपादः। †

---

हस्तनीमा इत्यादि। यस्मिन् नक्षत्रे उदिते रात्रिः प्रवर्त्तते तत् तस्या नेतृ। "नेतुर्नक्षत्र-उपसङ्ख्यानम्" इति वार्त्तिकम्।

* सङ्ख्या च सु च उपमानञ्च तस्मात्। न हस्त्यादि-रहस्त्यादिस्तस्मात्। एभ्यः परस्य अकारान्त-पाद-शब्दस्य पात् स्यात् हे, न तु हस्त्यादेः परस्य। उपमानतया प्राप्तो हस्त्यादि-र्निषेधः। द्वौ पादौ यस्य स द्विपात्। शोभनौ पादौ यस्य स सुपात्। व्याघ्रस्येव पादौ यस्य स व्याघ्रपात्। हस्तिन इव पादौ यस्य स हस्तिपादः। हस्त्यादिर्यथा—हस्ती कटोलः गण्डोलो कण्डोलो गणिका महान्। दासी कुसूल इत्यष्टौ हस्त्यादौ परिकीर्त्तिताः॥ कटोलश्चण्डालः, गण्डोलो धान्याधारविशेषः, कोष इति भाषा। पाणिनिमते—कुद्दाल अश्व अज कपोत—एतेऽपि हस्त्यादिगणपठिताः। काशिकामते वर्त्तिकापि। अत्र गूढादपीति वक्तव्यं, तेन गूढपात् सर्पः। पाणिनिः ५।४।१३८,१४०।

† अत्र ईपीति विषयसप्तमी, ईपि कर्त्तव्ये इत्यर्थः। कुम्भाविव पादौ यस्याः सा कुम्भपदी, शतं पादा यस्याः सा शतपदी, अनेन पादस्य पात्, (२६५) ईप्, (२२१) पदादेशः। कुम्भादिर्यथा—कुम्भैकजालाः शतसूत्रगोधाः विष्णुः शितिद्रोणि-कुणी च कृष्णः। निरार्द्र-सूचीशकृदेकदासी विः शूकरो वै कलशोऽपि चेति॥ "कुम्भार्द्रजालशतमुनिसूत्रकलशशुचिविशिति-कणकाः। विनिरष्टशकृत्सूचीशूकरदासीकद्रोणगोधाश्च॥" इति वोपदेवः। अत्र आर्द्र-शब्दस्थाने चार्द्रशब्दः, विष्णुशब्दस्थाने मुनिशब्दश्च पठितः, शकृत्शब्दः हस्त्यादिश्च। एते अष्टो-विंशतिसंख्याकाः, पाणिनीये गणपाठे तु चत्वारिंशत्संख्याकाः। पूर्वसूत्रेणैव पाद-पादादेशसिद्धौ नियमार्थोऽयं, तेन ईपोऽभावपक्षे न पाद्-आदेशः। पाणिनिः ५।४।१३९।

## ३४९। व्यतीहारे चिः पूर्व्वो घोऽनच्या वा।

(व्यतीहारे ७, चिः १।, पूर्व्वः १।, घः १।, अनचि ७, आ।१।, वा।१।)।

व्यतीहारे यो हस्तस्मात् चिः स्यात्, पूर्व्वस्य च घः स्यात्, आ वा नत्वचि।

केशेषु केशेषु गृहीत्वा यत् युद्धं प्रवृत्तं—केशाकेशि।
दण्डैश्च दण्डैश्च प्रहृत्य यत् युद्धं प्रवृत्तं—दण्डादण्डि।
मुष्टामुष्टि मुष्टीमुष्टि, बाहाबाहवि बाहूबाहवि। अचि तु अस्यसि।

इति हः।

---

* परस्परमेकजातीयक्रियाकरणं व्यतीहारः, तत्र यो बहुव्रीहिस्तत्परपदात् चिः स्यात्, चकारेत् अव्ययार्थं (९४), इकारस्थितिः। चौ कृते पूर्व्वपदस्य आकारः, पक्षे दीर्घश्च, अचि परे तु न आकारः, नापि दीर्घः इत्यर्थः। केशाकेशि दण्डादण्डि उभयत्र पूर्व्वपदस्याकारः, परपदात् चिः (२५८) अकारलोपः, (२४६) [illegible]। एवं मुष्टिभिर्मुष्टिभिः प्रहृत्य यद् युद्धं प्रवृत्तं मुष्टामुष्टि मुष्टीमुष्टि ; बाहुभिर्बाहुभिः प्रहृत्य यद् युद्धं प्रवृत्तं बाहाबाहवि बाहूबाहवि, उभयत्र पूर्व्वपदस्याकारः, पक्षे दीर्घः, परपदात् चिः, बाहुशब्दस्य तु चिनिमित्तत्वात् (११७) उकारस्य ओकारः, (२५) ओकारस्य अव्। असिभिः असिभिः प्रहृत्य यद् युद्धं प्रवृत्तम् अस्यसि, अत्र परपदात् चिः पूर्व्वपदस्य तु न आकारः नापि दीर्घः अच्परत्वात्। उदाहरणप्रपञ्चात्, तत्र गृहीत्वा तेन प्रहृत्य युद्धे व्यतीहारे यो हस्तस्यैवायं विधिरिति, तेन कायश्च कायश्च गृहीत्वा रथैश्च रथैश्च स्थित्वा इत्यादौ न स्यात्। अतएव "तत्र तेनेदमिति सरूपे" इति पाणिनिसूत्रम् (२।२।२७)। "कर्म्मव्यतिहारे युद्ध एवायं समासः। तथापि सप्तम्यन्तस्य ग्रहणविषये ; तृतीयान्तस्य प्रहरणविषये। सरूपे किं, हलैश्च मुषलैश्च युद्धं प्रवृत्तम्" इति टीका। पाणिनिः ५।४।१२७, ६।३।१३७।

बहुव्रीहौ, (पाणिनिः, ५।४।१३४) जायाया जानिः, (पाणिनिः ५।४।१३२) धनुषो धन्वन्, (५।४।१३३) वा संज्ञायाम्, (पाणिनिः ५।४।१२८) [illegible], (५।४।१३०) [illegible]-विभाषा, इत्यादि प्रयोगानुसारात् बोद्धव्यम्। यथा—युवजानिः, अधिज्यधन्वा, शतधन्वा शतधनुः, पुष्पधन्वा पुष्पधनुः, [illegible] [illegible], [illegible] [illegible] इत्यादि।

परमश्चासावात्मा चेति—परमात्मा।

सँश्चासौ चिच्चासौ-आनन्दश्चेति—सच्चिदानन्दः। *

३५०। कोङादिः पुंवत् यजातीयदेशीये तत्वे त्वजात्याख्यः।

(कोङादिः १।१, पुंवत् ।१।, य-जातीय-देशीये ७।, तत्वे ७।, तु ।१।, अजात्याख्याः १।)।

कोङ्पूरण्यादिः पुंवत् स्यात् यादौ, तत्वयोस्तु जातिसंज्ञावर्ज्जं। पाचकस्त्री पञ्चमभार्य्या। †

---

* उत्तरपदविशिष्ट-बहुव्रीहि-वर्ज्जं पदबहुत्वे समासो नास्तीति दुर्गसिंह-क्रमदीश्वरौ। वामनतमसोमुख्यं त्रिभिः पदैरपि कर्म्मधारयमाह सच्चिदानन्द इति। आनन्दयतीति आनन्दः इति विशेष्यं पदं, अन्यथा विशेषणत्वे समासानुपपत्तेः। कृतकृष्णः पटुविस्पष्टः इत्यादा-वुभयस्य विशेषणत्वेऽपि विशेष्यविशेषणभावस्य कामचारत्वात् एकस्य विशेष्यत्वं कल्प्यते। विशेषणस्य तु पूर्व्वस्थितिरेव, तेन ब्राह्मणदीर्घं एवं न स्यात्। कड़ारादिशब्दास्तु वा पूर्व्वं प्रयोज्याः, (पाणिनिः २।२।३८); तेन कड़ारजैमिनिः जैमिनिकड़ारः इत्यादि। कड़ारादि-संज्ञा—कड़ार बठर गड़ुल काण खोड़ खञ्ज कुण कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गल तनु बधिर मठर बर्ब्बर इति।

मयूरव्यंसकादयः (पाणिनिः २।१।७२), शाकपार्थिवादयश्च (शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानमिति वार्त्तिकम्) निपात्यन्ते। व्यंसयति छलयतीति व्यंसको धूर्त्तः, विपूर्व्वांसधातोर्णकः, मयूरश्चासौ व्यंसकश्चेति मयूरव्यंसकः। एवं उद्धर उत्सृज इति यस्यां क्रियायां सा उद्धरोत्सृजा, उद्धमविधमा, उत्पतनिपता, पचतभृज्जता इत्यादि। शाकः शाकं बदरी वा प्रियो यस्य सः शाकप्रियः, शाकप्रियः पार्थिवः शाकपार्थिवः, निपातनात् मध्यपद-लोपः। एवं श्रीहर्षनामा नृपतिः श्रीहर्षनृपतिः, मेरुनामा महीधरः मेरुमहीधरः, सुखयुक्ता वाटिका सुखवाटिका इत्यादि। मयूरव्यंसकादिः शाकपार्थिवादिश्च आकृतिगणः, प्रयोगानु-सारेण संग्राह्यः, तेन अन्यो राजा राजान्तरम्, पथिकजनः, मधुरोक्तयः, उच्चावचं, चिदेव चिन्मात्रमित्यादि मयूरव्यंसकाद्यन्तर्गतम्।

† ङ् उङ् यस्य स कोङ्, कोङ् आदिर्यस्य स कोङादिः। यश्च जातीयश्च देशीयश्च तस्मिन्। तश्च त्वश्च तत्वं तस्मिन्। जातिश्च आख्या च जात्याख्ये, न विद्येते जात्याख्ये

## ३५१ । द्वित्र्यष्टाधिका द्वात्रयोऽष्टा-स्त्रिदशा-द्येऽन्यषट्के त्वनशीतौ वा ।

(द्वित्र्यष्टाधिकाः १।३, द्वात्रयोऽष्टाः १।३, त्रिदशाद्ये ७।१, अन्यषट्के ७।१, तु ।१।, अनशीतौ ७।, वा ।१।) ।

एषामेते क्रमात् स्युः दशादित्रिके, चत्वारिंशदादिषट्के अशीतिवर्जे तु वा ।

द्व्यधिका दश द्वादश, त्रयोदश, अष्टादश ।

द्वाचत्वारिंशत् द्विचत्वारिंशत् । अनशीतौ किं, द्व्यशीतिः । *

---

यत्र कोङादौ सोऽज्ञाख्याज्ञः । (२२७) पुंवत् स्यात्पुंस्कोक्तेन उक्तपुंस्कस्य कोङादिः पुंवद्भावप्रसक्तौ, (२२८) नोत्सवकोक्तित्वेन निषेधे, कर्मधारयादौ पुनरनेन विधिः क्रियते, तेनायमर्थः—तद्धितस्य चकारस्य वा केन ककारोक्त्, पूरणीप्रत्ययान्तम्, चाज्ञाप्रभूतम्, रम्-रत्नार्थ-विकारार्थवर्णं वित्तद्धितान्तं, जाति-खाङ्ग-निर्दिष्टेभूतञ्च पदं यदि उक्तपुंस्कं भवति, तदा एकार्थे स्त्रीलिङ्गे परे कर्मधारयादौ पुंवत् स्यात्, जातीय-देशीय-प्रत्यये च परे पुंवत् स्यात्, तत्रयोः परयोस्तु जातिसंज्ञावर्जं उक्तपुंस्कः कोङादिः पुंवत् स्यादित्यर्थः । जातीय-प्रत्यये पुंवद्भावप्रसङ्गाभावेऽपि अनेन विशेषविधानम् । यथा—रसिका चासौ भार्य्या चेति रसिकभार्य्या, पाचिका चासौ स्त्री चेति पाचकस्त्री, पञ्चमी चासौ भार्य्या चेति पञ्चमभार्य्या । एवं दत्तभार्य्या, मैथिलभार्य्या, ब्राह्मणभार्य्या, सुकेशभार्य्या, (४८०) रसिकजातीया, (४७७) रसिकदेशीया, (४१८) रसिकता रसिकत्वम् । कोङादिभिन्नस्य तु दीर्घाजातीया इत्यादीनां न पुंवत् । उक्तपुंस्कः किं, गङ्गिकाभार्य्या इत्यादि । अज्ञाख्याज्ञ इति किं, ब्राह्मणीत्वं दत्तात्वं; गुणवाचकात्तु स्यादेव, यथा, शुक्लायाः भावः शुक्लत्वमित्यादि । केचित्तु कोङादित्वेन येषां पुंवद्भावो निषिध्यते तेन (२२९) पूरणीप्रियेत्यादौ निषेधेऽपि कर्मधारये पुंवद्भाव इच्छन्ति, यथा—कल्याणपञ्चमी कल्याणञ्चमी, कल्याणपञ्चमीका इत्यादि ।

कोङादिः (२२८) नोत्सवकोक् इत्यादिसूत्रे ये पठिताः, पूरण्यादिः (२२९) पूरणी-प्रियेत्यादिसूत्रे ये पठिताः, ते पुंवत् स्युः ये जातीयदेशीये च परे, तत्त्वे परे तु जातिवाचकस्य संज्ञावाचकस्य च न स्यादित्यर्थः इति रामतर्कवागीशः । पाणिनिः ६।३।४२ । "तसिलादिषु-वचनस्य" इति वार्त्तिकम् ।

* द्वौ च दशच अष्ट च ते द्विव्यष्ट, द्विव्यष्टभिः अधिका अधिकाः द्वित्र्यष्टाधिकाः, शाकपार्थिवादित्वात् कथितपदस्य लोपः, इत्यात् परस्याधिकशब्दस्य प्रयोगेण सत्वमात्

## ३५२ । वैकोनस्यैकादेकान्नौ सङ्ख्यायां ।

(वा ।१।, एकोनस्य ६।, एकाद्-एकान्नौ १।।, सङ्ख्यायां ७) ।

एकाद्नविंशतिः एकान्नविंशतिः एकोनविंशतिः । *

## ३५३ । सख्यह्नोराज्ञः टः षगे च ।

(सखि-अहन्-राज्ञः ५।, टः १।, ष-गे ७, च ।१।) ।

एभ्यः टः स्यात् षे गे च । प्रियसखः परमाहः महाराजः । †

---

द्व्यधिक-त्र्यधिक-अष्टाधिका इत्यर्थः । द्वाच त्रयश्च अष्टाच द्व्यष्टन्त्र्यष्टाः, दश आद्यो येषां ते दशाद्याः, त्रयाणां दशाद्यानां समाहारः त्रिदशाद्यं तस्मिन् । षण्णां समूहः षट्कं, अन्यच्च तत् षट्कं चेति तस्मिन् । न अशीतिरनशीतिस्तस्याम् । त्रिदशाद्यशब्देन दश-विंशति-त्रिंशत्-शब्दानामेव ग्रहणम्, अन्यथा अन्यषट्के अशीतिवर्जनमनर्थकं स्यात् । तेन द्व्यधिकत्र्यधिकाष्टाधिकानां स्थाने क्रमात् द्वा त्रयस् अष्टा इत्येते आदेशा भवन्ति दशशब्दे विंशतिशब्दे त्रिंशत्शब्दे च परे, प्रकरणात् कर्मधारये ; चत्वारिंशत् पञ्चाशत् षष्टि सप्तति नवतीति पञ्चसु परेषु वा स्युरित्यर्थः । द्व्यधिकाश्च ते दश चेति द्वादश, त्र्यधिकाश्च ते दश चेति त्रयोदश, अष्टाधिकाश्च ते दश चेति अष्टादश, शाकपार्थिवादित्वात् अधिकपदलोपः । एवं द्वाविंशतिः त्रयोविंशतिः अष्टाविंशतिः, द्वात्रिंशत् त्रयस्त्रिंशत् अष्टात्रिंशत् । द्व्यधिका चासौ चत्वारिंशच्चेति द्वाचत्वारिंशत्, पक्षे द्विचत्वारिंशत् । एवं द्वापञ्चाशत् द्विपञ्चाशत्, द्वाषष्टिः द्विषष्टिः, द्वासप्ततिः द्विसप्ततिः, द्वानवतिः द्विनवतिरित्यादि । अशीतौ तु न आदेशः, तेन द्व्यशीतिः त्र्यशीतिः अष्टाशीतिः । कर्मधारये किं, द्व्यधिका दश यस्य स द्व्यधिकदश इत्यादौ न स्यात् । अन्यषट्के इति किं, द्विशतं, त्रिसहस्रमित्यादि । पाणिनिः ६।३।४७,४८,४९ ; प्राक् शता-दिति वक्तव्यमिति वार्त्तिकञ्च ।

* एकोनस्य स्थाने एकाद्-एकान्नौ स्यातां सङ्ख्यावाचके परे षे । एकोना चासौ विंशतिश्चेति एकाद्नविंशतिरित्यादि । वाशब्दस्य व्यवस्थया सङ्ख्या इह विंशत्यादिरेव, तेन एकोनाश्च ते दश चेति एकोनदश इत्येव । "यद्यपि संख्यायामिति सामान्येनोक्तं तथापि विंशति त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टि सप्तति अशीति नवति शत सहस्रादावेव परेऽप्याद्यान्नादेशौ भवतः, न त्वन्यस्मिन् संख्याशब्दे परेऽनभिधानात्" इति गोयीचन्द्रः । षे किं, एकोना विंशतिर्यस्य सः एकोनविंशतिरिति । पाणिनिः ६।३।७६ ।

† सखा च अहश्च राजा चेति तस्मात् । प्रियश्चासौ सखा चेति प्रियसखः, अनेन ट० (२५८) इकारलोपः । स्त्रियां स्त्र्यादौपि (२५७) प्रियसखी । परमञ्च तत् अहश्चेति

## ३५४। सर्व्वैकदेशसङ्ख्यातसङ्ख्याव्यान्नैकान्नैक्येऽह्नोऽह्नः।

(सर्व्व—व्यात् ५।, न ।१।, एकात् ५।, न ।१।, ऐक्ये ७, अह्नः ६।, अह्नः १।)।

एभ्यः परस्य अहन् इत्यस्य स्थाने अह्नः स्यात् यादौ न त्वेकात् न चैक्ये। *

## ३५५। प्राग्वत् नो णोऽतोऽह्नस्य।

(प्राग्वत् ।१।, नः ६।, णः १।, अतः ५।, अह्नस्य ६।)।

सर्व्वाह्णः पूर्व्वाह्णः। एकात्तु एकाह्नः।

अत इति किं, त्रिभिरह्नोभिर्जातः त्र्यह्नः। †

---

परमाहः, यप्रत्यये, (२२०) नलोपे, (२५८) अकारलोपः, महदन्तानां पुंस्त्वमभिधानात्। महांश्चासौ राजा चेति महाराजः, (२२६) महतस्य आकारः, यप्रत्यये, न-लोपे, अकार-लोपः। स्त्रियां महाराज्ञी, "महाराज्ञी तु भार्य्यां नामवर्ण्यं स्त्रीलिङ्गस्यापि यदभिधेयस्य प्राधिकत्वात्" इति क्रमदीश्वरः। "महती चासौ राज्ञी चेति" इति गोयीचन्द्रः। "लिङ्ग-विशिष्टपरिभाषाया अनित्यत्वाच्च मद्राणां राज्ञी मद्रराज्ञी" इति भट्टोजिदीक्षितः। एवं कृष्णस्य सखा कृष्णसखः, नयानां सखीनां समाहारस्त्रिसखम्। यादौ किं, कृष्णः सखा यस्य स कृष्णसखिरिति हरदत्तव्यासकारयोस्तदनुगामिनाञ्च मतम्; तन्न साधु, भाष्यविरोधात्, तन्मते कृष्णसखा इति (१२९ सूत्रटीका द्रष्टव्या)। अतएव "वायुः सखा यस्य स वायुसखा" इति गोयीचन्द्रः। पाणिनिः ५।४।९१।

* सर्व्वस्य एकदेशस्य सङ्ख्यातस्य सङ्ख्या च व्यस्य समाहारे तस्मात्, न एको नैकस्तस्मात्, न ऐक्यं नैक्यं तस्मिन्। अत्र एकदेशवाची वर्त्तमानः पूर्व्वादिरेकदेशः। एभ्यः परस्य अहन्-शब्दस्य अत्र इत्यकारान्त आदेशः स्यात्, न तु एकात्, न च समाहारे स्त्रियां। पाणिनिः ५।४।८८,८९,९०।

† प्राग्वदित्यनेन (१००) सू.: अयकुपुमरेऽपीति च प्राप्तं, तथाच—अकार-रेफ-वर्ग-पुरस्ताद् अदन्तात् परस्य अह्नः नकारान्तस्य नो णः स्यात् अप्-कु-पु-व्यवधानेऽपीत्यर्थः। सर्व्वञ्च तत् अहश्चेति सर्व्वाह्णः, पूर्व्वञ्च तत् अहश्चेति पूर्व्वाह्णः। एवं प्राह्णः अपराह्णः इत्यादि (३५३, ३५४,३५५)। एकञ्च तदहश्चेति एकाह्नः (३५३,२२०,२५८)। त्र्यह्न इति तद्धितार्थद्विगुः, सङ्ख्यापूर्व्वत्वाद्विगोः। अदन्तस्यकारान्त इति किं, दीर्घाणि अहानि यस्यां सा दीर्घाह्नी

## ३५६। कोटग्रामात् तक्ष्णः ।

(कोट-ग्रामात् ५।१, तक्ष्णः ५।१)।

कोटतक्षः, ग्रामतक्षः । *

## ३५७। जातमहद्वृद्धादुक्ष्णः ।

(जात-महत्-वृद्धात् ५।१, उक्ष्णः ५।१)।

जातोक्षः, महोक्षः, वृद्धोक्षः । †

## ३५८। श्वनोऽत्यप्राण्युपमानात् ।

(श्वनः ५।१, अति-अप्राण्युपमानात् ५।१)।

अतेः प्राणिवर्ज्जादुपमानाच्च श्वनः षः स्यात् यादौ । आकर्ष इव श्वा आकर्षश्वः । प्राणिनस्तु, व्याघ्र इव श्वा व्याघ्रश्वा ।‡

---

अरत्। प्राण्वदिति किं, सह्याताक्षः त्र्यक्षः। पूर्व्वच नैकौ इति किं, द्वयोरह्नोः समाहारः द्व्यहः। एतेषां पुंस्त्वमभिधानात्। पुण्याहमिति तु नपुंसकं "अपथपुण्याहे नपुंसके" इति लिङ्गानुशासन-विशेष-सूत्रात्। एवं सुदिनाहमिति। "पुण्यसुदिनाभ्यां क्लीवे" इति अमरे प्रकरसूत्रम्। पाणिनिः ८।४।७।

* आभ्यां परात् तक्षन्शब्दात् षः स्यात् यादौ। कुट्यां भवः कोटः, कोटश्चासौ तक्षा चेति कोटतक्षः "स्वतन्त्रकर्म्मजीवी न कस्यचित् प्रतिबद्ध" इति गोयीचन्द्रः। ग्रामस्य तक्षा ग्रामतक्षः "बहूनां साधारण इत्यर्थः" इति गोयीचन्द्रः। कोटग्रामात् किं, राजतक्षा। पाणिनिः ५।४।९५।

† एभ्यः परात् उक्षन्शब्दात् षः स्यात् यादौ। जातश्चासौ उक्षा चेति जातोक्षः। एवं महोक्षः, वृद्धोक्षः। यादौ किं, महान् उक्षा यस्य स महोक्षा शिवः। पाणिनिः ५।४।७७।

‡ न प्राणी अप्राणी, अप्राणी चासौ उपमानञ्चेति अप्राण्युपमानं, अतिश्च अप्राण्युपमानञ्चेति समाहारः। आकृष्यतेऽनेनेति आकर्षः, पाशकुरूपो इति ख्यातः। आकर्षशब्देन तदवयवो आकर्षतुल्य उच्यते; तद्‌ज्ञापनार्थम् इवशब्दः। आकर्ष इति, अप्राण्युपमानात् परात् श्वन्शब्दात् षः। अतिश्व, श्वानमतिक्रान्तः अतिश्वः वराहः, अतिश्वी सेवा। व्याघ्रशब्देन तदवयवो व्याघ्रतुल्य उच्यते, व्याघ्रश्चासौ श्वा चेति व्याघ्रश्वा, प्राण्युपमानात् न षः। पाणिनिः ५।४।५६,५७।

## ३५९ । पूर्व्वोत्तरमृगाद्यानतेः सक्थ्नः ।

(पूर्व्व-उत्तर-मृगात् ५।, च ।१।, अनतेः ५।, सक्थ्नः ५।) ।

एभ्यः पूर्व्वोक्ताच्च अतिवर्ज्जात् सक्थ्नः षः स्यात् षादौ । पूर्व्वसक्थं । *

## ३६० । देशात् ब्रह्मणः कुमहद्भ्यान्तु वा ।

(देशात् ५।, ब्रह्मणः ५।, कु-महद्भ्यां ५॥, तु ।१।, वा ।१।) ।

कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा । †

## ३६१ । सरोऽनोऽयोऽश्मनः संज्ञाजात्योः ।

(सरस्-अनस्-अयस्-अश्मनः ५।, संज्ञा-जात्योः ७॥) ।

महानसं उपानसं लोहितायसं पिण्डाश्मः अमृताश्मः । ‡

---

* पूर्व्वश्च उत्तरश्च मृगश्च तस्मात् । नास्ति अतिर्यस्य सोऽनतिस्तस्मात् । पूर्व्वोत्तरमृगेभ्यः अप्राण्युपमानाच्च सक्थ्नः षः स्यात् षादौ । पूर्व्वञ्च तत् सक्थि चेति पूर्व्वसक्थम् । एवम् उत्तरसक्थम् । पूर्व्वोत्तरशब्दौ अवयववाचिनौ । मृगस्य सक्थि मृगसक्थम् । फलकमिव सक्थि फलकसक्थं, शिलासक्थम् । प्राण्युपमानात्तु श्वानसक्थि । अतिस्तु सक्थि अतिक्रान्तः अतिसक्थिः । पाणिनिः ५।४।९८ ।

† देशवाचकात् परात् ब्रह्मणः षः स्यात् षादौ, कुमहद्भ्यां परात्तु वा । अवन्तिषु ब्रह्मा अवन्तिब्रह्मः, सुराष्ट्रब्रह्मः । देशात् किं, देवब्रह्मा नारदः । महांश्चासौ ब्रह्मा चेति महाब्रह्मः महाब्रह्मा । ब्रह्मन्शब्दोऽत्र ब्राह्मणवाची । पाणिनिः ५।४।१०४,१०५ ।

‡ सरस् च अनस् च अयस् च अश्मन् चेति तस्मात् । संज्ञा च जातिश्च संज्ञाजाती तयोः । संज्ञालक्षणञ्च गोयीचन्द्रः "यो लोकव्यवहारायैव विहितो वर्त्तते स एव संज्ञाख्यो भवति ।" जातिलक्षणन्तु पूर्व्वमेवोक्तं ओष्ठे २६१ सूत्रे । एभ्यः षः स्यात् षादौ संज्ञायां जातौ च । आवस्य सरः आवसरसं संज्ञा । अवसरशब्दमिव तु भट्टोजिदीक्षितः । चन्द्रसरो देवयानसरः अश्वोदसरः इत्यादौ तु न भवति । मण्डूकसरसं जातिः । महच्च तत् अनश्चेति महानसं संज्ञा । उपगतमनः उपानसं जातिः । लोहितमयः लोहितायसं संज्ञा । कालमयः कालायसं जातिः । पिण्डश्च अश्मा पिण्डाश्मः संज्ञा । अमृतं अश्मा अमृताश्मः जातिः । संज्ञाजात्योः किं, दीर्घसरः इन्द्रानः शुभायः महाश्मा । पाणिनिः ५।४।९४ ।

३६२। सर्व्वैकदेशसङ्ख्यातपुण्यवर्षादीर्घाद्रात्रेः।

(सर्व्व—दीर्घात् ५।, रात्रेः ५।)।

रात्रेरेकदेशे वर्त्तमानः पूर्व्वादिरेकदेशः।

पूर्व्वरात्रः अपररात्रः। *

३६३। गोरतार्थे। (गोः ५।, अतार्थे ७।)।

गोशब्दात् अः स्यात् यादौ, न तु तार्थे। परमगवः। †

३६४। नावोऽर्द्धात् गे च।

(नावः ५।, अर्द्धात् ५।, गे ७।, च ।१।)।

अर्द्धात् परात् नौशब्दात् अः स्यात्, अतार्थे गे च। अर्द्धनावं। ‡

३६५। खार्य्या वा। (खार्य्याः ५।, वा ।१।)।

अर्द्धखारं अर्द्धखारी। §

इति यः।

---

* सर्व्वस्य एकदेशस्य सङ्ख्यातस्य पुण्यस्य वर्षायाः दीर्घस्य च तस्मात्। एभ्यः परस्याः रात्रेः अः स्यात् यादौ। सर्व्वा चासौ रात्रिश्चेति सर्व्वरात्रः। रात्र्यन्तानां पुंस्त्वमभिधानात्। पूर्व्वा चासौ रात्रिश्चेति पूर्व्वरात्रः रात्रेः पूर्व्वभाग इत्यर्थः, (ष॰ 'पूर्व्वं रात्रेः' इति वाक्यम्), एवमपररात्रः, मध्यरात्रः, सङ्ख्यातरात्रः, पुण्यरात्रः, वर्षाणां रात्रिः वर्षारात्रः, दीर्घरात्रः। पाणिनिः ५।४।८७।

† परमश्चासौ गौश्चेति परमगवः। एवं पुमांश्चासौ गौश्चेति पुंगवः। राज्ञो गौः राजगवः। तिसृणां गवां समाहारः त्रिगवं, षण्णां गवां समाहारः षड्गवम्। पञ्च गावो धनमस्य पञ्चगवधनः। अतार्थे किं, पञ्चभिर्गोभिः क्रीतः पञ्चगुः। पाणिनिः ५।४।९२।

‡ अत्र सूत्रे परस्य च यादेरनुवृत्तावपि अनभिधानात् अर्द्धात् परात् नौशब्दात् गे एव अः स्यात्, पुनः गे च इति वचनात् नौशब्दात् अः स्यात् अतार्थे गे च इत्यपरोऽर्थो बोद्धव्यः। अतएव पाणिनौ सूत्रद्वयम्। अर्द्धञ्च तत् नौश्चेति अर्द्धनावं क्लीवत्वमभिधानात् (षा. 'अर्द्धं नावः' इति वाक्यम्)। अर्द्धात् किं, दीर्घनौः। एवं त्रिनावं त्रिनावधनः। तार्थे तु, पञ्चभिः नौभिः क्रीतः पञ्चनौः। पाणिनिः ५।४।९९,१००।

§ अर्द्धात् परात् खारीशब्दात् अः स्यात् वा-गे। खारीशब्दात् अः स्यात् वा अतार्थे गे च इति च अर्थः। अर्द्धञ्च तत् खारी चेति अर्द्धखारं, क्लीवत्वमभिधानात्। पक्षे अर्द्ध-

## तत्पुरुष-समासः (क)।

**कष्टमाश्रितः कष्टाश्रितः। ***

### ३६६। व्यं पूर्व्वं। (व्यं ११, पूर्व्वं ११)।

**परं व्यं पूर्व्वं स्यात् ये सति।**

---

खारी। एवं त्रिखारं त्रिखारि, द्विखारधनः द्विखारीधनः। तार्थे तु, द्वाभ्यां खारीभ्यां क्रीतः द्विखारिः। पाणिनिः ५।४।१०१।

* द्वितीयादिविभक्त्यन्तपदपूर्व्वकाणां समासस्तत्पुरुष इत्युक्तं (२१८), क्रमेणोदाहरति कष्टमाश्रित इति। एवं क्रियाविशेषण-द्वितीयान्तादेरपि यथा—नित्यमोदः, मन्दगामी, मासं व्याप्य स्थितः मासस्थितः, मुहूर्त्तं व्याप्य सुखं मुहूर्त्तसुखम् (पा. २।१।२८,२९) इत्यादि। पाणिनि-मते तु क्रियाविशेषणस्थले सुप् सुपेति समासः, क्रियाविशेषणस्य कारकत्वेनानङ्गीकारात्।

नञ् इत्यव्ययस्य स्याद्यन्तेन सह समासो नञ्तत्पुरुषः (पाणिनिः २।२।६), स च प्रथमान्त-पदपूर्व्वक एव। यथा, न ब्राह्मणः अब्राह्मणः। नञ् च द्विविधः—पर्य्युदासः प्रसज्यप्रतिषेधश्च। तथाच—प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥ अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥ अब्राह्मण इत्यादौ परपदार्थसदृशार्थकत्वात् विधेः प्राधान्यं, प्रतिषेधांशे तात्पर्य्याभावात् प्रति-षेधस्याप्राधान्यम्, अतएव पर्य्युदास-नञः परपदेन सह सापेक्षत्वात् समासः। किञ्चित् न कुर्व्वाण इत्यादौ विध्यंशे तात्पर्य्याभावात् विधेरप्राधान्यं प्रतिषेधस्य च प्राधान्यम्, अतएव प्रसज्यप्रतिषेध-नञः क्रियया सह सम्बन्धात् स्याद्यन्तेन सह सापेक्षत्वाभावात् न समास इति। "शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम्" (रघौ) इत्यादौ केचित्तु समासं इच्छन्ति। प्रायशस्तु नञर्थः षड्विधः—तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥ यथा—अब्राह्मणः, अपापं, अघटः, अनुदरी कन्या, अकेशी, असुरः इत्यादि। अत्र वक्तव्यं—अब्राह्मण इत्यादौ नञ्तत्पुरुषः समासः, नातिशीतोष्ण इत्यादौ तु सुप् सुपेति समासः। अनतिशीतोष्ण इति मते तु नञ्तत्पुरुष एव।

एवञ्च कु-प्रादिभिः सह स्याद्यन्तस्य नित्यसमासः स्यात् (पाणिनिः २।२।१८, 'प्रादयः गताद्यर्थे प्रथमया' इति वार्त्तिकञ्च)। नित्यसमासो द्विविधः—अविग्रहः अस्वपद-विग्रहो वा। तत्र कृष्णसर्पादौ अविग्रहः; अस्वपदविग्रहे च पदान्तरेण वाक्य-कथनम्। कुत्सितः पुरुषः कुपुरुषः, ईषत् उष्णं कवोष्णं, प्रकृष्टो मतः प्रमतः, दुष्टो जनः दुर्जनः, शोभनो जनः सुजनः इत्यादिः शिष्टप्रयोगानुसारेण नित्यसमासो ज्ञेयः। (५७८ सूत्र

राजानमतिक्रान्ता अतिराजी, अतिश्वी, अत्यक्षः, अतिस्त्रिः । *

### ३६७ । सङ्ख्याव्ययाद्रात्र्यङ्गुलिभ्याम: ।

(सङ्ख्या-व्यात् ५।, रात्रि-अङ्गुलिभ्यां ५॥, अः १।) ।

सङ्ख्याया अव्ययाच्च पराभ्यां रात्र्यङ्गुलिभ्याम्-अः स्यात् यादौ, न तु सार्थे । अतिरात्रः अत्यङ्गुलः । †

हरिणा त्रातो हरित्रातः । विष्णवे दत्तं विष्णुदत्तं । अच्युतात् जातं अच्युतजातं । कृष्णस्य सखा कृष्णसखः, महाराजः, ग्रामतक्षः, मृगमक्षं, आम्रसरसं, मण्डूकसरसं, राजगवः, वर्षारात्रः । ‡

---

द्रष्टव्यम्) । स्याद्युत्पत्तेः प्रागपि कृदन्तेन सह उपपदस्य नित्यं समासः स्यात्, यथा—कुम्भं करोति इति कुम्भकारः (१००९), शत्रियकः, धनक्रीतीत्यादि ।

* समासान्तप्रत्ययानामिव निमित्तीभूतस्य यादेः इह पूर्व्वनिपाते अनुवृत्तिर्नास्ति, तेन समासमात्रेऽस्य विधानात् उपलक्षणम् इत्यव्ययीभावेऽपि पूर्व्वनिपातः । अतिराजीति (२५२) ञ-प्रत्यये, (२२७,२५८) नकार-अकार-लोपे, (२५७) ङित्वाद्दीप् । श्वानमतिक्रान्ता अतिश्वी (२५८) ञ-प्रत्ययः, शेषं पूर्व्ववत् । अक्षरतिक्रान्तः अत्यक्षः, (२५३) षः, (२५४) अक्षादेशः । स्त्रियमतिक्रान्तः अतिस्त्रिः, परपदार्थप्राधान्यात् (२१०) ह्रस्वः, एवम् अतिमायः, अतिखामीनः । राजानमतिक्रान्ता अतिराजीत्युदाहरता अत्यादिभिर्द्वितीयान्तस्य समास इति सूचितम् (अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति वार्त्तिकम्), तेन वेलामुद्गतः उद्वेलः, व्यामधिकृत्य अधिव्यं, मुखमभिगतः अभिमुखः—इत्यादि बोध्यम् । अत्र प्रयोगानुसारेण अव्ययभिन्नस्यापि पूर्व्वनिपातो मन्तव्यः, यथा—वनस्याग्रे अग्रेवनं, गवीनां गवः गवराजं, दन्तानां राजा राजदन्तः (पा. २।२।३१) इत्यादि । पाणिनिः २।२।२० ।

† सङ्ख्या च अव्ययं सङ्ख्याव्ययं तस्मात्, एकवचनं यथासङ्ख्यनिरासार्थम् । अत्र मण्डूकप्लुत्यधिकारात् यादिरनुवृत्तिः । रात्रिमतिक्रान्तोऽतिरात्रः, अङ्गुलिमतिक्रान्तोऽत्यङ्गुलः, उभयत्र अनेन प्रत्यये (२५८) इकारलोपः । एवं तिसृणां रात्रीणां समाहारः त्रिरात्रं, द्वयोरङ्गुल्योः समाहारः द्व्यङ्गुलम् । यादौ किं, हे अङ्गुली परिमाणमस्य द्व्यङ्गुलि (क्षेत्रं) । द्व्यङ्गुलं चेत्, द्व्यङ्गुला भूमिरित्यादि तु मात्रचरपरिमाणार्थकाण्डुगमन्तेन समासे सिद्धं, तथाच—अङ्गुलप्रमाणे ग्रन्थे द्व्यङ्गुलप्रमाणः । पाणिनिः ५।४।८६,८७ ।

‡ तृतीया-तत्पुरुषस्याह—हरिणा त्रात इति । एवं खड्गच्छिन्नः, रथकल्या, मासपूर्व्वः,

**२६८ । मुख्यार्थोरसः ।** (मुख्यार्थ-उरसः ष)।

**मुख्यार्था-दुरस्शब्दात् षः स्यात् याद्वौ । अश्वोरसं, मुख्योऽश्व इत्यर्थः ।**

**पुरुषेषु उत्तमः पुरुषोत्तमः, अवन्तिषु ब्रह्मा अवन्तिब्रह्मः । ***

**इति षः ।**

---

माषौदनः, कर्णावरः, गुड़मिश्र इत्यादि । दध्ना मिश्रित ओदनः दध्योदनः, गुड़ेन मिश्रिताः धानाः गुड़धानाः, हस्तिना युक्तो रथः हस्तिरथः, एवम् अश्वरथः इत्यादौ शाकपार्थिवादित्वात् मध्यपदलोपः । चतुर्थीमाह—विप्राय दत्तमिति । एवं गोभ्यो हितः गोहितः, यूपाय दारु यूपदारु, कुण्डलाय सुवर्णं कुण्डलसुवर्णम् इत्यादि । अत्र वक्तव्यं—येषामिन्मते प्रकृति-विकृतिभावस्तत्रैव चतुर्थीतत्पुरुषः, अन्यत्र तु षष्ठीसमासः । यथा अश्वघासः इत्यत्र अश्वस्य घासः, न तु अश्वाय घासः । एवं रन्धनस्थाली इत्यादि । पञ्चमीमाह—वृकात् भयमिति । एवं व्याघ्रभीतः सर्पभीतः, अश्वपतितः, अर्जुनपराजितः, सर्परक्षितः, चटसिद्धः इत्यादि । षष्ठीमाह—कृष्णस्य सखा कृष्णसखः (२५१), महती देवस्य महत्या भूम्या वा घासः महाघासः (२२६), महतः तकारस्य लोकारस्य वा आकारः । ग्रामस्य तक्षा ग्रामतक्षः (२५६) ट-प्रत्ययः । मृगस्य सक्थि मृगसक्थं (२५८) । जालस्य सरः मण्डूकस्य सरः, जालसरसं मण्डूकसरसं (२६१) । राज्ञो गौः राजगवः (२६२) । वर्षाणां रात्रिः वर्षारात्रः (२६२) । एवं मासस्य जातः मासजात इत्यादि । अत्र वक्तव्यम्—"कृद्योगा षष्ठी समस्यते इति वाच्यम्," "प्रतिपदविधाना षष्ठी न समस्यते इति वाच्यम्"—इति वार्त्तिकद्वयम् । यथा इध्मस्य प्रव्रश्चनः इध्मप्रव्रश्चनः ; सर्पिषो ज्ञानम्, मातुः स्मरणम्, एधोदकस्य उपस्करणम्, चौरस्य रुजा, सर्पिषो नाथनम्, चौरस्योज्जासनम्, व्रतस्य पचनमित्यादि ।

* मुख्योऽर्थो यस्य तत् मुख्यार्थं, मुख्यार्थञ्च तत् उरश्चेति तस्मात् । अश्वस्य उरः प्रधानम् अश्वोरसम् । उरस्शब्दो हृदयवाचकः, अत्र तु लक्षणया प्रधानार्थः । "अश्वानामुर इव" इति भट्टोजिदीक्षितः । मुख्यार्थादिति किं, हस्तस्य उरः हस्तोरः इत्यत्र ष न इत्यर्थः ।

सप्तमीतत्पुरुषमाह—पुरुषोत्तमः । अत्र उदाहरणप्रदर्शनात् पुरुषाणामुत्तमः इति न षष्ठीसमासः "न निर्धारणे" (पाणिनिः २।२।१०) इति सूत्रेण निषेधात् । अवन्तिब्रह्म इत्यत्र (२६०) अप्रत्ययः । पाणिनिः ५।४।८१ ।

अत्र वक्तव्यं, सिद्धप्रवादिभिरसुष्ठु शौण्डादिभिश्च वा, यथा—सिद्धिप्रवः, कवीन्द्रयः; उरसिकांता, कण्ठेकालः । वनेचरः वनचरः, खेचरः खचरः, अग्निहारः अग्न्याहारः, सरसिजं सरोजमित्यादि । एवं परस्मैपदम्, आत्मनेपदम्, कर्मोरतः कर्णेजपः, पङ्क्तौचरः, अन्तेवासी इत्यादौ नित्यम् । मातुःष्वसा मातुःस्वसा मातृष्वसा, पितुःष्वसा पितुःस्वसा पितृष्वसा इत्यादौ विकल्पः । पाणिनिः ६।३।१—६।३।२०, ८।३।८४,८५,९५ ।

तस्यार्थे—विषये, वाच्ये अपत्यार्थष्णिकादिकं
प्रोज्झ्यान्यादेः, समाहारे, गस्त्रिधोत्तरपदे परे।

पञ्चभिर्गोभिः क्रीतः पञ्चगुः। *

३६९। गैक्यादतोऽपात्रादेरीप्।

(गैक्यात् ५।, अतः ५।, अपात्रादेः ५।, ईप् ।१।)।

गैक्यादकारान्तादीप् स्यात्, न तु पात्रादेः।
त्रयाणां लोकानां समाहारः त्रिलोकी।

---

* गो द्विगुः—तस्य तद्धितस्य अर्थे, समाहारे, उत्तरपदे परे च भवन् त्रिधा भवति। तद्धितार्थेऽपि द्विधा भवति, यथा—तद्धितप्रत्ययमात्रस्य अर्थे विषये इत्येकः, अपत्यार्थष्णिकादिकं प्रोज्झ्य अन्या अजादितद्धितस्य अर्थे वाच्ये इत्यपरः। ष्णिकादिकमिति ष्णिरेव ष्णिक इति छन्दोऽनुरोधात् स्वार्थे कः, ष्णिप्रभृतिकमित्यर्थः। यत्र तस्यार्थविषये समासः क्रियते तत्र तद्धितप्रत्ययोत्पत्तेः पूर्व्वावस्थायां समासे कृते ततः प्रत्ययोत्पत्तौ द्वाद्यादिः, यथा द्वयोर्मात्रोरपत्यमित्यत्र ष्णिप्रत्ययस्य अणप्रत्ययस्य उत्पत्तेः पूर्व्वावस्थायां द्वयोः मात्रोः एतयोरेकपदीभावे द्विमातृशब्दात् (३१५) अण्प्रत्यये कृते, (४१६) णि इत्यस्य वृद्धौ, (४२५) उर् कृते द्वैमातुरः इति पदम्। एवं पञ्चानां नापितानामपत्यं पाञ्चनापितिरित्यादि। वाच्ये यथा—पञ्चभिर्गोभिः क्रीतः पञ्चगुः इत्यत्र क्रीतेऽपि वाच्ये कारक-कारकात् (४२९) ठणे कादित्यादिना प्राप्तष्णिकप्रत्ययस्य अर्थे वाच्ये, समासेनैव तद्धितस्य उक्तार्थत्वे, उक्तार्थानामप्रयोगः इति न्यायात् तद्धितप्रत्ययस्य अनुत्पत्तौ, (२३०) गव्याप्यादेरिति ह्रस्वः। अजादेरिति किं—द्वयोर्मूर्द्ध्नोर्भवः द्विमूर्द्धन्यः, इत्यादौ तद्धितप्रत्ययात् पूर्व्वं समासे, द्विमूर्द्धन्शब्दात् (४११) य-प्रत्ययः, अत्र विषये एव द्विगुः, न तु वाच्ये। समाहारे यथा—त्रिभुवनम्। उत्तरपदे परे यथा पञ्चगवधनः। पाणिनिः २।१।५१।

पात्रादेस्तु, द्विपात्रं त्रिपात्रं, त्रिभुवनं, चतुर्युगं । *

**३७० । वानापः ।** (वा ।१।, अन्-आपः ५।) ।

अनन्तादापश्च ईप् स्यात् वा । पञ्चतक्षी पञ्चतक्षं, त्रिखट्वी त्रिखट्वं । †

**३७१ । तार्थे मानात् काण्डात्वक्षेत्रे ।**

(तार्थे ७।, मानात् ५।, काण्डात् ५।, तु ।१।, अक्षेत्रे ७।) ।

द्व्याढकी, त्रिकाण्डी रज्जुः । क्षेत्रे तु, त्रिकाण्डा भूमिः । ‡

**३७२ । पुरुषाद्वा ।** (पुरुषात् ५।, वा ।१।) ।

---

* यस्य एतं नैतं (समाहारद्विगुः) तस्मात् । पात्रमादिर्यस्य स पात्रादिः, न पात्रादि-रपात्रादिः तस्मात् । समाहार-द्विगूनां (१२२) क्लीबत्वेऽपि ईपो विधानात् नित्यक्लीबं सूचितम् । द्वयोः पात्रयोः समाहारः द्विपात्रम् । आदिना—त्रिगुणं चतुर्गुणं चतुःशतं चतुष्पथं चतुर्मुखं पञ्चगवं पञ्चनावं त्रिद्वारं त्रिपद्मम् इत्यादि प्रयोगतो ज्ञेयम् । अत इति किं, नद्योर्वा जनतां समाहारः त्रिजगत् इत्यादि । पाणिनिः ४।१।२१, २।४।१७, "पात्रादिभ्यः प्रतिषेधः" इति वार्तिकञ्च ।

† आन्तोऽत्र समुच्चयार्थः, तथाच—अनन्तात् आबन्ताच्च नैतात् ईप् स्यात्, समुच्चयेन (२१७) [illegible] आदिरर्थः । [illegible] इति आधात् प्रत्यय [illegible] । पञ्चानां तक्ष्णां समाहारः, अनेन ईपि (२२०) न-लोपे, (२१८) अकार-लोपे, पञ्चतक्षी । पक्षे अनेनैव [illegible], (१२२) क्लीबत्वम् । एवं त्रिखट्वी त्रिखट्वम् इत्यादि । "आबन्तः," "स्त्री नवीपञ्च वा च त्रिखट्वम्" इति वार्तिकद्वयम् ।

‡ तद्धितार्थविषयो परिमाणवचनात् ईप् स्यात्, काण्डशब्दात्तु अक्षेत्रे स्यात् इत्यर्थः । द्वयोः आढकयोः परिमाणवचनाः द्व्याढकी धान्यसंहतिः । एवं द्वौ द्रोणौ परिमाणमस्याः द्विद्रोणी-त्यादि । त्रयः काण्डाः (दण्डाः) परिमाणमस्याः त्रिकाण्डी रज्जुः । क्षेत्रे तु त्रिकाण्डा भूमिः क्षेत्रविशेषः । पाणिनिः ४।१।२२,२३ ।

द्विपुरुषी द्विपुरुषा । त्रिसंख्यं त्रिगवं त्रिनावं, त्रिखारं त्रिखारि, त्र्यहः । *

## ३७३ । द्वित्रिभ्यामञ्जलेः ।

(द्वित्रि: ५।, वा ।१।, अञ्जलि: ५।, अ: १।) ।

द्व्यञ्जलं द्व्यञ्जलि, द्व्यङ्गुलं, त्रिरात्रं । †

पञ्च गावो धनं यस्यासौ पञ्चगवधनः द्विनावधनः द्विखारधनः, द्व्यञ्जलप्रियः । ‡

इति गः ।

---

* परिमाणवाचकात् पुरुषशब्दादीप् स्यात् वा तद्धितार्थे द्विगौ । द्वौ पुरुषौ परिमाणमस्याः द्विपुरुषी द्विपुरुषा भित्तिः । त्रयाणां सख्यीनां समाहारः त्रिसख्यं (२५२) । त्रयाणां गवां समाहारः त्रिगवम् (२६२) । तिसृणां नावां समाहारः त्रिनावम् (२६४) । तिसृणां खारीणां समाहारः त्रिखारं (२६५), पक्षे त्रिखारि (१६७) । त्रयाणामह्नां समाहारः त्र्यहः (२५२), अभिधानात् पुंस्त्वम् । (२५४) सर्वैकदेशेत्यत्र समाहारवर्जनात् न अह्नादेशः । परिमाणभिन्ने तु द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा स्त्र्येव । पाणिनिः ४।१।२४ ।

† द्वित्रिभ्यां परादञ्जलेः अः स्यात् वा तद्धितार्थे द्विगौ । द्वावञ्जली परिमाणमस्य द्व्यञ्जलं अन्नं, पक्षे अप्रत्ययाभावे अन्नविशेषणत्वात् क्लीबत्वम् । एवं त्र्यञ्जलं त्र्यञ्जलि । सिद्धान्तिनस्तु तद्धितार्थभिन्ने द्विगौ द्वित्रिभ्यामञ्जलेरप्रत्ययं विदधाति, तन्मते द्वयोरञ्जल्योः समाहारः द्व्यञ्जलं द्व्यञ्जलि, एवं द्वावञ्जली प्रियौ यस्य स द्व्यञ्जलप्रियः द्व्यञ्जलिप्रियः इति समाहारोत्तरपदपरयोरुदाहरणम् । तद्धितार्थे तु द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिरिति । अतएव 'अतद्धितलुकीत्येव' इति भट्टोजिदीक्षितः । द्वयोरङ्गुल्योः समाहारः द्व्यङ्गुलं, तिसृणां रात्रीणां समाहारः त्रिरात्रं, समासान्त (१६०) सङ्ख्याव्ययादिति अप्रत्ययः । पाणिनिः ५।४।१०२, "संख्यापूर्वं रात्रं क्लीबम्" इति वार्त्तिकञ्च ।

‡ उत्तरपदे परे उदाहरति—पञ्चगवधनः, अत्र धने उत्तरपदे परे द्विगौ, (२६२) अप्रत्ययः, द्वे नावौ धनमस्य द्विनावधनः (२६४) अप्रत्ययः । द्वे खार्यौ धनमस्य द्विखारधनः द्विखारीधनः (२६५) विकल्पेन अः । द्वे अञ्जली प्रिये यस्यासौ द्व्यञ्जलप्रियः, (२५२।२५४) अ॰ [illegible] ।

## अव्ययीभाव-समासः (व) ।

वः कसामीप्यसादृश्य-साकल्यानुक्रमर्द्धिषु ।
वीप्सापर्य्यन्तयोग्यत्व-पश्चादर्थानतिक्रमे ।
शब्दप्रादुर्भावाभाव-यौगपद्येष्वनेकधा ॥ *

### ३७४ । वात् क्लेर्मोऽतोऽप्याः ।

(वात् ५।, क्लेः ६।, मः १।, अतः ५।, अप्याः ६।) ।

अकारान्तात् वात् परस्याः क्लेर्मः स्यात्, नतु प्याः । †
कृष्णमधिकृत्य प्रवृत्ता कथा, अधिकृष्णम् ।
अप्याः किं, कृष्णस्य समीपात् गतः, उपकृष्णात् गतः । ‡

### ३७५ । टौम्प्योर्वा । (टौ-म्प्योः ६॥, वा ।१।) ।

उपकृष्णं उपकृष्णेन कार्य्यं । उपकृष्णं उपकृष्णे स्थितः । §

---

* वः अव्ययीभावः—कं कारकं, सामीप्यं, सादृश्यं, साकल्यं निःशेषत्वम्, अनुक्रमः, ऋद्धिः समृद्धिः, वीप्सा युगपत् व्याप्तुमिच्छा, पर्य्यन्तः सीमा, योग्यत्वं, पश्चादर्थः, अनतिक्रमः, शब्दप्रादुर्भावः शब्दोत्पत्तिः, अभावः, यौगपद्यम् एककालत्वम्—एषु चतुर्दशसु अर्थेषु भवति, प्रयोगानुसारादनेकधा च भवतीत्यर्थः । स च अव्ययशब्दानां स्यादिभिः सह नित्यसमासः स्यादिति । पाणिनिः २।१।६ ।

† अकारान्तशब्दस्य अव्ययीभावसमासे कृते, (११८) क्लेर्लुक् क्वे चैकत्वेन क्लेर्लुकि, पुनर्लिङ्गसंज्ञायाम्, उत्पद्यमानविभक्तीनां स्थाने मः स्यात्, नतु पञ्चम्याः स्थाने इत्यर्थः ।

‡ कृष्णमधिकृत्येति, यद्यपि क इति सामान्येनोक्तं, तथापि द्वितीयासप्तम्योरर्थयोरेव बोधः । अत्र कृष्णमिति कर्म्मार्थे अधिशब्देन (२६६) व पूर्व्वमिति वधेः पूर्व्वनिपातः, (११८) कृष्णमिति द्वितीयाया लुपि, अधिकृष्ण इत्यस्य पुनर्लिङ्गसंज्ञायां जातस्य सेः स्थाने अनेन मः, एवं सर्व्वत्र । सप्तम्यर्थे तु स्त्रीष्वधिकृत्य प्रवृत्ता वा कथा वा अधिस्त्रि इत्यादि । उपकृष्णादिति अत्र, अनेन उदाहरणेनैव सामीप्योदाहरणं दर्शितम् । एवं कुम्भस्य समीपम् उपकुम्भम् इत्यादि, अत्र उपसंख्या-सामीप्यार्थः । पाणिनिः २।४।८३ ।

§ अकारान्तादव्ययीभावात् परयोः तृतीया-सप्तम्योर्मो वा स्यात् । कृष्णस्य समीपेन

३७६। लुक् परात्। (लुक् ।१।, परात् ५।)।

अकारान्तादव्ययात् तत् परस्याः सेर्लुक् स्यात्। *

३७७। सह: सोऽकाले।

(सह: ६।, स: १।, अकाले ७।)।

सहस्य स: स्यात्, न तु काले। हरे: सादृश्यं सहरि। काले तु, सहपूर्व्वाह्णं। †

तृणेन सह सकलमत्ति सतृणं। ज्येष्ठमनुक्रम्य अनुज्येष्ठं। मद्राणां समृद्धिः सुमद्रं। विष्णुं विष्णुं प्रति प्रतिविष्णु। अग्नि-ग्रन्थपर्य्यन्तमधीते साग्नि। रूपस्य योग्यं अनुरूपं। शिवस्य पश्चात् अनुशिवं। शक्तिमनतिक्रम्य यथाशक्ति। हरे: शब्दः प्रादुर्भूतः इतिहरि। पापस्याभावः अपापं। चक्रेण युगपद्धेहि सचक्रं। यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामाः यावच्छ्लोकं।‡

---

कर्ण्ये (गेव इति शेषः) इत्यर्थे उपकर्णं उपकर्णेन। तथान्यत्, कृष्णस्य समीपे स्थितः, आश्रित इति शेषः, उपकृष्णं उपकृष्णे इति। एवम् उपगङ्गम् उपगङ्गेन (२२२,१६७) इत्यादि। पाणिनिः २।४।८४।

* अकारान्तादन्यस्मात् हलन्तात् इदन्ताद् वा सेः सर्व्वासां विभक्तीनामित्यर्थः नित्यं लुक् स्यात्। पाणिनिः २।४।८२।

† अव्ययीभावे पूर्व्वपदस्थितस्य सहशब्दस्य सः स्यात्, न तु कालवाचिशब्दे परे इत्यर्थः। सहरि इत्यत्र सहशब्दस्य सादृश्यम् अर्थः, इकारान्तात् सेर्लुक्। सहपूर्व्वाह्णमित्यत्र कालवाचि-पूर्व्वाह्णे परे सहस्य न सः, पूर्व्वाह्णेन सहेत्यर्थः। पाणिनिः ६।३।८१।

‡ सकलमत्ति सर्व्वमेवात्ति—तृणेन सह सकलमत्ति तृणमपि न त्यजतीत्यर्थः सतृणं, अत्र सहशब्दस्य साकल्यम् अर्थः। ज्येष्ठ-मनुक्रम्य ज्येष्ठस्य श्रेणी भूत्वा अधीते इत्यर्थः अनुज्येष्ठं, अत्र श्रेण्यर्थे अनुना योगे (१८८) ज्येष्ठमिति द्वितीया, अनुशब्दस्य आनुपूर्व्यमर्थः। मद्राणां मद्रदेशानां समृद्धिः सुखेन वर्त्तते इत्यर्थः, एवं सुभिक्षं वर्त्तते, अत्र सुशब्दस्य समृद्धिरर्थः। विष्णुं विष्णुं प्रतीति (१८८) द्वितीया, प्रतिविष्णु इत्यत्र समासेन वीप्साया उक्तत्वात् न द्विरुक्तिः। एवं परित्यज्य अनुविष्णु इत्यादि। साग्नि इत्यत्र पर्य्यन्तार्थोऽव्ययीभावः, सहशब्दस्य सः,

३७८। शरद्विपाडनसश्चेतोमनोदिगुपान-
द्धिमवद्दिदिवनडुद्दिक्चतुर्यत्तदोऽः।

(शरद्-विपाश्-अनस्-[चनस् ?]-चेतस्-मनस्-दिश्-उपानह्-हिमवत्-दिश्-दिव्-अनडुह्-दिश्-चतुर्-यत्-तदः ५।, अः १)।

एभ्यः अः स्यात् वे। उपशरदं।*

३७९। जराया जरस् च।

(जरायाः ६।, जरस् ।१।, च ।१।)।

उपजरसं।†

---

चयिष्यमाणात् परं किमपि नाधीते इत्यर्थः। यौग्यत्वार्थे अनुरूपं ददातीत्यादि। अनुविषमजिति पश्चादर्थे, मत्ताः अनुविष्णुं तिष्ठन्तीत्यर्थः। एवम् अनुरथं पादाताः इत्यादि। यथाशक्ति इति शक्तिमनतिक्रमार्थे ददातीत्यर्थः। एवं यथावयं व्यवस्यतीत्यादि। यथापि पतितमात्रयोगे विवीता (२८६)। इतिहरि इत्यत्र इतिशब्दस्य प्रादुर्भावोऽर्थः, हरिरिति शब्दो लोके प्रकाशित इत्यर्थः। अपापजिन्न अनर्थोऽभावः, स च संसर्गाभाव एव, न तु भेदः। (२२१) नञः स्थाने अः। एवं निर्मक्षिकमित्यादि। चक्रेण युगपत् धेहि—हे शिष्यो चक्रेण सह युगपदेकदा मद्रं धारय इत्यर्थः, सहस्य सः। यथेकथा इत्यत्र एकस्तुवादरणसमाप—सावप्तीयं अनुत-मयासाः श्रौतानाम् इयत्ता मन्त्राणाम् इयत्ता अवधारिता इत्यर्थः। एवं सावग्नीकमध्यं स्राक्षरात् निमज्जयति इत्यादि। ये ये तथाभूताः यथातथं, ये ये यथापूर्वाः यथायथम्। तिष्ठन्ति वहन्ति आयान्ति गावो यस्मिन् काले, तथाभूतं तिष्ठद्गु वहद्गु आयतीगवम्—इत्यादयो ज्ञेयाः (पाणिनिः २।१।१७)।

* शरद् विपाट् च अनस् चेतस् मनस् दिट् च उपानह् हिमवान् दिव् च अनडुह् दिक् च चतुर् यद् तद् एभ्यः तथात्। शरदः समीपं उपशरदं, एवम् उपविपाशं, उपानसं, उपचेतसं, उपमनसं, उपदिशं, उपोपानहं, उपहिमवतं, उपदिवं, उपानडुहं, प्रत्यनडुहं, प्रतिदिशं ('प्रतिदिशमभिमन्त्र्य' इति भट्टिपद्यम्), उपचतुरं, उपयदं, उपतदं इति। पाणिनिः ५।४।१०७। अत्र पाणिनिसूत्रे 'अनस्' इत्यत्र 'चेतस्' इत्यस्य स्थाने चनस् इति पठितम्, किन्तु तत्र तत्र तत्र चिन्त्यम् एतदपि पाणिनिवृत्तौ प्रसङ्गे। पद्मनाभीयेऽपि चनस् इत्येव पठति, न तत्र प्रयुक्तमेतत्।

† जरायाः अः स्यात् वे, तस्मिन् जरस् इत्येवम्। जरायाः समीपम् उपजरसम्। पाणिनिः ५।४।१०७। शरत्प्रभृतिषु पाठान्तरमेतं द्रष्टव्यम्।

३८० । सरजसोपशुने । (सरजस-उपशुनं १।)।

निपात्ये । *

३८१ । सम्परःप्रत्यनुभ्योऽक्ष्णः ।

(सम्-परस्-प्रति-अनुभ्यः ५।, अक्ष्णः ५।)।

समक्षं । †

३८२ । अनः । (अनः ५।)।

अनन्तात् अः स्यात् वे । अध्यात्मं । ‡

३८३ । क्लीबाद्वा । (क्लीबात् ५।, वा ।१।)।

उपचर्मं उपचर्म । §

---

* रजसा सह वर्त्तमानमिति सरजसं, निपातनात् अः । शुनः समीपम् उपशुनं, निपातनात् श्वन्शब्दस्य वस्य उः, अप्रत्ययश्च । "सरजसं पद्ममित्यसाधु" इति क्रमदीश्वरः, सरजः पद्ममित्येव साधु । अतएव "सरजस्तामव्रजेरपां निपाताः" इति किराते विन्यस्तम् । पाणिनिः ५।४।७७ ।

† सम् च परस् प्रतिश्च अनुश्च तेभ्यः । एभ्यः परात् अक्ष्णः अः स्यात् वे । अक्ष्णोः समीपं समक्षं, अक्ष्णोः परः परोक्षं, परस्शब्दात् निपातनात् अत्-प्रत्ये परत् इत्यव्ययम् । "प्रतिपरसमनुभ्योऽक्ष्णः" इति सूत्रे अक्ष्णः परमिति विग्रहे निपातनात् परस्य ओकारादेशः इति भट्टोजिदीक्षितः । क्रमदीश्वरस्तु "परेः परस् च" इति सूत्रं विन्यस्य परिशब्दात् परस्मादेश वदति । परोक्षमित्यत्र अव्ययत्वं अम्भावश्च । एषु अक्षिशब्दात् अव्ययत्वे (२५८) इकारलोपः । परोक्षः परोक्षा इति तु इन्द्रियवाचिना अकारान्तेन अक्षशब्देन, अक्षाणां प्रति प्रत्यक्षं, अक्षाणां परः परोक्षः इति षष्ठीसमासे (२६६) अर्थं पूर्वमिति पूर्वनिपातः । अथवा पारस्कारादित्वात् इति भट्टोजिदीक्षितः । पाणिनिः ५।४।१०७ । अरत्प्रभृतिभ्यश्चाप्येतत् वक्तव्यम् ।

‡ इकारस्य लोपात् अनन्तस्य अत्वं । आत्मनः अधिकृत्य अध्यात्मं (२२७,२५८) । एवम् अधिराजम् प्रतिभूमि इत्यादि । 'अनश्चाव्ययीभावे तु परमात्मं' इति क्रमदीश्वरः । पाणिनिः ५।४।१०८ ।

§ क्लीबलिङ्गात् अनन्तात् अः वा स्यात् अव्ययीभावे । चर्मणः समीपं उपचर्मं उपचर्म, एवम् अधरात्रं प्रति प्रस्थं प्रस्थः इत्यादि । पाणिनिः ५।४।१०९ ।

३८४ । अप्नदीपौर्णमास्याग्रहायणीभिरेर्वा ।

(अप् —भिरेः ५।, वा ।१।) ।

उपसमिधं उपसमित्, उपनदं उपनदि । *

इति कः ।

---

षट् समासाः ।

३८५ । पथ्यप्पुरः से । (पथिन्-अप्-पुरः ५।, से ७।) ।

एभ्यः पः स्यात् से सति । सखिपथो, रम्यपथो देशः, महापथः, दक्षिणापथः, चतुष्पथं, उपपथं, विमलापं सरः, विष्णुपुरं । †

३८६ । अन्तर्गेर्बोऽपोऽनात् ।

(गि-अन्तर्-गेः ५।, ई ।१।, पः ६।, अपः ६।, अनात् ५।) ।

एभ्योऽनवर्णान्तेभ्योऽपोऽकार ईः स्यात् ।

---

* अप् प्रत्याहारत्वान्, नदी-पौर्णमासी-आग्रहायणी-गिरिभ्यश्च पः स्यात् से वा । अत्र वा-ग्रहणं परत्र नित्यार्थम् । समिधः समीपम् उपसमिधम् उपसमित्, एवम् उपदृषदम् उपदृषत् । नद्याः समीपम् उपनदं उपनदि । एवम् उपपौर्णमासम् उपपौर्णमासि । उपाग्रहायणम् उपाग्रहायणि । उपगिरम् उपगिरि । [illegible] दीर्घे कः (१६०) । पाणिनिः ५।४।११०—११२ ।

† पन्थाः [illegible] [illegible] अत् प्रत्ययः । से इति समासान्तप्रत्ययार्थम् । [illegible]— सखा च पन्थाश्च तौ (द्वः) । रम्यः पन्थाः यत्र सः (बः) । महांश्चासौ पन्थाश्चेति (कः) । दक्षिणस्यां दिशि दक्षिणे देशे वा पन्थाः (षः), दक्षिणा इति तु (११०) [illegible], दक्षिणादिभ्यात् (११८) न [illegible] । [illegible] । चतुर्णां पथां समाहारः (द्विः) । पथः समीपे (अः) । [illegible] (११०) [illegible] (१४७) [illegible] । विमलाः आपो यस्मिन् सः । [illegible] । विष्णोः पूः विष्णुपुरमिति [illegible] । यद्यपि [illegible] तथापि [illegible] । पाणिनिः ५।४।७४, "पथः संख्याव्ययादेः" इति वार्त्तिकञ्च ।

द्वीपं अन्तरीपं समीपं । अनात् किं, प्रापं । *

३८७ । समापानूपौ । (समाप-अनूपौ १॥) ।

निपात्यौ । समापो देवयजनं, अनूपो देशः । †

३८८ । सम् तुम् मनः-कामे ऽवश्यम् क्ये ऽन्त्यलोपं सम्-मांसौ तु हित-तते पाक-पचने वा ।

(सम् ।१।, तुम् ।१।, मनः-कामे ७, अवश्यम् ।१।, क्ये ७, अन्त्यलोपं २।, सम्-मांसौ १॥, तु ।१।, हित-तते ७, पाक-पचने ७, वा ।१।) ।

सम् तुम् च मनः-कामयोः, अवश्यम् क्ये, अन्त्यलोपं याति ; सम् हित-ततयोः, मांसः पाक-पचनयोर्वा ।

समनाः सकामः, रन्तुमनाः रन्तुकामः, अवश्यसेव्यः, सहितः संहितः, सततः सन्ततः, मांपाकः मांसपाकः, मांपचनं मांसपचनं । ‡

---

* द्वी च अन्तश्च सिश्च तत् तस्मात् । न चः अनवचात् । द्विशब्दात् अन्तर्शब्दात् अपवर्गात्सिकशैव अप्‌शब्दस्य अकार ईः स्यात् समासे । द्वयोर्दिशोरापो यत्र तत् ("द्विर्गता आपोऽस्मिन्निति द्वीपः" इति क्रमदीश्वरः ; द्वीपमिति भट्टोजिदीक्षितः), अन्तर्गता आपो यत्र, समवेत् आपो यत्र इति वाक्यानि । एवम् नीपं प्रतीपं इत्यादि । प्रगता आपो यत्र तत् प्रापं । पाणिनिः ६।३।९७, "ईत्वमनवर्णादिति वक्तव्यम्" इति वार्त्तिकम् ।

† समीचीनाः (समा इति भट्टोजिदीक्षितः) आपो यत्र स समापः देवयजनं (यज्ञः) । ("समापं नाम देवयजनम्" इति तु क्रमदीश्वरः ।) अनुगता आपो यत्र सः अनूपः देशः । एतयोरीत्वाभावोऽनिपातनम्, अन्यत्र समीपम् अन्वीपमिति । पाणिनिः ६।३।९७, "समाप-ईत्वप्रतिषेधः" इति वार्त्तिकम् ।

‡ सम् तुम् इति शब्दौ मनः-कामाभ्यां परयोः [illegible] । [illegible] मांसस्य च हितस्य ततस्य परयोः, पाकस्य पचनस्य परयोः । सम् मनः-कामयोः, तुम् मनः-कामयोः, अवश्यम् क्ये अन्त्यलोपं याति [illegible] इति । सम् हित

### ३८९। धुरोऽनक्षस्य।
(धुरः ६।, अनक्षस्य ६।, अः १।)।

राजधुरा। अक्षस्य तु अक्षधूः।*

### ३९०। ऋचः। (ऋचः ६।)।

ऋचः परः अः स्याद् वे। अर्द्धर्चः।†

### ३९१। नञ्बह्वोर्माणवक-चरणे।
(नञ्-बह्वोः ६।, माणवक-चरणे ७)।

अनृचो माणवकः, बह्वृचः चरणः। अन्यत्र अनृक् साम, बह्वृक् सूक्तं।‡

---

[illegible] (११६३) [illegible] (९८२)। [illegible]

* [illegible] (२१०)। [illegible]

† [illegible]

‡ [illegible]

३९२ । प्रत्यन्ववात् सामलोम्नः ।

(प्रति-अनु-अवात् ५।, साम-लोम्नः ६।) ।

प्रतिसामं प्रतिलोमं । *

३९३ । अक्ष्णोऽचक्षुषि । (अक्ष्णः ५।, अचक्षुषि ७।) ।

गवामक्षीव गवाक्षः । चक्षुषि तु, विप्राक्षि । †

३९४ । ब्रह्महस्तिराजपल्यात् वर्चसः ।

(ब्रह्म—पल्यात् [पल्यात् ? ] ५।, वर्चसः ६।) ।

ब्रह्मवर्चसं हस्तिवर्चसं राजवर्चसं पल्यवर्चसं । ‡

३९५ । समवान्धात् तमसः ।

(सम्-अव-अन्धात् ५।, तमसः ६।) ।

सन्तमसं । §

---

* प्रतिश्च अनुश्च अवश्च तस्मात् । एभ्यः पराभ्यां सामन् लोमन् शब्दाभ्यां अः स्यात् से इति । साम साम प्रति, लोम लोम प्रति, लोमानां वा । एवम् अनुलोमम् अनुसामम् । पाणिनिः ५।४।७५ ।

† न चक्षुः अचक्षुः तस्मिन् । अक्षिशब्दात् अः स्यात् समासे, अचक्षुषि वाच्ये । गवाक्षो वातायनम् । विप्रस्य अक्षि । [illegible] इति [illegible] वाच्ये अः । [illegible] गवाक्ष इति [illegible] उदाहरति । पाणिनिः ५।४।७६ । अत्र "[illegible]" इति [illegible] वार्तिकं [illegible] न [illegible] ।

‡ ब्रह्मा च हस्ती च राजा च पल्यञ्च तस्मात् । एभ्यः परात् वर्चसः अः स्यात् से । [illegible] । ब्रह्मणो वर्चः, हस्तिनो वर्चः, राज्ञो वर्चः, पल्यस्य वर्चः इति वाक्यानि । अत्र, पाणिनेः [illegible] पल्यस्थाने पल्य इति पाठो [illegible] । [illegible] इति [illegible] । पाणिनिः ५।४।७८, "पल्यराजभ्यां चेति वक्तव्यम्" इति वार्त्तिकम् ।

§ एभ्यः परात् तमसः अः स्यात् से । [illegible] । [illegible] सन्तमसम्, अन्धतमसम्, अवतमसम् । पाणिनिः ५।४।७९ ।

३९६। श्वोवसीयस-श्वःश्रेयस-निःश्रेयसं।

(श्वोवसीयस—निःश्रेयसं १।)।

एते निपात्याः। *

३९७। तमान्ववाद्रहसः।

(तम-अनु-अवात् ५।, रहसः ५।)।

तमरहसं। †

३९८। प्रत्युरसानुगवे। (प्रत्युरस-अनुगवे १।)।

एते निपात्ये। ‡

३९९। गेरध्वनः। (गेः ५।, अध्वनः ५।)।

प्राध्वो रथः। §

---

* अव्ययानामनेकार्थत्वात् (श्वःशब्दः आशीर्वाचकः) श्वः शोभनं वसीयः श्रेयः (बहुव्रीहिवत्) (बहुशब्दः प्रशंसावाची) श्वोवसीयसं कल्याणं, श्वः शोभनं श्रेयः श्वःश्रेयसं कल्याणं, निर्निश्चितं श्रेयो निःश्रेयसं निर्वाणम्। अत्र वसीय इत्यत्र वसवीय इति केषांचिन्मतम्। पाणिनिः ५।४।७७,८०।

† एभ्यः परात् रहसः अः स्यात् वे। तम-धात्वोः कर्मणि क्तः तप्तं, ततश्च तप्तं रहो येनेति, अन्वक्तं यत् भवेत् [illegible] तत् तमरहसं विदुः; अथवा "परीक्षणविधानं हि बहुधा [illegible]। तस्य वक्तव्येति [illegible] विदुः॥" इति। रहोरसः अनुरहसम्, अवरहसम्। पाणिनिः ५।४।८१।

‡ उरसि प्रति (वर्तते) प्रत्युरसं, [illegible] अनुगवम्। यथा यातु (व्यायाम) (आयामे इति पा.) अनुगवं शकटम्। ([illegible] पाणिनि[illegible]) [illegible] पाणिनिः ५।४।८२,८३।

§ गेः परात् अध्वनः अः स्यात् वे। प्रगतः अध्वानं, प्रगतोऽध्वा [illegible] इति [illegible] रथः। एवं प्राध्वं शकटम्। गेः किं, [illegible]। पाणिनिः ५।४।८५।

४००। पाण्डूदक्कृष्टात् भूमेः।

(पाण्डु-उदक्-कृष्टात् ५।१, भूमेः ५।१)।

पाण्डुभूमो देशः। *

४०१। संख्याया नदीगोदावरीभ्याञ्च।

(संख्यायाः ५।१, नदी-गोदावरीभ्यां ५।२, च ।१।)।

पञ्चनदं, सप्तगोदावरं, द्विभूमः प्रासादः। †

४०२। निसः शतो डः। (निसः ५।१, शतः ५।१, डः १।१)।

निस्त्रिंशः, निश्चत्वारिंशः। ‡

४०३। सूतसुरभिपूतेर्गन्धादिर्वा तूपमानात्।

(सु-उत्-सुरभि-पूतेः ५।१, गन्धात् ५।१, इः १।१, वा ।१।, तु ।१।, उपमानात् ५।१)।

सुगन्धिः, पद्मगन्धिः पद्मगन्धः। §

---

* उदक् इति उत्पूर्वात् अञ्चधातोः कर्त्तरि क्विप्, कृष्ट इति कृषधातोः क्तः। एभ्यः परात् भूमेः अः स्यात् से। पाण्डुर्भूमिर्यस्मिन् स पाण्डुभूमो देशः। उदीची उदक् भूमिर्यस्मिन् स उदग्भूमो देशः, पुंवद्भावादुदगिति। कृष्टा भूमिर्यस्मिन् स कृष्टभूमो देशः। कृष्टस्थाने 'कृष्ण' इति काशिका सिद्धान्तकौमुदी च। पाणिनीये ५।४।७५ सूत्रे "कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृतः" इति हरिकारिका।

† संख्यायाः पराभ्यां नदी-गोदावरीभ्यां भूमेश्च अः स्यात् से। पञ्चानां नदीनां समाहारः, सप्तानां गोदावरीणां समाहारः, द्वे भूमी यस्य सः इति वाक्यानि। अत्र नदीशब्देन (८६)-सूत्रोक्तपारिभाषिकनदीसंज्ञको न गृह्यते, (तथा सति 'स्त्री' इत्येव स्यात्), नापि च लोकप्रसिद्धं किन्तु नदीस्वरूपवचनम्; अतः शतद्रुं विपाट्नदमित्यादि। पञ्चनदमित्यादौ संख्यात् समाहारद्विगुः इति पाणिनिः। पाणिनिः २।१।२०।

‡ निसः परात् शत् शब्दात् डः स्यात् से। निर्गता त्रिंशत् यस्य स निस्त्रिंशः, एवं निश्चत्वारिंशः, निष्पञ्चाशः। "निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य। निर्गत-त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः।" इति भट्टोजिदीक्षितः। निसः किं, दुस्त्रिंशत् इत्यादि। "[illegible] निस्त्रिंशाद्यर्थम्" इति वार्त्तिकम्।

§ सु उत् सुरभि पूति इत्येतेभ्यः गन्धात्। एभ्यः परात् गन्धात् इः स्यात् से, उपमान-

## ४०४ । नार्च्चायां स्वतेः सख्यादेः ।

(न ।१।, अर्च्चायां ७।, सु-अतेः ५।, सख्यादेः ५।, अः १।) ।

स्वतिभ्यां परात् सख्यादेरो न स्यात् पूजायां ।
शोभनो राजा सुराजा, अतिशयेन राजा अतिराजा ।
अर्च्चायां किं, ग्राममतिक्रान्तः अतिगवः । *

## ४०५ । किमः क्षेपे । (किमः ५।, क्षेपे ७।) ।

किंराजा । †

## ४०६ । नञोऽह्वे । (नञः ५।, अ-ह-वे ७।) ।

नञः परात् सख्यादेरो न स्यात्, न तु ह-वयोः ।

---

वाचकात् परात्तु वा इत्यर्थः । शोभनो गन्धो यस्य सः सुगन्धिः, एवं उद्गन्धिः सुरभिगन्धिः पूतिगन्धिः । पद्मस्येव गन्धो यस्य सः पद्मगन्धिः पद्मगन्धः । अत्र समवायसम्बन्धेन वर्त्तमानात् गन्धात् इः स्यादिति सम्प्रदायः, तेन सुगन्धी वायुरिति, वस्तुतः शिष्टप्रयोगानुसारेणैव । किञ्च गुणवाचिनो गन्धादेव इः, तेन शोभनानि गन्धद्रव्याणि यस्यां सा सुगन्धा विपणिरिति । सूत्सुरभिपूतेरिति किं, तीव्रगन्धः । पाणिनिः ५।४।१३५,१३७ । "गन्धस्येत्त्वे तदेकान्तग्रहणम्" इति वार्त्तिकम् । तदर्थश्च—"तदवयव इवाविभागेन लक्ष्यमाणो यो गुणवाची गन्धशब्दो गृह्यते, न तु द्रव्यवाची" ।

* सुश्च अतिश्च तस्मात् स्वतेः । प्रशंसार्थे वर्त्तमानाभ्यां सु-अतिभ्यां परात्, (३५२) सख्याद्यन्तात् इत्यस्य (३९८) नेरष्टन् इत्यनेन च येऽप्रत्ययौ विहितः स न स्यादित्यर्थः । सुराजा अतिराजा उभयत्र प्रशंसायां स्वती । अतएव "सुराज्ञि देशे राजन्वान्" इत्यमर-सिंहनम् । एवम् अतिशयेन श्वा अतिश्वा, सुगौः सुराधिः सुपन्थाः इत्यादि । अतिक्रम-णत्वेन न प्रशंसार्थोऽतिः, एवं अतिसखः इत्यादि । परमराजः उत्तमराजः इत्यादौ अर्च्चायोगेऽपि स्वत्यभावात् भवत्येव । पाणिनिः ५।४।६९ ।

† निन्दायां वर्त्तमानात् किमः परात् सख्यादेरो न स्यात् । कुत्सितो राजा किंराजा, यो न रक्षति प्रजाः । एवं किंगौः, यो न वहति भारम् । निन्दायां किं, कस्य राजा किंराजः, कस्य गौः किंगवः इत्यादि । "स किंसखा साधु न शास्ति योऽधिपम्" इति किराते । पाणिनिः ५।४।७०, २।१।६४ ।

असखा। ब-व्री तु—अनपं सरः; अधुरं। *

४०७। पथो वा। (पथः ५।१, वा ।१)।

अपथं अपन्थाः। ब-व्री तु—अपथो देशः, अपथं। †

४०८। कत् कच्त्रिरथवदे।

(कत् ।१।, कु ।१।, अच्-त्रि-रथ-वदे ७।)।

कोः स्थाने कत् स्यात् ते अजादौ परे। कदन्नं कत्त्रयः। ‡

४०९। काक्षे। (का ।१।, अक्षे ७।)।

काक्षं। §

---

* [illegible], न [illegible] तस्मिन्। ब-व्री-भिन्न-समासे नञः परात् सख्यादेरो न स्यात्। असखा इति नञ्-तत्पुरुषः। न सन्ति आपो यत्र तत् अनपं सरः, अत्र (१८६) अ-प्रत्ययः। धुरोऽभावः अधुरं, अत्रापि (१८६) अ-प्रत्ययः। पाणिनिः ५।४।७१।

† ब-व्री-भिन्न-समासे नञः परात् पथः अः स्याद्वा। न पन्थाः इति तत्पुरुषे अपथं अपन्थाः। नास्ति पन्था यस्मिन् इति अपथो देशः, पथोऽभावः इति अपथं, उभयत्र (१८५) नित्यम् अ-प्रत्ययः। पाणिनिः ५।४।७२।

‡ अच् त्रिः रथः वदः, तस्मिन्। अत्र कु इति शब्दः कुत्सितवाची, तेन कोः (पृथिव्याः) अधिपतिः कुपतिः इत्यादौ न स्यात्। कुत्सितमन्नं कदन्नं, एवं कदाहारः, कदौषधम्। कुत्सिताः त्रयः कत्त्रयः, एवं कद्रथः, कद्वदः। अत्र सूत्रस्य कर्मधारय एवाभिधानात् कुत्सितो ऋषिः कुऋषिः इत्यादौ न स्यात्, अतः पाणिनिसूत्रे "तत्पुरुषे" इत्युक्तम्। अत्र वक्तव्यम् "तृणे च जातौ" इति (पाणिनिः ६।३।१०३) सूत्रेण कत्तृणमिति। पाणिनिः ६।३।१०१,१०२, "कद्भावे त्रावुपसंख्यानम्" इति वार्त्तिकञ्च।

§ अक्षशब्दे परे कोः का स्यात् ते। कुत्सितमक्षं (इन्द्रियं) काक्षं। अक्ष इति सामान्यतो ग्रहणात् कुत्सिते अक्षिणी यस्य स काक्षो मित्रः इत्यत्र अक्षिसक्थ्यात् (२२४) षे सतेऽपि स्यात्। "तत्पुरुषेण तत्पुरुषः, अक्षिशब्देन बहुव्रीहिर्वा" इति भट्टोजिदीक्षितः। पाणिनिः ६।३।१०४।

४१० । पथिपुरुषे वा । (पथि-पुरुषे ७, वा ।१।) ।

कापथः कुपथः, कापुरुषः कुपुरुषः । *

४११ । कोरीषदर्थे । (कोः ६।, ईषदर्थे ७।) ।

ईषज्जलं काजलं । †

४१२ । कत्कवौ चाग्न्युष्णे ।

(कत्-कवौ १।।, च ।१।, अग्नि-उष्णे ७।) ।

कदग्निः कवाग्निः काग्निः, कदुष्णं कवोष्णं कोष्णं । ‡

---

* कोः का स्यात् वा पथि-पुरुषयोः परयोः । कुत्सितः पन्थाः, कुत्सितः पुरुषः, इति वाक्यद्वयम् । अत्र द्रष्टव्यम्—"का पथ्यक्षयोः" इति पाणिनिसूत्रे (६।३।१०४) पथिन्शब्दात् नित्यं कापथः इति पदम् ; पश्चात् "पथि च च्छन्दसि" इति सूत्रे (६।३।१०८) वेदे कवपथः कापथः कुपथः इति पदत्रयं दर्शितम् । बोपदेवेन तु लौकिकालौकिकमतं लौकिकत्वेन प्रयुक्तम् । विचार्यमत्रावत्—कापथः इत्यत्र पुंस्त्वं वार्त्तिकमतेनासङ्गतं, यतः "पथः संख्याव्ययादेः" इत्यत्र क्लीबत्वमुक्तम् (९८५ सूत्रं द्रष्टव्यम्) । अमरकोषटीकायां—"कुत्सितः पन्थाः कापथम् । कुपथ-मित्यपि साधु ।" इति । "पथिशब्देन समासे नित्यं क्लीबः" । पथिशब्दस्य समासेन पक्षान्तरेऽपि क्लीबत्वाभावः" इति बोपदेवः । एतच्च द्रष्टव्यं—सर्वेषामपि प्रकाशितानां सिद्धान्त-कौमुदीनां कापथः इति पाठो दृश्यते ; सिद्धान्तकौमुदीसम्मतपाठस्तु कापथम् इति पाठः । बोपलिङ्गप्रकटीकृते पदके पाणिनीये च कापथः इति पुंलिङ्गमेवास्ति । सुपद्मे तु समास-प्रकरणे "पथः संख्याव्ययात् क्लीबे" इति ९८५सूत्रे कापथमित्युक्तं, तद्धितप्रकरणे तु १५८-सूत्रे कापथः इत्युक्तम् इति पूर्वापरविरोधः । हैमोक्तसूत्रटीकायान्तु "वार्त्तिकमतावलम्बे क्लीबत्वम्, पदान्तरपक्षे तु कुपथः" इति विविक्तम् । पाणिनिः ६।३।१०९ ।

† ईषदर्थे वर्त्तमानस्य कोः का स्यात् वै । कोरेकस्य कुत्सिताल्पार्थयोरनुवर्त्तमानत्वेन । प्रयोगानुसारेण कथित् कविरपि परे इत्थं । एवम् ईषदुष्णं कावोष्णमित्यादि । अत्रापि च "ईषदर्थेऽपि कापाठ—कामधुरं कामरे" इत्यादि । पाणिनिः ६।३।१०५ ।

‡ ईषदर्थे कोः स्थाने कत्-कवौ, चकारात् का च स्यात् अग्नि-उष्णयोः परयोः । ईष-दग्निः, ईषदुष्णमिति वाक्यद्वयम् । पाणिनिः ६।३।१०७ ।

**४१३। ज्योतिर्जनपद रात्रि नाभि बन्धु गन्ध पिण्ड लोहित कुक्षि वेणी ब्रह्मचारि तीर्थ पत्नी पक्षे समानः सः।** (ज्योतिः—पक्षे ७, समानः १।, सः १।)।

समानं ज्योतिर्यस्यासौ—सज्योतिः। *

**४१४। रूप नाम गोत्र स्थान वर्ण वयो वचन धर्म जातीयोदर्य्ये वा।** (रूप—उदर्य्ये ७, वा।१।)।

सरूपः समानरूपः। †

इति स-पादः।

---

* एषु बहुव्रीहिषु परेषु समानः सः स्यात् ये सति। सज्योतिः—"यस्मिन् ज्योतिषि चादित्ये नक्षत्रे वा संजातं तदुत्तमयपर्यन्तमनुवर्तमानमाशौचं सज्योतिरित्युच्यते।" इति तत्त्वबोधिनी। एवं सजनपदः, जनपदपर्य्यायपदत्वात् समानो देशो यस्यासौ सदेशः। सरात्रिः सनाभिः सबन्धुः सगन्धः सपिण्डः सलोहितः सकुक्षिः सवेणीकः। ब्रह्मचार्य्यादि-सम्बन्धेन समानशब्दः एकार्थ एव न तु तुल्यार्थः, समानम् एकं ब्रह्म वेदं चरतीति वाक्ये (८८१) ग्रहादित्वात् णिनि, ब्रह्मचारिन्शब्दे परे समानः सः, एकब्रह्मव्रताचारा मिथः सब्रह्मचारिण उच्यन्ते। समाने एकस्मिन् तीर्थे गुरौ वसतीति (४२८) यप्रत्यये तीर्थ-शब्दे परे समानः सः; निर्व्याकरणपक्षे (यप्रत्यये) समानं तीर्थं यस्य इति बहुव्रीहिः। तीर्थमुपनिषदुक्तपि गुरौ इति, सतीर्थ्योऽधिकगुरव इति चामरः। पाणिनौ संक्षिप्तसारे च बहुव्रीहि-तीर्थशब्द एव दृश्यते। समान एकः पतिर्यस्याः इति वाक्ये निपातनात् पत्युः पत्नादेशे ङीपि समानस्य सः सपत्नी (पाणिनिः ४।१।३५)। एवं समानः पक्षः (पक्षाः) सपक्षः। पाणिनिः ६।३।८५,८६,८७। एषु सूत्रेषु परत्वे च नभ पिण्ड लोहित कुक्षि वेणी पत्नी पक्ष शब्दा न दृश्यन्ते "बालमन्तु पुनः पक्षपर्णजातीयान्यपि पठति" इति क्रमदीश्वरः। वेणुशब्दोऽपि संक्षिप्तसारे दृश्यते।

† एषु शब्देषु परेषु समानः सः स्यात् वा। समानं रूपं यस्यासौ सरूपः। समानमेकं नाम यस्य स सनामा। एवं सगोत्रः सस्थानः सवर्णः सवयाः सवचनः सधर्मा (२७७)। समानस्य प्रकारः इति (४५०) सजातीयः। समाने एकस्मिन् उदरे भवतीति (४२८) उदरशब्दात् यप्रत्यये सोदर्य्यः। सोदर-समोदरशब्दौ तु उदरेण सह वर्तते योऽसौ इति (२९१) सूत्रेण सिद्धौ। एषु विकल्पपक्षे समानस्थितिः। पाणिनिः ६।३।८५,८८। उदर्य्ये वर्जयित्वा सर्वे पाणिनिमते नित्यम्, चान्द्रमते तु विकल्पः।

४१५। बाह्वाद्यतोऽश्वाद्याद्गर्गादेर्नडादेः पितृष्वस्रादे रेवत्यादेः शेषशिवादेः ष्णि-ष्णेय-ष्ण्य-ष्णायन-ष्णीय-ष्णिक-ष्णा अपत्ये।

(बाह्वाद्यतः ५।, अश्वाद्यादेः ५।, गर्गादेः ५।, नडादेः ५।, पितृष्वस्रादेः ५।, रेवत्यादेः ५।, शेषशिवादेः ५।, ष्णि—ष्णाः १॥, अपत्ये ७)।

एभ्यः परा एते क्रमात् स्युरपत्यार्थे। *

---

* बाह्वादिर्गण सः, बाह्वादिश्च अत् च तस्मात्। अपिच आप् च तौ आदी यस्य सः अश्वाद्यादिस्तस्मात्, अश्वादेः आपादेश्चेत्यर्थः। गर्ग आदिर्यस्य तस्मात्। नड आदिर्यस्य तस्मात्। पितृष्वसा आदिर्यस्य तस्मात्। रेवती आदिर्यस्य तस्मात्। उक्तादन्यः शेषः, शिव आदिर्यस्य सः शिवादिः, शेषश्च शिवादिश्च तत् तस्मात्। एतस्मात् शेषशिवादिवर्गात् समाहारैकत्वम्। ष्णिश्च ष्णेयश्च ष्ण्यश्च ष्णायनश्च ष्णीयश्च ष्णिकश्च ष्णश्च ते। एतेभ्यः सप्तभ्यः परे एते सप्त प्रत्ययाः क्रमात् स्युः अपत्यार्थे। न पतन्ति येन वंशो येन तदपत्यं, पुत्र-पौत्र-प्रपौत्रादिः (कन्या च) उच्यते (पाणिनिः ४।१।९२)। क्रमश—बाह्वादेः अकारान्तात् च ष्णिः, अश्वादेः आपादेश्च ष्णेयः, गर्गादेः ष्ण्यः, नडादेः ष्णायनः, पितृष्वस्रादेः ष्णीयः, रेवत्यादेः ष्णिकः, शेषात् शिवादेश्च ष्णः इति। एतेषां ष इत्, ण इत् इत्यर्थः। पाणिनिः ४।१।९५,९६,९८,१०५,११०,११२,१२०,१२१,१२२,१२३,१२६,१४६ ; ४।२।९२। ष्णि—इञ् इति पाणिनिः, इञ् इति क्रमदीश्वरः। ष्णेय—ढक्, ढञ् इति पाणिनिः, एयण् इति क्रमदीश्वरः। ष्ण्य—यञ् इति पाणिनिः, य इति क्रमदीश्वरः। ष्णायन—फक्, फञ् इति पाणिनिः, आयन इति क्रमदीश्वरः। ष्णीय—छण् इति पाणिनिः, ईय इति क्रमदीश्वरः। ष्णिक—ठक् इति पाणिनिः, इक इति क्रमदीश्वरः। ष्ण—अण् इति पाणिनिः, अद् इति क्रमदीश्वरः।

बाह्वादीनामुदाहरणानि अग्रत ४१६, ४१८, ४२२, ४२३, ४२८ सूत्राणां टीकायां द्रष्टव्याः।

४१६। ञिति ञिराद्यचः सुभग-सुपञ्चाला-
[illegible]दिषु द्व्यन्त्यदानां।

(ञिति ७, ञिः १।, आद्यचः ६।, सुभग-सुपञ्चालादीषु ७॥, तु ।१।, द्व्यन्त्यदानां ६॥)।

अचां मध्ये आद्यचो ञिः स्यात् ञिति ते परे, सुभगादिषु द्वयोर्द्वयोः, सुपञ्चालादिषु अन्त्यस्य दस्य।*

(११७) ञ्योर्लोपोतो तेऽत्ये। बाहोरपत्यं बाहविः, उपबिन्दोरपत्यं औपबिन्दविः, उडुलोम्नोऽपत्यं औडुलोमिः, अग्निशर्मणोऽपत्यं आग्निशर्मिः। कृष्णस्यापत्यं कार्ष्णिः।†

४१७। य्वोर्युम् दान्तेऽस्वक्क व्यक्क व्यङ्ग व्यव-हार व्यायाम स्वागत स्वध्वर श्वनः।

(य्वोः ६॥, युम् ।१॥, दान्ते ७, अस्वक्क—श्वनः ६।)।

---

* ञ्-इत्संज्ञा यस्य स ञित्, ञिकारो तस्येति ञितः तस्मिन्। आदिभूतो अच् चेति आद्यच् तस्य। सुभगश्च सुपञ्चालश्च सुभगसुपञ्चालौ, तौ आदौ ययोस्तौ सुभग-सुपञ्चालादी तयोः। द्वे च अन्त्यश्च द्व्यन्त्यानि, द्व्यन्त्यानि च तानि दानि चेति द्व्यन्त्यदानि तेषाम्। पूर्वं (८) अच एव ञिविधानितलेन निर्दिष्टेऽपि अत्र अचो ग्रहणं परसूत्रे आद्यचो-ऽनुवृत्त्यर्थम्। सामान्यतः सर्वेषां शब्दानाम् अचां मध्ये आद्यचो ञिः, सुभगादिकयोः पदयो-राद्यचो ञिः, सुपञ्चालादिषु केवलम् अन्त्यपदस्याद्यचो ञिः स्यात्, ञिति तद्धिते परे इत्यर्थः। सुभगादीनामुदाहरणानि ४२१ सूत्रे, सुपञ्चालादीनाञ्च ४२२ सूत्रे द्रष्टव्यानि। पाणिनिः ७।२।११७, ७।३।१२६।

† बाहवीनाम—बाहुनामकस्य कस्यचिदपत्यम् इत्यर्थे, बाहोरिति पदात् ञिः, ञ च अत्, अकारश्चेति, (११८,११७,२१) बाहवि इति भागस्य पुनर्विभक्तिसंज्ञायां बाहुरूपसिद्धिः, एवं सर्वत्र। यथा विभक्तेः वाक्यं तद्धितप्रत्ययान्तात् प्रभवः। एवम् औपबिन्दविः। औडुलोमि-रित्यत्र विशेषः, (११७,२१८) नलोपः, अकारलोपश्च। एवम् आग्निशर्मिः। कार्ष्णि-रिति (२१८) अकारलोपः। बाह्वादिषु—बाहु उपबाहु उपबिन्दु उडुलोमन् अग्निशर्मन् सुधर्मन् कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम सङ्कर्षण प्रभृतिः, आकृतिगणोऽयम्।

प्रायस्य: स्थाने आतयोर्दीम्ले ञितयोर्यवयो: स्थाने क्रमादि-सुमौ स्तो ञिति ते परे, न तु स्वादेः । *

४१८ । द्वार स्वर स्वः स्वस्ति स्वादुमृदु व्यल्कश स्वः श्वन् स्फ्यकृत स्व स्वाध्याय स्वग्रामै-कान्यग्रोधानां य्वापदन्ययोस्तु वा नमिति य्वादेः ।

(द्वार—न्यग्रोधानां ६।३, य्वापद-न्ययोः ६।२, तु ।१।, वा ।१।, न ।१।, तु ।१।, इति अ, य्वादेः ६।१) ।

द्वारादेरद्वितीयस्य न्यग्रोधस्य च य्वोर्युम् स्यात्, य्वापदन्ययोस्तु वा, न तु य्वादेरिकारादौ ते । †

---

* य च व च यौ तयोः । इश्च उश्च यू, ताभ्यां म् युम् इति सुप्तप्रथमा-द्विवचनं यथा-क्रमार्थम् । न्यङ्कुच मद्रुच भद्रुच व्यवहारस्य व्यायामस्य व्यायतस्य व्यवहरस्य यम् च तत्, यथाक्रमस्वार्थे तस्य । स्वाङ्गादयः सप्त शब्दाः, यम् इति (११४१) सूत्रप्रत्ययः, तेन तदन्तस्य ग्रहणम् । प्रायस्य इति ञिते इति च अनुवर्तते । इयुणोर्णिकारादौ । ञिति ते परे प्रादौ इयुमि कृते पचात् इति: । पाणिनिः ७।३,७,८,९ । अत्र द्रष्टव्यम्—पाणिनीये व्यायतादिश्वपि व्यायामशब्दो नास्ति, सपतिशब्दस्तु दृश्यते ।

† एकोऽद्वितीयस्तस्मी न्यग्रोधश्चेति एकस्वरोप: । पदेति किं, न्यग्रोधमूले भवा: न्याग्रोधमूला: प्रायस: इति भद्रोःअदीर्घस्य: । न्याग्रोधमूलिककामिति (४१२) एवे वर्णं पश्यति । द्वारस्य स्वरस्य स्वरिति रेफान्तमव्ययस्य स्वस्तीत्यव्ययस्य स्वादुमृदुस्य व्यल्कशस्य यम् इति सान्तमव्ययस्य श्वा च स्फ्यकृतस्य स्व स्वाध्यायस्य स्वग्रामस्य एकन्यग्रोधस्य ते तेषाम् । य्वापदस्य न्यङ्कुरेति तस्य । वा चार्थिकेन च वारितस्य । द्वारादीनां यवयोरद्योनस्य प्रायस: स्थाने यथाक्रमाय पूर्वेषामादौ उपगमितम् । द्वारादेर्यवयोरिमुणी स्यातां ञिति णिति परे, य्वापदन्ययोस्तु वा, न्यग्रोधादीनां (वार्त्तिकोक्त—स्वर्ग-नववचोष) इकारादौ णिति परे तु न वारितमर्थ: । अत्र वा: स्वाध्याय: स्वाध्याय: इति मुग्धमि:, न तु (तु) सौवन: स्वाध्याय: स्वाध्याय इति काशिका । स्वादुमृदु इति पदं केषाचित् मते एकम् पदद्वयम् । स्वग्रामशब्दस्य पाणिनीये द्वारादिश्वपि न दृश्यते । पाणिनिः ७।३,४,८,९ ।

वैयग्निः सौवग्निः । स्वङ्गादेस्तु स्वाङ्गिः व्याङ्गिः व्याड्ङिः । *

४१९ । व्यासादेरक् ष्णौ ।

(व्यासादे: ६।, अक् ।१।, ष्णौ ७।) ।

वैयासकिः सौधातकिः । †

[illegible]नेयः शौभ्रेयः । माण्डेयः माडेयः सौवतेयः । ‡

४२० । श्वोर्लोपोऽकद्रुपाण्डोरेये ।

(श्वो: ६।, लोप: १।, अकद्रु-पाण्डो: ६।, एये ७।) ।

---

* पूर्वसूत्रोदाहरणमाह—विगतोऽग्नी यस्य स: व्यग्नः तस्यापत्यं वैयग्निः, अदन्तत्वात् ष्णिप्रत्यये यकारस्य इसि कृते तस्यैव वृद्धिः । एवं शोभनोऽग्नी यस्य स: स्वग्नः तस्यापत्यं सौवग्निः, वकारस्य उसि तस्यैव वृद्धिः ।

आयन: स्थाने आतयोः किं, दधिप्रिय: अग्नी यस्य स दध्यग्नः, मधुप्रियोऽग्नी यस्य स मध्वग्नः, तस्य तस्य अपत्यं दाध्यग्निः माध्वग्निः इत्यादौ इस् उस् न स्यात् । दान्ते स्थितयोः किं, इयात्मीः अव यत् इति अन्तः, अवः इदं यातमिति, एवं द्वयोर्यवयोरर्थे विधानिकम् इत्यादौ इस् उस् न स्यात् ।

स्वङ्गादिषु शोभनम् अङ्गं यस्य स स्वङ्ग: स्वङ्गस्यापत्यं स्वाङ्गिः, विगतम् अङ्गं यस्य स: व्यङ्ग: व्यङ्गस्यापत्यं व्याङ्गिः, व्यड्स्यापत्यं व्याड्ङिः इत्यादौ यवयोर्दान्तत्वादायन: स्थाने आतत्वाच्च निषेधः । अव्ययस्य तु व्यावक्रोशी, व्यव-क्रुशयातोः (११४१) अनप्रत्यये, व्यवक्रोशनात् स्वार्थे ष्णे ईपि सिद्धम् । पाणिनिः ७।३।६ ।

† व्यासादिशब्दस्य स्थाने अक् स्यात् ष्णिप्रत्यये परे, णित्वादन्तस्य स्थाने । अक्-वृत्तिः । व्यासस्यापत्यं वैयासकिः, व्यासशब्दात् ष्णि: यकारस्य (४१०) इस्, (४१६) इकारस्य वृद्धिरैकारः, अनेन अक् । एवं सुधातुरपत्यं सौधातकिः, सुधातृशब्दात् ष्णि:, आयनो वृद्धिः, ऋस्थाने अक् । व्यासादिस्तु—व्यास वरुड निषाद चण्डाल बिम्ब सुधातृ प्रभृतिः । पाणिनिः ४।१।९७, वार्त्तिकञ्च । अत्र सुधातृशब्दः प्रथमं पठितः ।

‡ श्वभ्रादीनाह—श्वभ्रस्यापत्यं, शुभ्रस्यापत्यम् । मण्डादीन् आह—मण्डाया अपत्यं, मण्डा-यापत्यं, सुवत्या अपत्यं, सर्वत्र एयप्रत्यये वेषाद्यौ (२१८) स्ववर्णवर्जवोर्लोप: । श्वभ्रादिस्तु—शुभ्र इष्ट पूर्व शुभ्रकु पाण्डु कद्रू शुक्र कुमारिका रोहिणी विमात्र विधवा भगिनिका रथिवी रोहिणी सुवर्णा प्रभृति:, आकृतिगणोऽयम् । पाणिनिः ४।१।१२२ । अयं श्वभ्रादिः ।

उवर्णस्य एये परे लोपः स्यात् [illegible]योः । कामण्डलेयः ।
तयोस्तु काद्रवेयः पाण्डवेयः । *

४२१ । कल्याणी सुभगा दुर्भगा बन्धकी रजकी बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्र्य-नुसृष्ट्यनुदृष्टि कुलटाश्च इनेयः ।

(कल्याणी—कुलटाश्च: ५॥, इनेयः १।) ।

सौभागिनेयः दौर्भागिनेयः । †

४२२ । क्षुद्राणोधाभ्यो वैरारौ ।

(क्षुद्रा-गोधाभ्य: ५॥, वा ।१।, एरारौ १॥) ।

नाटेरः नाटेयः, गौधेरः गौधारः गौधेयः । ‡

---

* कमण्डलोः कमण्डल्वा वा अपत्यं कामण्डलेयः, केचित् अनेन उवर्णलोपः । कद्र्वा अपत्यं, पाण्डोरपत्यं—अनयोरुवर्णलोपाभावे, (२१०) उवर्णस्य ओकारः, (२५) ओकारे अव् । कमण्डलुः चतुष्पाज्जातिविशेषः । पाणिनिः ४।१।१३५ ; ६।४।१४७ ।

† अर्थवशात् विभक्तेर्विपरिणामः इति न्यायात् एये इति सप्तम्यन्तं पदं षष्ठ्यन्तं भूत्वा अनुवर्त्तते । कल्याण्यादीनां मर्यादयाः परस्य केवलस्य इनेयः स्यात्, आदिस्वरस्य वृद्धिः, स्त्रियाभावे च । कुलटा इह कुत्सिता सती भिक्षुकी, असतीवाचे तु (४२२) परत्वमपि । कल्याण्या अपत्यं काल्याणिनेयः, स्त्रियां काल्याणिनेयीत्यादि । सुभगाया अपत्यं सौभागिनेयः, दुर्भगाया अपत्यं दौर्भागिनेयः, अत्रत्र (४१६) सुभगादित्वादुभयपदवृद्धिः । एवं परस्त्रिया अपत्यं पारस्त्रैणेयः अत्र (२५८) ईवर्णलोपप्रसक्तावपि, सुभगादिपाठ-सामर्थ्यात् (२५८) ईकार-लोपाभावे, अनतः सन्धी, पश्चात् तत्रैव वृद्धिः । सुभगादिषु—सुभगा दुर्भगा [illegible] चतुर्ष्वपि अनुशतिक अनुसंवत्सर [illegible] इहलोक परलोक सर्वलोक सर्वपुरुष सर्वभूमि परस्त्री राजपुरुष अधिभूत अधिदेव अधुर्भगा अधिकतत् अभिगमय सुखनपद पुंसकृष्ण स्थिरवेतु सर्वलोक इत्यादि । [illegible] प्रतिपर्व अनेकत्र अनुस्वर अभियुग अनुसार इत्यादी विकल्पः । यथा, आधीयत् आर्धोपमितादि । पाणिनिः ४।१।१२६,१२७ । [illegible] गौधे कल्याण्यादिष्वपि रजकीत्यत्रापि आरधीयते इत्यत्रापि । ... अपि अरवीं पठन्ति ।

‡ क्षुद्राश्च गोधा च ताभ्यः (पाणिनौ "गोधाया ढ्रक्" इति एकवचननिर्देशात्, "क्षुद्राभ्यो वा" इति बहुवचननिर्देशाच्च) । एरच आरच एरारौ । क्षुद्राः कुत्सितशीलाः

गार्ग्यः वात्स्यः जाबाल्यः वाध्यायनः । *

### ४२३ । ओदौतोऽश्वत् तकद्व-व्यक्याः ।

(ओत्-औतः ५।, अश्ववत् ।१।, तकद्व-क-व्याः १॥) ।

ओदौद्भ्यां पर-स्वकंशः तत्संबकश यः अश्वो च अश्ववत् स्यात् ।†

बाभ्रव्यः । ‡

नाड़ायनः गार्ग्यायणः दाक्षायणी । पैलव्यस्तीयः माद्रव्यस्तीयः ।

रैवतिकः आश्वपालिकः । यादवः आङ्गिरसः । §

---

अङ्गहीनाय । "काः क्षुद्रा नाम? अनियतपुंस्का अङ्गहीना वा" इति भाष्यम् । "व्यङ्गा-ङ्गुःशोधाभ्याश्च" इति क्रमदीश्वरः । गोधाशब्दः शुभ्रादिगणान्तर्गतः । अत्र वाशब्दस्य व्यवस्था-वाचित्वात् क्षुद्राभ्यः परस्य चेयस्य एरः स्यात्, गोधायाः परस्य चेयस्य एरारौ स्यातां वा इत्यर्थः । कुलहीनाङ्गहीना यथा—नट्या अपत्यं नाटेरः, पक्षे नाटेयः । एवं कुलटाया अपत्यं कौलटेरः कौलटेयः । सतीवाचे तु पूर्वसूत्रादिनेवे कौलटिनेय इति । एवं दास्या अपत्यं दासेरः दासेयः इत्यादि । अङ्गहीना यथा—काणायाः अपत्यं काणेरः काणेयः इत्यादि । गोधाया अपत्यं गौधेरः गौधारः गौधेयः इत्यादि । पाणिनिः ४।१।१२८,१३०,१३१ ।

* गर्गादीनाञ्च—गर्गस्यापत्यं, वत्सस्यापत्यं, जमदग्नेरपत्यं, पराशरस्यापत्यं, सर्वत्र गर्गादित्वात् यञ्प्रत्यये, यावणौ वृद्धौ, (२५८) यस्येत्यवर्णलोपे । स्त्रियां (२५९) यलोपे गार्गीत्यादि । गर्गादिश्च—गर्ग वत्स वज संकृति पुलस्ति अगस्त्य रैभ अग्निवेश शङ्ख शठ धूम अवट चमस धनञ्जय लोहित बभ्रु मण्डु मङ्क्षु शङ्कु लिगु गुह मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायी सूनु कथक कन्थक ऋक्ष वृक्ष तनु तरुक्ष तलुक्ष तण्ड वतण्ड कपि कत कुरुकत अनडुह् कण्व शकल गोकक्ष अगस्ति कुण्डिनी यज्ञवल्क उभय जात विरोहित वृषगण रहूगण शण्डिल वणक चुलुक मुद्गल मुसल जमदग्नि पराशर जतूकर्ण इत्यादयः । पाणिनिः ४।१।१०५ ।

† ओकारान्तौ प्रत्ययौ । अश्वः इव अश्ववत् । तथ कश्च तौ, तयोर्द्वन्द्वः तकद्वः, तकद्वश्च व्यश्च ते । पाणिनिः ४।१।७९,८० ।

‡ बभ्रोरपत्यं बाभ्रव्यः, अत्र मधुबभ्र्वोरिति यञि, (४२०) उकारस्य ओकारे, अथैन अश्व स्वभूपे, (१५) ओकारस्य अव् । (पाणिनिः ४।१।१०६ ।) एवं गावा गार्ग्यः गाव्यं, (४२८) आयन्नत्वे, अथैव अश्ववत्त्वे, ओकारे आव् । कृतो वकारे, गार्ग्यं भाव्यमित्यादि । वाजिन्यादि इत्यादि, पार्गिजादि, (८४२) आयन्नते अश्ववत् । गौरिकादयोऽपि भवन्ति, गौरिकायणि इति, एवम्, (८५८) आयन्नते अश्ववत् ।

§ नड़ादि-पक्षपदादेश्च—नडस्यापत्यं नाड़ायनः, गार्ग्यस्यापत्यं गार्ग्यायणः, दक्षस्यापत्यं स्त्री दाक्षायणी, सर्वत्र नड़ादित्वात् फक् । नड़ादिश्च—(पाणिनिः ४।१।९९,१००,१०१)

**४२४ । मन्वर्वान्वर्मोषब्रह्मेनोऽणोऽश्मात्मनो-ऽपत्यण्योऽविकारण्याभावकर्मण्ये ईने न न-लोपः ।**

(मन्वर्वान्-वर्मोषब्रह्मेनः ६।, अणः ६।, अश्मात्मनः ६।, अपत्यणे ७।, अविकारण्याभावकर्मण्ये ७।, ईने ७।, न ।१।, न-लोपः १।) । *

मन्वर्जस्यानो वर्मोषः ब्रह्मः स्यात् परस्तेनच, अपत्यार्थ-ण्ये, अणो विकारार्थवर्जे ण्ये भावकर्मार्थवर्जे ये च, अश्मात्मनोरीने, न-लोपो न स्यात् ।

याज्वनः भाद्रवर्मणः औक्ष्णः चार्मणः । †

---

गड़ नर रोम काष्ठ दक्षिन् दृक्तिन् बदर बनस्त रक्षस् प्रभृतिः । पितृष्वसुरपत्यं पैतृष्वसेयः, मातृष्वसुरपत्यं मातृष्वसेयः, उभयत्र पितृष्वसादित्वात् ईयः । (पाणिनिः ४।१।१३२,१३४ ।) रैवत्या अपत्यं रैवतिकः, अश्वपाल्या अपत्यम् आश्वपालिकः, उभयत्र रैवत्यादित्वात् णिकः । एवं द्वारपालिक इत्यादि । रैवत्यादिश्च—रैवती अश्वपाली मणिपाली द्वारपाली वृकवञ्चु वृकग्राह कर्णग्राह दण्डग्राह चामरग्राह प्रभृतिः । यदोरपत्यं यादवः, अङ्गिरसोऽपत्यम् आङ्गिरसः, एवं रघोरपत्यं राघवः इत्यादिषु शिवत्वात् अः । (पाणिनिः ४।१।८२) सूत्रे शिवः—अपत्यादिचतुरर्थान्तारम्भोऽर्थः । अत्र तु आत्मपादिगणान्तर्गतमिति इत्यर्थः ।

* मनं वर्जयतीति मन्वर्जः (१००९), मन्वर्जश्चासौ वन् चेति मन्वर्वान् । वः संयोगः, आदिन् ओम् । मन्वर्वान् च वर्म च उषा च ओम् च मन्वर्वान्वर्मोषब्रह्मेन् तस्य । अश्मा च आत्मा च तस्य । अपत्ये णः अपत्यणस्तस्मिन् । न विकारोऽविकारः, अविकारे णः अविकारणः, भावश्च कर्म च भावकर्मणी, न भावकर्मणी अभावकर्मणी, अभावकर्मणोर्यः अभावकर्मयः, अविकारणश्च अभावकर्मयश्च अविकारण्याभावकर्मण्यं तस्मिन् ।

† अत्र (४११) विकारार्थवर्ज-ण्ये परे सर्वेषां अन्नन्तानां न-लोपनिषेधे, अपत्यार्थ-ण्ये परे मन्नन्तस्य न-लोपार्थत्वात् मन्वर्वानिति, अपत्यण्ये परे मन्-वर्जस्यैव अन्नन्तस्य न-लोपनिषेधः, मन्नन्तस्य तु न-लोपः स्यादेव, अपत्यार्थभिन्नण्ये परे तु मन्नन्तस्यापि न-लोपनिषेधः । अन्नन्त-वर्जनात् वर्मणोऽपि न-लोपप्राप्तौ तस्य न-लोपनिषेधार्थं पृथग्ग्रहणं कृतम् । उभयत्र एव अस्य नियमार्थमेव, तेन उभयः अपत्यण्ये एव न-लोपनिषेधः, अन्यण्ये तु न-लोपः स्यादेवेति । यज्वनो-ऽपत्यं याज्वनः, भद्रवर्मणोऽपत्यं भाद्रवर्मणः, उभयत्र शिवत्वात् अः, अतोऽत्र न-लोपनिषेधः ।

शैव: वाशिष्ठ: । *

## ४२५ । संख्यासंभद्राम्मातुरुर् ञे ।

(संख्या-सं-भद्रात् ५।, मातु: ६।, उर् ।१।, ञे ७।) ।

द्वैमातुर: । †

## ४२६ । नञ् पुंस्त्रियो: ।

(नञ् ।१।, पुंस्त्रियो: ६॥) ।

पौंस्न: स्त्रैण: । ‡

---

अनन्तस्य तु सुत्वानोऽपत्यं सौत्वान: इत्यादि । अपत्यार्थे इति किं, चर्मणा परिवृतो रथ: चार्मण: । उक्ष्णोऽपत्यं औक्ष्ण: (४२१) उङ्लोप:, अपत्यार्थभिन्नार्थे तु उक्ष्ण इदम् औक्षं चर्म । वर्मिणोऽपत्यं वार्मिण:, एवं माङ्गिन: दाण्डिन: हास्तिन: इत्यादि संयोगादिनो न-लोपनिषेध: । अणोऽविकारार्थे यथा—अश्म जानाति आश्मन: । साम इदं सामन-मित्यादि । तर्हि कथं अश्मनोऽपत्यं आश्मन:, अश्मन-इदं आश्मं सर इत्यादिप्रयोग: । उच्यते—"आश्मोऽजातौ" (६।४।१७१) इति पाणिनिसूत्रेण निपात: । "योगविभागोऽत्र कर्तव्य: । आश्म इति निपात्यते अनपत्येऽणि । आश्मं हवि: । ततोऽजातौ । अपत्ये जातावपि अश्मनष्टिलोपो न स्यात् । अश्मनोऽपत्यं आश्मन: । अपत्ये किं, आश्मी ओषधि: ।" इति भट्टोजिदीक्षित: । अनावकर्मार्थे यथा—सूर्यणि भव: सूर्यण्य:, अश्मनि साधु: अश्मन्य: इत्यादि । पाणिनि: ६।४।१६४—१७१ । "अश्मनो विकार इति उपसंख्यानं कर्तव्यम्" "अपूर्व-प्रतिषेधे वा हितनाम इति वक्तव्यम्" इति वार्तिकवचनम् ।

* शिवादीनाम् । शिवस्यापत्यं शैव:, वशिष्ठस्यापत्यं वाशिष्ठ: । शिवादिषु—शिव वशिष्ठ गौतम ... विश्रवस् ... ककुत्स्थ इक्ष्वाकु कुरु ... भूमि ... कर्णनाभ प्रभृति: । पाणिनि: ४।१।११२ ।

† संख्या च सम् च भद्रश्च तस्मात् । संख्यावाचकात् समो भद्राच्च मातृशब्दस्य उर् स्यात् ञे परे, ञित्प्रत्ययस्य स्थाने । द्वयोर्मात्रोरपत्यं द्वैमातुर:, अत्र तद्धितार्थे विषये द्विगौ, द्विमातृ ञे इति एकपदीभावात् ऐरित्यादे: (४१६) वृद्धि: । एवं षण्णां मातॄणामपत्यं षाण्मातुर:, भद्राया मातुरपत्यं भाद्रमातुर: । संमातुरपत्यं सांमातुर:, एवं ...मातुर: । पाणिनि: ४।१।११५ ।

‡ पुंस्-स्त्री-शब्दयो: नञ् स्यात् ञे, ञित्प्रत्यये, अपत्यादिष्वर्थेषु इति: । पुंसोऽपत्यं पौंस्न:, स्त्रिया अपत्यं स्त्रैण:, ञे नित् च स्त्री (२१८) अकारलोप: । एतत् इत्यादौ

४२७। कुञ्जादेर्ञायन्योऽस्त्रीब्येऽपत्ये।

(कुञ्जादेः ५।१, ञायन्यः १।१, अस्त्रीब्ये ७।१, अपत्ये ७।१)।

कुञ्जादेरपत्यार्थे ञायन्यः स्यात्, न तु स्त्रियां, न च ब्ये। कौञ्जायन्यः ब्राध्नायन्यः। स्त्रीब्ये तु कौञ्जायनी कौञ्जायनाः।*

४२८। गर्गयस्कविदादि-भृग्वत्रि-कुत्साङ्गिरो-वशिष्ठ-गोतम-रूढ़ात् लुक् ब्येऽस्त्रियाम्।

(गर्ग—रूढ़ात् ५।१, लुक् १।१, ब्ये ७।१, अस्त्रियां ७।१)।

देशतुल्याख्यः क्षत्रियो रूढ़ः। एभ्यः परेषामुक्तानां ब्यानां ब्ये विहितानां लुक् स्यात्, न तु स्त्रियां।†

गर्गाः वत्साः, यस्काः लह्याः, विदाः उर्व्वाः, भृगवः अत्रयः कुत्साः अङ्गिरसः वशिष्ठाः गोतमाः, अङ्गाः वङ्गाः कलिङ्गाः।

स्त्रियान्तु गार्ग्यः।‡

---

[illegible]ऽपि यथा—पुंस इदं पौंस्नं, स्त्रीणां समूहः स्त्रैणं, स्त्री देवता अस्य स्त्रैणः। पाणिनिः ४।१।८७।

* स्त्री च ब्यश्च स्त्रीब्यं, न स्त्रीब्यम् अस्त्रीब्यं तस्मिन्। आयन्येन आयनो बाध्यते। कुञ्जायनं, ब्राध्नायनं, [illegible] इति। कुञ्जायनं स्त्री, कुञ्जायनानि [illegible], [illegible] एव। कुञ्जादिस्तु—कुञ्ज ब्रध्न शङ्ख भस्मन् गण लोमन् [illegible] प्रभृतिः। पाणिनिः ४।१।९८; २।४।६२।

† गर्गश्च यस्कश्च विदश्च ते आदयो येषां ते गर्गयस्कविदादयः, [illegible] गर्गादि-यस्कादि-विदादय इत्यर्थः। ते च भृगुश्च अत्रिश्च कुत्सश्च अङ्गिराश्च वशिष्ठश्च गोतमश्च रूढ़श्च तस्मात्। [illegible] [illegible], [illegible] (४९८) [illegible] इत्यादि। "[illegible]" इति पाणिनिः [illegible] [illegible] [illegible]। [illegible] (४९) [illegible] [illegible] स्यात्।

‡ गर्गापत्यानि [illegible], [illegible] गर्गादित्वात् [illegible] लुक्। [illegible] [illegible] यस्कादित्वात्, विदापत्यानि [illegible]

## ४२९ । ठञ् वात् ऋगीककक्षीनेत्राव्ययानितश्च ।

(ठ-ञि ७, वात् ५।, ऋगीक-कक्ष-नेत्र-व्ययाः १॥, च ।१।, अनितः १॥, च ।१।) ।

वात् परा एते पूर्वं च येऽतोऽनितश्च स्युः ठे घे च वाच्ये । *

तर्कं वेत्ति अधीते वा तार्किकः; पदकः, क्रमकः; वैयाकरणः; वाचा कृतं वाचिकं; पाणिनीयं; भक्त्या बुध्यतेऽसौ भाक्तीकः, वार्ष्टीकः; तिष्येण युक्ता रात्रिः तैषी, पौषी; यज्ञाय साधुः यज्ञियः; यज्ञाय हितं यज्ञियं; मथुराया आगतः

---

भृगोरपत्यानि एतेषु यस्य लुक् । यस्कादिर्यथा—यस्क पुष्करसद् यर्धक मन्दक लम (लुम वा) रथीतृण भंडुपाद प्रभृतिः । बिदादिश्च—बिद पुत उर्व कश्यप कुशिक भरद्वाज उपमन्यु आपस्तम्ब भरवत् रथन्तर विश्वानर प्रभृतिः । अत्रेरपत्यानि अत्र येयस्य लुक् । कुत्सस्याप-त्यानि अङ्गिरसोऽपत्यानि वशिष्ठस्यापत्यानि गोतमस्यापत्यानि एतेषु यस्य लुक् । यद्वस्य राज्ञो-ऽपत्यानि, एवं वत्सस्यापत्यानि कपिलस्यापत्यानि इत्यादिषु यस्य लुक् । क्वचित् प्रसिद्धत्वाभिप्रायो-ऽपि बहौ वक्तव्यः यथा—रघूणामन्वयं वक्ष्ये, इक्ष्वाकूणामिदं हि कुलव्रतम् इति च रघुः । माघो यदूनामिति उद्भटः । अस्त्रियामिति किं, भृगोरपत्यानि स्त्रियः इत्यत्र यलोपाभावे भार्गवी-शब्दात् जस्विभक्तौ भार्गव्यः इति । अपत्यार्थप्रत्ययानामिति किं, भर्गाणामिमे भार्गवाः मन्त्राः इत्यादौ न यलोपः । एवं प्रिया गार्ग्या यस्य स प्रियगार्ग्यः इत्यत्र समुदायस्य एकत्वेऽपि गार्ग्य-शब्दस्य बहुत्वे प्रयुक्तत्वात् यलोपः स्यादेव । एवं प्रियो गार्ग्यौ येषां ते प्रियगार्ग्याः, अत्र समु-दायस्य बहुत्वेऽपि गार्ग्यशब्दस्य एकत्वे प्रयुक्तत्वात् यलोपो न स्यात् । एवं प्रियवत्साः प्रिययास्काः इत्यादयः । पाणिनिः २।४।६२—६६ । अत्र वक्तव्यम्—"न गोपवनादिभ्यः" इति पाणिनि-सूत्रेण (२।४।६७) बिदाद्यन्तर्गत-गोपवनादिभ्यो लुङ्निषेधः ।

* इत्य-मार्गर्णार्थं सन्निवृत् । ठीकस्य कन् च चीकस्य अत्र ते । अनित-अत् येषां ते अनितः । पौषीकालेऽपि पक्षान्तरेण पूर्वोक्ताः प्रियप्रत्ययाः प्रत्ययाः तद्धितोक्ता । अनितत्वेति अकारस्य ईकः इति निर्देशसामर्थ्यं लक्ष्यते । अथवा—इत्य प्रत्ययः पूर्वोक्ताय अत्र-पति प्रत्ययस्य प्रत्ययः-प्रत्यनुरक्षिणः प्रत्ययानि अर्थादि च वाच्ये स्युः, ते च प्रत्ययानुसारेण प्राप्तिम्-एतद्-विनाश-अनुक्तिरिव । अन्तर्गतया इति प्रत्ययात् (४२६) निर्दिष्टे ते-पदे तद्धिते अनित्यत्वेऽपि । पर्यवसिते प्रत्ययविधिरेव अनित्यत्वादेव बोध इति ।

माथुरः ; इह भवं ऐहिकं ; कादाचित्कं ; ग्रामीणः, ग्राम्यः ; मूर्द्धन्यः ; नादेयः ; शालीयः ; नागरः ; अग्र्यः । *

## ४६० । व्यटेर्लोपोऽनाराच्छ्वतोऽण्येऽयौ ।

(व्य-टेः ६।, लोपः १।, अनारात्-श्वतः ६।, अण्-ये ७, अयौ ७) ।

---

* तर्कम् वेत्ति अधीते वा इत्यर्थे एव तर्कम् इत्यस्मात् कर्मकारकात् कर्त्तरि वाच्ये ष्णिकः । (पाणिनिः ४।२।६०) । एवं—पदं वेत्ति अधीते वा पदकः, क्रमं वेत्ति अधीते वा क्रमकः, उभयत्र अणित् कण् । (पाणिनिः ४।२।६१ ।) व्याकरणं वेत्ति अधीते वा वैयाकरणः, व्याकरण-शब्दात् य्वमध्ये (४१७) यस्मात् इञ्, तस्य ऐचि: । (पाणिनिः ४।२।५९ ।) वाचा जितं वाचिकम्, अत्र वाचा इत्यस्मात् करणकारकात् कर्मणि वाच्ये ष्णिकः, (४११) न इं तस्मान्निमित्तत्वेन हान्तत्वनिषेधात् (२११) विरामाभावे कुत्वादि न स्यात् । (पाणिनिः ५।४।२५ ।) पाणिनिना प्रोक्तं पाणिनीयम्, अत्र पाणिनिना इति कर्तृकारकात् कर्मणि वाच्ये ष्णीयः । (पाणिनिः ४।२।१०१ ।) एवं अर्घ्यवर्णेन प्रोक्तं आर्घ्यवर्णिकमित्यादि । आटीक इत्यत्र करणकारकात् कर्त्तरि वाच्ये ष्णीकः ; अटव्या युध्यते चरति आटीकः । (पाणिनिः ४।४।५८ ।) पाणिनिमते तु शक्तिः प्रहरणमस्य, यष्टिः प्रहरणमस्य इत्याकारं वाक्यम् । तिष्येण नक्षत्रेण युक्ता रात्रिः तैषी, एवं पुष्येण नक्षत्रेण युक्ता रात्रिः पौषी, उभयत्र तिष्येण पुष्येण इति करणकारकात् कर्मणि वाच्ये ष्णे कृते ङी, (२६०) यकारलोपे, (२५७) स्त्रियाम् ईप् । (पाणिनिः ४।२।३ ।) आश्विनः, आश्विनम् इत्यत्र तादर्थ्ये जितशब्दयोगे च चतुर्थ्यन्तादकारकादपि इत्यस्मात् अयः, सूत्रे कारकादिति तु प्रधानेन व्यपदेशा भवन्तीति न्यायादुक्तम् । (१०८) कालीयराशिपतोक्तमेन सम्बन्धविवक्षायामेव षष्ठीसप्तम्योर्विधानात्, अत्राथ तादर्थ्यमेव निमित्तार्थे चतुर्थी । (पाणिनिः ४।१।१३८—अत्र सूत्रे जातौ यः न तु स्वार्थे । पाणिनिः ५।१।५ ।) माथुर इति मथुरायाः इति अपादानकारकात् कर्त्तरि वाच्ये ष्णः । (पाणिनिः ४।३।७४ ।) इह इति अधिकरणात् कर्त्तरि वाच्ये ष्णिके ऐहिकं, एवं कदाचित् भवं कादाचित्कं, अत्र कण् । (पाणिनिः ४।३।५३ ।) ग्रामे भवः ग्रामीणः, अत्र खीनः, एवं ग्राम्य इत्यत्र यः । (पाणिनिः ४।२।९४ ; ४।३।९१ ।) मूर्द्धनि भवो मूर्द्धन्यः, अत्र ये कृते (३२४) न-लोपनिषेधः । (पाणिनिः ४।३।५५ ।) नद्यां भवो नादेयः, अत्र ष्णेयः (पाणिनिः ४।२।९७) । शालायां भवः शालीयः, अत्र छीयः । (पाणिनिः ४।२।११४ ।) नगरे भवो नागरः, अत्र ष्णः (पाणिनिः ४।२।१२८) । अग्रे भवः अग्र्यः, अत्र यः (पाणिनिः ४।४।११६) । एतेषु उदाहरणेषु (२५८) अपादानात् इत्यस्मिन्-लोपः प्रभवाय शैषोऽभिमत एव । एवं षष्ठीमात्रस्यैव कारकात् कर्मणि कर्त्तरि च वाच्ये प्रत्यया भवन्तीति ।

पौनःपुनिकः, बाह्यः बाहीकः । *

## ४३१ । न टं तसौ त्वस्त्यर्थे च ।

(न ।१।, टं १।, त-सौ १।, तु ।१।, अस्त्यर्थे ७।, च ।१।) ।

अव्ययादपि ये च ते पूर्वं टसंज्ञं न स्यात्, तान्त-सान्तौ तु अस्त्यर्थे च ।

आरातीयः साम्प्रतिकः । †

---

* अव्ययस्य टिः अटिलक्ष । आराद अव्यय तत्, न तत् अनाराच्छन्नत् तस्य । अव्यय अर्थं तद्धितम् । नास्ति पुर्येभित् अयुक्तमिन् । आरात्-अवत्-वर्जितस्य अव्ययस्य टेर्लोपः स्यात् प्रकरणवशात् तद्धितसंज्ञके अपि युक्ते ये च परे इत्यर्थः । पुनःपुनर्भवः इति वाक्ये (४२९) ठिके, (४१६) इकौ, अनेन टिलोपे पौनःपुनिकः । बहिर्भवः इति वाक्ये यो ईको च इकौ, टिलोपे बाह्यः बाहीक इति । एवं सायंप्रातर्भवः सायम्प्रातिक इत्यादि । अव्ययो किं, अंशुः आंशुः । आरात्प्रवतीवद्वारणं परसूत्रे दर्शितम् । अत्र आरात्-अवत्-वर्जनादेव अव्ययमात्रे पुनर्ग्रहणं क्वचिदव्ययस्य टिलोपाभावप्रापणार्थं, तेन सुष्ठु भावः सौष्ठवं, अं विवृतेऽस्य अंवः, एवं कांच इति । "अव्ययानां भमात्रे टिलोपः । अविकारेऽपव् ।" इति सिद्धान्तकौमुदी ।

† तत्र भव तसौ । अपि अर्थौ अत्र अपिन् । तद्धितप्रिहिंटे पूर्वंसोति आयाराह— पूर्वं टसंज्ञं न स्यादिति । अर्थेऽस्त्री इत्यनुवर्तते । (११९) प्रत्यये परे शेर्षुपि सुप्तविभक्तिकाः पदस्मे अनेन निषिध्यते । आरातीय इति आरात् भव इति वाक्ये (४२९) ईये, अनेन पदत्वनिषेधात् न (५८) अत्रोऽपि अत् । एवं अद्यत् भव इति वाक्ये ठिके आद्यतिक इति । ये परे यथा—अव इदं आव्यं, दिवि भवं दिव्यमित्यादौ अनेन हान्तत्वाभावात् (२११) विरामे परे न कुत्वादिः । एवम् आगतुकं आयुष्कं बोद्धुकं चौपानहमित्यादौ क्रमेण न, स्, ट, च, अष् (१८३,१७४,१७६,२१०) । तान्त-सान्तौ यथा—अद्वितो भावः आद्वित्वं, अस्त्यर्थे अद्वित्वात् इत्यादौ न (५८) तस्य द । एवं पयसो विकारः पायसं इत्यादि, पायसं पयस्मादम्, अस्त्यर्थे पयस्यात् पयसी तेजसी इत्यादौ पदान्तत्वात्, आदीवदत्पयस्वात्मादिति वैदिकं, न अत्र (१०२) विसर्गः । अव्ययो किं, अंशुः आंशुः, अत्र हान्तत्वात् (५६) मलानुबन्धः । अर्थे किं, नाव्यं दिवान्तम् इत्यादौ हान्तत्वात् (६४) विरामविहितं कार्यं स्यादेव । किन्तु अत्र निर्दिष्टत्वविधिरिति भावात् भवदीयमित्यादौ हान्तत्वात् (५८) अत्, अंव इत्यादौ (२१६) अभावसूत्रात् । पाणिनिः १।४।१८,१९ । "अव्ययवीरचयोऽरपदोदोचादमथोऽप्रक-निवेषत्वादौ नियमितव्ये" इति वार्तिकस्य ।

## ४१२। यङ्कोऽङ्कोऽनीये।

(यङ्क: ६।, अङ्क: १।, अनीये ७)।

याज्ञिकं। ईवे तु याज्ञीन:। *

सुपाञ्चालक: सर्वपाञ्चालक:। †

दौवारिक: सौवरं सौवं सौवस्तिक: सौवाद्धमृदवं वैयल्कशं न्यौधं न्यौधनं स्वैयक्कतं सौवं सौवाध्यायिकं सौवग्रामिकं नैयग्रोधं। एकेति किं, व्याघ्रोधमूलिकं। शौवापदं श्वापदं, नैयङ्कवं न्याङ्कवं। श्वागणिकं। ‡

---

* न ईवेऽनीनयाज्ञिम्। यज्ञम्-अन्तस्य यङ्क: स्यात् यवि वे च तद्धिते, नतु ईवे यको च। अव्ययात् यस्यर्थे इकण् मातुरन्ति:। यज्ञे भवम् याज्ञिकं (४२८) निर्वि, यवीन यज्ञपदेवि, (४२६) वृद्धि:। ईवे तु, यज्ञोऽन्तोऽङ्क: इति तद्धितार्थेविषयविनी (४२८) ईवे कृते, यज्ञादिमनिषेधात् (२२०,२५८) याज्ञीन:। पाणिनि: ५।१।७८,८६,८७ ; ६।४।१४५।

† (४१६) सुपञ्चालादीनुदाहरति—सुपञ्चाले (ईवे) भव:, सर्वपञ्चाले भव:, अनयन (४२८) कण्, परपदस्य वृद्धि:। सुपञ्चालादिषु—सुपञ्चाल सर्वपञ्चाल अर्धपञ्चाल पूर्वपञ्चाल दक्षिणपञ्चाल उत्तरपञ्चाल सुवस्तु पितृपितामह वातपित वातश्लेष्म एकपुरुष पूर्वपुरुष पूर्वकायन अपरकायन त्रिसंवत्सर त्रिवर्ष त्रिसमाप्ति त्रिनिष्क त्रिसुवर्ण. भीष्मपद भद्रपद इत्यादि:। अत्र द्रष्टव्यम्—पाणिनि: ७।३।१०—१८ सूत्राणि उत्तरपदवृद्धर्थकानि; ७।३।१९—२१ सूत्राणि उभयपदवृद्ध्यर्थकानि। तत्र प्रथमोक्तानि सूत्राणि बोपदेवमते सुपञ्चाला-दिगणघटकानि ; द्वितीयानि तु सुवस्वादिगणघटकानि (४१६ सू द्रष्टव्यम्)।

‡ (४१८) [illegible]—द्वारि नियुक्त: दौवारिक:, (४५८) [illegible] [illegible] इत्यादि:। [illegible] (पाणिनि: ७।३।४ ।) [illegible] (पाणिनि: [illegible]) [illegible] (पाणिनि: [illegible]) [illegible] दौवस्तिक:, [illegible]

४१२। विकारसमूहभावेष्विक्षाद्योदेः [illegible]।

(विकार—[illegible]) ।

एष्वर्थेषु च ते तद्धिताः स्युः।

इक्षो विकारः ऐक्षः पाथ्यः पाणीयः, भिक्षाणां समूहः भैक्षं पाक्षं गाणिक्यं राजकं, गुरोर्भावः गौरवं यौवनं साम्यं वैरूप्यं राज्यं सौहार्दं, विष्णोरिदं वैष्णवं त्वदीयं माधवनं यौवनं। *

---

[illegible] संघातं वा, (भक्तं) [illegible]। [illegible], [illegible] अर्थं [illegible]। केचित्तु [illegible] पठन्ति, ते पुनः, विगतोऽर्कः [illegible] [illegible], [illegible] [illegible] (४१७) [illegible] अर्थं [illegible], [illegible] टेर्लोपः। [illegible] (९९६) [illegible], [illegible] [illegible] (४२४) [illegible] [illegible] (१९४) [illegible] न [illegible]। [illegible] अर्थं [illegible], [illegible] तृतीयातत्पुरुषः। [illegible] अर्थं [illegible] अर्थं [illegible]। [illegible] अर्थं [illegible]। [illegible] अर्थं [illegible] अर्थं [illegible] अर्थं [illegible] अर्थं [illegible] (४१८) [illegible] (१३) [illegible] (पाणिनि: [illegible]) [illegible]।

* [illegible] (पाणिनि: ४।३।१३४), [illegible] (पाणिनि: ४।२।३७), [illegible] (पाणिनि: ५।१।११९,१२४), [illegible] (पाणिनि: ४।३।१२०), [illegible] (पाणिनि: ४।१।४), [illegible]

४३४ । [illegible]ड्ढो वे । (वत् [illegible], ट: [illegible], वे [illegible]) ।

पित्र्य । *

४३५ । हन्‌पन्‌धृतराष्ट्रामुञ्लोप: ण्यो ।

(हन्-पन्-धृतराष्ट्रां [illegible], उञ्लोप: [illegible], वे [illegible]) ।

वार्त्तघ्नं घोष्यं धार्त्तराष्ट्रं । एवां विं, आमनं । †

---

("[illegible] उपसंख्यानम्" इति वार्त्तिकम्) । एषु [illegible] ते पूर्वोक्ता: (४१५) [illegible] [illegible] प्रत्यय [illegible] (४२८) [illegible] [illegible] [illegible], एते एकादश प्रत्यया: [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] व: प्रत्यय: [illegible] [illegible] वा [illegible], एतत् सर्वं प्रयोगानुसारेणैव ज्ञेयम् । पाणिनीये "[illegible] देवता" (पा॰ ४।२।२४), "[illegible] [illegible]" (पा॰ ४।४।२१), "[illegible]" (पा॰ ४।४।५५), "[illegible]" (पा॰ ४।४।५०), "[illegible]" (पा॰ ४।४।६१), "तत्र नियुक्त:" (पा॰ ४।४।६९), "तत्रेश्वर:" (पा॰ ५।१।४२) इत्यादयो [illegible] बोध्या: । [illegible] इति [illegible] [illegible], (४१६) [illegible], (२२७,२५८) [illegible] [illegible] च लोप: । [illegible] [illegible] विकार: [illegible], [illegible] [illegible] । [illegible] [illegible], [illegible] [illegible] । [illegible] [illegible] (पा॰ ४।२।२८), [illegible] [illegible], (पा॰ ४।२।४२ सूत्रे वार्त्तिकम्), [illegible] (४१२) [illegible] । [illegible] [illegible] [illegible], (पा॰ ४।२।४०), [illegible] [illegible] । राज्ञां समूह: राजकं, (पा॰ ४।२।३९), [illegible] [illegible] । [illegible] भाव: [illegible], (४२४) [illegible] [illegible] (१२७) [illegible] न [illegible] । (पा॰ ५।१।११९ ।) [illegible] भाव: [illegible], [illegible] [illegible] [illegible] । (पा॰ ५।१।१२८ ।) ([illegible]) राज्ञो भाव: (पाणिनिमते भाव: कर्म वा) राज्यं ([illegible]), [illegible], (२२७, २५८) [illegible] [illegible] लोप: । ([illegible]) [illegible] भाव: [illegible], [illegible], (४१६) [illegible] [illegible] । [illegible] [illegible] (२३०) [illegible] [illegible], (४१) [illegible] । [illegible] [illegible] [illegible], [illegible] [illegible], (२११) [illegible] । [illegible] [illegible], (१९१) [illegible] [illegible], [illegible] [illegible] [illegible], [illegible] [illegible], (१९७) [illegible] [illegible], (४२३) [illegible] [illegible]-निषेधश्च ।

* [illegible] ट: [illegible] [illegible] [illegible] [illegible] पितृभिर्दं पित्र्यं, (४२१) [illegible] [illegible] । (पितुर्यच्च इति तु पाणिनि: ४।३।७९ ।) वे पिं, [illegible], [illegible] [illegible] ।

† हन् च पन् च धृतराजम् च तेषाम् । [illegible] इति [illegible], [illegible] [illegible] प्रकृतीनां [illegible] । (११०) [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

## ४३६। युष्मदस्मद्त्वन्मदां युष्माकास्माक-तवकममकाः ष्णयीने।

(युष्मद्—मदां ६॥, युष्माक—ममकाः १॥, ष्णयीने ७)।

यौष्माकं यौष्माकीणं, आस्माकं आस्माकीनं, तावकं तावकीनं, मामकं मामकीनं।*

सूर्य्याय हितं सौरीयं आगस्तीयं आत्मनीनं। चोर एव चौरः, चैलोकं रामकः।†

---

ष्णे परे एषामेव उदलोपः स्यात् नान्यस्य इत्यर्थः। उभय इदम् इति वाक्ये (४२२) ष्णे कृते उभ-यत् इत्यस्य उदलोपे, (१८८) ञ्णानि वृः, (४१६) आयपो वृद्धिः, आर्भयं। एवं पूर्व इदं पौर्वं, उत्तरात्र इदं औत्तरात्रं। उभयत्र अपवादे ष्णं, पौत्र इति (४२४) पूर्वमुदाहृतम्। एवं त्रिं, त्वाव इदं त्वावनं, अत्र पूर्वेणापि (११०) उदलोपो न स्यात्। सर्वेण चाधिकार-ष्णे न-लोपाभाव: (४२४)। पाणिनि: ६।४।१४४।

* युष्मद् अस्मद् त्वद् मद् एषां स्थाने क्रमात् युष्माक अस्माक तवक ममक एते आदेशाः स्युः ष्णे ष्णीने च परे। युष्माकमिदम् इति वाक्ये ष्णे ष्णीने च कोर्तुकि युष्माकादेशे कृते यौष्माकं यौष्माकीणं। एवम् आस्माकं आस्माकीनं। तव इदम् इति वाक्ये ष्णे ष्णीने च युष्मद एकत्वात् (२११) त्वादेशे, अनेन तवकादेशे कृते तावकं तावकीनं, एवं मामकं मामकीनं। स्त्रियां तावकी (कन्दति), मामिका (चौरी)। पाणिनि: ४।३।१,२,३।

† (४२२) हितार्थे उदाहरति सौरीयमित्यादि। सूर्याय इत्यस्मात् ष्णीये विभक्तिलोपे, (२१०) यलोपः। एवम् आगस्तीयं। आत्मने हितम् आत्मनीनं, अत्र ष्णीने (४२४) न-लोप-निषेधः। (पाणिनि: ५।१।८ ; ६।४।१६८।) स्वार्थे उदाहरति, चौर इति। एवं चिन्तोवी एव चैतोवी, अत्र चैत्र ष्णे (२१८) ईकारलोपः। स्वार्थप्रत्ययानां पूर्वलिङ्गत्वमिति नियमोऽपि क्वचित् लोकव्यवहारानुसारात्; अतएवात्र क्वचित् स्वार्थिकाः प्रत्यया लिङ्गवचनान्यतिवर्तन्ते। राम एव रामकः, अत्र स्वार्थे। कल्पकोऽन्यार्थेऽपि भवति, यथा—अल्पे कुत्सिते चैव संज्ञाया-मनुकम्पने। तद्युक्तनीत्यायसङ्गे ह्रस्वे च कः स्मृतः॥ इति मावः। तद्युक्तनीतौ अनुकम्पायुक्तनीतावित्यर्थः। पाणिनि: "प्रागिवात्" (५।३।७०), "कुत्सिते" (७४), "संज्ञायां कन्" (७५), "अनुकम्पायाम्" (७६), "नीतौ च तद्युक्तात्" (७७), "अल्पे" (८५), "ह्रस्वे" (८६)।

४३७। कोऽकः स्त्रो के ह्रु वा।

(के ७, अकः ६।, कः १।, स्त्रो ७, ह्रु १।१, वा ।१।)।

कन्यका, सुकन्यकः सुकन्याकः। *

शिवो देवता यस्यासौ शैवः, शालेयः। †

४३८। त्वतौ भावे। (त्वती ११, भावे ७)।

साधुत्वं जड़ता, पाचकत्वं, ब्राह्मणीत्वं। ‡

---

* अकः प्रत्याहारस्य कः स्यात् कपि परे, बहुव्रीहौ ह्रु वा। कन्या एव कन्यका, अत्र अनित्-कपि कृते, अनेन ह्रस्वे, आर्थप्रत्ययान्तात्स्त्रियाम् एवेति (२४८) आप्। एवं मूषिकिका, रामोदका, वैनायिका इत्यादि। शोभना कन्या यस्येति बहुव्रीहौ सुकन्यकः सुकन्याकः, एक वा ह्रस्वः। अक इति किं, गौरिव गौका इत्यादि। पाणिनिः ७।४।१३,१४,१५।

इवे परेऽपि क्वचित् ह्रस्वो वक्तव्यः यथा—कारिषदासः, हरिदासः, पक्विदासः, मैत्रिविमलः, श्रीतकिदम्बुरिलं, नाड़िगचनमित्यादयः प्रयोगानुसारात्। "इकूतोर्ड्याप्" इति क्रमदीश्वरः।

† (४१९) वाहिपदस्य उदाहरणमात्र शैवः, अत्र णः। (पाणिनिः ४।२।२४।) एवं अग्निर्देवता यस्यासौ आग्नेयः, अत्र एयः। एवं आप्तः वैष्णवः गायत्रम इत्यादि। प्रयोगानु-सारेण सर्वविधिषु यथायथं प्रत्ययादिपदेन सूचितमिति।

‡ भावमात्रात् त्व त इति एवं स्यात् भावेऽर्थे। पक्षिणागात् भावस्य द्योतकं, तात्पर्य च द्योतकं स्यात्। भावस्तु शब्दप्रवृत्तिनिमित्तं, येन धर्मेण यत्र शीघ्रमिति प्रतीतिः स धर्मो बोध्यस्तस्य भाव इत्यर्थः। साध्व्या भावः साधुत्वं, जड़ाया भावः जड़ता, उभयत्र (११७) पुंवद्भावः। पाचिकाया भावः पाचकत्वं, अत्र (११८) पुंवद्भावनिषेधेऽपि, (२५०) विशेषविधानात् पुंवद्भावः। एवं पट्व्या भावः पटुत्वं, कैशिक्या भावः कैशिकत्वमित्यादि। ब्राह्मण्या भावः ब्राह्मणीत्वं (२५०) जात्यन्तत्वात् प्रवृत्तिः न पुंवद्भावः, एवं हस्तिनीत्वमित्यादि। अत्र गार्गीत्वं कलितात्वमित्यादि च जात्यन्तत्वाज्जिज्ञासनम्। [illegible] च सामान्यविधौ [illegible] जड़स्य भावः जड़त्वं जड़ता जाड्यं, शुक्लस्य शुक्लत्वं शुक्लता शौक्ल्यमित्यादि ज्ञातव्यं। अत्र वक्तव्यम्—"देवात् तल्" (५।४।२७) इति पाणिनिसूत्रेण देव एव देवता इति स्वार्थे तल्प्रत्ययः। पाणिनिः ५।१।११९।

४३९ । सौक्षोऽर्घात् सः ष-त्वि ।

(त्वि-त्व: ५।, ष-र्घात् ५।, स: ६।, ष: १।, त्वि ७।) ।

ष-र्घात् सौक्ष: स: ष: स्यात् तद्धिते ते । यशुष्ट्वं, धीषु गौरुष्ठ्वं । *

४४० । वृत् साम्ये । (वृत् ।१।, साम्ये ७।) ।

उपमानार्थे वृत् स्यात् । कृष्ण इव कृष्णवत् । †

४४१ । मतुरस्त्यर्थे । (मतु: १।, अस्ति-अर्थे ७।) ।

श्रीरस्ति यस्यासौ श्रीमान्, विद्युमान् दोषान् । ‡

---

* वीरिह् सीष् वचान् । नास्ति घौं यत्र सोऽर्धवान् । दीर्घवर्जात् त्रिवृत्स इक: परस्य सस्य ष: स्यात् तद्धित-तकारे परे । यजुषो भाव: यजुष्टं, एवं हविष्टं । गिरो भाव: गीष्र्वं, एवं धूर्त्वं, अत्र (२२८) दीर्घे,, रेफान्त (१०२) विसर्गे, (६५) विसर्गस्य सकारे, षत्वप्राप्तौ दीर्घवर्जत्वान्निषेध: । सौक: सिं, बहुसाराम् । पाणिनि: ८।३।१०१ ।

† समस्य भाव: साम्यं तद्भिन्नम् । साम्यमात्रात् वृत् स्यात् उपमानेऽर्थे । वकारोऽव्ययार्थ: (२४) । कृष्ण इव कृष्णवत् श्रियौ भातीति शेष:, एवं कृष्णमिव कृष्णवत् शिवं मन्ये इति शेष: । एवं सर्वविभक्त्यन्तात् वृत्प्रत्ययो ज्ञेय: । उपमानं क्रियाविशेषणीयमेव, तेन पुत्रेण तुल्य: स्थूल इत्यादौ क्रियाभिन्नसाम्ये (द्रव्यगुणसाम्ये) न स्यात् । तत्र तु "तत्र तस्येव" (पा० सूत्रम् ११६) । पाणिनि: ५।१।११५,११६,११७ । एषु सूत्रेषु द्वितीयातृतीयाषष्ठीसप्तमी-विभक्त्यन्तादेव वति: स्यादित्युक्तम् ।

‡ अस्ति-अर्थो यस्य अस्तिम् वा स: अस्त्यर्थो विद्यमानसम्बन्धवाचिन् । प्रथमान्तपदात्, अस्ति यस्य अस्तिम् वा इत्यर्थे (यस्य अस्तीत्यस्ति पाणिनिसूत्रे प्रत्ययात्), मतु: स्यात्, उकार-श्रव्य (१९२) तुवर्ग:, (१८५) दीर्घान्त:, त्रिवा (२५०) ईश्वरेण । तेन श्रीवान् श्रीमतो । एवं श्रीरस्ति अस्तिमिति वाक्येऽपि श्रीमान् । विद्युत् अस्ति यस्य अस्तिम् वा इति वाक्ये विद्युत्मान्, अत्र (२२९) मतौ परे मतोर् स्वरस्य उकारविधानसामर्थ्यादेव, (४१०) मकारोऽन्-त्येन भासन्तं ऋतु पाणिन्या: मतु: स्यात् । ततश्च अस्य उत्ते (४११) न तं तकारविकल्पेन सार्वत्रिकत्वात् विसर्गाभावे, (१८३) रुत्वोऽभावे, (२११) मतम् । एवं दोरस्ति यस्य स दोर्मान् । अत्र यवादिर्गणपाठ्य:, यवादिर—यव ऊर्मि भूमि कृमि द्राक्षा हरित् ककुत् मरुत् प्रभृति: । पाणिनि: ५।२।९४,९५ ।

## ४४२। मोङ्म-झपात् वतुः।

(म्-अ-उङ्-म्-अ-झपात् ५।, वतुः १।)।

मकारोङोऽवर्णोङो मकारान्तादवर्णान्तात्, झपान्ताच्च, वतुः स्यादस्त्यर्थे। लक्ष्मीवान्, यशस्वान् भास्वान्, किंवान्, ज्ञानवान् विद्यावान्, विद्युत्वान्। *

## ४४३। स्रङ्मेधास्मायात् विन् वा।

(स्रज्-मेधा-अस्-मायात् ५।, विन् ।१।, वा ।१।)।

स्रग्वी मेधावी तेजस्वी मायावी। पक्षे स्रग्वान् इत्यादि। †

---

"न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः" इति न्यायः, तेन, शोभना बुद्धिरिति कर्मधारये सुबुद्धिरस्यास्तीति सुबुद्धिमान् जन इति न स्यात्, शोभना बुद्धिर्यस्यासौ सुबुद्धिरिति बहुव्रीहिणैव तदर्थप्रतिपादनात्। मत्वादीनां ख्यापनमाह दुर्गसिंहः, भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायामभी मत्वादयो मताः॥ यथा—भूम्नि गोमान्। निन्दायां पापी। प्रशंसायां रूपवान्। नित्ययोगे क्षीरिणो वृक्षाः। अतिशायने उदरवती कन्या। संसर्गे दण्डी पान्थः।

* म च अश्च मौ, मौ उङौ ययोस्तौ मोङौ, मोङौ च म च झप् चेति समाहारः। झप् प्रत्याहारः। लक्ष्मीरस्यास्ति, यशोऽस्यास्ति, भा अस्त्यस्य, किम् अस्त्यस्य, ज्ञानमस्यास्ति, विद्या अस्त्यस्य, विद्युत् अस्त्यस्य, सर्वत्र अस्मिन् वा, इति क्रमेण वाक्यानि। यशस्वान् भास्वान् विद्युत्वान् एतेषु (४२१) दान्तत्वनिषेधात् न सस्य विसर्गः, न च (५८) तस्यापि द। पद-संज्ञाभावस्तु पूर्ववत्। पाणिनिः ८।२।९,१०।

कुमुद-नैतल-नड़ादीनाम् वकारलोपो निपात्यः, तेन कुमुद्वान् वेतस्वान् नड्वान् इत्यादि। (पाणिनिः ४।२।८७। एतन्मते ड्मतुप्।) राजन्वान् इत्यत्र न-लोपाभावो निपात्यः। (पाणिनिः ८।२।१४।) उदन्वानुदधौ चेत् निपात्यः। (पाणिनिः ८।२।१३।) आसन्दीवत्-चक्रीवत्-कक्षीवदादयश्च निपात्याः (पाणिनिः ८।२।१२)।

† स्रज् च मेधा च अस् च माया चेति समाहारे सहात्। एभ्योऽस्त्यर्थे विन् वा स्यात्। पक्षे पूर्वेण वतुः। स्रज् अस्त्यस्य स्रग्वी, अत्र दान्तत्वनिषेधाभावात् विनि परे (२११) कुक्, ततः (१८८) दीर्घः, (११८) न-लुप्। एवं मेधा अस्त्यस्य मेधावीत्यादि। आमयोऽस्त्यस्य आमयावीति निपातनात् अकारस्य आकारः। पाणिनिः ५।२।१२१, "आमयस्योपसंख्यानं दीर्घश्च" इति वार्त्तिकञ्च।

**४४४ । नैकाजादिन् वा ।**

(नैकाजात् ५।, इन् ।१।, वा ।१।) ।

अनेकाचोऽवर्णान्तादिन् वा स्यादस्त्यर्थे । ग्रामी शिखी । *

**४४५ । शं-कंभ्यां य-यु-त-तु-ति-व-भाः ।**

(शं-कं भ्यां ५॥, य—भाः १॥) ।

शंय: शंयु: शन्त: शन्तु: शन्ति: शंव: शंभ: । †

**४४६ । गो तृण मेधा दन्त काण्ड द्यु बल बलि पर्व्व चूड़ा फेन लोम पाम प्रज्ञा मधु केश रज: फलोर्म्मी मृक्त निद्रार्त्तो वातादे—र्मिन् सेरोरेर ओलेभ तलेल श न श र व वलेन युरक्राल्वकिन् वा ।** (गो—वातादेः ५।, मिन्—विन् ।१।, वा ।१।) ।

---

* न एको नैकः, नैकोऽच् यस्य स नैकाच्, नैकाजासौ अचेति नैकाजः तस्मात् । ग्रामम् अस्यास्ति ग्रामी, शिखा अस्यास्ति शिखी, एवं मालो दण्डी इत्यादि । पक्षे ग्रामवानित्यादि । नैकाजः किं, स्वं धनम् अस्यास्तीति न स्वी, परन्तु स्ववान्, स्वामीति स्वं यथाप्राप्ति । पाणिनिः ५।२।११५, "इनिठनोरेकाचरात् प्रतिषेधः" इति वार्त्तिकञ्च ।

† अम् अन् इति मात्वाम्याम् एते सप्त प्रत्ययाः स्युः मत्वर्थे । शं कल्याणं विद्यतेऽस्य शंयः; अत्र टिलोपाभावश्चिन्त्यः (४१०) द्रष्टव्यम् । एवं (४११) मध्या निर्दिष्टमनित्यमिति न्यायात् [illegible] (५०) [illegible] । एवं शंयुरित्यादि । कं वारि [illegible] । पाणिनिः ५।२।१३८ । अत्र द्रष्टव्यम्— [illegible] इति सिद्धान्तकौमुदी ।

एभ्य एते क्रमात् स्युः मत्वर्थे वा । गोमी । *

### ४४७ । नाम्नस्त्यर्थेऽणो घिः ।

(नाम्नि अ, मत्वर्थे अ, अणः ६।, घिः १।) । †

स्वामी, वृषलः, मेधिरः रथिरः, दन्तुरः, काण्डीरः आण्डीरः, द्युमः द्रुमः, वत्सलः वातूलः, वलिभः तुन्दिभः, पर्वतः मरुत्तः, चूडालः मांसलः, फेनिलः पिच्छिलः, लोमशः रोमशः, पामनः अङ्गना, प्रज्ञः श्राद्धः, मधुरः कुञ्जरः, केशवः मालवः, रजस्वला कृषीवलः, फलिनः बर्हिणः, ऊर्णायुः अहंयुः, शृङ्गारकः वृन्दारकः, निद्रालुः दयालुः, पर्वसः वैजयन्तः, वातकी अतिसारकी । ‡

---

* कर्मा यथा—

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| गो | वृष | मेधा | दन्त | काण्ड | द्यु | वत्स | वलि | पर्व | चूडा | फेन | लोम |
| मिन् | ल | इर | उर | ईर | म | ऊल | इभ | त | ल | इल | श |

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| पाम | प्रज्ञा | मधु | केश | रजस् | फल | ऊर्णा | शृङ्ग | निद्रा | अर्हस् | वात |
| न | ण | र | व | वल | इन | यु | आरक | आलु | ण | किन् |

वातादेरित्यादिपदं सर्वत्र योज्यम् । अत्र यद्यपि सामान्येनोक्तं, तथापि यथाविहितं ज्ञातव्यः । गावो विद्यन्तेऽस्य गोमी, पक्षे गोमान् । पाणिनिः ५।२।११४ ; ५।२।८० ; "मेधारथाभ्यामिरच् इरचौ वक्तव्यौ" इति वार्त्तिकम् ; ५।२।१०६ ; १११ ; १०८ ; "वत्सांसाभ्यां कामबले" इति वार्त्तिकम् ; ५।२।१३९ ; "पर्वमरुद्भ्यां तप्" इति वार्त्तिकम् ; ५।२।९६ ; ९९ ; १०० ; १०१ ; १०७ ; १०९ ; ११२ ; "फलबर्हाभ्यामिनच्" इति वार्त्तिकम् ; ५।२।१२३, १४० ; "शृङ्गवृन्दाभ्यामारकन्" इति वार्त्तिकम् ; निद्रालुः दयालुरिति निद्रासंज्ञाभ्यामौः दयतेरेव स्पृहिगृहीत्यादिना सिद्धं (पा० ३।२।१५८) न तु तद्धितप्रत्ययेन ; ५।२।१२० ; १२९ ।

† अणो दीर्घः स्यात् मत्वर्थप्रत्ययेषु, नाम्नि वाच्ये । पाणिनिः ६।३।१२० ।

‡ गावोऽस्यास्तीति सन्त्यस्येति वा स इत्यस्मात् मिन्, अनेन दीर्घः, स्वामी ईश्वरः । वृषम् अस्त्यस्य वृषलः, एवं मेधा अस्त्यस्य मेधिरः इत्यादि ज्ञातव्यम् । अत्रत्यमर्थं (२५८) प्रत्ययान्तमर्थान्तरे । सर्वत्र अभिधानात् स्त्रीपुंसिङ्ग-व्यवस्था ।

## ४४८। वाग्मि-वाचाट-वाचालाः ॥

(वाग्मि—वाचालाः १॥)।

वाचोऽर्थविशेषे एते निपात्यन्ते । *

## ४४९। जन-खलादि-गो-रथ-वातात् तल्-इन्-त्र-कट्योलं समूहे।

(जन—वातात् ५।, तल्-इन्-त्र-कट्य-ऊलं १।, समूहे ७)।

जनता बन्धुता, खलिनी हलिनी, गोत्रा, रथकट्या, वातूलः । †

---

एतद्भिन्नानि—चूड़ादित्वात्—("सिध्मादिभ्यश्च" इति तु पाणिनिः ५।२।९७) मांसलः वंसलः पांशुलः श्यामलः पिङ्गलः कपिलः बल्वूलः पृथुलः पलवलः मञ्जुलः मृदुलः वट्ठलः पेशलः सक्तलः तुन्दिलः शीलः कुशलः वाचालः शीतलः पुष्कलः श्रेमलः। रोमादित्वात्—कपिशः कर्कशः किरिशः। पामादित्वात्—वामनः दद्रुणः लक्ष्मणः। अश्मादित्वात्—वार्त्तः शार्करः ऊषरः वैरः वासरः। मध्वादित्वात्—शुषिरः ऊषरः पुष्करः मुखरः खरः नखरः पाण्डुरः मधुरः कुञ्जरः नगरम्। केशादित्वात्—विपुलः राजीवः गाण्डीवः अर्णवः मणिवः हिरण्यवः। रजआदित्वात्—दन्तावलः शिखावलः पर्वतः ऊर्जस्वलः आढ्यवलः पुत्रवलः उत्साहवलः। प्रज्ञादित्वात्—मलिनः। ऊर्णादित्वात्—ऊर्णायुः। निद्रादित्वात्—तन्द्रालुः लज्जालुः नद्रालुः दयालुः स्पृहयालुः शीतालुः उष्णालुः हिमेलुः—इत्यादीनि प्रयोगानुसारात् ज्ञेयानि।

* वाग्मन्तस्य स्थाने एते निपात्यन्ते पञ्चार्थे। निपातो ह्यर्थविशेषे इति वाग्मीति प्रशंसायां, वाचाटवाचालौ निन्दायां, बहुभाषित्वादस्यर्थ इति। "यो हि सम्यग्बहु भाषते स वाग्मी"। यौ तु कुत्सितं बहु भाषेते तौ वाचाटवाचालौ। अतएव पाणिनौ (५।२।१२४, १२५) सूत्रद्वयं, परसूत्रे च "कुत्सित इति वक्तव्यम्" इति वार्त्तिकम्।

† जनश्च खलश्च तौ आदी यस्य स जनखलादिः, स च गौश्च रथश्च वातश्च तस्मात्। तल् इन् च त्रश्च कट्यश्च ऊलश्च तत्। समूहार्थे जनादेः तल् खलादेरिन् गोशब्दात् त्रः रथात् कट्यः वातादूलः यथासंख्यम्। जनानां समूहः जनता, एवं बन्धुता ग्रामता। खलानां समूहः खलिनी, एवं हलिनी बिसिनी पद्मिनी कुमुदिनी। जनादिः खलादिश्च प्रयोगतो ज्ञेयः। गवां समूहः गोत्रा, रथानां समूहः रथकट्या, वातानां समूहः वातूलः। जनशब्दात् पुंस्त्वम् ... पाणिनिः ४।२।४३,५०,५१; "वातात् समूहे च" इति, "खलादिभ्य इनिः" इति च वार्त्तिकम्। अत्र रथकड्या इत्यपि पाठान्तरं दृश्यते।

४५०। सङ्ख्याया डट् पूरणे।

(सङ्ख्यायाः ५।, डट् ।१।, पूरणे ७।)।

एकादशानां पूरणः एकादशः। *

४५१। नोऽसङ्ख्यादेर्मट्।

(नः ५।, असङ्ख्यादेः ५।, मट् ।१।)।

असङ्ख्यादेर्नान्तसङ्ख्याया मट् स्यात् पूरणे। पञ्चमः। †

४५२। तमट् षष्ट्यादेः। (तमट् ।१।, षष्ट्यादेः ५।)।

असङ्ख्यादेः षष्ट्यादेः पूरणे तमट् स्यात्।

षष्टितमः सप्ततितमः। सङ्ख्यादेस्तु एकषष्टः। ‡

४५३। शतादि-मास-संवत्सरात्। (५।)।

एभ्यस्तमट् स्यात् पूरणे। शततमः एकशततमः, मासतमः संवत्सरतमः। §

---

* सङ्ख्यावाचकेभ्यो डट् स्यात् पूरणे। डट्टिकौ, ष्णकारटिलिङ्गः, टिलात् (१२६) टिलोपः, टिलात् (२५०) ईप्। पूर्यते सम्पूर्यते अनेनेति पूरणः करणेऽनट्। तत्पूरणसमासानां विशेषणत्वेन वाच्यत्वात् तान् विहाय उदाहरति, एकादशानां पूरणः एकादशः इति, एकादश सङ्ख्या येन कारणेन पूर्णा भवति स एकादशः पुरुषः, इत्यनुभवः पर इत्यर्थः। एवं द्वादश इत्यादि। स्त्रियाम् एकादशी इत्यादि। पाणिनिः ५।२।४८।

† सङ्ख्या आदिर्यस्य स सङ्ख्यादिः, न सङ्ख्यादिरसङ्ख्यादिस्तस्मात्, न इत्यस्य विशेषणम्। पञ्चानां पूरणः पञ्चमः, (११८) नस्य लुप्। टिलात् (२५०) पञ्चमीत्यादि। एवं सप्तमः अष्टमः नवमः दशमः। असङ्ख्यादेः किं, एकादशः इत्यादि। एषां लुक्ष्यमाणमेव लक्ष्यं, तेन अविपञ्चानां पूरणः इत्यादौ न स्यात्। पाणिनिः ५।२।४९।

‡ षष्ट्यादिर्येषां ते षष्ट्यादयस्तस्मात्। षष्टेः पूरणः, सप्ततेः पूरणः। एवम् अशीत्यादितमः, षष्टीतितम इत्यादि। एकषष्ट इति (४५०) डट्। पाणिनिः ५।२।५८।

§ शतादिश्च मासश्च संवत्सरश्च तस्मात्। पृथक् योगात् असङ्ख्यादेरिति नाद्रियते,

## ४५४ । विंशत्यादेर्वा । (विंशत्यादेः ५।१, वा ।१।) ।

विंशतितमः विंशः, त्रिंशत्तमः त्रिंशः । *

## ४५५ । चतुः-षष्-कति-कतिपयात् थट् ।

(चतुः—कतिपयात् ५।१, थट् ।१।) ।

चतुर्थः षष्ठः कतिथः कतिपयथः । †

## ४५६ । बहु-गण-पूग-सङ्घ-वतोस्तिथट् तल्लोपश्च ।

(बहु—वतोः ५।१, तिथट् ।१।, तल्लोपः १।१, च ।१।) ।

बहुतिथः यावतिथः । ‡

---

तेन सङ्ख्यादिभ्योऽसङ्ख्यादिभ्यो वा एष इत्यर्थः । शतस्य पूरणः, एकशतस्य पूरणः, मासस्य पूरणः, संवत्सरस्य पूरणः । एवम् एकमासतमः एकसंवत्सरतमः इत्यादि । पाणिनिः ५।२।५७ ।

* विंशतिरादिर्यस्य स तस्मात् । आदिपदेन नवतिपर्यन्तं अवलोक्यते । सङ्ख्यादे-रसङ्ख्यादेर्वा विंशत्यादेस्तमट् स्यात् पूरणे । विंशतेः पूरणः विंशतितमः, पक्षे (४५०) डट्, (१२६) तिलोपः, (२५८) अकारलोपः, विंशः । एवं त्रिंशत्तमः त्रिंशः इत्यादि । सङ्ख्यादिस्तु एकविंशतितमः एकविंशः इत्यादि । पूर्वेण (४५२) सङ्ख्यादिवर्जनेऽपि, अनेन सङ्ख्यादेः षष्ट्यादेः पूरणे तमट् वा वक्तव्यः, तेन एकषष्टितमः एकषष्ट इत्यादि । पाणिनिः ५।२।५६ ।

† चतुर् च षष् च कति च कतिपयश्च तस्मात् । डतिरिति प्रत्ययः (५०८), तेन तदन्तानां कति-यति-ततीनां ग्रहणम् । एभ्यः पूरणे थट् स्यादित्यर्थः । चतुर्णां पूरणः चतुर्थः, एवं षष्ठ इत्यादि । विद्यमानविभक्तिकानां पदत्वं स्वाभाविकं, लुप्तविभक्तिकानान्तु पदत्वम् प्रातिदैशिकत्वेन, तत्र प्रातिदैशिकमनित्यमिति न्यायात्, चतुर्थः षष्ठ इत्युभयत्र पदत्वाभावेन विरामाभावात् (१०२) रस्य न विसर्गः, (१५५) षस्य च न ड इति । पाणिनिः ५।२।५१ ।

‡ बहुश्च गणश्च पूगश्च सङ्घश्च वतुश्च तस्मात् । वतुरिति प्रत्ययः (५०८), तेन यावत् तावत् एतावत् कियत् इयत् इत्येतेषां ग्रहणम् । एभ्यः पूरणे तिथट् स्यात्, तिथट् परे चकारवर्णितपूर्ववर्ति-तकारस्य लोपश्च इत्यर्थः । बहूनां पूरणः इत्यादि वाक्यम् । पाणिनिः ५।२।५२,५३ ।

४५७। द्वितीय तृतीय तुर्य तुरीयाः। (१३)।

एते निपात्याः। *

४५८। सङ्ख्याया धाच् प्रकारे।

(सङ्ख्यायाः ५।, धाच् १।१।, प्रकारे ७।)।

चतुःप्रकारं चतुर्धा। †

४५९। द्वैधं द्वेधा त्रैधं त्रेधा षोढैकध्यं वा।

(द्वैधं—ऐकध्यं १।१।, वा ।१।)।

एते निपात्यन्ते वा प्रकारे। पक्षे द्विधा त्रिधा षड्धा एकधा। ‡

४६०। सङ्ख्याया अवयवे तयट्।

(सङ्ख्यायाः ५।, अवयवे ७।, तयट् ।१।)।

चतुरवयवं चतुष्टयं। §

---

* द्वयोः पूरणः, त्रयाणां पूरणः, चतुर्णां पूरणः, इति वाक्येषु क्रमेण एते निपात्याः। तुर्ये इत्यत्र (२२८) वर्हितवकारवर्जनात् न दीर्घः। पाणिनिः ५।२।५४,५५ ; तुर्यतुरीयेत्यत्र "चतुरश्छयतावाद्यक्षरलोपश्च" इति वार्त्तिकञ्च।

† सङ्ख्यायाः अर्थेन (१०१) सङ्ख्यातुल्यानामपि ग्रहणं, तेन सङ्ख्यावाचकेभ्यः कत्यादि-बहुगणेभ्यश्च धाच् स्यात् प्रकारे। प्रकारोऽत्र क्रियार्थः। प्रकारो भेदसादृश्ययोः इत्यमरः। चतुः-प्रकारमिति चत्वारः प्रकारा यस्य तत्। एवं कतिधा इत्यादि। सर्वविभक्त्यर्थे एतावा-न्प्रत्ययः, तेन चतुःप्रकारान् भुङ्क्ते, चतुःप्रकारैः भुङ्क्ते इत्यादौ चतुर्धा भुङ्क्ते इति। पाणिनिः ५।३।४२। अधिक (५।३।२०) इति पाणिनिसूत्रेण क्रियायाः [illegible] पर्यवसानात्. शीघ्रे आसन्नाम्नो वा स्यात्; यथा, चतुर्धा दिवसस्य भुङ्क्ते, चतुरावर्त्तनमित्यर्थः। [illegible] वारार्थेऽपि धा इति औमराः। तत्र, वर्हितपरिशिष्टे "वाऽवरविषयेऽ धुञ्च" इति सूत्रस्य नामोदाहरणं "चतुरश्वावर्त्तनविषये धाचि वा धा वा स्यात्" इति हरिभट्टोक्तिः।

‡ द्विप्रकारं, त्रिप्रकारं, षट्प्रकारं, एकप्रकारमित्यर्थः। [illegible] [illegible] इति (१२१) ए इति, [illegible] न (३०) [illegible]। पाणिनिः ५।३।४३,४४,४५; [illegible] "धमुञ् वा" इति वार्त्तिकञ्च।

§ पुनः सङ्ख्यावयवं [illegible]। [illegible] सङ्ख्यायाः [illegible]।

## ४६१ । द्वित्रेर्वायट् । (द्वि-त्रेः ५।, वा ।१।, अयट् ।१।) ।

द्वयं द्वितयं, त्रयं त्रितयं । *

## ४६२ । तरतमौ द्विबहूनामेकोत्कर्षे ।

(तर-तमौ १।, द्वि-बहूनां ६।।।, एकोत्कर्षे ७।) ।

द्वयोरेकस्यातिशये तरो बहूनां तमः स्यात् ।

अयमनयोरतिशयेन विद्वान् विद्वत्तरः, अयमेषामतिशयेन विद्वान् विद्वत्तमः । शुक्लतरा शुक्लतमा । †

## ४६३ । रूपकल्पे चेबूप् स्वं वा भितु पुंवच्च ।

(रूप-कल्पे ७, च ।१।, ईप्-ऊप् ।१।, स्वं १।, वा ।१।, भित् ।१।, तु ।१।, पुंवत् ।१।, च ।१।) ।

---

ट् स्तु । द्वयोर्विभाषयोर्मध्ये विधिर्नित्यः । चत्वारोऽवयवा यस्य तत् (सुखं) चतुरवयवं इति चतुष्टयं (१०२,६५,४१८,४०) । स्त्रियां चतुष्टयी । पाणिनिः ५।२।४२ ।

* द्वौ च त्रयश्च तत् तस्मात् द्वित्रेः । आभ्याम् अयट् स्याद् अवयवे । द्वयवयं त्र्यवयवम् इति सामान्यं, द्वि-त्रि-शब्दाभ्याम् अयट्, (२५८) इकार-लोपः । पक्षे पूर्वोक्त तयट् । स्त्रियां द्वयी, त्रयी । पाणिनिः ५।२।४३ ।

† तरश्च तमश्च तौ । द्वौ च बहवश्च द्विबहवस्तेषां, (११२) निर्धारणे षष्ठी । द्वि-बहूनामिति बहुवचनान्तत्वेऽपि शब्दसाम्यात् तरतमाभ्यां क्रमो ज्ञेयः । उत्कर्षोऽतिशयः । एकस्य उत्कर्षे [illegible] पूर्वविहित एव । विद्वत्तरः विद्वत्तमः, उभयत्र विद्वान् उत्कर्षी भवति, (१८१) इत्यत्र, (६३) इत्यत्र च । इयमनयोरतिशयेन शुक्ला शुक्लतरा, आसामतिशयेन शुक्ला शुक्लतमा, (३९०) पुंवद्भावः । एवम् अतिशयेन साध्वी साधुतरा इत्यादि । अत्र [illegible] प्रत्ययौ प्रयुक्तः । [illegible]—विद्वत्तरः विद्वत्तमः इतिवत् मूर्खतरः मूर्खतमः इत्यपि भवति । नहि प्रकर्षमात्रे एव तरतमौ, परन्तु अपकर्षेऽपि । [illegible] तद्विषय एव तरतमप्रयोगः । अतएव "अतिशयविशिष्टे" [illegible] "द्विबहुष्वोत्कर्षे तरतमौ" इति सूत्रं विन्यस्य "अतिशयेन [illegible] एव भवति" इति उक्तम् । पाणिनिः ५।३।५५,५७ ।

चकारात् तर-तम-रूप-कल्पेषु ईबन्तमूबन्तञ्च स्त्रं स्याद्वा ऊङ्-दित्सु पुंवच्च। स्त्रितरा स्त्रीतरा, वामोरुतरा वामोरूतरा। विदुषितरा विदुषीतरा विद्वत्तरा, सतितरा सतीतरा सत्तरा। *

## ४६४। त्यादेश्च रूपः। (त्यादेः ५।, च ।१।, रूपः १।)।

तेस्त्यादेश्चोत्कर्षे रूपः स्यात्। पटुरूपः, पचतिरूपं। †

## ४६५। किमेव्यात्याद्द्रव्ये चतरां चतमां।

(किम्-ए-व्यात् ५।, च ।१।, अद्रव्ये ७।, चतरां-चतमां ।१।)।

किम एदन्तात् व्यात् त्याद्यन्ताच्च द्विबहुनामिकोत्कर्षे चतरां चतमां स्तः, न तु द्रव्ये। किन्तरां प्राह्णेतरां उच्चैस्तरां, पचतितरां। एवं चतमां। द्रव्ये तु उच्चैस्तरस्तरुः। ‡

---

* रूपश्च कल्पश्च रूपकल्पं तस्मिन्। ईप् च ऊप् च ईबूप्। ऊङ् अन्ते यस्य सः, स इत् यस्य स्त्रित्। ईबन्तं ऊबन्तञ्च पदं ह्रस्वं वा स्यात् तरतमरूपकल्पेषु परेषु, ऊङादित् वर्जयित्वा पुंवच्च वा इत्यर्थः। (२२०) पुंवद्भावोऽत्रैव सिद्धे प्राप्ते चनेन विकल्पविधानम्। ह्रस्वत्वाभावे-ऽतिशयेन स्त्री, ह्रस्वत्वयोरतिशयेन वामोरूः, इति वाक्यद्वयम्। उभयत्र स्त्रियाः सौन्दर्यमत्र उत्कर्षो गम्यते। चनेन वा ह्रस्वः। विदधातोः क्वसु (११०१) तस्य स्थाने वसु भवति, (२५०) ईपि, (२२८) वस्य उः विदुषी इति, ततः द्वयोरनयोरतिशयेन विदुषी, एवम् अस-धातोः (११००) शतृप्रत्यये ईपि सती, ततः द्वयोरनयोरतिशयेन सती इति तरप्रत्यये, चनेन वा ह्रस्वः, पक्षे पुंवच्च। पाणिनिः ६।३।४५।

† तेन विधिस्तदन्तस्येति न्यायात् त्यादेः त्याद्यन्तात् चकारात् तिबन्ताच्च रूप स्यात्। अत्र एतत्प्रत्ययस्य पर्यन्तेन प्रशस्यवाचकत्वात् केवलम् उत्कर्षे इत्येव बहुवचनी। अतिशयेन पटुः पटुरूपः, अतिशयेन पट्वी पटुरूपा, (२२०) पुंवद्भावः। अतिशयेन पचति पचतिरूपम्, अत्र क्रियाया उत्कर्षः। एवम् अतिशयेन पचति पचतिरूपम् इत्यादिषु कर्तृकर्मणोरनुसारेण विभक्त्यः प्रयुज्यन्ते, परन्तु क्रियायाः पुंस्त्वाभावेन स्वार्थ-क्रियापदस्य विशेषणत्वाभावे सामान्यत्वात् नपुंसकत्वम्, एवं क्रियायाः सङ्ख्याभावेन च प्रथमैकवचनमेव। पाणिनिः ५।३।६६ ; ५।३।५८।

‡ किम् च ए च व्यच किमेव्यं तस्मात्। न द्रव्यम् अद्रव्यं तस्मिन्। चतरां च चतमां च तौ। अद्रव्यस्य द्विबहुनामिकोत्कर्षे इति बहुवचनी। चकारात् त्याद्यन्तात्।

## ४६६ । गुणाद्विष्ठेयसू ।

(गुणात् ५।, वा ।१।, इष्ठ-ईयसू १।२)।

**गुणवाचिनो द्विबहूनामेकोत्कर्षे क्रमादिष्ठेयसू ईयसिष्ठौ वा स्तः ।***

## ४६७ । ओमंश्च ञिन्नैकाचः ।

(ञि-इमन् ।१।, च ।१।, ञित् ।१।, नैकाचः ५।)।

**ञि-रिमन् इष्ठ ईयसुश्च अनेकाचो लेः परो ञित् स्यात् । लघिष्ठः, लघीयान् । †**

---

किन्तु धातुग्रहणं नोत्तरत्र इति न्यायात् त्यायन्तस्य न पश्चादनुवृत्तिः । द्रव्यादपि यथा—चित्वप्तेर्जामदग्न्योम-कालाः दिन्दैचिनो मम इति मव । द्वयोरेकोत्कर्षे घतरा, बहूनामेकोत्कर्षे घतमामिति क्रमः । चकारेत् अव्ययार्थम् । अत्र किमादीनां मध्ये ये गुणादिवाचिनो द्रव्यवाचिनश्च तेभ्यो गुणादौ वाच्ये एतौ प्रत्ययौ स्तः, द्रव्यवाच्ये तु न स्त इत्यर्थः । इदमनयोरतिशयेन किम् किन्तरां, किंशब्दोऽत्र कुत्सितार्थः । द्वयोरतिशयेन प्राह्णे प्राह्णेतरां, एकारान्तात् प्रत्ययविधानसामर्थ्यात् सप्तमीविभक्तेरलुक् । अयमनयोरतिशयेन उच्चैः उच्चैस्तरां (शब्दः), एवं नीचैस्तरां, सुतरां नितरामित्यादि । इदमनयोरतिशयेन पचति पचतितरां, अत्र पचनक्रियाया उत्कर्षः । उच्चैस्तर इति, यद्यपि द्रव्ये (जातौ च) प्रकर्षाभावस्तथापि गुणक्रियाप्रकर्षौ यदा द्रव्ये आरोप्यते तदैवायं प्रतिषेधः, पूर्व्वेण (४६२) तरतमाविति । एवमेव गोयीचन्द्रधृतकविपरिशिष्टे—"जातिद्रव्ययोः प्रकर्षाभावात् गोतरो डित्थतम इति न भवति । यदाऽपि क्रियागुणप्रकर्षौ विवक्ष्यते तदा तरतमाभ्यां भवितव्यमेव ।" पाणिनिः १।१।२२ ; ५।४।११ ।

* गुणवाचिन इति गुणवद्वाचिन एव ग्रहणं, न तु गुणमात्रवाचिनः, तेन शुक्लीयान् पटः इति स्यात्, न तु पटस्य शुक्लीयानिति । अतएव "गुणवचनेभ्यो मतुपो लुगिष्टः" इति भाष्यविवरणम् । "शुक्लो गुणोऽस्यास्तीति शुक्लः पटः" इति सिद्धान्तकौमुदी । द्विबहूनामेकोत्कर्षे इति अनुवर्त्तते । यद्यपि पाणिन्यादिव्याकरणेषु (पाणिनिः ५।३।५५,५७,५८) द्विबहूनामभ्येन ईयसिष्ठयोः क्रमो दृश्यते, तथापि, बोपदेवेन क्रमविपरीतप्रयोगदर्शनात्, इष्ठेयसू ईयसिष्ठौ वा स्त इति उभौ क्रमाभावः कथितः ।

† ञिश्च इमन् च तत् ओमम् । चकारादिष्ठेयसू च । नास्ति एकोऽच् यस्य स नैकाच् तस्मात् । इमन्ग्रहणसामर्थ्यात् ञित्त्व लेः पर एव, तेन ओमरचतीत्यादौ न प्रसङ्गः । अथ-

४६८ । लुङ्मत्वत्विनां । (लुङ् ।१।, मत्-वत्-विनां ६।३)।

मतिष्ठः । मेधिष्ठः । *

४६९ । टन् लोप्यः । (टन् ।१।, लोप्यः १।)।

करिष्ठः । †

४७० । बाढान्तिक स्थूल दूर युव क्षिप्र क्षुद्र प्रिय स्थिर स्फिरोरु गुरु बहुल तृप्र दीर्घ ह्रस्व वृद्ध वृन्दारकाः—साध नेद स्थव दव यव क्षेप क्षोद प्र स्थ स्फ वर गर बंह त्रप द्राघ ह्रस वर्ष वृन्दाः ।

(बाढ—वृन्दारकाः १।३, साध—वृन्दाः १।३)।

एषां स्थाने क्रमादेते स्युः ञ्यादिषु ।

साधिष्ठः नेदिष्ठः स्थविष्ठः दविष्ठः यविष्ठः क्षेपिष्ठः क्षोदिष्ठः

---

मनीषिणां वा अतिशयेन बहुः बहिष्ठः, इष्ठे, अनेन अर्द्ध विकारे, (१२६) टिलोपः । एवं बहीयानिति वा । पक्षे बहुतरः बहुतम इति । पाणिनिः ६।४।१५८ ।

* मत् वत् विन् च लोप्याः । अर्थवशात् विभक्तेर्विपरिणाम इति-न्यायात् ञ्यादिः सम्बन्धलेनानुवृत्तिः । शेष—विः इमन् इष्ठ ईयस् एषु परेषु मत्-वत्-विनां लुक् स्यात् । अतिशयेन मतिमतां मतिष्ठः, अनेन मतोर्लुक्, विभक्तेः टिलोपः । अतिशयेन मेधावान् मेधावी वा इति वाक्ययो वतु-विनोर्लुक् विभक्तेः टिलोपे मेधिष्ठ इति । एवं मतीयसी मेधीयसीत्यादि । पाणिनिः ५।३।६५ ।

† टन् लोप्यः स्यात् ञ्यादिषु । अतिशयेन कर्त्ता करिष्ठः, अत्र इष्ठौ परे, अनेनेति लोपस्यान्तिमिति न्यायात्, (१२९) तृचि एकाच्त्वात् न टिलोपः । एवं करीयान् । कर्तुर्भावः करिमा । कर्तारमाचष्टे कारयति, अत्र इष्ठौ परे, तदन्तमनुबन्ध लिङ्गी, णौ परे गुणः (१००) वृद्धिः । पाणिनिः ६।४।१५४ ।

प्रेष्ठः स्थेष्ठः स्फेष्ठः वरिष्ठः गरिष्ठः बंहिष्ठः त्रपिष्ठः द्राघिष्ठः ह्रसिष्ठः वर्षिष्ठः वृन्दिष्ठः । *

## ४७१ । प्रशस्यः श्रः । (प्रशस्यः १।, श्रः १।)।

श्रेष्ठः । †

## ४७२ । ज्यो वृद्धश्चेयस्त्वाः ।

(ज्यः १।, वृद्धः १।, च ।१।, ईयसो ।१।, आः १।) ।

वृद्धः प्रशस्यश्च अजादौ ज्यः स्यात्, तस्माच्चेयसोरी आः स्यात् । ज्येष्ठः ज्यायान् । ‡

---

* बाढस्य अन्तिकस्य इत्यादि, साधस्य नेदस्येत्यादि च क्रमः । स्थिरो ..., ..., वृन्दारकोऽपि क्रमः औणादिको रेफः । वृन्दारको देवो मुख्यो वा । क्रमो यथा—

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| बाढ | अन्तिक | स्थूल | दूर | युवन् | क्षिप्र | क्षुद्र | प्रिय | स्थिर |
| साध | नेद | स्थव | दव | यव | क्षेप | क्षोद | प्र | स्थ |
| स्फिर | उरु | गुरु | बहुल | तृप्र | दीर्घ | ह्रस्व | वृद्ध | वृन्दारक |
| स्फ | वर | गर | बंह | त्रप | द्राघ | ह्रस | वर्ष | वृन्द |

स्थूलादौ यणादेर्लोपः पूर्वस्य च गुणः ... भवन्ति, प्रादिषु परेषु आदेशविधान-सामर्थ्यात् । इष्ठेमनीयसोरेषां वा प्रतिशब्देन बाढः साधिष्ठः, एवं सर्वत्र प्रथमान्तेन वाक्यम् । ... (४६७) स्थिरं, (१२६) टिलोपः । प्रेष्ठः स्थेष्ठः स्फेष्ठः एषु ... न स्थिरम् । एकाच्-... (२४८) ... न ... । ... एकाच्त्वात् आदेशानां न ... भवति । एवमन्यत्र पाणिनिमतम्, वर् गर् बंहि वर्षि द्राघि त्रप् इत्यादि-... प्रयोगात् । पाणिनिः ५।३।६३, ६।४।१५६,१५७ ।

† प्रशस्यः श्रः स्यात् अजादौ । इष्ठेमनीयसोरेषां वा प्रतिशब्देन प्रशस्यः श्रेष्ठः । एवं श्रेयान् । प्रशस्यस्य श्रः श्रेष्ठः । पाणिनिः ५।३।६० ।

‡ ईयसोरी ईयसो इति सूत्रमपरेषाम् । इष्ठेमनीयसोरेषां वा प्रतिशब्देन वृद्धः प्रशस्यो वा ज्येष्ठः । एवं ज्यायान्, अत्र आदेशात् परस्य ईयसोरीकारस्य आः । पूर्वेण (४७०) वर्षिष्ठः वर्षीयानिति च भवति । पाणिनिः ५।३।६१,६२ ।

## ४७३ । पृथु मृदु कृश भृश दृढ परिवृढस्यृ रः ।

(पृथु—परिवृढस्य ६।, ऋत् ।६।, रः १।)।

एषामृकारस्य अजादौ रः स्यात् । प्रथिष्ठः । *

## ४७४ । युवाल्पौ कन् वा ।

(युवाल्पौ १॥, कन् ।१।, वा ।१।)।

कनिष्ठः, यविष्ठः अल्पिष्ठः । एवमीयसुः । †

## ४७५ । गुणादिमन् भावे ।

(गुणात् ५।, इमन् ।१।, भावे ७।)।

गुणवाचिन इमन् स्यात् भावे । लघिमा । ‡

## ४७६ । भूयोभूमभूयिष्ठाः ।

(भूयस्-भूमन्-भूयिष्ठाः १॥)।

---

* पृथुश्च मृदुश्चेत्यादि द्वन्द्वे तस्य । अयमनयोरेषां वा अतिशयेन पृथुः प्रथिष्ठः । एवं म्रदिष्ठः क्रशिष्ठः भ्रशिष्ठः द्रढिष्ठः परिव्रढिष्ठः, प्रथीयान्, प्रथिमा इत्यादि च । पाणिनिः ६।४।१६१ ।

† युवा अल्पश्च कन् स्याद्वा अजादौ । अयमनयोरेषां वा अतिशयेन युवा अल्पो वा कनिष्ठः इति युवाल्पयोरुदाहरणं, पक्षे युवन्शब्दस्य (४७०) यविष्ठः, अल्पशब्दस्य अल्पिष्ठः । एवं कनीयान्, पक्षे यवीयान् अल्पीयान् । पाणिनिः ५।३।६४ ।

‡ गुणवाचिन इति गुणवद्वाचिन इत्यर्थः । तेन रूपस्य भावः रूपत्वं, रसस्य भावः रसत्वमित्यादि, न तु रूपिमा रसिमा इत्यादि । शुक्लिमा कालिमा नीलिमा इत्यादि तु घटादिगुणवतो घटादेरेव धर्मः । लघोर्भावः, लघ्व्या भावः, लघुनो भाव इति वाक्यत्रयेऽपि लघिमा, (१२०) पुंवद्भावः, (४६०) ञित्वं, (१२६) टिलोपश्च । इमन्प्रत्ययान्तः पुंलिङ्ग एव अभिधानात्, केवलं प्रियस्य भावः प्रेमा प्रेम इति पुंलिङ्गः क्लीबलिङ्गश्च । प्रेमा ना प्रियता हार्दं प्रेम स्नेह इत्यमरः । पाणिनिः ५।१।१२२ ।

बह्वो-ईयस्-इमन्-इष्ठान्तस्य क्रमादेते निपात्यन्ते । *

## ४७७ । त्यादेश्चोने कल्पदेश्यदेशीयाः ।

(त्यादेः ५।, च ।१।, ऊने ७।, कल्प-देश्य-देशीयाः १॥) ।

ङेस्त्याद्यन्ताच्च ईषदूनेऽर्थे एते स्युः ।

ईषदूनो विद्वान्—विद्वत्कल्पः विद्वद्देश्यः विद्वद्देशीयः । तार्किक-देशीया । पचतिकल्पं । †

## ४७८ । सेर्बहुः प्राक् । (सेः ५।, बहुः १।, प्राक् ।१।) ।

ईषदूनः पटुः बहुपटुः । ‡

## ४७९ । पाशः कुत्सायां । (पाशः १।, कुत्सायां ७।) ।

कुत्सितो भिषक् भिषक्पाशः । §

---

* अतिशयेन बहुरिति बहुशब्दादीयसुप्रत्यये भूयः, इष्ठप्रत्यये भूयिष्ठः । बहोर्भाव इति इमन्प्रत्यये भूमा इति । पाणिनिः ६।४।१५८,१५९ ।

† ति आदिर्यस्य स त्यादिस्तस्मात् । आ (ईषत्) ऊनः ओनस्तस्मिन्, (२६) अकार-लोपः । कल्पश्च देश्यश्च देशीयश्च ते । विद्वत्कल्प इति (१८१) विरामे परे दङ् । एवं विद्वद्देश्यः विद्वद्देशीयः । एषां पूर्व्वलिङ्गतैव । ईषदूना दीर्घा दीर्घकल्पा दीर्घदेश्या दीर्घ-देशीया, एषु (२२७) असन्ततरादित्वात् पुंवद्भावः । ईषदूना तार्किकी तार्किकदेशीया, (२५०) पुंवद्भावः । ईषदूनं यथा स्यात्तथा पचति पचतिकल्पं, एवं पचतःकल्पं, पचन्तिकल्पमित्यादि । पाणिनिः ५।३।६७ ।

‡ सेः पुनरुपादानं त्यादिनिवृत्त्यर्थम् । स्याद्यन्तात् बहुः स्यात्, स च बहुः परत्र जातः सन् पूर्व्वः स्यादित्यर्थः । बहुपटुरिति विभक्तेर्लुकि कृते, पुनर्लिङ्गसंज्ञायां विभक्तिः । ईषदूना विदुषी बहुविदुषी, अत्र बहुप्रत्ययस्य असन्ततरादित्वेऽपि परस्थायित्वाभावात् न (२२७) पुंवत् । पाणिनिः ५।३।६८ । अत्र द्रष्टव्यम्—बोपदेवप्रभृतिमते बहुप्रत्ययो वर्ज्जकारादिः, तर्क-वाचस्पतिमते तु अन्तःस्यादिः ; प्रत्ययत्वेन अन्तःस्यादिरेवात्र लिखितः । ४४५ सूत्रटीका द्रष्टव्या ।

§ स्याद्यन्तात् पाशः स्यात् कुत्सायाम् । कुत्सिता विदुषी विद्वत्पाशा, असन्ततरादित्वात् पुंवद्भावः । पाणिनिः ५।३।४७ ।

४८०। चरट् भूतपूर्व्वे। (चरट् ।१।, भूतपूर्व्वे ७।)।

भूतपूर्व्वेऽर्थे चरट् स्यात्। भूतपूर्व्वं आढ्यः आढ्यचरः। *

४८१। ष्या रूप्यश्च। (ष्याः ५।, रूप्यः १।, च ।१।)।

ष्यान्तात् रूप्यः चरट् च स्यात् भूतपूर्व्वेऽर्थे।
कृष्णस्य भूतपूर्व्वो गोः—कृष्णरूप्यः कृष्णचरः। शुभ्रारूप्यः शुभ्रचरः। †

४८२। बह्वल्पार्थात् काच्छस् वा।
(बह्वल्पार्थात् ५।, कात् ५।, शसट् ।१।, वा ।१।)।

बह्वर्थादल्पार्थाच्च कात् परश्शस् स्यात् वा।
बहुशो देहि भूरिशः, अल्पशः स्तोकशः। ‡

* भूतपूर्व्वः प्रागभूतः, अभिन्नार्थे स्याद्यन्तात् चरट, स्यात्, ट ईवर्थः। भूतपूर्व्वः आढ्यः (न तु अधुना वर्त्तते), भूतपूर्व्वा आढ्या आढ्यचरी, भूतपूर्व्वा विदुषी विदुषचरी, ऋकारान्तादि-त्वात् (२२७) पुंवद्भावः, टित्वात् (२५७) ईप्। पूर्व्वमवृत्तत्वात् यत्र वर्त्तमानता प्रतीयते तत्र न स्यात्, यथा ईश्वरो भूत इति। पाणिनिः ५।३।५३।

† ष्यान्तात् षष्ठ्यन्तात्। शुभ्रायाः (गोः) भूतपूर्व्वो गौः शुभ्रारूप्यः, चर (२२७) पुंवर्ज्जनात् न पुंवद्भावः, शुभ्रचरः अत्र पुंवत् आदेशः। पाणिनिः ५।३।५४।

‡ बहुत्व अल्पत्व बह्वल्पौ, तौ अर्थौ यस्य स तस्मात्, कात् इत्यस्य विशेषणम्। कारकादित्यर्थः। इत्यत् शोभत् भूतपूर्वे इत्यत्र, वा इत्यस्य च माहात्म्यम्। बहुत्व इति बहुत्व संख्या बहूनि वा द्वितीयार्थे कारकात् शसट्। भूरिशः इति भूरि अल्पशः स्तोकशः। एवं अल्पशः पूगशः अल्पशः इत्यादि। बहुभिर्धनैः धनानि, बहुशो देहि, बहुषु लोकेषु वासः इत्यादौ बहुशः। अल्पं देहि अल्पशः, एवं स्तोकशः। अल्पश इति तु अल्पशम्। कात् किं, बहूनां स्वामीत्यत्र न स्यात्। पाणिनिः ५।४।४२। अत्र पाणिनिसूत्रे स्वार्थे शस् स्यात्, परसूत्रे च वीप्सायाम्। बहुशो वाराणस्य टीकाकृतिः प्रयुज्यते, यथा, "कुसुमान्तरपि शतशः बहुशः शीघ्रं गच्छत्यामन्त्र्य" इति कुमारे बहुशो बहुवारमिति मल्लिनाथव्याख्यानम्। भट्टिकाव्ये "धर्मकर्मोऽसौ अपयाममत्त" इत्यत्र बहुवार इति पदे धर्म्मकृत्याद्यर्थोऽप्येवम्।

## ४८३ । सङ्ख्यैकार्थात् वीप्सायां ।

(सङ्ख्या-एकार्थात् ५।, वीप्सायां ७।)।

कति कति कतिशः गणशः यावच्छः तावच्छः, द्विशः, पादशः ।*

## ४८४ । कृत्वस् वारे । (कृत्वस् ।१।, वारे ७।)।

कति वारान् भुङ्क्ते कतिकृत्वः, गणकृत्वः पञ्चकृत्वः । †

## ४८५ । सुच् चतुर्द्वित्रेः ।

(सुच् ।१।, चतुर्-द्वि-त्रेः ५।) ।

एभ्यः सुच् स्यात् वारे । चतुः द्विः त्रिः । ‡

## ४८६ । मयट् तद्रूपे । (मयट् ।१।, तद्रूपे ७।) ।

---

* एकः एकभागः, एकः अर्थो यस्य स एकार्थः, सङ्ख्या च एकार्थश्च समाहारे तस्मात् । सङ्ख्यावाचक-कारकात् एकभागार्थाच्च कारकात् शस् स्यात् वीप्सायाम् । कति कति देहि कतिशः, एवं गणं गणं देहि गणशः, यावन्तं यावन्तं यावच्छः, तावन्तं तावन्तं तावच्छः, (१०१) सङ्ख्यातुल्यत्वात् शस् । द्वौ द्वौ द्विशः, एवं त्रिशः इत्यादि । एकभागार्थात्तु पादं पादं पादशः, एवं पदं पदं पदशः इत्यादि । प्रत्ययेन वीप्साया उक्तत्वात्, अनुक्तवीप्सायां द्वित्वस्य नियमादत्र न द्विः । पाणिनिः ५।४।४३ ।

† सङ्ख्याभिन्नस्य वारोऽर्थो न सम्भवतीत्यत्र कति वारानिति । चित्वादव्ययम् । एवं गणकृत्वः । (१०१) सङ्ख्यावत्त्वम् । पञ्च वारान् पञ्चकृत्वः, एवं दशकृत्व इत्यादि । (२४६) द्विभक्तेर्लुगिति, (१८५) न दीर्घः । पाणिनिः ५।४।१७ ।

‡ चतुश्च द्विश्च त्रिश्च तस्मात्, पुंस्त्वं सूत्रत्वात् । सुचा कृत्वस् बाध्यते । सुच उकारः उच्चारणार्थः, चकारोऽव्ययार्थः । वारः क्रियाभ्यावृत्तिगणनम् । चतुरिति, चतुरो वारान् इत्यर्थे सुच्, (२०६) रस्य विसर्गः, (६०) विसर्गस्य सः, (२११) सस्य लोपः, ततः सुचः सस्य विसर्गः । एवं द्वौ वारौ द्विः, त्रीन् वारान् त्रिः । पाणिनिः ५।४।१८ ।

तदात्मकेऽर्थे मयट् स्यात्। विष्ण्वात्मकं विष्णुमयं। वाङ्मयं। *

## ४८७। प्रकारे जातीयः।

(प्रकारे ७, जातीयः १)।

तार्किकजातीया। †

## ४८८। वित्ते चुञ्चुचणौ।

(वित्ते ७, चुञ्चु-चणौ १॥)।

विद्याचुञ्चुः विद्याचणः। ‡

## ४८९। निर्वृत्ते भावादिमः।

(निर्वृत्ते ७, भावात् ५, इमः १)।

पाकिमः। §

---

* तदेव रूपम् आत्मा यस्य तत् तद्रूपं तस्मिन्। पृथग्योगात् किमपि नानुवर्त्तते, प्रकरणवशात् स्याद्यन्तादेव। विष्ण्वात्मकमिति विष्णुरात्मा यस्य तत् विष्णुमयं जगत्, एवं वागात्मकं वाङ्मयं शास्त्रम्। "एकाचो नित्यम्" इति वार्त्तिकेन वाङ्मयमिति। हिरण्यात्मकं हिरण्मयमिति निपातनात् यलोपः। टित्वादीपि तेजोमयी। पाणिनौ बहुष्वर्थेष्वो मयट् दृश्यते। यथा, आगतार्थे—४।३।८२; विकारार्थे अवयवार्थे च—४।३।१४३,१४४, १४९; इदमर्थे गोमयदात् पुरीषे—४।३।१४५; विकारार्थे—४।३।१४६,१४८; षष्ठ्यर्थे—५।२।४७; प्रकृतवचने स्वार्थे—५।४।२१,२२; विकारार्थे निपातः—६।४।१७४।

† स्याद्यन्तात् जातीयः स्यात् प्रकारे। प्रकारशब्दः सादृश्यवाची पुंलिङ्गः, तद्युक्तार्थे इत्यर्थः। "सामान्यस्य भेदको विशेषः प्रकारः" इति पाणिनिटीका। तार्किक्याः प्रकारः तार्किकजातीया, (३५०) पुंवद्भावः, तार्किकतुल्या स्त्रीत्यर्थः। एवं पटुजातीयो जनः, मृदु-जातीयं फलम्। किन्तु विदुष्याः प्रकारः विदुषीजातीया, अत्र जातीयस्य प्रसन्नतरादि-भिन्नत्वात् (२२७) न पुंवद्भावः। पाणिनिः ५।३।६९।

‡ स्याद्यन्तात् ("तृतीयान्तात्" इति तु पाणिनिः) चुञ्चु-चणौ स्यातां वित्ते (तेन ख्याति) अर्थे। चुञ्चुः पञ्चमस्वरवत्वात्, चणो मूर्द्धन्यणत्वात्। विद्यया ख्यातः इति वाक्यम्। पाणिनिः ५।२।२६।

§ भावविहितशब्दान्तात् इमः स्यात् निर्वृत्ते (तेन निष्पन्ने) अर्थे। पाकेन निष्पन्नः पाकिमः, (२५८) अकारलोपः। पचधर्जित भाववाच्ये (११६७) घञ्, पाकः। "केशंग्र-

**४९०। पशुभ्यः स्थानद्वित्वषट्के गोष्ठगोयुग-षड्गवं।**

(पशुभ्यः ५।३, स्थान-द्वि-षट्के ७, गोष्ठ-गोयुग-षड्गवं १।)।

गोगोष्ठं गोगोयुगं गोषड्गवं। *

**४९१। शुण्डोक्षभ्योऽपकर्षे रष्टरौ।**

(शुण्डोक्षभ्यः ५।३, अपकर्षे ७।, र-ष्टरौ १।२)।

अपकृष्टा शुण्डा शुण्डारः शमीरः कुटीरः, उक्षतरो। †

**४९२। पीलुतिलोमाकर्णादेः कुणतैलकट-जाहं पाकस्नेहरजोमूले।**

(पीलु—कर्णादेः ५।१, कुण—जाहं १।१, पाक—मूले ७।)।

पीलुकुणः, तिलतैलं, उमाकटः, कर्णजाहं। ‡

---

"नित्यम्" इति पाणिनिसूत्रे (४।४।२०) "एवं तर्हि भाव इति प्रकृत्य इमप्वक्तव्यः" इति वार्तिकम्।

* स्थानञ्च द्वौ च षट्कञ्च तस्मिन्। गोष्ठञ्च गोयुगञ्च षड्गवञ्च तत्। पशुवाचकेभ्यः— स्थाने वाच्ये गोष्ठः, द्वित्वमित्यर्थे गोयुगः, षट्कमित्यर्थे षड्गवः स्यात्। गवां स्थानं गोगोष्ठं, एवं महिषगोष्ठम्। गोद्विकं गोगोयुगम्, एवं हरिणगोयुगम्। गवां षट्कं गोषड्गवम्, एवं हरिणषड्गवम्। एषां क्लीवत्वं स्वभावात्। "गोष्ठादयः स्थानादिषु पशुनामभ्यः," "द्वित्वे गोयुगच्," "षट्त्वे षड्गवच्" इति वार्तिकत्रयम्।

† शुण्डाश्च उक्षाश्च ते तेभ्यः। उभयत्र बहुवचनं गणार्थम्। रश्च टरश्च तौ। शुण्डादेः रः, उक्षादेः टरः स्यात् अपकर्षेऽर्थे (ह्रस्वे, तनुत्वे इति पाणिनिः)। शुण्डा मदिरास्थानम्। अपकृष्टा शुण्डा शुण्डारः, एवं अल्पा शमी शमीरः, अल्पा कुटी कुटीरः। सर्वत्र पुंस्त्वमभिधानात्। अपकृष्टः (गलद्यौवनः) उक्षा उक्षतरो, एवं अपकृष्टा (बालिका) वत्सा वत्सतरी इत्यादि। पाणिनिः ५।३।८८,९१।

‡ पीलुश्च तिलश्च उमा च कर्णश्च ते आदयो यस्य तस्मात्। कुणश्च तैलश्च कटश्च जाहश्च तत्। पाकश्च स्नेहश्च रजश्च मूलञ्च तस्मिन्। पील्वादेः कुणः पाके, तिलादेस्तैलः

## ४९३। क्षेपे शाकटशाकिनौ।

(क्षेपे ७।, शाकट-शाकिनौ १॥)।

इक्षुशाकटं इक्षुशाकिनं। *

## ४९४। इतोऽस्य जाते।

(इतः ५।, अस्य ६।, जाते ७)।

फलितं। †

---

क्षेपे, क्षमादिः कटो रजसि, कणादेशाद्धा भूमौ व्यादित्यर्थः। पौर्णा पाकः, तिलक क्षेत्रः, क्षमाया (मलिना) रजः, कर्कश मूलम् इति कटेन सम्बन्धि। कुम्भकटाख्यौ: पुंसा, तिल-माषाभ्यौ: क्षौमलक्ष्याभिधानात्। पाणिनिः ५।२।२९। "क्षेत्रे तेषाम्," "कटप्रकरणे अलाबूतिलोमाभ्यां रजस्युपसंख्यानम्" इति वार्त्तिकद्वयम्।

* व्याख्यानादेरेव कः तस्य क्षेपमित्यर्थं। इक्षोः क्षेत्रमिति वाक्यम्। यद्यपि क्षाकार्थे-नोक्त, तथापि इक्षुक्षेत्रमिति केचित्, इक्षुमूलकार्यमिति परे, "भवनानि क्षेत्रे शाकटप्रत्यय प्रत्ययौ वक्तव्यः" "शाकिनशब्दस्य प्रत्ययौ वक्तव्यः" इति वार्त्तिकद्वयं तु न तथा नियमः, यथा, इक्षुशाकट, मूलशाकट, क्षीरशाकट, वास्तुशाकटमित्यादि। एवम् इक्षुशाकिनमित्यादि।

† व्याख्यानादितः व्यात् भव जातमित्यर्थं। फलमस्य जातं फलितं वनं, कौमुदी वनः, कलिता लता। फलादिरेवाय विधिः। तारकादिषु (जातमितस्योऽयम्) (पाणिनिमते तारकादिः, कौमारमतेऽपि तथा)—

फल पुष्पाङ्कुर पल्लव गर्भो बकुल मुकुल भार कल्लोलम्।
दर्पं कुड्मल किसलय शस्त्र स्तबक कण्टक मुख कोरकम्॥
तन्द्रा तिलक शैवल रोम पक्ष्मण मुकुल कोरक वेगम्।
निद्रा मुद्रा मद मल रोग पुलक कज्जल कुसुम तरङ्गम्।
क्षेपा तारक सूत्र पुरीषं बुभुक्षा विचारं शब्द शृङ्गारम्।
स्तबक पिपासा श्रद्धा दोषं निष्कुसल ज्वर दुःख द्रोहम्॥

पथ दीक्षा गर्व मूर्च्छा रच पक्व उत्का क्षुधाः।
कण्डीयाद्यास्त तोत्रास्त ब्याल व्याधि पङ्क्ताः।
पिपासाख्यं प्रमुखा च चरीषाख्ये च मञ्जरी॥

एतद्व्यतिरिक्ता अन्येऽपि गणादयः प्रश्नाः सन्ति। द्रवत्वित पिपासित-शब्दौ न शाब्दौ तकारान्तत्वात्। पाणिनि. ५।२।३६।

४९५। च्विः कृभ्वस्स्वभूततद्भावेऽस्येरीदीर्घाव-व्ययस्य।

(च्विः १।, कृ भू-अस्तु ७॥, अभूततद्भावे ७।, अ इ १॥, ईदीर्घौ १॥, अव्ययस्य ६।)।

अभूततद्भावेऽर्थे कृभ्वस्तिषु परेषु च्विः स्यात्, तस्मिंश्चावर्णेवर्णयो-रीकार-दीर्घौ स्तः, न त्वव्ययस्य। *

४९६। व्यो वमाद्यो लोप्यः।

(व्यः १।, वमाद्यः १।, लोप्यः १।)।

वकारमात्रस्यो लोप्यः स्यात्।

अकृष्णं कृष्णं करोति कृष्णीकरोति, कृष्णीभवति कृष्णीस्यात्।†

---

* कृ च भू च अस् च ते तेषु। अभूतस्य अजातस्य तद्रूपेण भावश्चोत्पत्तिरभूततद्भावः। "प्रागवस्थावतोऽवस्थान्तरेणाभूतस्याजातस्यानन्तरं तदात्मनो लाभोऽवस्थान्तरेण जन्म अभूततद्भावः" इति तद्धितपरिशिष्टे गोपीचन्द्रः। काष्ठं भस्म करोति इति तु न अभूततद्भावः, किन्तु काष्ठस्य भस्म करोति इत्येव। ("सम्पद्यकर्त्तरि" इति पाणिनिः।) कृधातौ भूधातौ अस्धातौ वा परे अभूततद्भावेऽर्थे आद्यन्तात् च्विः स्यात्, च्वौ परे प्रकृतेरन्तस्थितयोः अवर्ण-इवर्णयोः क्रमेण ईकार-दीर्घौ स्तः, न तु अव्ययस्य ईकार-दीर्घौ, अव्ययात् च्विप्रत्ययस्तु स्यादेव अव्ययस्येति षष्ठ्यन्त-निर्देशात्। च्विप्रत्ययस्य इकारश्चिकार्थः, चकारेत् अव्ययार्थः। पाणिनिः ५।४।५०; ७।४।३२।

† व आद्यो मात्रेति वमाद्यः। वकारमात्रावशिष्टप्रत्ययो लोप्यः स्यात्। तेन च्वि, (१०२८) क्विप्, (१०१०) क्विट्, (१०१२) क्विप् क्विप् इति एषां लोपः। अकृष्णं कृष्णं करोतीति वाक्ये कृष्ण शब्दात् च्विः, अनेन अवशिष्टस्य वकारस्य लोपे, पूर्ववर्त्तिनः अकारस्य ईकारः। एवं कृष्णीभवति कृष्णीस्यात्। अत्र अस्तीति पदं हित्वा स्यादिति कथनात् ग्रौविभक्तौ अस्धातौ परे च्विः स्यादिति सूचितम्। अतएव, "अस्तेर्लिङन्तस्यैव प्रयोगेऽभूततद्भावस्य प्रतीतिः अन्यत्राप्रतिभासनात्" इति तद्धितपरिशिष्टे गोपीचन्द्रः। यथाप्रमाणं सर्वेष्वपि कृतेः प्रयोगे एवं ज्ञातव्यम्। एवम् अमालां मालां करोति, मालीकरोति—आकारस्य ईकारः। अग्निं अग्निं करोति अग्नीकरोति—इकारस्य दीर्घः। अव्यय-स्वरूपत्वात् तु अस्वरं स्वरं करोति स्वरकरोति इत्यादि। अकर्णं कर्णं करोति

४९७। यङ्क्यक्ये च्वौ।

(यङ्-क्य-क्ये ७, च ।१।, ऋत् ।१।, री ।१।)।

ऋकारो री स्यात् यङि क्ये क्ये च्वौ च। मात्रीकरोति। *

४९८। मनश्चक्षुश्चेतोऽरूरजोरहोऽन्तलोपश्च्वौ।

(मनः—रहः ६।, अन्तलोपः १।, च्वौ ७)।

मनीकरोति। †

४९९। कार्त्स्न्यायत्तयोः सम्पद्यकादौ चसाद्वा।

(कार्त्स्न्यायत्तयोः ७॥, सम्पद्य-कादौ ७, चसात् ।१।, वा ।१।)।

साकल्ये अधीनत्वे च सम्पद्यति कृभ्वस्तिषु परेषु च चसात् स्याद्वा। कृत्स्नं लवणं जलं सम्पद्यते—जलसात् सम्पद्यते। राजायत्तं सम्पद्यते—राजसात् सम्पद्यते। ‡

---

ग्रामीकरोति, अग्रामिणं ग्रामिणं करोति ग्रामीकरोति, इत्यादौ (११८) नस्य लुपि, नलोऽसार्थत्वात् तदादिविधेर्निषेधाभावे, अकारस्ययोरीकारयोः स्याताम्। अव्ययस्य तु अहना ब्रह्म ब्रह्म इति वाक्ये दिवाभूत इत्यादौ च्विप्रत्ययान्तस्य (५४८) समासे, (११०६) आपो यथादिश:। स्वाधीकृत इति तु नञा निर्दिष्टमनित्यमिति न्यायात् दीर्घः। पाणिनिः ५।४।५०; ७।४।२६,३२, "अव्ययस्य च्वावीत्वं नेति वाच्यम्" इति वार्त्तिकञ्च।

* अमातरं मातरं करोति—मात्रीकरोति च्विप्रत्यये ऋकारस्य री। यङि—चेक्रीयते। क्ये क्ये, (८४८) मातेवाचरति मात्रीयते, पितरमिवाचरति (८४०) पित्रीयति। पाणिनिः ७।४।२७।

† मनस् चक्षुस् चेतस् अरुस् रजस् रहस् एतेषाम्। एषाम् अन्तस्य लोपः स्यात् च्वौ परे। अमनो मनः करोति मनीकरोति, स-लोपे अकारस्य ई। एवं चक्षूकरोति, स-लोपे दीर्घः। चेतीकरोति, अरूकरोति, रजीकरोति, रहीकरोति। पाणिनिः ५।४।५१।

‡ कृत्स्नं समग्रं तस्य भावः कार्त्स्न्यम्। आयत्तमधीनत्वम्। कार्त्स्न्यञ्च आयत्तञ्च कार्त्स्न्यायत्ते तयोः। सम्पद्य: सम्पूर्वक-दैवादिक-पदधातुः, सम्पद्यश्च कादिश्च तत् तस्मिन्।

५०० । देये त्रा च । (देये ७।, त्राच् ।१।, च ।१।) ।

देयेऽर्थे त्राच् चसाच स्यात् सम्पद्यादौ ।

देवाय देयं करोति—देवत्रा करोति देवसात् करोति । *

५०१ । नैकाचोऽव्यक्तानुकरणात् डाच् वानितौ द्विश्च । (नैकाचः ५।, अव्यक्तानुकरणात् ५।, डाच् ।१।, वा ।१।, अनितौ ७।, द्विः १।, च ।१।) ।

अनेकाचोऽव्यक्तानुकरणात् सम्पद्यादौ डाच् स्याद्वा, न त्वितौ, तस्मिंश्च द्विर्भावः । †

५०२ । न लोप्योऽतष्टिस्त्वितौ द्वेस्त्वन्तो वा ।

(न ।१।, लोप्यः १।, अतः ६।, टिः १।, तु ।१।, इतौ ७।, द्वेः ६।, तु ।१।, अन्तः १।, वा ।१।) ।

---

सम्यर्थं च इत्यनिर्मेकेऽस्ति पुनः स्यादियर्थं परत्र अनुवर्तनार्थम्, चानुकृष्टं नोत्तरत्र इति न्यायेन अनुवर्तनबाधात्। चसात्प्रत्ययस्य चकारोऽव्ययार्थः। कृत्स्नं लवणं जलं करोति जलसात् करोति, एवं जलसात् भवति, जलसात् स्यात्। पक्षे जलीकरोति, जलीभवति, जलीस्यात्। पाणिनिः ५।४।५२,५३,५४।

* दानार्थ-दाधातोः कर्मणि यत्प्रत्यये देयं तस्मिन् अर्थे। चकारोऽव्ययार्थः। देवत्रा सम्पद्यते देवसात् सम्पद्यते इति च। सम्पद्यादीनां परस्मिन्नन्वयेऽपि स्यात्, तेन "बहुरो-हिणिर्हरः चिती चित्रदारकशस्त्राणि भस्मसात्" इति। पाणिनिः ५।४।५५।

† एकोऽच् यस्य स एकाच्, न एकाच् नैकाच्, तस्मात्। अव्यक्तो ध्वन्यात्मकशब्दः, तस्य अनुकरणम् अव्यक्तानुकरणं तस्मात्। न इति अनिति तस्मिन्। इतौ—तस्मिंश्चेति डाचि सति पूर्वस्य द्वित्वं स्यादित्यर्थः। वाशब्दस्य व्यवस्थया इतौ परेऽपि तस्य द्विर्भावो वाच्यः। पाणिनिः ५।४।५७; ६।१।९९।

तस्मादन्तस्य न लोप्यो डाचि, इतौ तु टिर्लोप्यः, हेतु चन्तो लोप्यो वा । *

पटपटाकरोति । एकाचस्तु—श्रत् करोति ।

इतौ तु पटदिति करोति—पटिति,पटत्पटेति पटत्पटदिति । †

५०३ । तीय सम्ब बीज सङ्ख्यादिगुणात् कृञि कृषौ । (तीय—गुणात् ५।, कृञि ७।, कृषौ ७।) ।

एभ्यः करोतौ डाच् स्यात् कृषौ ।

द्वितीयं कर्षणं करोति द्वितीयाकरोति सम्बाकरोति, बीजेन सह कर्षणं करोति बीजाकरोति, द्विगुणाकरोति । ‡

५०४ । समय निष्कुल दुःख सुख सत्यात्—यापन निष्कोष प्रातिकूल्य पाकाशपथे ।

(समय—सत्यात् ५।, यापन—श-पथे ७।) ।

---

* तस्मादन्तस्येति तस्य अनेकाचोऽव्यक्तानुकरणस्य, अदन्तस्य अत् भागान्तस्य पटत् मनत् इत्यादिशब्दस्य लोपः स्यात् डाचि परे, इतिशब्दे परे तु ताडशस्यैव शब्दस्य टिर्लोपः स्यात्, एवं इतौ द्विरुक्तस्य तस्यैव शब्दस्य अन्त्यवर्णौ लोप्यौ वा इत्यर्थः । पाणिनिः ६।१।९८ ।

† पटत्शब्दात् डाचि, अनेन तकारस्यापि पट इत्यस्य द्वित्वे पटपटाकरोति । अनेन टिलोपे पटिति, अनित्यत्वात् न (५८) चयो जश् । हेतु चन्तो वा लोप्यः पटत्पटेति पटत्-पटदिति । पाणिनिः ६।१।१०० ।

‡ तीयः प्रत्ययः, तेन द्वितीयः तृतीयश्च । सङ्ख्या आदिर्यस्य स सङ्ख्यादिः, स चासौ गुणश्चेति सङ्ख्यादिगुणः । तीयश्च सम्बश्च बीजश्च सङ्ख्यादिगुणश्च तस्मात् । कृञि परे एभ्यो डाच् स्यात् कर्षणेऽर्थे । द्वितीयाकरोति द्विवारं क्षेत्रं कर्षतीत्यर्थः, एवं शम्बं कर्षणं करोति । द्वौ एकार्थौ । द्विगुणं कर्षणं करोति द्विगुणाकरोति, एवं त्रिगुणाकरोतीत्यादि । पाणिनिः ५।४।५८,५९ ।

एभ्यः क्रमादेतेष्वर्थेषु डाच् स्यात् कृञि परे।
समयाकरोति निष्कुलाकरोति दुःखाकरोति शूलाकरोति सत्याकरोति। *

## ५०५। सपत्रनिष्पत्रात् प्रियसुखात् मद्रभद्रात् पीडानुकूल्यवपने।

(सपत्र-निष्पत्रात् ५।, प्रियसुखात् ५।, मद्रभद्रात् ५।, पीडानुकूल्यवपने ७।)।

एभ्यः क्रमादेतेष्वर्थेषु डाच् स्यात् कृञि। सपत्राकरोति निष्पत्राकरोति मृगं। प्रियाकरोति सुखाकरोति। मद्राकरोति भद्राकरोति। †

---

* समयश्च निष्कुलश्च दुःखश्च शूलश्च सत्यश्च तस्मात्। यापनश्च निष्कोषश्च प्रातिकूल्यश्च पाकश्च अशपथश्च तस्मिन्। समयात् यापने, निष्कुलात् निष्कोषे, दुःखात् प्रातिकूल्ये, शूलात् पाके, सत्यात् अशपथे अर्थे डाच् स्यात् कृञि परे। समयाकरोति समयं यापयतीत्यर्थः। निष्कुलाकरोति, दाडिमं निष्कोषयतीत्यर्थः। अन्तरवयवस्य बहिष्करणं निष्कोषः। निष्कोष-भिन्नार्थे शत्रुं निष्कुलं करोति। दुःखाकरोति, शत्रुं पीडयतीत्यर्थः, अत्र प्रातिकूल्यम्। शूलाकरोति मांसं शूलेन पचतीत्यर्थः। सत्याकरोति वणिक् सत्यं कारयतीत्यर्थः, अत्र न शपथः। शपथे तु सत्यं दिव्यं करोति। पाणिनिः ५।४।६०,६२,६४,६५,६६।

† सपत्र-निष्पत्राभ्यां पीडायां, प्रियसुखाभ्याम् आनुकूल्ये (चित्ताराधने), मद्रभद्राभ्यां वपने (मुण्डने) डाच् स्यात् कृञि। सपत्राकरोति मृगं, व्याधः सपत्रं शरं मृगशरीरे प्रवेशयतीत्यर्थः; निष्पत्राकरोति मृगं, मृगशरीरात् शरमपरपार्श्वे निष्क्रामयतीत्यर्थः। "सपुङ्खशरप्रवेशेनेव सपत्रं करोतीत्यर्थः। सपुङ्खस्य शरस्य अपरपार्श्वे निर्गमनात् निष्पत्रं करोतीत्यर्थः" इति भट्टोजिदीक्षितः। अन्यत्र सपत्रं (पत्रयुक्तं) करोति भाण्डं, निष्पत्रं (पत्ररहितं) करोति वीथः, उभयत्र वृक्षमिति शेषः। प्रियाकरोति सुखाकरोति सखायं, सख्युरानुकूल्यं करोतीत्यर्थः। मद्र-भद्रौ मङ्गलार्थौ, मद्राकरोति भद्राकरोति बालं नापितः, मङ्गलपूर्वं वपतीत्यर्थः। पाणिनिः ५।४।६१,६३,६७, "भद्राच्चेति वक्तव्यम्" इति वार्त्तिकञ्च।

## ५०६। दघ्नमात्रद्वयसट् माने।

(दघ्न-मात्र-द्वयसट् ।१।, माने ७।)।

परिमाणार्थे एते स्युः।

गजपरिमाणः—गजदघ्नः गजमात्रः गजद्वयसः। *

## ५०७। सङ्ख्यान्शतो डिन्।

(सङ्ख्या-अन्-शतः ५।, डिन् ।१।)।

दशी, त्रिंशी। †

## ५०८। कति यति तति यावत्तावदेतावत्-कियदियन्तः।

(कति—इयन्तः १॥)।

किं-यत्-तदां डत्यन्तानां यत्-तत् एतत्-किम्-इदमां वत्वन्तानां एते क्रमात् निपात्यन्ते माने। ‡

## ५०९। दशादेर्डो युते शतादौ।

(दशादेः ५।, डः १।, युते ७।, शतादौ ७।)।

---

* दघ्नश्च मात्रश्च द्वयसश्च समाहारे, तस्मात् ट। टकारस्य प्रत्येकेन सम्बन्धः, दघ्नट् मात्रट् द्वयसट्। परिमाणमिह ऊर्द्ध्वपरिमाणम्। गजः ऊर्द्ध्वपरिमाणमस्य गजपरिमाणः—एवमर्थे एते प्रत्ययाः। टित्वादीप् च। पाणिनिः ५।२।३७।

† अन् च शत् च, अन्शत्, सङ्ख्या चासौ अन्शत् चेति तस्मात्। अन्शतोः केवलयो-रसम्भवात् तदन्तयोर्ग्रहणम्। सङ्ख्यावाचकात् अन्नन्तात् (दशन् आदिः) शत्-अन्ताच्च (त्रिंशत् आदिः) डिन् स्यात् परिमाणार्थे, ड इत्। दश परिमाणमस्य दशी, एवं त्रिंशी (मासः), डिन् (१२६) टिलोपः। "अन्शतोर्डिनिर्वक्तव्यः" इति वार्त्तिकम्।

‡ किं परिमाणमेषां कति (वा, सङ्ख्या परिमाणमेषामिति तु पाणिनिः), एवं सर्वाणि व्याख्यानि। पाणिनिः ५।२।४१।

एकादशं शतं, विंशं शतं । *

## ५१० । किंयत्तदेकान्यात् द्विबहूनामेकनिर्द्धारे डतरडतमौ ।

(किं—अन्यात् ५।, द्वि-बहूनां ६॥, एकनिर्द्धारे ७।, डतरडतमौ १॥) ।

अनयोः कतरो वैष्णवः, एषां कतमः शैवः । †

## ५११ । तस् ङ्सेः । (तस् ।१।, ङ्सेः ६।) ।

ङ्सेः स्थाने तस् स्यात् । कृष्णतः सर्व्वतः अमुतः । ‡

---

* दश आदिर्यस्य स दशादिस्तस्मात् । अत्र अतद्गुणसंविज्ञानबहुव्रीहिणा दश हित्वा एकादशादीनां ग्रहणम् । (अतएव पाणिनौ [५।२।४५] दशान्तादित्युक्तम्) । एवमुभयत्र आदि-शब्दयोर्व्यवस्थावाचित्वात् दशादेरिति षष्टिपर्य्यन्तानामेव, शतादाविति शतसहस्रयोरेव ग्रहणम् । तेन, एकादशादेः षष्टिपर्य्यन्तात् डः स्यात् युते (अधिके इति पाणिनिः) अर्थे, शते सहस्रे च वाच्ये इत्यर्थः । एकादशभिर्युतम् एकादशं शतं, (एकादशाधिका अस्मिन् शते इति पाणिनिः) । डित्त्वात् (१२६) टिलोपः । एवं विंशत्या युतं विंशं शतम्, अत्र (१२६) विंशतेस्तिलोपे, (२५८) अकारलोपः । पाणिनिः ५।२।४५,४६ ।

† किञ्च यच्च तच्च एकच्च अन्यच्च तत्तस्मात्, द्वौ च बहवश्च ते तेषां । जातिगुणक्रिया-दिभिर्व्यवच्छेदो निर्द्धारः, एकस्य निर्द्धार एकनिर्द्धारः तस्मिन् । डतरश्च डतमश्च तौ । एभ्यो द्वयोर्म्मध्ये एकस्य निर्द्धारणे डतरः, बहूनां मध्ये एकस्य निर्द्धारणे डतमः स्यात्, डिति टिलोपः । अनयोर्म्मध्ये कः कतरः, एषां मध्ये कः कतमः । एवं यतरः यतम इत्यादि । "जात्या क्रियया गुणेन संज्ञया वा समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम्" इति काशिका । "माथुराः पाटलिपुत्रेभ्य आढ्यतराः" इति (२।३।४२) पाणिनिसूत्रे उदाहरणम् । पाणिनिः ५।३।९२,९३,९४ ।

‡ पृथग्योगात् पूर्व्वात् किमपि नानुवर्त्तते । सर्व्वस्मात् लिङ्गात् सर्व्वविभक्तेः स्थाने तस् आदेशः स्यात्, इति सामान्येन उक्तेऽपि शिष्टप्रयोगानुसारेण प्रयोक्तव्यमेव । अतएव "सार्व्वविभक्तिकस्तसिः" इति भाष्ये । कृष्ण इति, कृष्णमिति, कृष्णेन इति, कृष्णाय इति, कृष्णादिति, कृष्णस्येति, कृष्णे इति वा कृष्णतः । एवं सर्व्वतः । अमुत इति तसो विभक्ति-स्थानजातत्वात् सर्व्वं सामान्यविभक्तिनिमित्तं कार्य्यं स्यादेव, तेन (१२२) टेः स्थाने अः, (२०४) दस्थाने मः, (२१५) ऊत्वस्थाने उः । विभक्तिविशेषविहितन्तु साक्षात् विभक्तावेव, तेन

## ५१२। देवादेर्द्वीप्तयोस्त्राच्।

(देवादेः ५।, द्वीप्तयोः ६॥, त्राच् ।१।)।

देवत्रा वन्दे रमे वा। *

## ५१३। स्त्रिबह्वोस्त्रोऽद्व्यादेः प्त्राः।

(स्त्रिबह्वोः ५।, त्रः १।, अद्व्यादेः ५।, प्त्राः ६।)।

सेर्वह्वोश्च परस्याः प्त्यास्त्रः स्यात्, नतु द्व्यस्मद्युष्मदः।
सर्व्वस्मिन् सर्व्वत्र, तत्र बहुत्र। †

## ५१४। सर्व्वैकात् काले दा।

(सर्व्वैकात् ५।, काले ७।, दा।१।)।

सर्व्वस्मिन् काले सर्व्वदा। ‡

---

जसादेः स्थाने तसि क्वते हरित इत्यादौ (१२२) गुणादिर्न स्यात्। एवञ्च विभक्तिस्थाने तसादयो ये आदेशास्तदन्तानामव्ययत्वमिति प्राञ्चः। (पाणिनिः "तद्धितश्चासर्व्वविभक्तिः"—अव्ययसंज्ञः स्यात् १।१।३८।) त्राच्-थाच्-भिन्नान्तानामव्ययत्वं नास्तीत्येके। पाणिनिः ५।३।७,१४।

* देवादेः परयोर्द्वितीया-सप्तम्योस्त्राच् स्यात्। देवं देवौ देवान् वा वन्दे देवत्रा वन्दे। देवे देवयोः देवेषु वा रमे देवत्रा रमे। देवादिर्यथा—देवो बहुः पुरुमर्त्यौ मनुष्यः पुरुषश्च मद्। पाणिनिः ५।४।५५,५६।

† स्त्रिश्च बहुश्च तत्तस्मात्। सङ्ख्यार्थबहुशब्दस्य ग्रहणम्। द्विरादिर्यस्य स द्व्यादिः, न द्व्यादिरद्व्यादिस्तस्मात्। द्व्यादिश्च (८६) त्यदादिगणसमाप्तिपर्य्यन्त इत्यत आह द्वि-अस्मद्-युष्मदः। सर्व्वस्मिन् सर्व्वयोः सर्व्वेषु वा सर्व्वत्र। सर्व्वस्यां सर्व्वयोः सर्व्वासु इत्यत्रापि सर्व्वत्र, (२२०) प्रत्यये परे पुंवद्भावः। तस्मिन् तयोः तेषु, तस्यां तयोः तासु इति वा तत्र, (१२२) टेः स्थाने अः। बहुषु बहुत्र। "इतराभ्योऽपि दृश्यन्ते" इति पाणिनिसूत्रात् (५।३।१४) स भवान्, ततोभवान्, तत्रभवान्; दीर्घायुर्भवान्, अत्रभवान्। पाणिनिः ५।३।१०।

‡ सर्व्वश्च एकश्च तस्मात्। काले वर्त्तमानाभ्यामाभ्यां परस्याः सप्तम्या दा स्यात्। एकस्मिन् काले एकदा। पाणिनिः ५।३।१५।

## ५१५। किमन्ययत्तदोर्हिश्च।

(किमन्ययत्तदः ५।, र्हिः १।, च ।१।)।

एभ्यः सप्तम्या र्हिं दा च स्यात्। कस्मिन् काले कर्हिं कदा। *

## ५१६। तदो दानीं वा।

(तदः ५।, दानीं ।१।, वा ।१।)।

तदानीं तर्हिं तदा। †

## ५१७। पूर्व्वान्यान्यतरेतरापराधरोत्तरोभया-देद्युसह्नि।

(पूर्व्व—उभयात् ५।, एद्युस् ।१।, अह्नि ७।)।

पूर्व्वस्मिन्नह्नि पूर्व्वेद्युः। ‡

## ५१८। दिक्शब्दाद्दिग्देशकाले स्सात् प्रोपोम्रो-ऽचो लुक्।

(दिक्-शब्दात् ५।, दिग्-देश-काले ७।, स्सात् ।१।, प्रो-पो-म्रः १।।।, अचः ५।, लुक् ।१।)

---

* कस्य अन्यस्य यस्य तस्य तत्तस्मात्। अन्यस्मिन् काले अन्यर्हिं अन्यदा, यर्हिं यदा, तर्हिं तदा। पाणिनिः ५।३।२१।

† काले वर्त्तमानात् तदशब्दात् सप्तम्या दानीं वा स्यात्। पाणिनिः ५।३।१९।

‡ पूर्व्वस्य अन्यस्य अन्यतरस्य इतरस्य अपरस्य अधरस्य उत्तरस्य उभयस्य तत्तस्मात्। एभ्यो-ऽष्टभ्यः परस्याः सप्तम्या एद्युस् स्यात् अह्नि वाच्ये। पूर्व्वेद्युरित्यत्र, (५२७) आदिष्ट-इत्यनेन तद्धितप्रकरणोक्तादेशानामपि तद्धितसंज्ञाविधानात् (२५८) अकारलोपः। पाणिनिः ५।३।२२, "पूर्व्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युसुच्" इति "द्युश्चोभयात्" इति 'उभयद्युः' इति च वार्त्तिकम्।

परस्तात्, प्राक् । *

५१९ । वैनोऽपौ । (वा ।१।, एनः ।१, अ-पौ ।१।) ।

पूर्व्वेण । †

५२० । दक्षिणोत्तरादाहौ ।

(दक्षिणोत्तरात् ५।, आ-आहौ ।१॥) ।

दक्षिणा दक्षिणाहि । उत्तरा उत्तराहि । ‡

५२१ । वाधराच्चात्ता: ।

(वा ।१।, अधरात् ५।, च ।१।, आत् ।१।, ता: १॥) ।

अधरात् अधरस्मात्, दक्षिणात् दक्षिणस्मात् । §

---

* दिशि वर्त्तमान: शब्दो दिक्शब्द:, स च पूर्व्वादि: प्रागादिश्च । दिशि देशे काले च वाच्ये ।दिग्वाचकशब्दात् परासां प्रथमा-पञ्चमी-सप्तमीनां स्थाने स्तात् स्यात्, अनूच धातो: क्विप्प्रत्ययेन साधितात् अच: परस्य स्तातो लुक् स्यादित्यर्थ: । ग्रन्थकारेण तिसृणां विभक्तीनामेकमुदाहरणं प्रयुक्तं परस्तादिति, परा दिक् परो देश: पर: काल:, परस्या दिश: परस्मात् देशात् परस्मात् कालात्, परस्यां दिशि परस्मिन् देशे परस्मिन् काले, इति वाक्यानि । प्राक् इति प्राची दिक्, प्राक् देश:, प्राक् कालो वा इति प्रथमा-स्थाने स्तात्, तस्य लुक् । समीपादित्वात् पुंवत् । एवं पञ्चमीसप्तम्योरपि बोध्यम् । पाणिनि: ५।३।२७,३० । (पाणिनौ सुपद्मे कलापे च अस्ताति:, संक्षिप्तसारे तु स्तात् ।)

† दिग्देशकाले वर्त्तमानेभ्यो दिक्शब्देभ्य: प्रोक्तोऽरेन: स्याद्वा । पूर्व्वेणेति पूर्व्व: पूर्व्वस्मिन् वा इत्यर्थ: । पाणिनि: ५।३।३५ ।

‡ आच् आहिश्च तौ आहौ, द्विवचनं यथासङ्ख्यनिरासार्थम् । दिग्देशकाले वर्त्तमानाभ्यां दक्षिणोत्तराभ्यां प्रथमा-सप्तम्यो: स्थाने आ आहिश्च स्यात् । विशेषत्वात् स्तातो बाधकावेतौ । दक्षिण: दक्षिणस्मिन् वा, उत्तर: उत्तरस्मिन् वा इति वाक्यम् । पाणिनि: ५।३।३६,३७,३८ ।

§ ता: प्रोपौष्ठा: । अधरशब्दात् चकारात् दक्षिणोत्तरशब्दाभ्यां दिग्देशकाले प्रथमा-पञ्चमी-सप्तमीस्थाने आत् स्यात् वा । अधर: अधरस्मात् अधरस्मिन् वा अधरात् । दक्षिण: दक्षिणस्मात् दक्षिणस्मिन् वा दक्षिणात्, एवमुत्तरात् । विकल्पपक्षे अधरस्मात् दक्षिणस्मादिति । पञ्चम्येवोदाहरणं बहुलप्रयोगदर्शनात् । पाणिनि: ५।३।३४ ।

## ५२२ । पूर्व्वाधरावराः पुराधावाः स्तादसोः ।

(पूर्व्वाधरावराः १॥, पुराधावाः १॥, स्तादसोः ७॥) ।

पुरस्तात् पुरः, अधस्तात् अधः, अवस्तात् अवः । अतएव अस् ।*

## ५२३ । त्ववत् थाच् प्रकारे । (त्ववत् ।१।, थाच् ।१।, प्रकारे ७।) ।

येभ्यस्त्र उक्तास्तेभ्यः प्रकारे थाच् स्यात्, सच तद्वत् । सर्व्वप्रकारं सर्व्वथा । †

## ५२४ । कुतः क्व कुह कुत्रेतो ऽतो ऽत्रेह सदैतर्ह्यधुनेदानीं पश्चादुपर्य्युपरिष्टात् परेद्यवि सद्योऽद्यैषमः परुत्परारीत्यं कथम् । (कुतः—कथम् ।१॥) ।

---

* पूर्व्वश्च अधरश्च अवरश्च ते । पुरश्च अधश्च अवश्च ते । स्ताच अस् च तौ तयोः । पूर्व्वस्य पुरः अधरस्य अधः अवरस्य अवः स्यात् स्तादसोः परयोः । पुरस्तादिति पूर्व्वशब्दात् (५१८) प्रथमादेः स्तात्-आदेशे, अनेन पुर आदेशः । अस् परे पुर आदेशे, (२५८) अकारलोपे पुरः । एवम् अधरशब्दात् अधस्तात् अधः, अवरशब्दात् अवस्तात् अवः, अतएव—अस्विधायकसूत्राभावेऽपि अनेन अस् परे आदेशविधानादेव, एतेभ्यः प्रथमादेः स्थाने अस् स्यादिति वक्तव्यम् । पाणिनिः ५।३।३९,४० ।

† चन्द्रवत् मुखमित्युक्ते यथा चन्द्रस्य आह्लादकत्वेन साम्यं गृह्यते न तु धावल्यादिना, तथात्रापि त्ववदित्युक्ते (५१२) अद्यादित्रिवज्जनसरजातत्वेनैव साम्यं ग्राह्यं, न तु केवलं सप्तमीस्थानजातत्वेन । अतएव—अद्यादित्रिवर्ज्जेभ्यो परासां (उदाहरणज्ञापकात्) द्वितीयादिविभक्तीनां स्थाने थाच् स्यात् प्रकारे । प्रकारः सादृश्यं भेदो वा । ["प्रकारवचने थाल्" (पा. ५।३।२३) इति सूत्रव्याख्याने 'सामान्यस्य विशेषो भेदकः प्रकारः' इति काशिकायाम् । प्रौढ़मनोरमायाम् "सामान्यस्य भेदको विशेषः प्रकारः । यद्यपि "प्रकारे गुणवचनस्य" इत्यत्र सादृश्यं प्रकारः, तथापि नेह सादृश्यं गृह्यतेऽनभिधानात्" । एवमपि तत्त्वबोधिन्याम् । तथापि ५।४।३ सूत्रव्याख्याने "प्रकारो भेदः सादृश्यञ्च" इत्युक्तं ताभिः ।] चकारःअव्ययार्थः । सच तद्वदित्यनेन, (३२०) प्रत्यये परे पुंवद्भावादिकं स्यादिति सूचितम् । सर्व्वं प्रकारं, सर्व्वेण प्रकारेण, सर्व्वस्मै प्रकाराय, सर्व्वस्मात् प्रकारात्, सर्व्वस्य प्रकारस्य, सर्व्वस्मिन् प्रकारे—सर्व्वथा इति । तृतीयाया एव थाच् इति पाणिनिः ५।३।२३ । "प्रथमायास्तु न भवति स प्रकारस्तथा, अनभिधानात् ।" इति प्रौढ़मनोरमा ।

एते निपात्यन्ते ।

कस्मात्—कुतः, कस्मिन्—क्व कुह कुत्र, अस्मात्—इतः, एतस्मात्—अतः, एतस्मिन्—अत्र, अस्मिन्—इह, सर्व्वदा—सदा, अस्मिन् काले—एतर्हि अधुना इदानीं, अपरस्मिन्—पश्चात्, ऊर्द्ध्वं—उपरि उपरिष्टात्, परस्मिन् अह्नि—परेद्यवि, समानेऽह्नि—सद्यः, अस्मिन्नह्नि—अद्य, अस्मिन् वर्षे—ऐषमः, पूर्व्वस्मिन् वर्षे—परुत्, पूर्व्वतरस्मिन् वर्षे—परारि, इदम्प्रकारं—इत्थं, किम्प्रकारं—कथम् । *

५२५ । त्यत्राद्य चिर दक्षिणाद्यादे—त्य ट्न-त्न-त्यण् मा भवादौ । (त्यत्र—आद्यादेः ५।, त्य—माः १॥, भवादौ ७।)।

एभ्य एते क्रमात् स्युः भवाद्यर्थे । त्यत्रत्यः तत्रत्यः, अद्यतनी ह्यस्तनी, चिरत्नः परुत्नः, दाक्षिणात्यः पाश्चात्त्यः, आदिमः मध्यमः । †

---

* कस्मादिति । एषा तावत् टीका, सर्व्वेष्वेव पुस्तकेषु तु मूलमध्ये सन्निविष्टा दृश्यते । पाणिनिः ५।३।७,१२,१३,१०,२,५,११,६,१६,१७,१८,२२,२१,२२,२४,२५—७।२।१०४,१०५ ।

† त्यत्रश्च अद्यश्च चिरश्च दक्षिणश्च आदिश्च ते आद्यो यस्य स तस्मात् । त्यश्च ट्नश्च त्नश्च त्यण् च मश्च ते । अत्र विभक्तिमनाहृत्य शब्दैरेव क्रमग्रहणं, त्यट्नत्नत्यण्म—इति पाठो वा । त्यत्रादेः त्यः, अद्यादेः ट्नः (ट्युट्युलौ तुट् च इति पाणिनीयाः, तन इति सारस्वतीयाः, तनट् इति कौमराः कालापाः सौपद्माश्च), चिरादेः त्नः, दक्षिणादेः त्यण्, आद्यादेः मः स्यात्, तत्र भव इत्याद्यर्थे । त्यत्र भवः त्यत्र वसति वा इत्यर्थे त्यत्रत्यः, एवं तत्रत्यः । अद्यभवा अद्यतनी, (२५७) टित्त्वादीप्, एवं ह्यः (पूर्व्वदिने) भवा ह्यस्तनी । अद्यादित्वात्—श्वस्तनः, चिरन्तनः, दिवातनः, दोषातनः, सायन्तनः, सदातनः, सनातनः, पुरातन इत्यादि । ("पुराशब्दात्तनट्" इति क्रमदीश्वरः, पुराणः ।) चिरे भवः चिरत्नः, परुत् भवः परुत्नः (अत्र तकार-लोपः), एवं परारित्नः, दक्षिणा भवः दाक्षिणात्यः, दक्षिणा इति (५१०) आः ।

## ५२६। किमः क्यन्तात् चिच्चनौ।

(किमः ५।, क्यन्तात् ५।, चित्-चनौ १॥)।

कस्यचित् कदाचित्, कस्यचन कदाचन। *

## ५२७। आदिस्तः। (आदिः १।, तः १।)।

(३२३) चैक्याच्चुदषष्ठोऽः इत्येतमकारमारभ्य यस्य ङत्तः स-तसंज्ञः स्यात्। †

इति तपादः।

### इति स्याद्यन्ताध्यायः।

स्याद्यन्ताधिकारः समाप्तः।

---

चिस्त्वात् (४१६) वृद्धिः। एवं पश्चात् भवः पाश्चात्यः। आदिना पौरस्त्य इत्यादि। आदौ भवः आदिमः, मध्ये भवः मध्यमः। "अग्रान्तपश्चातां डिमः" इति क्रमदीश्वरः। तेन अग्रिमः, अन्तिमः, पश्चिमः। "अग्रादिपश्चात् डिमच्" "अन्ताच्च" इति वार्त्तिकद्वयम्। पाणिनिः ४।३।९८,१०४, ४।३।८,२२।

* जातुचिदित्यादौ चित्प्रयोगदर्शनेऽपि प्रायिकत्वात् 'किमः' इत्युक्तं वोपदेवेन। अत्र 'असाकल्ये तु चिच्चन' इत्यमरोक्तयोः चित्-चन-इत्यव्ययशब्दयोर्योगेन कश्चित् कौचित् केचित् काचित् किञ्चिदित्यादिपदे सिद्धेऽपि एतत्सूत्रकरणं कश्चित् कदाचिदित्यादेरेकपदत्व-निर्व्वाहार्थं, तेन कादाचित्कमित्यादौ (४१६) पूर्व्वपदस्य वृद्ध्यादि स्यादिति। एतच्च पाणिन्यादि-सम्मतम्, तत्र कश्चिदित्यादौ पदद्वयत्वस्य स्वीकारात्; अतएव "अकिञ्चन" इति शब्दो "मयूरव्यंसकादयश्च" इति सूत्रे (२।१।७२) निपातनात् सिद्धः। एवं कादाचित्कादयोऽपि निपातनात् साध्याः।

† अ आदिर्यस्य स आदिः। प्रधानेन व्यपदेशा भवन्तीति न्यायात्, तद्धितप्रकरणोक्त-विभक्तिस्थानजातानामादेशानामपि तद्धित-संज्ञा स्यादिति, तेन (५१९) पूर्व्वेण इत्यादौ (२५८) णौ परे अकारलोपादि सिद्धम्।

# त्याद्यन्ताधिकारः।

## ५मः। अध्यायः।

### १म पादः—संज्ञा।

५२८। धोः—

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| कौ | तिप् | तस् | अन्ति | सिप् | थस् | थ | मिप् | वस् | मस्— |
| | ते | आते | अन्ते | से | आथे | ध्वे | ए | वहे | महे |
| खौ | यात् | याताम् | युस् | यास् | यातम् | यात | याम् | याव | याम— |
| | ईत | ईयाताम् | ईरन् | ईथास् | ईयाथाम् | ईध्वम् | ईय | ईवहि | ईमहि |
| गौ | तुप् | ताम् | अन्तु | हि | तम् | त | आनिप् | आवप् | आमप्— |
| | ताम् | आताम् | अन्ताम् | स्व | आथाम् | ध्वम् | ऐप् | आवहैप् | आमहैप् |
| घौ | दिप् | ताम् | अन् | सिप् | तम् | त | अम्प् | व | म— |
| | त | आताम् | अन्त | थास् | आथाम् | ध्वम् | इ | वहि | महि |
| टौ | दि | ताम् | अन् | सि | तम् | त | अम् | व | म— |
| | तन् | आताम् | अन्त | थास् | आथाम् | ध्वम् | इ | वहि | महि |
| ठौ | णप् | अतुस् | उस् | थप् | अथुस् | अ | णप् | व | म— |
| | ए | आते | इरे | से | आथे | ध्वे | ए | वहे | महे |
| डौ | ता | तारौ | तारस् | तासि | तास्थस् | तास्थ | तास्मि | तास्वस् | तास्मस्— |
| | ता | तारौ | तारस् | तासे | तासाथे | ताध्वे | ताहे | तास्वहे | तास्महे |

ढौ { यात् यास्ताम् यासुस् यास् यास्तम् यास्त यासम् यास्व यास्म
सीष्ट सीयास्ताम् सीरन् सीष्ठास् सीयास्थाम् सीध्वम् सीय सीवहि सीमहि

तौ { स्यति स्यतस् स्यन्ति स्यसि स्यथस् स्यथ स्यामि स्यावस् स्यामस्
स्यते स्येते स्यन्ते स्यसे स्येथे स्यध्वे स्ये स्यावहे स्यामहे

थौ { स्यत् स्यताम् स्यन् स्यस् स्यतम् स्यत स्यम् स्याव स्याम—
स्यत स्येताम् स्यन्त स्यथास् स्येथाम् स्यध्वम् स्ये स्यावहि स्यामहि*

(धोः ५।, तिप्—स्यामहि ।१॥) ।

एतानि साशीतिशतसङ्ख्यकानि धोः पराणि प्रयुज्यन्ते । †

५२९ । कौ खौ गौ घौ टौ ठौ डौ ढौ तौ थौ

ऽष्टादशशः । (कौ—थः १॥, अष्टादशशः ।१॥) ।

तान्यष्टादशाष्टादश क्रमादेतत्संज्ञानि स्युः । ‡

---

* "प-ग-त्वा दिस्सारिकारयेतः" इति वार्त्तिकसूत्रम् । पाणिनिः ३।४।७८ । अत्र सूत्रे अष्टादशानामेव विभक्तीनामुल्लेखः । पश्चात् लकारस्थाने आदेशा भवन्ति । यथा, ३।४।७९, ३।४।८२,१०२,१०८ इत्यादि ।

† धोरिति पञ्चम्यन्तं तिबादीनां प्रत्ययत्वज्ञापनार्थम् । सह अशीत्या वर्त्तते यत् तत् साशीति, तच्च तत् शतञ्चेति साशीतिशतं, तत् सङ्ख्या येषां तानि साशीतिशतसङ्ख्यकानि वचनानीत्यर्थः ।

‡ अष्टादश अष्टादश इति वीप्सायां (४८३) शस्, अष्टादशशः । तानि तिबादीनि अष्टादश अष्टादश भूत्वा, क्रमात् कौ-आदिसंज्ञकानि स्युरित्यर्थः । भगवता पाणिनिना तु यथाक्रमं लट् (३।२।१२३), विधिलिङ् (३।३।१६१), लोट् (३।३।१६२), लङ् (३।२।१११), लुङ् (३।२।११०), लिट् (३।२।११५), लुट् (३।३।१५), आशीर्लिङ् (३।४।११६), लृट् (३।३।१३), लृङ् (३।३।१३९), एतत्संज्ञकानि कृतानि ।

## ५३०। पञ्च रः शिच्च।

(पञ्च १।।।, रः १।, शित् ।१।, च ।१।)।

ताः पञ्च रसंज्ञाः स्युः, शिच्च। *

## ५३१। नवशः पमे ञितोऽन्यङिद्भ्यां वे।

(नवशः ।१।।।, पमे १।।, ञितः ५।, अन्य-ङिद्भ्यां ५।।, वे ७।)।

तानि नव नव क्रमात् प-म-संज्ञानि स्युः, ते च ञितो धोः परे स्तः, तदन्य-ङिद्भ्यान्तु क्रमेण स्तो वे। †

## ५३२। ङिदपिद्रः। (ङित् ।१।, अपित् ।१।, रः १।)।

अपित् रो ङित् स्यात्। ‡

## ५३३। कित् ठो ढोपं। (कित् ।१।, ठो ।१।, ढोपं १।)।

अपित् ठो क्याः प-स्व कित्संज्ञं स्यात्। §

---

* ताः पञ्च—क्वौ ख्वौ गौ घौ टौ इति पञ्च, प्रथमोपस्थितपरित्यागे प्रमाणाभावात्। क्या र-संज्ञाफलन्तु अभूदित्यादौ (५५४) वमोऽन्त्येत्यनेन न इम्, अपिद्रत्वेन ङित्त्वात् (५३२) न गुणश्च (५४२)। शकारितप्रत्ययस्य रसंज्ञया (नदौ ञ श व्यये) तुदतीत्यादौ न गुणः, भवन् दीव्यन् इत्यादिषु शवप्रत्यये परे अपृष्ठ्यन्तादिश्च। पाणिनिः ३।४।११३,११४। रः = सार्व्व-धातुकम्, अरः = आर्द्धधातुकम्।

† नव नव इति (४८३) नवशः। पञ्च मञ्च पमे, पं परस्मैपदं परोद्देश्यकफलबोधन-क्षमपयोग्यं, मं आत्मनेपदम् आत्मोद्देश्यकफलकं.धनक्षमपयोग्यम्। ञ इत् यस्य स ञित् तस्मात् ञितः। ङ इत् यस्य स ङित्, अन्यश्च ङिच्च अन्यङितौ ताभ्याम्। तानि तिबादीनि। ते च पमे आनुबन्धधातोः स्तः, तदन्यस्मात् आनुबन्धभिन्नात् धातोः पं स्यात्, ङानुबन्धात्तु मं स्यात्, कर्त्तरि वाच्ये इति [illegible]न्वयः। ङानुबन्धात् ममिति विशेषाभिधानात् अन्य [illegible] आनुबन्ध-ङानुबन्धाभ्याम् अन्यो बोध्यः। आनुबन्धफलन्तु (९१९) सूत्रे द्रष्टव्यम्। पाणिनिः १।४।९९,१००।

‡ ङ इत् यस्य स ङित्, प इत् यस्य स पित्, न पित् अपित्। अपिदिति भिन्नं पदं परस्य अनुवृत्त्यर्थम्। अत्र ङित्-कित्-शब्दौ पारिभाषिकार्थे वाच्यार्थे च प्रयुक्तौ। पाणिनिः १।२।४।

§ ढाः पं ढोपं, यात् यास्तामित्यादि नव। पाणिनिः ३।४।१०४, वार्त्तिकञ्च।

## ५३४ । दा-धा दा । (दा-धा ।१।, दा ।१।) ।

अपित् दा धा च दासंज्ञः स्यात् । *

## ५३५ । यणोऽचेक् जिः ।

(यण: ६।, अचा ३।, इक् ।१।, जि: १।) ।

अचा युक्तस्य यणस्य स्थाने इक् क्रमात् जिसंज्ञः स्यात् । †

## ५३६ । सकृत् द्विस्तु वा ।

(सकृत् ।१।, द्वि: १।, तु ।१।, वा ।१।) ।

जि: पुनर्न स्यात्, द्विस्तु वा स्यात् । ‡

---

* दा धा इत्युभयं स्वरूपं, तेन—दा ल लूनौ, दा तु दाने, डु दा ञ् लि च, डु धा ञ् लि च इति चतुर्णां, एव दे ङ पालने, दो य छेदे, धे ट पाने इति त्रयाणां एचोऽशित्याः (६०८) इति आकारे कृते दा-संज्ञा, शिति परे आकाराभावात् दासंज्ञा नास्तीति । अपिद्ग्रहणेन दै प शोधने इत्यस्य दासंज्ञा-निषेधः । दासंज्ञाफलन्तु (५४९,५५२,६१२,८११) एतेषु सूत्रेषु द्रष्टव्यम् । पाणिनिः १।१।२० । अत्र दा=घुः ।

† अचा स्वरवर्णेन युक्तानां य व र ल इत्येषां स्थाने क्रमेण इ उ ऋ लृ इत्यादेशाः जिसंज्ञाः स्युरित्यर्थः । फलन्तु (६५१,६६१) इत्यादिषु द्रष्टव्यम् । लकारस्य जिर्न उपलभ्यते, यण्संज्ञानुरोधादन्तःपतनम् । पाणिनिः १।१।४५, ६।१।१०८ । अत्र जिः=सम्प्रसारणम् ।

‡ सकृत् एकवारं, जिरित्यनुवर्त्तते । यावत् सम्भवस्तावद्विधिरिति न्यायात् पुनः सामग्री-समाधानेऽपि, जिः पुनर्न स्यात् । तेन, व्यय व्यध व्यच व्ये इत्यादि धातूनाम् एकवारं य-स्थाने इ कृते पुनः वि इत्यस्य स्थाने उर्न स्यादिति । द्विस्तु वा इति वाशब्दः समुच्चयार्थः, द्वित्वञ्च पुनर्न स्यादित्यर्थः । तेन, कितप्रभृति-धातोः सनि कृते द्वित्वे चिकित्स-धातोः, चिकित्-सितुमिच्छतीति पुनः सनि कृते चिकित्सिषतीत्यादौ पुनर्द्वित्वं न स्यादिति । एवं क्रुधातोर्यङि द्वित्वे चेक्रीयधातोः सनि चेक्रीयिषते इत्यादावपि पुनर्न द्वित्वमिति दुर्गादासः । वस्तुतस्तु (पाणिनौ "अनभ्यासस्य" इति विधानात्) द्विस्तु वेति वाशब्दस्य व्यवस्थितविभाषा अर्थः, तेन कृतद्वित्वानां पुनर्द्विर्न स्यात्, जक्षादिस्तु (१७४) द्वित्वसंज्ञायां सत्यामपि पुनर्द्विः स्यादित्यर्थः । पाणिनिः ६।१।९—६।१।८,९ ।

## ५३७। प्रागच्कार्य्यादचि द्विः।

(प्राक् ।१।, अच्कार्य्यात् ५।, अचि ७।, द्विः १।)।

अचि परे अच्-कार्य्यात् प्राक् द्विः स्यात्। *

## ५३८। द्वेः पूर्व्वः खिः। (द्वेः ६।, पूर्व्वः १।, खिः १।)।

द्वेर्धोः पूर्व्वो भागः खिसंज्ञः स्यात्। †

## ५३९। खघौ घुरू। (ख-घौ १॥, घु-रु १॥)।

खो घुसंज्ञो घो रुसंज्ञः स्यात्। ‡

## ५४०। खः स्ये रुः। (खः १।, स्ये ७।, रुः १।)।

स्ये परे खो रुसंज्ञः स्यात्। §

इति संज्ञा-पादः।

---

* अचः कार्य्यम् अच्कार्य्यं तस्मात्, प्राक्शब्दयोगे (१००) पञ्चमी। यत्र स्वरवर्णे परे स्वरवर्णस्थाने कश्चित् आदेशः सम्भविष्यति, द्वित्वञ्च सम्भविष्यति, तत्र प्रथमं द्वित्वं स्यात्, पश्चात् स्वरकार्य्यं स्यादित्यर्थः। यथा—निनाय जुहाव इत्यादौ आदौ द्वित्वं पश्चात् वृद्धिसन्धी। यत्र एकदा अच्कार्य्यद्वित्वयोः प्रसक्तिस्तत्रैवायं नियमः। नियमश्चायं प्रायिक एव, तेन अरिरिषतीत्यादौ आदौ गुणे सन्धौ पश्चात् द्वित्वमिति। पाणिनिः १।१।५९।

† द्वेरिति धोरित्यस्य विशेषणं, धोरिति अधिकारप्राप्तम्। जागरं जागरं जगतीत्यादौ धातुत्वाभावात् पूर्व्वभागस्य न खित्वम्। पाणिनिः ६।१।४। अत्र खिः = अभ्यासः।

‡ लघुगुरुसंज्ञयोः फलं (५८२,६२८) इत्यादौ द्रष्टव्यम्। पाणिनिः १।४।१०,१२।

§ खे इतिकालेनैवेष्टसिद्धौ खः इति वचनं कदाचित् छन्दसि संयोगे परे गुरुत्वं स्यादिति सूचनार्थम्, अतएव भ्रूश्वैति पिङ्गलसूत्रम्। पाणिनिः १।४।११।



## (१) भू सत्तायाम्।

भू-तिप् इति स्थिते—

**५४१। घे अप् रे।** (घे ७।, अप् १।१, रे ७।)।

रे परे धोः अप् स्यात् घेऽर्थे। *

**५४२। गुर्धुङस्याकङिति।**

(गुः १।, धुङः ६।, अ १।१, अ-कङिति ७।)।

अन्त्यस्य धुसंयोगस्य गुः स्यात्, नतु किति ङिति।

भवति भवतः। †

---

* घे अर्थे कर्त्तरि वाच्ये। अपः अ् प् अत्, अकार-स्थितिः। शित्वात् (५९७) स्यादावित्यादिना तिङाद्यादिमः। (९२१) ढ-भावयोर्यका बाधितावशिष्टे सुतरां कर्त्तर्य्येव अप् स्यात्, तेनात्र घे इति व्यर्थमिति चेत् उच्यते,—कर्म्मकर्त्तरि वाच्ये (९२७) ढवद्ढव इत्यनेन यगाद्यतिदेशात् अबादेर्बाधे, चिक्षोधत इत्यादौ (९२१) सकृत्सन्त्येत्यादिना पुनर्यगादिनिषेधे, चांक्षिकगुणबाधकत्वात् अबादयः स्युरिति। अत्र अबादेर्बाधकस्य यगादेर्निषेधे सुतरां अबादिना भाव्यमिति वाच्यं, सकृद्गतौ विप्रतिषेधौ यद्बाधितं तद्बाधितमेवेति न्यायात् पुनः अप्-प्रसङ्गाभावात्। अतएव अनूद इत्यत्र (६५७) सकोऽप्राप्तिपक्षे सेर्निषेधे अबपि न स्यादिति। पाणिनिः ३।१।६८।

† धुर्गुणः, धुयासौ उङ् चेति धुङ् तस्य। क च ङ च कङौ, कङौ इतौ यस्य स कङित्, न कङित् अकङित् तस्मिन्। लघोरङः (९१) अकारात् (८) अन्यस्य इकस्य गुणः, यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्येति न्यायात् कित्ङित्-प्रत्ययाभ्यां भिन्ने अव्यवहित प्रत्यये परे इत्यर्थः। निमित्ताव्यवहित-पूर्व्ववर्त्ति-धातूनां, धातूत्तरजातयोः गुणपोष गुणः स्यात्। एवं (८४२) ध्यण्प्रत्ययस्य णित्करणात् कदाचित् ङित्त्वेऽपि गुणः स्यादिति, यथा मुदमापद्य मोदयतीत्यादि। भू-तिप् इति स्थिते, अप्, ऊकारस्य गुण ओकारः, (३५) अव्। एवं भवतः इत्यादि। पाणिनिः ७।३।८४,८६—१।१।५।

## ५४३ । लोपोऽतोऽदेपोः ।

(लोप: १।, अत: ६।, अत्-एपो: ७॥) ।

अकारस्य लोप: स्यात् अकारे एचि च परे ।

भवन्ति, भवसि भवथ: भवथ ।

(१०८) आ न्मिमभवि । भवामि भवाव: भवाम: । *

## ५४४ । भुव: प्राप्तौ वा मं ।

(भुव: ५।, प्राप्तौ ७।, वा ।१।, मं १।) ।

प्राप्तौ भुवो मं स्याद्वा वे । भवते । †

## ५४५ । यायातोऽत: ।

(ई ।१।, आ ।१।, आय-आत: ६।, अत: ५।) ।

अकारात् परयोराथातोराकार ई: स्यात् ।

भवेते भवन्ते, भवसे भवेथे भवध्वे, भवे भवावहे भवामहे । ‡

---

* अत्र अदेपोरिति प्रकरणबलात् धो: परत आतयोरेव ग्रहणं, यथा भवन्ति भवे भवन् बुभूर्षतीत्यादि, मुरारि: ब्रह्मैकत्वमित्यादौ न प्रसङ्ग:। लोपोऽतोऽदेतोरित्येव पाठ: साधु: एकारभिन्नानामनावश्यकत्वात्, अदेपोरिति तु लिपिकरप्रमादागत इति। भवन्ति इत्यत्र अपोऽकारलोप:। पाणिनि: ६।१।९७।

† भू सत्तायामिति गणपाठात् भूधातो: सत्ता एव अर्थ:, सत्ता च उत्पत्तिर्विद्यमानता च। अभिन्नार्थे (५११) परस्मैपदमेव। यदा तु प्राप्तिरर्थ: तदा आत्मनेपदमपि भवतीत्येतत्ज्ञापनार्थम् एतत् सूत्रम्। "प्राप्तिसम्पत्तजन्मसु" इति भट्टमल्ल:। आत्मनेपदमेवेति केचित्। वे कर्त्तरि वाच्ये इति मस्कृत्सूत्राधिकारात् अनुवर्त्तते। आत्मनेपदप्रकरणं विना अस्मैतत्सूत्रकरणं विरलप्रचारज्ञापनार्थं प्रथमप्रयुक्त-भूधातो: सार्वैतिप्रत्ययसंज्ञकविभक्तिषु पदसमुदायप्रदर्शनार्थञ्च। पाणिनिमते भूधातु: परस्मैपदी सत्तार्थश्च।

‡ ई आ इति भिन्नं पदम्। आय च आत चेति तस्य। आय आत इति लोपत्वयोरवधारणात् तदादि-विभक्तीनां ग्रहणं, तेन आये आते आयां आतां—इत्येतेषां ग्रहणम्। भवेते भवेथे—उभयत्र अनेन आत-आथयोराकार ई, (२१) गुण:। अत्र इकारकरणेनापि पदसिद्धौ

## ५४६। ख्या या युस् यामा-मीयुसीयम्।

(ख्याः ६।, या-युस्-यामाम् ६।।।, ई ईयुस् ईयम् ।१।।।)।

अकारात् परेषां ख्याः या युस् याम् एषां स्थाने—
ई ईयुस् ईयम् एते क्रमात् स्युः।*

भवेत् भवेतां भवेयुः, भवेः भवेतं भवेत, भवेयं भवेव भवेम। भवेत भवेयातां भवेरन्, भवेथाः भवेयाथां भवेध्वं, भवेय भवेवहि भवेमहि। भवतु भवतां भवन्तु।

## ५४७। ह्रेर्लोपोऽस्योप्नोश्च।

(ह्रेः ६।, लोपः १।, अस्योप्नोः ५।, च ।१।)।

अकारा दस्याभ्या-मुप्नुभ्याञ्च ह्रेर्लोपः स्यात्। †

भव भवतं भवत, भवानि।

## ५४८। व्यस्य ग्यनुकार डाच् च्वि कणोऽलं सन्मनोऽदोऽन्तःपुरो ऽस्तं तिरः कारिकोर्य्यादे र्धौ सः।

(व्यस्य ६।, गि—उर्य्यादेः ६।, धौ ७।, सः १।)।

एषां व्यानां धौ परे सः स्यात्। ‡

---

(५सूत्रे) द्विमात्रवर्णेन सह एकमात्रवर्णस्य साम्यमयुक्तमिति कृत्वा द्विमात्रकरणम्; एवं परत्रापि बोध्यम्। पाणिनिः ७।२।८१। अत इय् इति क्रमः।

* ख्या इति ग्रहणम् अदन्तधातोः ख्याः अप्राप्त्यर्थम्। पाणिनिः ७।२।८०।

† स्यः संयोगः, नास्ति स्यो यत्र सोऽस्यः, उप् च नुश्चेति उप्नु:, अस्यश्चासावुप्नुश्चेति अस्योप्नुस्तस्मात्। अकारादकाराच्च। उप्नुभ्यां यथा—तनु चिनु। अस्याभ्यां किम्, आप्नुहि। पाणिनिः ६।४।१०५,१०६।

‡ अनुकारो रूमत्पटदित्याद्यनुकरणशब्दः। गिश्च अनुकारश्च डाच् च च्विश्च कणे च अलम् च सत् च मनस् च अदस् च अन्तर् च पुरस् च अस्तम् च तिरस् च कारिका च

**५४९। प्राग्वन्नो णो ऽन्तरदुर्गे र्षादि हन मीना हिन्वानिप् णान्तनशो, गद नद पत पद दा मा सो हन वा या द्रा प्सा वप वह शम चि दिहान्तने,-र्वा त्वन निंस निन्द निक्ष भवान्त-ह्नो,-ऽकखाद्यषान्तान्त-नेः ।**

(प्राग्वत् ।१।, नः ६।, णः १।, अन्तर्-अदुर्-गेः ५।, र्षादि—शम ६।, गद- नेः ६।, वा ।१।, तु ।१।, त्वन—ह्नः ६।, अक—नेः ६।) ।

षादे र्षो हन्ते र्मीनाते र्हिनोते रानिपः णान्त-नशो गदाद्यन्त-नेश्च नस्य अन्तरो दुर्वर्जगेश्च परस्य षविधिहेतौ सति णः स्यात्, अनादे र्भवान्त-ह्नः ककादि-खादि-षान्तवर्ज-अन्त-नेश्च वा स्यात् । अन्तर्भवाणि प्रभवाणि । दुरस्तु दुर्भवानि । भवाव भवाम । भवतां भवेतां भवन्तां, भवस्व भवेथां भवध्वं, भवै भवावहै भवामहै । *

---

ऊर्यादिष्वेति सत्य । डाच् च्वि इति द्वौ प्रत्ययौ (५०१,४८५), अत्र तदन्तानां ग्रहणम् । अन्ययानामेषां शब्दानां धातौ परपदे सति समासः स्यादित्यर्थः । यथा प्रपचय, ऊरीकृत्य, पटपटाकृत्य, शुक्लीभूय । कथं सत्कृत्य शब्दो समार्थो, कर्मकृत्य सनःकृत्य, पयः पिबतीति प्रेषः । अलंकृत्य । सत् आदरे, सत्कृत्य । तत्पुरुषेऽपि अन्तर्भाव्य । अदः अनुपदेशे -- अदःकृत्य, अस्तंगत्य, पुरस्कृत्य । अस्तमित्यपलब्धौ, अस्तकृत्य । तिरोभूय । कारिका मर्यादा-यत्न-पीडासु, कारिकाकृत्य । उरीकृत्य, आदिना उररी ऊरी-प्रभृतीनां ग्रहणम् । एषु समासात् (११७६) क्त्वो यप् । अत्र समासः एकपदीभावमात्रं, उपादिसंज्ञा तु व्याख्यानादे-मेव, अतः समासप्रकरणे एतत् सूत्रं न कृतम् । धातुप्रकारणघटित कर्मादिः पूर्वं समास-करणात् समासाभावे यत्न न स्यादिति सूचितम् । पाणिनिः १।४।६१,६२,६३,६४,६५,६६, ६७,६८,७०,७१ ।

* नास्ति दुर् यत्र सोऽदुः, अदुरासौ गिश्चेति अदुर्गिः । अन्तर् च अदुर्गिश्चेति तस्मात् । मूर्धन्य-षादिश्च हन च मीनाश्च हिनुश्च आनिप् च तासाम्-आना-नश् चेति तस्य,

# ५५० । घीटीघीष्वम् धोरमा ।

(घी-टी-घीषु ७॥, अम् ।१।, घो: ६।, अमा ।३।) ।

**आसु परासु धोरम् स्यात्, न तु मा-योगे ।**

**अभवत् अभवतां अभवन्, अभवः अभवतं अभवत, अभवं अभवाव अभवाम । अभवत अभवेतां अभवन्त, अभवथाः अभवेथां अभवध्वं, अभवे अभवावहि अभवामहि । ***

---

मूर्द्धन्यणादिगिति (५७०) णोपदेशं ज्ञात्वा ज्ञेयः । (५६९) पुनर्दन्त्यत्वप्राप्तिः स्यादिति । गदश्च नदश्चेत्यादिद्वन्द्वे गद—दिहाः, ते अन्ते यस्य स गद—दिहान्तः, स चासौ निश्चेति गद—दिहान्तनिश्चतस्य । मवौ अन्ते यस्य स मवान्तः, स चासौ हन चेति मवान्तहन, अन च निंस च निन्द च निच च मवान्तहन चेति तस्य । कखौ आद्यौ येषां ते कखाद्याः, मूर्द्धन्यषोऽन्ते येषां ते षान्ताः, कखाद्याश्च षान्ताश्च कखाद्यषान्ताः, न कखाद्यषान्ताः अकखाद्यषान्ताः, ते अन्ते यस्य सः अकखाद्यषान्तान्तः स चासौ निश्चेति तस्य ।—

यथा—प्रणयति प्रणायिष्यति इत्यादि । मीना इति मायुक्तस्य मीधातोः, हिनु इति श्नुप्रत्ययस्य हिधातोर्ग्रहणम् । आनिप् इति विभक्तिः । प्रणक्ष्यति इति शान्तनशत्वात् णत्वं, प्रनष्ट इति न णत्वम् । गदाद्यन्तनेर्यथा—प्रणिगदतीत्यादि । दा इति दासंज्ञकस्य ग्रहणं, तेन —प्रणियच्छति प्रणिददाति प्रणिदधाति । देङ् दो धेट इति चयाणां (६०८) आकारे प्रणिदायते इत्यादौ णत्वं स्यात्, ञिति परे तु आकाराभावात् दासंज्ञाभावे न णत्वम् । दीङ् इत्यस्य (७१२) ङादेशे णत्वं स्यादेव । मा इति स्वरूपग्रहणं—तेन माङ्मि, मा स, माङ्य, इत्येतेषां णत्वं स्यात्, मीञ् मीङ्य मीङ्ग इत्येषां (७१५) ङादेशे, एवं मेङ् इत्यस्य (६०८) आकारे च स्यादेवेति । अनादेस्तु वा—यथा—प्राणिति प्राणितीत्यादि । प्रनिकरोति प्रनिखादति प्रनिशीषति इत्यादौ कादि-खादि-षान्तान्त-नित्वात् न णत्वम् । तद्भिन्ननित्वात् प्रणिपचति प्रनिपचतीत्यादौ विकल्पः । अन्तर्भवाणीत्यादौ आनिपो नस्य णत्वम् । पाणिनिः ८।४।१४,१५,१६,१७,१८,१९,२२,२३,२४,३२ ।

* आदिहनमीनादीनामनुवृत्तिमाशङ्क्याह धोरिति । मा इत्यनेन माङ-शब्दस्यापि ग्रहणम् । योगस्तु अर्थेन, न तु अव्यवहितत्वेन । अम् इत्यागमः, म इत् (१७) आदौ स्यादिति । अभवदिति भू ध्वा दिप्, अनेन अम्, (५४१,५४२,३५,६४) शप्, गुणः, ओस्थाने अव्, दस्थाने त् । एवं सर्वत्र । पाणिनिः ६।४।७१,७४ ।

## ५५१ । ञ्यां सिः । (ञ्यां ७।, सिः १।) ।

धोः सिः स्यात् ञ्यां । *

## ५५२ । भूस्थापिबद्नो लुक् पे ।

(भू-स्था-पिब-दा-इनः ५।, लुक् ।१।, पे ७।) ।

एभ्यः सेर्लुक् स्यात् पे । अभूत् अभूतां । †

## ५५३ । भुवो वन् टौव्यचि ।

(भुवः ६।, वन् ।१।, टौव्यचि ७।) ।

भुवो वन् स्यात् टौव्योरचि परे । अभूवन् । ‡
अभूः अभूतं अभूत, अभूवं अभूव अभूम ।

## ५५४ । वसोऽरस्येमनौदितः ।

(वसः ६।, अरस्य ६।, इम् ।१।, अनौदितः ५।) ।

अनौदितो धोः परस्य अरस्य वसस्य इम् स्यात् । §
अभविष्ट अभविषातां ।

---

* अर्थगतविशेषात् निमित्तगतविशेषस्य बलवत्त्वात्, अयं शप्श्नमादीनां यकोऽपि बाधकः । तेन कर्त्तरि अभविष्ट, कर्म्मणि अभाविषातामित्यादि । विभक्तिव्यत्यासेन धोरित्यत्र पञ्चमी । पाणिनिः ३।१।४३,४४ । एतन्मते सिच् ।

† भूश्च स्थाश्च पिबश्च दाश्च इन् चेति तस्मात् । पिब इति निर्देशात् पा ल रक्षणे पै शोषे इत्येतयोः अपासीत् । दा इति दासंज्ञकः, तेन दै प शोधने इत्यस्य अदासीदिति । अभूदिति व्या रत्वात् (५५४) वसोऽरस्येति न इम् । ङित्त्वात् (५४२) न गुणः । लुक्-करणात् (५७४) न वृद्धिः । पाणिनिः २।४।७७ ।

‡ भुव इति षष्ठ्यन्तस्य भूधातोर्वन्नुकरणं धात्ववयवत्वात् तस्मिन् परे भूधातोः (५४२) गुणनिषेधार्थम् । वनोऽकार उच्चारणार्थः, न इत् (१०) अन्ते । भू-अन् (५५०,५५१,५५२, ५५३) अभूवन् । पाणिनिः ६।४।८८ ।

§ न रोऽरस्तस्य । नास्ति औत् इम् यस्य सः अनौदित् तस्मात् । वस इति अन्तःस्थ-

## ५५५। मान्तोऽदनतः।

(मान्तः ६।, अत् ।१।, अनतः ५।)।

मस्यान्त् इत्यस्य अत् स्यात् नलकारात् परस्य। *
अभविषत, अभविष्ठाः अभविषाथां।

## ५५६। धे स-लोपो वा। (धे ७।, स-लोपः १।, वा ।१।)।

धे परे सस्य लोपो वा स्यात्। †

## ५५७। टौ ठौ ढौ धो ढिचः सेमस्तु ह्लो वा।

(टौ-ठौ-ढौ-धः ६।, ढ ।१।, इचः ५।, सेमः ५।, तु ।१।, हलः ५।. वा ।१।)

इचः परस्यासां धस्य ढः स्यात्, सेम्हलात् परस्य तु वा स्यात्।
अभविढ्वं अभविध्वं, (६४) झपझसोरिति सस्य दः—अभ-
विद्ध्वं, ‡ अभविषि अभविष्वहि अभविष्महि।

---

वकारादिः प्रत्याहारः, अरस्येति (५३०) पञ्च रः श्रिवेति सूत्रोक्तभिन्नस्य। म इत् (१७) आदौ। इमो वसस्थानजातत्वेन ततुल्यत्वात् वसो गुणित्वागुणित्वेन इमोऽपि गुणित्वागुणित्वं, तेन विवरिथ इत्यादौ गुणः, दुदुविव इत्यादौ न गुणः, औदितस्तु कविकल्पद्रुमात् ज्ञेयाः। पाणिनिः ७।२।३५—७।२।१०। अत्र औदित्स्थाने अनुदात्तेत्कथनम्।

* मस्य आत्मनेपदस्य अन्त् मान्त् तस्य। अन्त् इति हसन्तस्य ग्रहणं, तेन अन्त अन्ते अन्तां इत्येषामपि। अनत इति किं, एधन्ते, (५४२) लोपोऽतोऽदेचोरित्यकारलोपस्य स्थानिवत्त्वाङ्गीकारात्। पाणिनिः ७।१।५।

† पाणिनिः ८।२।२५।

‡ टौ-ठौ-ढौनां ध टौठौढौध तस्य। सह इमा वर्त्ततेऽसौ सेम् तस्मात्। आसां टौ-ठौ-ढौनां। हल् प्रत्याहारः। भू—ध्वं (५५०, ५५१, ५५४, ५४२, ३५. ५५६), ततः अनेन धस्य वा ढ, अभविढ्वं अभविध्वं। सलोपाभावपक्षे सस्य द अभविद्ध्वमिति। पाणिनिः ८।३।७८।

५५८ । धुर्द्विष्ठ्यङि । (धुः १।, द्विः १।, ठ्यङि ७।) ।

ठ्यां अङि च धुर्द्विः स्यात् । *

५५९ । झभ् खथ् ह घं कुॠणां जब् चप् ज ख चाः खेः । (झभ्—कु-ॠणां ६।।।, जब्—ख-चाः १।।।, खेः ६।) ।

खे झभ् खथ् हकार घं कवर्ग ऋवर्णानां क्रमात् जब् चप् जकार ख चवर्गाकाराः स्युः । †

५६० । भुवोऽङ् ठ्यां ढ-भावे तु वा ।

(भुवः ६।, अङ् ।१।, ठ्यां ७।, ढ-भावे ७।, तु ।१।, वा ।१।) ।

भुवः खेरङ् स्यात् ठ्यां ढ-भावयोस्तु वा । ‡

बभूव बभूवतुः बभूवुः, बभूविथ बभूवथुः बभूव, बभूव बभूविव बभूविम ; बभूवे बभूवाते बभूविरे, बभूविषे बभूवाथे बभूविढ्वे बभूविध्वे, बभूवे बभूविवहे बभूविमहे । ढे भावे च—बभूवे बुभूवे इति प्रयोगौ ।

---

* ठौ च अङ् च ठ्यङ् तस्मिन् । प्रकरणादेव धोः प्राप्तौ पुनरुपादानं ठ्या अव्यवहितपूर्व्वधातोरेव द्वित्वं स्यादिति ज्ञापनार्थं, तेन इन्दामबभूव इत्यादौ इन्दादेर्न द्वित्वमिति । वीप्साद्यर्थे पदानां द्वित्वमपि वक्तव्यम् (सिद्धान्तकौमुदी-द्विरुक्तप्रकरणं द्रष्टव्यम् ।) पाणिनिः ६।१।८,११ ।

† झभ् च खथ् च हश्च घंश्च कुश्च ऋश्च ते तेषां । जब् च चप् च जश्च खश्च चुश्च अश्च ते । क्रमश्च——झभ् खथ् ह घं कु ऋवर्णं
जब् चप् ज ख चु अ

पाणिनिः ८।४।५४,—७।४।५९,६२,६६ ।

‡ पाणिनिः ७।४।७३ । वार्त्तिकञ्च ।

भविता भवितारौ भवितारः, भवितासि भवितास्थः भवितास्थ, भवितास्मि भवितास्वः भवितास्मः ; भविता भवितारौ भवितारः, भवितासे भवितासाथे भविताध्वे, भविताहे भवितास्वहे भवितास्महे ।

भूयात् भूयास्तां भूयासुः, भूयाः भूयास्तं भूयास्त, भूयासं भूयास्व भूयास्म ; भविषीष्ट भविषीयास्तां भविषीरन्, भविषीष्ठाः भविषीयास्थां भविषीढ्वं भविषीध्वं, भविषीय भविषीवहि भविषीमहि ।

भविष्यति भविष्यतः भविष्यन्ति, भविष्यसि भविष्यथः भविष्यथ, भविष्यामि भविष्यावः भविष्यामः ; भविष्यते भविष्येते भविष्यन्ते, भविष्यसे भविष्येथे भविष्यध्वे, भविष्ये भविष्यावहे भविष्यामहे ।

अभविष्यत् अभविष्यतां अभविष्यन्, अभविष्यः अभविष्यतं अभविष्यत, अभविष्यं अभविष्याव अभविष्याम ; अभविष्यत अभविष्येतां अभविष्यन्त, अभविष्यथाः अभविष्येथां अभविष्यध्वं, अभविष्ये अभविष्यावहि अभविष्यामहि ।

भवतकि भवतकः । प्रणिभवति प्रनिभवति । *

एवं चेततीत्यादयः । †

---

* बभूव इत्यादि, द्वित्वे, खेर्भस्य ब, अनेन अङ् । भविता इत्यादि (५५४, ५४२, २५) । भूयादित्यादि किस्वात् न गुणः । भविषीढ्वमिति आसां षस्य ढः स्यादिति कथनेन व्यवधानेऽपि ढः । भविष्यतीत्यादीनि सुगमानि । भवतकीत्यादौ (२०८) टेः पूर्व्वं अक् । प्रणिभवतीत्यादि (५४९) अकखाद्यषान्तान्तनेर्वा णत्वम् ।

† एवं चेततीत्यादय इत्यनेन येषु विशेषकार्य्याणि न सन्ति ते एवमित्यर्थः । विशेषकार्य्यार्थं सूत्राण्याह ददाद्यतीत्यादि ।

## (२) चिती संज्ञाने । *

* चित धातुः, ई अनुबन्धः, संज्ञाने प्रकृष्टज्ञाने (अर्थे) वर्त्तते इति ।

---

### प्रसङ्गात् गणपाठोक्ता अनुबन्धास्तत्प्रयोजनानि च लिख्यन्ते ।

अ—सुखोच्चारणार्थः । (४)
आ—निष्ठाभावादिकर्म्मे वेट् ।
(१०७२, भावे क्रियारम्भे च वाच्ये क्त-क्तवतु-स्थाने वा इट्) ।
इ—नुम्वान् । (५६८)
इर्—वा अङ्वान् ।
(५६५, ङ इति लभते) ।
ई—अनिड्निष्ठः ।
(१०७१, क्त-क्तवतुस्थाने न इट्) ।
उ—क्त्वा-वेट् । (११७२)
ऊ—वेट् । (५७२) वैम् ।
ऋ—चङि अह्रस्वः । (६१८)
ॠ—चङि वा ह्रस्वः । (७७९)
ऌ—अङ्वान् । (५६५, ङ) ।
ए—सिचि अवृद्धिः । (५७६)
ऐ—यजादिः । (६५१)
ओ—निष्ठा-त-न ।
(१०५२, क्त-क्तवतोः त-स्थाने न) ।
औ—अनिट् । (५५४) लभते अनिम् ।
क—चुरादिः । (७७२)
कि—वा चुरादिः । (७७२)
ग—क्र्यादिः । (७१८)
गि—प्वादिरपि (७६९) ।
प्वाधातुभिन्नश्चेत् ल्वादिश्च । (१०५२)
घ—रुदादिः । (५६१, ६९५)
ङ—तङ्वान् ।
(५२१, कर्त्तरि वाच्ये आत्मनेपदी) ।
ञ—ज्वलादिः । (१०००)
ञ—उभयपदी । (५२१)
ञि—अद्य क्तः ।
(१०९५, वर्त्तमानकाले क्तः) ।
टु—अथुः । (११४२)
डु—त्रिमक्युतः । (११४२)
ण—फणादिः । (५७९)
त—अदन्तः=अत्-अन्तः । (७७५)
द—तनादिः । (६८८)
ध—रुधादिः । (७१८)
न—स्वादिः । (७१८)
प—मुचादिः । (७४१)
भ—भ्रमादिः । (७४०)
म—घटादिः । (७९८)
मि—णिचि इण्-यमोः वा ह्रस्वः । (७९९)
य—दिवादिः । (७१८)
र—वैदिकः । (वेदोक्त-धातुः ।)
ल—अदादिः । (६७०)
लि—ह्वादिः । (७२६)
लु—लुपादिः । (६६१)
व—व्रतादिः । (६४८)
श—तुदादिः । (७१८)
शि—कुटादिः । (७५५)
ष—ऋदङ्वान् ।
(११५६, ऋदन्ते ऊ) ।
स—जषादिः । (१७४)

## ५६१। रुदाद्यस्तिसे-र्दिस्योरीम्।

(रुदादि-अस्ति-सेः ५।, दि-स्योः ६॥, ईम् ।१।)।

एभ्यो दि-स्योरीम् स्यात्। *

## ५६२। झस-स्वात् झसीम ईमि सेर्लोपः।

(झस-स्वात् ५।, झसि ७।, इमः ५।, ईमि ७।, सेः ६।, लोपः १।)।

झसात् स्वाच्च परस्य झसि, इमः परस्य ईमि, सेर्लोपः स्यात्। अचेतीत् अचेतिष्टां। †

## ५६३। अनुस् सिद्वेरभुवः।

(अन् ।१।, उस् ।१।, सि-वेः ५।, अभुवः ५।)।

सेर्वेश्च परस्य अन उस् स्यात् न तु भुवः। अचेतिषुः, अचेतीः। ‡

---

* रुदादिभ्य अस्तिश्च सिश्चेति तस्मात्। दिश्च सिश्च तयोः। रुद स्वप श्वस प्र-अन जक्ष इति पञ्च रुदादिः। अस्तिरिति असधातुः, स्वरूपकथने तिप्। सिरिति (५५१) ध्यां सिः। एतेभ्यः परस्य देः सेश्च ईम् स्यादित्यर्थः। रुदाद्यस्तिभ्यां घ्या दि-स्योरेव, रुदादिष्वां सि-व्यवधानेन अस्तेर्भू इति आदेशेन च व्या दिस्योरसम्भवात्। सेस्तु व्या दिस्योरेव, घ्या असम्भवात्। पाणिनिः ७।२।९६,९८।

† झस् च स्वश्चेति तस्मात्। झम् प्रत्याहारः। अचेतीत् —चित—व्या-दि (५५०, ५५१, ५५४, ५४२, ५६१, ५६२)। अचेतिष्टां—अत्र इमः परस्य ईम्येवेति विशेषनियमात् झस्वात् परस्यापि सेर्न लोपः। अचैष्ट अस्तोष्ट इत्यादौ लोपस्वरादेशयोस्तु स्वरादेशविधिर्बलीति न्यायात् आदौ गुणे सिलोपो न स्यादिति। पाणिनिः ८।२।२६,२७,२८।

‡ सिश्च विश्च सिविस्तस्मात्। सेः परस्य व्या अन् उस्, वेस्तु घ्या एव। यथा अचेतिषुः। अस्थुः अपुः अदुः अगुः एषु (५५२) सेर्लुकि, त्यलोपे त्यलक्षणमिति न्यायात् सेः परत्वात् अन् उस्। वेस्तु अजक्षुरित्यादि। पाणिनिः ३।४।१०९।

## ५६४। खेराद्यचो लोप्योऽनु ग्रस्खपाद्यन्तान्यस्याद्यन्तौ।

(खेः ६।, आद्यच: ५।, लोप्य: १।, अनु ।१।, ग्रस्—अन्तौ १॥)।

खेराद्यचः परो भागो लोप्यः स्यात्, पश्चात् ग्रसादि-खपान्तो यदि स्योऽवशिष्टस्तस्यादिर्लोप्यः, यद्यन्यादृशस्तस्यान्तो लोप्यः। चिचेत चिचिततुः चिचितुः। *

(२) च्युतिर् क्षरणे।

## ५६५। ग्रासुलिद्द्युतपुषादे ङ्टौपे—ऌ श्वि स्तन्भु विपु म्रुचु म्लुचु ग्रुचु ग्लुञ्चुरितस्तु वा।

(ग्रासु—पुषादि: ५।, ङ: १।, टौपे ७।, ऌ—इरित: ५।, तु ।१।, वा ।१।)।

ग्रासो ऌकारितो द्युतादेः पुषादेश्च ङः स्यात् टौपे, आदेस्तु वा। अच्युतत् अच्योतीत्। चुच्योत। †

---

* आदिश्चासौ अच् चेति आद्यच् तस्मात्। आदिरत्र अचां मध्ये इत्यर्थः। ग्रस् च खप् च ग्रस्खपौ, आदिश्च अन्तश्च आद्यन्तौ, ग्रस्खपौ आद्यन्तौ यस्य स ग्रस्खपाद्यन्तः, स च अन्यश्च तौ ग्रस्खपाद्यन्तान्यौ, तौ च तौ स्यौ चेति ग्रस्खपाद्यन्तान्यस्यौ, तयोराद्यन्तौ ग्रस्खपाद्यन्तान्यस्याद्यन्तौ। अनु पश्चादर्थः। पश्चात् आद्यचः परभागाभावे इत्यर्थः। तेन यस्य खेः आद्यचः* परभागो वर्तते तस्य तल्लोपानन्तरं, यस्य तु न वर्तते तस्य प्रथमत एव, ग्रसादि-खपान्त-संयोगस्य आदिवर्णो लोप्यः, अन्यविधसंयोगस्य अन्तवर्णो लोप्यः स्यादिति। चिचेत इति चित—णप् (५५८) द्वित्वं, अनेन खेः तलोपः, (५४२) गुणः। पाणिनिः ७।४।६०,६१।

† ऌ इत् यस्य स ऌित्। द्युत् च पुष् च द्युत्पुषौ, तौ आदी ययोस्तौ द्युत्पुषादी। ग्रासुश्च ऌिच्च द्युत्पुषादी चेति तस्मात्। अस्मते ऌिदित्त्वेनैव सिद्धे द्युत्पुषाद्यंशद्वयं प्राचामनुरोधात्। इर् इत् यस्य स इरित्। ऌश्च श्विश्च स्तन्भुश्च विपुश्च म्रुचुश्च म्लुचुश्च ग्रुचुश्च ग्लुञ्चुश्च इरिच्चेति तस्मात्। ग्रासुप्रभृतीनां उकारेत् चिह्नार्थः। द्युतादय आत्मनेपदिनः, अत्र तु टौपे ङविधानसामर्थ्यात् ज्ञेयां उभयपदिनः स्युरिति।

## (४) मन्थ विलोड़ने ।

### ५६६ । स्यात् ह्यपित् किद्वा ।

(स्यात् ५।, ठी ।१।, अपित् ।१।, कित् ।१।, वा ।१।) । *

### ५६७ । हसुङ्नो लोपोऽणौ ।

(हसुङ्नः ६।, लोपः १।, अणौ ७।) ।

धोर्हस उङो नस्य लोपः स्यादणौ ।

ममथतुः ममन्थतुः । मथ्यात् । †

---

च्युतादयश्च—श्चुत श्चुत गृध स्यन्द क्रुप श्वित मिद स्विद श्विद रुच लुट रुट लुट लुठ शुभ क्षुभ नभ तुभ स्रन्स ध्वन्स भ्रन्स भ्रन्श स्रम्भ इति चयोविंशतिः । पुषादयश्च—पुष शुष तुष दुष श्लिष शक क्रुध क्षुध शुध सिध रधादि (=रध तृप दृप मुह द्रुह स्नुह स्निह नश) शमादि (=शम तम दम श्रम भ्रम क्षम क्लम मद) अस जस यस तस दस बस वस व्युस व्युष बुष बुस प्लुष विस कुस मुस मस सम उच भ्रश वृश क्लश तृष हृष रुष रिष डिप कुप गुप युप रुप लुप लुभ क्षुभ नभ तुभ क्लिद इति । वोपदेवेन तु गणपाठे सर्व्वे इरित्त्वेन निर्द्दिष्टा इति । अच्युतदिति इरित्त्वेन वा ङः । ङस्तु सेडबाधकः, तेन पक्षे ह्यां सिरेव । ह्या अपि चुच्योत् इति । पाणिनिः ३।१।५५,५६,५७,५८ । ङ=अङ् ।

* संयोगात् परा अपित् ठी कित् स्याद्वा । परसूत्रे हसुङ्नो लोपोऽणौ ह्यान्तु वा इति कृते, अपित्ह्यां नलोपविकल्पे सिद्धे पृथक् एतत्सूत्रकरणं भ्रस्जधातोः (७५१) भ्रस्जोऽरे णौ भर्ज वेत्यनेन बभर्जे इत्यत्र भर्जादेशार्थम् । असंयोगात्तु नित्यम् यथा—पाणिनिः १।२।५ ।

† उङ् चासौ न चेति उङ्न, हसो हसन्तधातोरुङ्न हसुङ्न तस्य । नास्ति णुर्यस्मिन् (परे) सोऽणुस्तस्मिन् । मन्थधातोः अतुस् पूर्व्वेण कित्, अनेन नलोपः । पक्षे कित्त्वाभावात् अगुणत्वाभावे न नलोपः । मथ्यादिति (५२२) नित्यकित्त्वे नित्यं नलोपः । पाणिनिः ६।४।२४ ।

(५) कुथि हिंसा-संक्लेशयोः ।

**५६८। नेदित्पूजार्थाञ्चोः ।**

(न ।१।, इदित्-पूजार्थाञ्चोः ६॥) ।

इदितो धोः पूजार्थस्याञ्चतेश्च न-लोपो न स्यादणौ ।
अतएवेदितो नुम् । प्रणिकुथ्यात् । (५४९) कादित्वान्न णः । *

(६) षिधु गत्यां ।

**५६९। आद्यादिष्णः स्नो ऽष्ठ्यैष्वक्कष्ठिवां ।**

(आद्यादिषः ६।, स्नः १।, अ-ष्ठ्यै-ष्वक्क-ष्ठिवां ६॥) ।

आदेरादौ स्थितयोः ष-णयोः स-नौ स्तः, नतु ष्ठ्यै-ष्वक्क-ष्ठिवां ।†

**५७०। सेक सीक सृप सृ सृज**
**स्तृ स्त्यान्ये दन्त्याजन्तसादयः**
**षोपदेशा धवः, स्वक्क**
**स्वित् स्वत् स्वञ्ज स्वप स्मिङश्च ।**
**णोपदेशा स्वनृन्नर्द**
**नाथ नाध नन्द नक्क नृ नटः ।**

---

* इत् इकारः इत् यस्य स इदित्, पूजार्थश्चासौ अञ्च चेति पूजार्थाञ्च, इदिच्च पूजार्थाञ्च च तयोः । इकारानुबन्धधातोर्नकार एव नास्ति कथं तस्य लोपो निषिध्यते अत आह अतएवेत्यादि, (पाणिनिः ७।१।५८) अतएव नलोपनिषेधादेव । पाणिनिः ६।४।२४,३० ।

† भूः आदिर्यस्य स भ्वादिः, भ्वादेरादिः भ्वाद्यादिः, तच तच च, भ्वाद्यादौ च भ्वाद्यादिश्च तस्य । भ्वादिरिति भू सत्तायामित्यादिधातुगणः, तथाच—भ्वादयादौ शुचेत्यादि दिवादिः स्वादि-रेव च, तुदादिश्च रुधादिश्च तनक्र्यादिचुरादय इति । सौत्रधात्वादिष्वपि भ्वादिश्च एवं नामधातुनिरासार्थम् । पाणिनिः ६।१।६४,६५ ; वार्त्तिकञ्च ।

(सेक—अन्ये १।॥, दन्त्याजन्तसादयः १।॥, षोपदेशाः १।॥; षवः १।॥, स्तम्भ—णिजः १।॥, च ।१।, षोपदेशाः १।॥, तु ।१।, अ-वत्—नटः १।॥)।

सेधति। *

## ५७१। व्याच्छस्य गत्यर्थवदे सः।

(व्याच्छस्य ६।, गत्यर्थवदे ७।, सः १।)।

गत्यर्थे वदे च धौ परदे व्यस्याच्छस्य सः स्यात्। अच्छ-सेधति। †

## ५७२। गीकः स्तु स्तुभ सो सुवास्थान्त-सुञां स्था सेनि सनज स्वनञा ऽगतिसेधा ऽप्रतिसदा

---

* षोपदेश-षोपदेशौ दर्शयति साद्धया आर्य्यया।

सेक च सौक च सृप च सृभु सृज च स्तृच स्याश ते, तेभ्योऽन्ये। स्या इति स्त्यैधातुः (६०८) ऐ स्थाने आ। दन्त्यश्च अच् दन्त्याचौ, तौ अन्ते यस्य स दन्त्याजन्तः, स चासौ स चेति दन्त्याजन्तसः, स आदिर्येषां ते दन्त्याजन्तसादयः। दन्त्यवर्णान्ताः अजन्ता वा ये सकारादिका धातवः षोपदेशाः, षस्य उपदेशो येषु, धातुसंज्ञाकाले मूर्द्धन्यषादित्वेन पठिताः इत्यर्थः। सेकादीना-मजन्तसादित्वात् स्त्य स्वे इत्येतयो दन्त्यान्तसादित्वाच्च प्राप्तो निषेधः। स्त्यादीना-मतथात्वात् पृथगुपादानम्। "ऋदूटौ यत्र विद्येते यो वः प्रत्ययसन्धिजः, अन्तःस्थं तं विजानीयात् तदन्यो वर्ग्य उच्यते" इति वचनात् स्वपधातोर्वकारस्य दन्त्यत्वेऽपि पृथक् ग्रहणं क्वचित् षोपदेशाभावज्ञापनार्थं यथा सन्त्व क सान्त्वने इत्यादयः। षोपदेशफलन्तु तुष्टाव इत्यादौ क्षतसकारत्वात् (१११) षत्वम्। पाणिनिः ६।१।६४ सूत्रे वार्त्तिकम्।

नृत नर्द्द च इत्यादि द्वन्द्वः, न सन्ति नृत्‌नर्द्द नाथ नाध नन्द नक्क नॄ नटः येषु धातुषु ते। नृतप्रभृतिवर्जिता णादयो धातवः णोपदेशाः, धातुसंज्ञाकाले मूर्द्धन्यादित्वेन पठिता इत्यर्थः। णोपदेशफलन्तु (५४९) इत्यनेन णत्वम्। पाणिनिः ६।१।६५ सूत्रे वार्त्तिकम्।

सेधतीति षिधधातुः षोपदेशः, (५६९) षस्य सः।

† व्यस्य तत् अच्छः चेति व्याच्छसस्य। गत्यर्थस्य वदस्य तत्तिम्। अच्छ इति अभिमुखार्थो निपातः। अच्छ-सेधति अभिमुखं गच्छतीत्यर्थः। एवं अच्छ-वदति अभिमुखं वदति। (५४८) व्यस्य ण्यनुकारेत्यस्य निषेधोऽयम्। पाणिनिः १।४।६९।

**ऽयङ्सिचा ऽनङ्स्तम्भा ऽम्बव्यवस्वन परि नि वि सेव सुम ऽनङ्सिवा ऽनोऽङ्सहां सः षो ऽव्यपि दम-स्यादेस्तु द्वेश्च ।***

(गि-इकः ५।, स्तु—स्तुभां ६॥।, स्था—सहां ६॥।, सः १।, षः १।, अमि ७।, अपि ।१।, दम-स्यादेः ६।, तु ।१।, द्वेः ६।, च ।१।) ।

**स्वादे-रस्थान्तस्तुञः स्थादे-रगत्यर्थ-सेधो ऽप्रतिपूर्व्व-सदो यङ्वर्ज-सिचो ऽङ्वर्जस्तम्भो ऽवार्थव्यवपूर्व्व-स्वनः पर्य्यादिपूर्व्व-सेव-सुम-ऽङ्वर्ज-सिव ओऽङ्वर्ज-सहाश्च गेरिकः परः सः षः स्यात् अभ्यन्तरेऽपि, दमानां स्थादीनान्तु द्वित्वानाञ्च ।**

निषेधति, न्यषेधत् । गतौ तु—गङ्गां व्यसेधत् । †

---

* गेरिक् गौक् तस्मात् । सः सरूपः (न तु संयोगः), सोऽन्ते यस्य स स्तान्तः, न स्तान्तो ऽस्तान्तः, स चासौ स्तुञ् चेति अस्तान्तस्तुञ् । स्तुश्च स्तुभश्च सोश्च सुवश्च अस्तान्तस्तुञ् च तेषाम् । अगतौ सेधः अगतिसेधः, नास्ति प्रति यस्मिन् सोऽप्रतिः, स चासौ सदश्चेति अप्रतिसदः, नास्ति यङ् यस्मात् सोऽयङ्, स चासौ सिचश्चेति अयङ्सिचः, नास्ति अङ् यस्मात् सोऽनङ्, स चासौ स्तम्भश्चेति अनङ्स्तम्भः, वि-अवाभ्यां स्वनः व्यवस्वनः, अम्बे (अवार्थे) व्यवस्वनः अम्ब-व्यवस्वनः ; नास्ति अङ् यस्मात् सोऽनङ् स चासौ सिवश्चेति अनङ्सिवः, ओश्च अङ् च ओऽङौ, न विद्येते ओऽङौ यस्य सः अनोऽङ्, स चासौ सहश्चेति अनोऽङ्सहः ; सेवश्च सुमश्च अनङ्सिवश्च अनोऽङ्सहश्च ते सेवसुमऽनङ्सिवाऽनोऽङ्सहः ; परिश्च निश्च विश्च परिनिवयः, तेभ्यः सेवसुमऽनङ्सिवाऽनोऽङ्सहः परिनिविसेवसुमऽनङ्सिवाऽनोऽङ्सहः ; पश्चात् स्थाश्च सेनिश्च सञ्जश्च स्वञ्जश्च अगतिसेधश्च अप्रतिसदश्च अयङ्सिचश्च अनङ्स्तम्भश्च अम्बव्यवस्वनश्च परिनिविसेवसुमऽनङ्सिवाऽनोऽङ्सहश्च ते तेषाम् । दमानां स्थादीनां समाहारस्तस्य, तेन सिवसहोर्ण ग्रहणम् ।

† अत्र सुव इति तौदादिकस्य षू प्र चेपे इत्यस्य ग्रहणं, नतु षू ङल षूयीङ प्रस्वेतयोः । सेनिरिति नामधातुः सेना-शब्दात् (८५८) ञिः । निषेधतीत्यत्र अगत्यर्थत्वात् षत्वं, व्यादिपि न्यषेधदित्यत्र अम्व्यवधानेऽपि षत्वम् । गत्यर्थे तु व्यसेधदिति न षत्वम् । सेध इति निर्देशात् दैवादिकस्य निसिध्यतीत्यादौ न षत्वम् । अवष्वणतीत्यत्र व्यवस्वन इत्युक्तेः गौतमित्यादपि

(७) षिधू शास्त्रे माङ्गल्ये च ।

## ५७३ । वेमूदित् स्वर षाय स्फाय प्याय सूति सूय धूञ रधादि निष्कुषोऽरवसो वदुसुनोस्त्वत्थ्याः ।

(वा ।१।, इम् ।१।, ऊदित्—निष्कुष: ५।, अरवस: ६।, वदुसुनो: ५।, तु ।१।, थथ्या: ६।) ।

एभ्यो वसस्यारस्य इम् स्यात् वा, रौत्यादेस्तु ठीवर्जम् । *

असेधीत् ।

## ५७४ । व्रजवदरलजनिमो ऽञ्जिश्चिजागृ व्रिः सौ पे ।

(व्रज-वद-चर्-चल्-चल्-जनिम: ६।, अञ्जिश्चिजागृ: ६।, व्रि: १।, सौ ७।, पे ७।) ।

---

षत्वम् । सुम् इति सुम्-आगम: (७५२,७६६) । (१११) क्लिवादिस्यनेन प्राप्तं उपसर्गनिमित्तकमेव षत्वम् अनेन नियम्यते, तेन विस्तौति प्रतिस्नाति इत्यादौ न षत्वम् ; तोष्टूयते इत्यादौ स्विनिमित्तकं षत्वं स्यादेव । क्लिवादिस्यत्र यथा, तथा इहापि विसर्गव्यवधानेऽपि षत्वं स्यात्, यथा निःष्टौतीत्यादि । पाणिनि: ८।३।६५,६६,६७,६८,६९,७०,११२, वार्तिकानि च ।

* ऊत् इत् यस्य स ऊदित्, रध आदिर्यस्य स रधादिः, निसः कुष निष्कुष ; ऊदिच स्वरश्च षायश्च स्फायश्च प्यायश्च सूतिश्च सूयश्च धूञ च रधादिश्च निष्कुष चेति तस्मात् । वद दुष सुष नुष तस्मात् । स्वर इति स्वृ ञ शब्दोपतापयोः, सजातीयधात्वन्तराभावात् स्वृग्रहणेनैवेष्टसिद्धौ स्वरग्रहणं क्वचित् निषेधं बाधित्वा विकल्पोऽयं प्रवर्तते इति ज्ञापनार्थम्, अतएव (६१६) नेमृतस्वप इत्यनेन इमनिषेधेऽपि सस्वरिथ सस्वर्थ इति अनेन वा इम् । सूति सूय इति भ्वादि-दिवाद्योर्ग्रहणात् षू ञ चैपे इत्यस्य असावौदिति नित्यमिम् । रधादिस्तु रध तप दृप मुह द्रुह ष्णुह ष्णिह नश इति अष्ट । स्वमते ऊदित्त्वेनैव सिद्धौ स्वृ-रधाद्योरिह पाठः प्राचीनमतानुवादार्थः । वदुसुतु इत्येतेषां थ्यां विकल्पस्यैव वर्जनं, (५८४) नेमसुम इति नियमात् नित्यमिम् स्यादेव । पाणिनि: ७।२।४४,४५, वार्तिके “क्लिति तु नित्यः प्रतिषेधः । स्नुत्वा । सूत्वा । धूत्वा ।” इति ।

व्रजी-वदे-ररन्तस्यालन्तस्याजन्तस्यानिमश्च सौ पे ञिः स्यात्, न तु जि-श्वि-जागृणाम्। अनैषीत्, अनैषिष्टां। *

## ५७५। ढभात् तथोर्धोऽधः।

(ढभात् ५।, त-थोः ६॥, धः १।, अधः ५।)।

ढभात् परयोस्तथयोर्धः स्यात् नतु धाञः। अवोढां। †

(८) वह सेवे वधे च।

## ५७६। हसादेः सेमो ऽह्मयदित्क्षणश्वस-वधो वोऽन्तः सौ पे ञिः।

(हसादेः ६।, सेमः ६।, न ह-म-य-एदित्-क्षण-श्वस-वधः ६।, वा ।१।, उऽन्तः ६।, सौ ७।, पे ७।, ञिः १।)।

हमयान्तादेकारेतः क्षणादेश्चान्यस्य सेमो हसादेरुङोऽकारस्य ञिः स्यात् वा सौ पे। अखादीत्, खादित्वात् ञः (५४८), अखदीत्। ‡

---

* नास्ति इम् यस्मात् सोऽनिम्। व्रजश्च वदश्च अर्‌च अल्‌च अच्‌च अनिम् चेति तस्य। जिश्च श्विश्च जागृश्चेति तत्, न तत् अजिश्विजागृ तस्य। अर् अल्—एतदन्तयोर्ग्रहणम्। अच् इति स्वरवर्णाः। व्रजेर्वदेरिति, धातोः स्वरूपग्रहणे इप्रत्ययो वक्तव्यः। अनिम् इति यदा इम् न स्यात् तदेव, तेन अचैक्षीदिति, इमो विकल्पपक्षे अनिम्त्वात् सिध इकारस्य वृद्धिः ऐकारः (८) अचचारात्वेऽन् ञिरिति नियमात्। व्रजसाहचर्य्यात् वद इति दन्त्यवकारादिः। (६९८) जाग्रोऽयमिति गुणप्राप्तावपि इह जागृवर्णानं विशेषविधानात् प्राप्ताया वृद्धेर्निषेधार्थम्। पाणिनिः ७।२।१,२,३,४। निषेधस्तु ५मसूत्रे प्रदत्तः।

† ढभ इति प्रत्याहारः ढ घ ध भ इति। अवोढामिति विकल्पपक्षे अनिम्त्वात् ढत्वे, (५६२) ढि-लोपे, अनेन तस्य धः। धाञस्तु धत्ते इति। पाणिनिः ८।२।४०।

‡ हस् आदिर्यस्य स तस्य। उङ् इमा वर्तते यः स सेम् तस्य। एद् इत् यस्य स एदित्, हश्च मश्च यश्च एदिच्च क्षणश्च श्वसश्च वधश्च तत्, न तत् अह्मयदित्क्षणश्वसवध

## ५७७ । ञ्णित्यन्त्येऽजुङ्क्तोः ।

(ञ्णिति ७, अन्त्येऽजुङ्क्तोः ६॥) ।

धोरन्त्यस्येच उङ्क्तोऽकारस्य च व्रिः स्यात् ञिति णिति च । चखाद ।*

## ५७८ । णप्यन्त्ये वा । (णपि ७, अन्त्ये ७, वा ।१।) ।

चखाद, चखद । †

(९) गद भाषे ।

प्रणिगदति । ‡

(१०) खद स्थैर्ये ।

## ५७९ । तॄ फल भज त्रप श्रथ ग्रन्थ दम्भाद्य-न्तास्वहसां क्याः कित्-सेम्प्रयप्दे: णिल्लोपश्चा-ग्रस्य

---

-नस्य । उङ् चासौ अश्चेति उङ्क्त् तस्य । ह्मन्तादिषु—अचह्नीत् अक्रमीत् अह्वयीत् अकटीत् अश्वयीत् अश्वसीत् अवधीत्—एतेषु न वृद्धिः । अखादीत् अखदीत् अनेन वा वृद्धिः । पाणिनिः ७।२।५,७ ।

* ञ् च ण् च ञ्णौ, ञ्णौ इतौ यस्य स ञ्णित् तस्मिन् । अन्त्यश्चासौ इच्चेति अन्त्येच्, उङ् चासावश्चेति उङ्क्त्, अन्त्येच् उङ्क्त् च तौ तयोः । अत्र पुनः उङ्क्तो ग्रहणात् इसादेरिति नानुवर्त्तते । तेन धातुमात्रस्य अन्त्येच उङ्क्तश्च व्रिः स्यादिति । उङ्क्त् इति येन केनापि उङ्क्तो ग्रहणं, तेन अभाजि अलाभि इत्यादौ (९२६) न-लोपे ततः उङ्क्तो वृद्धिः । अत्र इत्तौ धोरिति ग्रहणात् लघयतीत्यादौ णिसमेतस्य (६११) धातुसंज्ञायामपि लघ्-शब्दस्य धातुत्वाभावात् उङ्क्तो न वृद्धिरिति । जागरयतीत्यादौ (६९९) गुणे, एकनिमित्तकं कार्य्यं कार्य्यान्तरस्य बाधकमिति न्यायात् पुनर्न वृद्धिरिति । चखाद इत्यत्र उङ्क्तो वृद्धिः । पाणिनिः ७।२।११५,११६ ।

† णपि (उत्तमपुरुषैकवचने) णपि परे धोरन्त्यस्येच उङ्क्तोऽकारस्य च व्रिः स्याद्वा इत्यर्थः । पाणिनिः ७।१।९१ ।

‡ प्रणिगदतीत्यत्र (५४९) णत्वम् ।

**ददवाद्यन्यथा-खि यु नलोपिनां जॄ वम भ्रम त्रस फणादि वधार्थ-राधान्तु वा ।**

(तु—हसां ६॥, ण्याः ६।, कित्-सेम्थपि ७।, अत् ।१।, एः १।, खि-लोपः १।, च ।१।, अ-ग्रस—नलोपिनां।६॥, जॄ—राधां ६॥, तु ।१।, वा ।१।) ।

त्वादीनामाद्यन्तस्थितास्यहसानाञ्च अकारः ण्याः कृिति सेम्थपि च एः स्यात् खिलोपश्च, न तु ग्रसे ददे वकारादे अन्यथाभूतखे युमतो नलोपिनश्च, जॄवमभ्रमत्रसफणादीनां हिंसार्थस्य राधेश्च वा स्यात् । वेदतुः वेदुः वेदिथ । अन्यथाभूतखेषु चखदतुः । *

(११) णद शब्दे ।

(५६८) ष्वाद्यादीति षो नः । नदति । प्रणिनदति । †

---

* स्यः संयोगः, न स्योऽस्यः, अस्यश्चासौ हस चेति अस्यहस्, आद्यन्तयोः अस्यहस् येषां ते आद्यन्तास्यहसः । तृश्च फलश्च भजश्च त्रपश्च ग्रथश्च ग्रथश्च दम्भश्च आद्यन्तास्यहसश्च तेषाम् । सह इमा वर्त्तते यः स सेम्, सेम् चासौ थप् चेति सेम्थप्, किच्च सेम्थप् च तस्मिन् । अन्तःस्थवकार आदिर्यस्य स वादिः, अन्यथा अन्यप्रकारो जातः खिर्यस्य सोऽन्यथाखिः, युश्च नलोपश्च तौ युनलोपौ, तौ विद्येते ययोस्तौ युनलोपिनौ ; ग्रसश्च (पाणिनिमते तु दन्त्यान्तग्रसः) ददश्च वादिश्च अन्यथाखिश्च युनलोपिनौ च ते, पश्चात् नञ्समासे तेषाम् । वधार्थश्चासौ राध चेति वधार्थराध, जॄश्च वमश्च भ्रमश्च त्रसश्च फणादिश्च वधार्थराध च ते तेषाम् ।

तृधातोर्युमत्त्वात् फलभजोरन्यथाखित्वात् त्रपः संयोगादित्वात् ग्रथग्रथोः संयोगादित्वात् नलोपित्वाच्च दम्भो नलोपित्वात् अप्राप्तौ पृथग्युक्तिः । फणादिश्च—फण राज भाज भाष भ्लाश स्यम स्वन इति । अत्र फणादिपाठसामर्थ्यादेव आकारस्यापि एत्वं, एवं वधार्थराधोऽपि ।

वेदतुरित्यादि वर्ग्यवकारादित्वात् न निषेधः । दन्त्यादेस्तु ववजतुः ववनहुरित्यादि । चखदतुरिति (५५९) सूत्रेणे च-करणादन्यथाखित्वम् । पाणिनिः ६।४।१२०,१२१,१२२,१२३, १२४,१२५,१२६, वार्त्तिकानि च ।

† प्रणिनदति (५४९) णदाद्यन्तर्गतत्वम् ।

## (१२) अर्द्द पीड़ायां ।

**५८० । स्यान्तादाद्यृदाद्यश्नोः खेरान् क्यां वा त्वाञ्केः ।**

(स्यान्तादादि-ऋदादि-अश्नोः ६।, खेः ६।, आन् ।१।, क्यां ७।, वा ।१।, तु ।१।, आञ्केः ६।) ।

स्यान्तो योऽकारादिस्तस्य ऋकारादेः अश्नोतेश्च खेरान् स्यात् क्यां आञ्कतेस्तु वा । आनर्द्द । *

## (१३) इदि परमैश्वर्य्ये ।

**५८१ । भूयोऽमजादेः ।** (भूयः ।१।, अम् ।१।, अजादेः ६।) ।

अजादेरमि कृते पुनरम् स्यात् । ऐन्दत् । †

**५८२ । विंजादि-दयायासथानेकाचोऽनृच्छ्रू-र्णोष्ठ्यामाम् ।**

(विंजादि—अनेकाचः, ५।, अनृच्छूर्णोः ५।, क्यां ७।, आम् ।१।) ।

---

* स्यः संयोगोऽन्ते यस्य स स्यान्तः । अत् आदिर्यस्य सः अदादिः । स्यान्तश्चासौ अदादिश्चेति स्यान्तादादिः । ऋत् आदिर्यस्य स ऋदादिः । स्यान्तादादिश्च ऋदादिश्च अश्नुश्चेति तस्य । अत्र ऋदादिरिति अन्तवर्त्ति-वर्णान्तरसहित-ऋकारादिरेव, तेन ऋधातोर्न ग्रहणम् । आनर्द्द इति अर्द्द-णप्, द्वित्वं, खेः स्थाने आन् । पाणिनिः ७।४।७१,७२, वार्त्तिकञ्च ।

† अच् (स्वरवर्णः) आदिर्यस्य सोऽजादिस्तस्य । अमि कृते इति (५५०) औटीथोष्वम् इत्यनेन । ऐन्दत् इद अतएवेदितो नुम् इन्द, ह्या-दिप् (५५०) अमि, अये धातोरिकारेण सन्धौ, पश्चात् अनेन पुनरम्, ततः पुनः सन्धिः । अये अमद्वयस्य सन्धौ पुनरमकरणस्य वैयर्थ्यात् । (५५०) औटीथोष्वम् चोरमा अजादेर्मिश्च इति कृते सिद्धौ पुनरेतत्सूत्रकरणं आदिष्टस्यापि अजादेः पुनरम्विधानार्थं, तेन यजधातोः ऐज्यत, वस्धातोः औष्टामित्यादि सिद्धम् । पाणिनिः ६।४।७२ ।

हसंश्लेजादेर्दय अय आस एभ्यस्त्यान्तादनेकाचश्च व्याम् आम् स्यात्, नतु कच्छूर्णोः । *

५८३ । भ्वस्क्रान्वामः । (भू-अस् क्र ।१॥, अनु ।१।, आमः ५।) ।

भू अस् क्र एते आमन्तादनु प्रयुज्यन्ते ।

इन्दाम्बभूव इन्दामास इन्दाञ्चकार । †

५८४ । नेमऽसुमृक्ष ह्र ह्री भृ स्तु द्रु श्रु स्रो-रेव क्याः । (न ।१।, इम् ।१।, असुमृक्ष—स्रोः ५।, एव ।१।, क्याः ६।) ।

एभ्य एव क्या इम् न स्यात्, अन्यस्मादनिमोऽपि स्यात् ।

---

* वर्गेदः । दयासी इच् चेति विंच, विंच् आदिर्यस्य स विंजादिः, विंजादिश्च दयश्च अयश्च आसश्च त्यश्च अनेकाच्चेति तस्मात् । कच्छच ऊर्णुच कच्छूर्णू:, न कच्छूर्णूः तस्मात् । त्यः प्रत्ययान्तः । त्यान्तानामनेकाच्त्वेनैव प्राप्तौ पृथक् ग्रहणं त्यामास (८४८) इत्याद्यर्थम् । पाणिनिः ३।१।३५,३६,३७ । अत्र "आद्यन्तवदेकस्मिन्" इति पाणिनिसूत्रेण (१।१।२१) विंजादिगणने दिवादिः ईधातोः क्रादिः ऋधातोश्च उपसंख्यानम् कर्त्तव्यम् ; तेन अयाञ्चकार, अराञ्चकारेति रूपम् । (क्रमदीश्वरः गोयीचन्द्रश्च द्रष्टव्यौ ।)

† भूश्च अस्च क्रश्चेति भ्वस्क्र । आम इति पञ्चम्या एव परतः प्रयोगे सिद्धे अनुग्रहणं क्रियाविशेषणोपसर्गव्यवधानेऽपि प्रयोगार्थम् । तेन तं पातयाम्प्रथममास इति, उषाम्प्रचक्रुरिति च रघुभट्टौ । (इदन्तु न पाणिनिसम्मतम् ।) पूर्वसूत्रेऽनुवृत्तावपि पुनरामो ग्रहणं सामान्याम्-प्राप्त्यर्थं, तेन (६०७) दरिद्राञ्चकारेति, (७२८) पयाम् चेति आमोऽपि भ्वादेरनुप्रयोगः । अत्र आत्मनेपदिधातुभ्योऽस्यभुवो-रनुप्रयोगे कर्तरि क्तवस्य आत्मनेपदस्य स्थाने परस्मैपदादेशो वक्तव्यः, करोते-रनुप्रयोगे तु (कर्तृगेऽपि क्रियाफले) मूलधातोरिव परस्मैपदात्मनेपदे तिष्ठतः (पा. १।३।६३) । इन्दामासेति, अस्तेः अनुप्रयोगविधानसामर्थ्यादेव (६९२) न भू-आदेशः । पाणिनिः ३।१।४०, अत्र सूत्रे "प्रयुज्यते इत्यनेनैव प्रयोगे लब्धे अनुपदोपादानं विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थञ्च इति वार्त्तिककाराशयः ; तेन तं पातयां प्रथममासेत्यादिकमपाणिनीयमिति मल्लिनाथः ।" "तं पातयां प्रथममास पपात पश्चादित्यसाधु" इति क्रमदीश्वरः । उषां-प्रचक्रुरित्यत्र उषाम् प्रचक्रुरिति केचित् समादधिरे इति गोयीचन्द्रः । "आमः कृञनुप्रयुज्यते" इति कातन्त्रसूत्रम् । "श्रवणादेऽपि दृश्यते, तं पातयाम्प्रथममास पपात पश्चात् इति पञ्चनाथः ।

इन्द्राग्नकर्थं । *

(१४) पिवि कुत्सायां ।

प्रपिन्दति प्रनिन्दति । †

(१५) उख गतौ ।

५८५ । खेर्यो रियुवर्णे ।

(खेः ६।, योः ६।, इयुव् ।१।, अर्णे ७।) ।

खेरिवर्णोवर्णयोः क्रमादियुवौ स्यातां अर्णे परे ।

उवोख । अर्णे किं, ऊखतुः । ‡

(१६) मनृचु गतिपूजनयोः ।

(५६८) नेदित्पूजार्थाच्चोरिति, मञ्चयात् । गतौ तु मच्यात् । §

(१७) म्रुचु इर् गत्यां ।

(५६५) ध्रासुलिद्द्युदिति ङो वा, अम्रुचत् अम्रोचीत् । ¶

---

* नास्ति सुम् यस्य सः असुम्, असुम् चासौ क्रथेति असुमक्रः, असुमक्रश्च स्तम्भ स्तुम्भ स्तुम्भ स्कुम्भ स्कुभेति तस्मात् । (५८७) नेमेकाजादित्यत्र इवर्जनात् प्राप्तस्य इमो निषेधार्थमिह व-ग्रहणम् । अन्येषां सप्तानाम् एकाच्त्वेन अनिमामपि इह ग्रहणं नियमार्थम् । नियमश्च अनिम्धातुमध्ये केवलम् एभ्य एव व्या इम् न स्यात्, सुतराम् एवकारेण अन्यस्मादनिमोऽपि धातोः व्या इम् स्यादिति । इन्द्राग्नकर्थं इत्यत्र असुमक्रत्वादिम्निषेधः । पाणिनिः ७।२।१३, "क्रयोऽसुटः" इति वार्त्तिकञ्च ।

† प्रपिन्दति प्रनिन्दतीत्यत्र (५४९) वा णत्वम् ।

‡ इश्च उश्च यु तस्य योः । इय् च उव् च तत् । अर्णे असमानवर्णे परे । उवोख इति उख-णप्, द्वित्वं, खलोपः, मूलस्य उकारस्य गुण ओकारः, [वर्णादाङ्गं बलीय इति न्यायात् णादौ न (२२) दीर्घः ।] ततः अनेन खेः उस्थाने उव् । ऊखतुरित्यत्र किति गुणाभावे समानवर्णत्वात् न उव्, सन्धिः । पाणिनिः ६।४।७८ ।

§ मञ्चयात् मनृच-ढौ-यात्, पूजार्थत्वात् न नलोपः । गत्यर्थे मच्यादिति नलोपः ।

¶ अम्रुचदिति म्रुच-टौ-दि, इरादित्वात् ङः, ङिति गुणाभावः । पक्षे व्यां सिरित्यादि ।

एवं (१८) क्षुधु, गुधु, स्नुधु ।

(१९) आछि आयामे ।

आनाञ्छ आञ्छ ।

(२०) वज गतौ ।

ववजतुः, ववजिथ । (५७९) वादित्वान्न एः । *

(२१) व्रज गतौ ।

(५७४) व्रजवदेति त्रिः । अव्राजीत् ।

(२२) अज गतौ क्षेपणे च ।

५८६ । व्यजोऽरे वा त्वनवस्यघञल्क्यपि ।

(वी ।१।, अजः ६।, अरे ७, वा ।१।, तु ।१।, अन-वसि ७, अ-घञ्-अल्-क्यपि ७) ।

अजते-ररे वी स्यात्, अन-त्ये वसे च वा स्यात्, न तु घञादौ ।†

५८७ । नेमेकाजादुग्रहतोऽस्त्रि स्यि णौ थौ यु रु थु सु चु ण्यु वुः ।

(न ।१।, इम् ।१।, एकाच्-आत्-उ-ग्रह-तः ५।, अस्त्रि—वुः ५।) ।

---

* क्षुधुप्रभृतयोऽपि इरनुबन्धाः अभ्यर्थाः । आनाञ्छ आञ्छ इति आञ्छ-यप् (५८०) वा स्थिरात् । वजधातुर्दन्त्यवकारादिः, अतएव न वेर्लोपः अथ चकार एकारः ।

† अनश्च वस् च तस्मिन् । अज् च अल् च क्यप् च अजल्क्यप् न अजल्क्यप् तस्मिन् । अन इति (११३४) प्रत्ययः । वस् प्रत्याहारः । अज् अल् क्यप् एते च (११३४,११५०) प्रत्ययाः । 'वा' इति व्यवस्थितविभाषा । 'वी' इति दीर्घोच्चारणं किं—प्रवीतः, वीता, वीतिः इत्याद्यर्थम् । पाणिनि: २।४।५६,५७ ।

ञ्रादेरन्येभ्य एकाज्भ्य आदन्तेवर्णान्तोदन्त-ऋदन्तेभ्य इम् न स्यात्। अवैषीत् आजीत्। विवाय।*

## ५८८। श्नुध्वोरणावियुव्यो व्यौ त्वस्यान्नैकाचो व्योः।

(श्नु-ध्वो: ६॥, अणुचि ७, इयुव् ।१।, यो: ६।, व्यौ १॥, तु ।१।, अस्यात् ५।, नैकाचो: ६॥, व्यो: ६॥)।

श्नोर्ध्वेश्च इवर्णोवर्णयोरणावचि इयुवौ स्तः, अनेकाचोस्तु अस्यात् परयोः क्रमादुवर्णेवर्णयो र्व-यौ स्तः। विव्यतुः विव्युः।†

---

* एकोऽच् यस्य स एकाच्। आत् च इश्च उत् च ऋत् चेति आदुदृत्, एकाचश्चासौ आदुदृच्चेति एकाजादुदृत् तस्मात्। श्रिञ् श्रिञ डीङ् शीङ् युञ रुञ णुञ स्नुञ क्षुञ क्षुञ वृञ ते, न विद्यन्ते ते यत्र तत् अ-श्रि श्रि डी शी यु रु णु स्नु क्षु क्ष्णु वृ तस्मात्। सामान्य-विधिप्राप्तस्य इमो निषेधकोऽयं, विशेषविधिना तु स्यादेव, यथा (५९८) यमरमेति अपासीत्, (६२२) सुस्तुधूञिति अस्तावीत्, '(६१७) स्वसईन इति करिष्यतीत्यादि। यु इति यु च मिश्रणे युञ ग बन्धे इत्युभयोः, एवं वृ इति स्वादीयक्र्यादीययोः उभयोरेव प्रतिप्रसवः। अत्र रु णु इति द्वयोर्ग्रहणं नित्येम्प्राप्त्यर्थमिति केचित्। अवैषीदिति अज-टी-दि, पूर्व्वेण वसी परे वी-आदेशे, एकाजिवर्णान्तत्वात् इम्निषेधः, (५७४) अनिम्त्वात् वृद्धिः। पक्षे आजी-दिति न इम्निषेधः। विवाय इति णप्, णरे परे नित्यं वी-आदेशः, द्वित्वं, (५५९) ह्रस्वः, (५७७) वृद्धिः, सन्धिः। "श्रिश्रिडीशी"त्यादि कविकल्पद्रुमोक्त-कारिका।

† श्नुश्च (विकरणं) ध्रुश्च श्नुध्रू तयोः। नास्ति णुर्यस्मिन् सोऽणुः, अणुश्चासावच्चेति अणुच् तस्मिन्। इय् च उव् च तत् इयुव्। इश्च उश्च यु तस्य। व च य च तौ व्यौ। न स्योऽस्यस्तस्मात्। न एको नैकः, नैकोऽच् ययोस्तौ तयोः नैकाचोरिति श्नुध्रुवोरित्यस्य विशेषणम्। उश्च इश्च वौ तयोः व्योः। योरित्येकवचनान्तस्य इयुव इत्यनेनैव क्रमः, न तु श्नुध्रुवोरिति द्विवचनान्तेन, श्नोरिवर्णस्यासम्भवात्। तेनायं नियमः—अणावचि परे श्नोरुवर्णस्य उव् स्यात्, धातोरिवर्णो-वर्णयोः क्रमेण इयुवौ स्त इति। एवं व्योरिति द्विवचनान्तस्य श्नुध्रुवोरिति द्विवचनान्तेन क्रमः, तेनायं नियमः—अनेकाचः श्नोरसंयोगात् परस्य उवर्णस्य वकारः, अनेकाचो धातोश्च असं-योगात् परस्य केवलम् इवर्णस्य यकार इति। (२५) यणायवायाव: इत्यस्य, धातुप्रकरणे अयं विशेषनियमः। पाणिनिः ६।४।७७,८२।

विव्यतुः विव्युः उभयत्र अनेन इस्थाने यः। एवं विवि[illegible]विव्यिम।

## ५८९ । सृजदृशचक्षपाठाल्वतो नित्यानिमृतु-स्थपो वेमनृव्येऽदः ।

(सृज-दृश-अच्-पाठ-अल्वत: ५।, नित्य अनिम्-तु: ५।, थप: ६।, वा ।१।, इम् ।१।, अनृ-ऋ-व्ये-ऽद: ५।) ।

सृजेर्दृशेरजन्तात् भ्वादिपाठे अकारवतो नित्यमिमृरहितटत्वात् थप इम् वा स्यात्, नतु ऋट व्येञ् अद एभ्य: ।

विवयिथ विवेथ । *

(२३) चि चये ।

## ५९० । घोऽज्य्यरे । (घं: १।, अच् ।१।, यि ७।, अरे ७।) ।

अजन्तस्य घं: स्यात् अरे ये परे । चीयात् । †

---

* अत् अस्यस्य अत्वान्, पाठं (दशविधगणपाठे) अत्वान् पाठाल्वान् । सृज च दृश च अच पाठाल्वांश्चेति तस्मात् । नित्यम् अनिम् ट(प्रत्ययौ) यस्मात् स नित्यानिमृता तस्मात् । नित्यानिमृतुरिति अजन्तस्य पाठाल्वतश्च विशेषणम् । ऋश्च व्येश्च अद चेति ऋव्येऽद, न ऋव्येऽद अनृव्येऽद तस्मात् । पाठकाले अकारवतो यथा पच—पेचिथ पपक्थ, वच—उवचिथ उवक्थ इत्यादि । पाठग्रहणं विना केवलम् अल्वत इति कृते कृष-धातोरपि (६०४) ऋकारस्य रेफे कृष इति अकारवत्त्वात् चकर्षिथ चकर्ष्ठ इत्याद्यनिष्टं स्यात् । नित्यानिमृतु: किं— शिश्रयिथ पेठिथ इत्यादौ नित्यमिम् । ननु ऋव्येऽद इत्यत्र ऋशब्दस्य ऋवर्णान्तवाचित्वेऽपि, दीर्घऋदन्तानां ट इत्यस्य च सेमृटत्वात् प्रसङ्गाभावे, (६१६) नेमृतस्थपोऽवृक्कुरित्यनेन ट ऋ स्कृ भिन्न-ऋदन्तात् थप इम्निषेधे, ऋ स्कृ इति द्वयोरेव नित्यानिमृटत्वात् अनेन विशेषविधानात् वेम्प्राप्तौ निषेध:, (५८४) नेमसुम् इति नियमात् (५५४) वसोऽरस्थेति नित्यमिम् स्यादेवं । अजधातो: थप्, वी आदेशे, अजन्तत्वादनेन वा इम्, गुणादिश्च । पाणिनि: ७।२।६१,६२, ६३,६५,६६, कारिका च ।

† न र: अरस्तस्मिन् अरे, यि इत्यस्य विशेषणम् । अच सामान्याजन्तनिर्देशात् शिव-[illegible]ाचरति, हरिरिवाचरति शिवायते हरीयते इत्यादौ लिङन्तस्यापि दीर्घ: । धातोरन्त-[illegible]ज्ञतस्य प्रकृतेर्विकृतेरपि अचो दीर्घ:, यथा, डे—ड्यात्, श्वि—शूश्वादित्वादौ जौ कृतेऽपि दी[illegible] शियात् क्रियादित्वादौ तु (६२०) ऋस्थाने इस्थान-रि-आदेशसामर्थ्यात् न दीर्घ: । चि[illegible]-ढो-यात्, दीर्घ:, चीयात् । पाणिनि: ७।४।२५ ।

## (२४) कटे वर्षावरणयोः ।

अकटीत्, एदित्त्वान्न वृद्धिः (५७६) । *

## (२५) गुपू रक्षणे ।

**५९१ । कम ऋतो गुपू धूप पण पनो णिङ्-ईयङायाः धुः ।**

(कमः ५।, ऋतः ५।, गुपू-धूप-पण-पनः ५।, णिङ्-ईयङ्-आयाः १।।।, धुः १।) ।

कमो णिङ्, ऋतेरीयङ्, गुपादेरायः स्यात् स्वार्थे, तदन्तश्च धुसंज्ञः । गोपायति । †

**५९२ । वारे ।** (वा ।१।, अरे ७।) ।

एभ्य एते वा स्युः अरे विषये ।

अगोपायीत् अगोपीत् अगौप्सीत् । गोपायामास जुगोप । ‡

---

* कट—ए इत् सिचि अवृद्धिः, वर्षणे आवरणे च वर्तते । अकटीत् टी-दि, (५७६) एदित्त्वात् न वृद्धिः ।

† कमधातोः रूपं ३४२ पृष्ठे द्रष्टव्यम् । ऋत्-धातुः कविकल्पद्रुमे तान्तवर्गे परस्मैपदे स्पर्द्धैश्वर्ययोः घृणागत्योश्चार्थे पठितः ; अत्र तु ईयङो ङसामर्थ्यात् ऋतीयते इति पदं भवत्येव । सिद्धान्तकौमुद्यान्तु "ऋतिः सौत्रस्तस्मादीयङ् स्यात् स्वार्थे । जुगुप्सायामयं धातुरिति बहवः, कृपायाञ्चेत्येके ।" इति । गुपूश्च धूपश्च पणश्च पनश्चेति तस्मात् । णिङ् च ईयङ् च आयश्च ते । णिङो णकारो वृद्ध्यर्थः, ङकार आत्मनेपदार्थः । ईयङो ङकार आत्मनेपदार्थः अगुणार्थश्च । अर्थविशेषानभिधानात् स्वार्थे एव स्युः । गुपधातोः आयप्रत्यये, गुणे, धुसंज्ञायां, गोपायधातोस्तिप् । आय इति अदन्तनिर्देशात्, गोपायधातोर्ञौ ञते (७७५) अकारलोपे, गोपायि धातोः ञ्या-दि, अजुगोपायदिति अल्लोपित्वात् (६२८) न ह्रस्वः । पाणिनिः ३।१।२८,२९,३० ।

‡ अरे इति विषयसप्तमी, तेन, ञ्यामेव सिप्रभृतिप्रत्ययः सम्भाव्यते इति टीप्रभृत्युत्पत्तेः प्रागेव आदेशाः, ततो धातुसंज्ञायां टीप्रभृतिविभक्त्युत्पत्तिः । अगोपायीदिति आयान्तत्वेन धातुसंज्ञायां धात्वन्तरत्वात् (५५४) नित्यमिम् । पक्षे ऊदित्त्वात् (५७२) वा इम् अगोपीत्, अगौप्सीदिति अनिम्त्वात् (५७४) वृद्धिः । गोपायामास इति (५८२) प्रत्ययान्तत्वादनेकाच्त्वाद्वा आम् । पाणिनिः ३।१।३१ ।

एवं (२६) धूप तापे । *

(२७) तपौ सन्तापे ।

(५५४) औदित्त्वात् नेम् । अतापीत् ।

(२८) चमु अदने । †

## ५९३ । ष्ठिवुक्लमाचमोऽपि घं: ।

(ष्ठिवु-क्लम-आचम: ६।, अपि ७।, घं: १।) ।

एषां घं: स्यादपि । आचामति । आङ: किं, चमति विचमति ।

(५७६) मान्तत्वात् न ञि:, अचमीत् । ‡

(२९) क्रमु पादविक्षेपे ।

## ५९४ । क्रम क्लम भ्रम भ्रास भ्लास त्रस त्रुट लष यस संयस: श्यन् वा रे वे ।

(क्रम—संयस: ५।, श्यन् ।१।, वा ।१।, रे ७।, वे ७।) ।

एभ्यो वेऽर्थे श्यन् स्यात् वा रे परे । क्राम्यति । §

---

* धूपधातोरुदित्त्वाभावात् टौ-दि अधूपायीत् अधूपीदिति (५५४) नित्यमिम् ।

† चम-धातु: उकारानुबन्ध: क्त्वा-वेट् (११७२) ।

‡ ष्ठिवुश्च क्लमश्च आ-चम च तस्य । अपि इति (५४१) अप् परे । • आङ्पूर्व्वस्यैव चमो दीर्घ:, नतु केवलस्य अन्योपसर्गपूर्व्वस्य च । पाणिनि: ७।३।७५, "दीर्घत्वे आङि चम इति वक्तव्यम्" इति वार्त्तिकञ्च ।

§ क्रमश्च क्लमश्चेत्यादि द्वन्द्वे तस्मात् । अत्र भ्रास-भ्लासौ दन्त्यान्तौ तालव्यान्तौ च । तालव्यान्तौ इति क्रमदीश्वर: । पाणिनिस्तु भाश भ्लाश इति पठति । संयसो ग्रहणम् अन्योपसर्ग-निरासार्थम् । श्यन: श न इतौ, यकारस्थिति: । अपो बाधकोऽयम् । शित्त्वात् (५२०) रसंज्ञायां, (५२२) ङित्त्वात्, त्रुट्यतीत्यत्र न (५४२) गुण: । नकारस्तु त्रुट्यन्तौ इत्यादौ (२४५) नुमर्थ: । श्यनि परेऽपि दीर्घ इति गोविन्दभट्ट:, तन्मते क्राम्यतीत्यादि । श्यनो विकल्पपक्षे तत्तद्गणीय: प्रत्यय इति । पाणिनि: ३।१।७०,७१,७२ ।

## ५९५ । क्रमः पेऽपि घं: ।

(क्रम: ६।, पे ७।, अपि ७।, घं: १।) ।

क्रामति । *

## ५९६ । सु-क्रमोऽमे ऽरवस इम् ।

(सु-क्रम: ५।, अमे ७।, अरवस: ६।, इम् ।१।) ।

आभ्यां वसंख्यारस्य इम् स्यात्तु मे । अक्रमीत् । †

### (३०) ञौ यमु उपरमे ।

## ५९७ । स्था दान पा घ्रा ध्मा म्ना-र्त्ति दृश शत् सद् गमिष् यम जनां—तिष्ठ यच्छ पिब जा जिघ्र धम मनच्छ पश्य शीय सीद गच्छेच्छ यच्छ जाः शिति ।

(स्था—जनां ६।।।, तिष्ठ—जा: १।।।, शिति ७।) ।

एषामेते क्रमात् स्युः शिति परे । यच्छति । ‡

---

* क्रमो घं: स्यात् पे अपि परे । पे किं, विक्रमते, अपि किं, क्रमिष्यति । पाणिनि: ७।३।७६ ।

† सुक्रमाभ्यामिम् (५५४) सिद्धेऽपि पुनरिम्विधानं, सिद्धे सत्यारम्भो नियमाय इति न्यायात् आत्मनेपदे न स्यादिति नियमार्थं, तेन कर्मणि वाच्ये क्रमधातोस्तनि अक्रामि इत्यत्र, ईमुत्वाभावात् (७४४) न ह्रस्व: । यादृग्जातीयस्य विप्रतिषेधो विधिरपि तादृग्जातीयस्येति न्यायात् सुधातो: परस्मैपदे एव अनेन इमि सिद्धे, पुन: (५८७) नेमिकाजित्यत्र सुधातो: प्रतिप्रसव: सुषित: सुषितवानित्यादौ इम्प्राप्त्यर्थ: । पाणिनि: ७।२।३६ ।

‡ स्था च दा-न चेत्यादि द्वन्द्वे तेषाम् । तिष्ठ च यच्छ चेत्यादि द्वन्द्वे ते । दान इति नकारेत्-दाधातुग्रहणम् अन्य-दाधातूनां ग्रहणानयोर्यच्छादेशानिवृत्त्यर्थम् । पा इति पानार्थ-पा-ग्रहणम् । पिब इत्यदन्त: । अर्त्तीति ऋ गतौ ऋ खिं गत्यामित्युभयो: । दृश इति तौदादिकस्यैव ।

## ५९८। यम-रम-नमातः पे सेरिम् सन् चैषां।

(यम—आतः ५।, पे ७।, सेः ६।, इम् ।१।, सन् ।१।, च ।१।, एषां ६॥)।

यमादेरादन्ताच्च सेरिम् स्यात् पे, तेषाञ्च सन्।

अयंसीत् अयंसिष्टां[1]। *

(५८९) सृजदृशेति वेम्, येमिथ ययन्थ।

एवं (२१) णमो शब्दनत्योः।

(२२) अय गतौ।

अअयीत् (५७६) यान्तत्वान्न त्रिः।

(२३) दल त्रि भेदे।

(५७४) व्रजवदेति त्रिः, अदालीत्।

(२४) ञि फला विसरणे।

फेलतुः फेलुः फेलिथ। †

---

अय इति दैवादिकस्यैव। अय रे इति गोत्रा मितीति वचनं, ययचौत्वघ (६७०) अपो लुक्, रे परे स्थ्याद्यनिवृत्त्यर्थम्। क्रमस्तु—

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स्था | दाण | पा | ज्ञा | घ्रा | ध्मा | म्ना | ऋ |
| तिष्ठ | यच्छ | पिब | जा | जिघ्र | धम | मन | ऋच्छ |
| दृश | सृ | सद | गम | इष | यम | जन | |
| पश्य | धौ | सीद | गच्छ | इच्छ | यच्छ | जा | |

पाणिनिः ७।३।७७,७८,७९। अयोल्लिखितः स्थात्: शुद्धव्यादित्वात् बोपदेवेन न गृहीतः।

* यम च रम च नम च आत् च तस्मात्। तेषां यमादीनां स्थाने सन् (इति आगमः) स्यात् न इत् अन्ते। पे किं, अरंस्त अदास इत्यादि। पाणिनिः ७।२।७३।

† फल धातुः, ञिः अव्ययः (१०६५), आ निष्ठाभावादिकार्थे वेट् (१००१), विसरणम् उत्पादनम्, भिदि इति कविकल्पद्रुमः। फेलतुरित्यादि (५७९) त्विलोपः, अकारस्य एकारः।

(३५) त्सर छद्मगतौ ।

अत्सारीत् ।

(३६) ष्ठिवु निरसने ।

(५८३) ष्ठिवुक्लमेति दीर्घः, ष्ठीवति ।

५९९ । ष्ठिवजाद्योः खेष्ठक्षोस्त वा ।

(ष्ठिव्-अजाद्योः ६॥, खेः ६।, ठ-क्षोः ६॥, त ।१।, वा ।१।) ।

तिष्ठेव टिष्ठेव, ष्ठीव्यात् । *

(३७) जि जये ।

६०० । जेर्गिः सन्-ण्योः ।

(जेः ६।, गिः १।, सन्-ण्योः ७॥) ।

जिगाय । †

(३८) रक्ष पालने ।

प्रनिरक्षति, णान्तत्वान्न णः (५४९) ।

(३९) अक्षू व्याप्तौ ।

६०१ । वाक्ष-क्षमार्थतक्षः श्नुर्वे रे ।

(वा ।१।, अक्ष-क्षमार्थतक्षः ५।, श्नुः १।, वे ७।, रे ७।) ।

---

* ष्ठिव च अजादिश्च तयोः । ठ च क्ष च तयोः । ष्ठिवधातोः खेः ठकारस्य अजादि-धातोः खेः क्षकारस्य च तकारः स्याद्वा । यथा तिष्ठेव टिष्ठेव, उतिक्षिषति उचिक्षिषति । ष्ठीव्यादिति (२२८) दीर्घः । "अस्य द्वितीयस्थकारष्ठकारो वेति" वृत्तिः । "उभयोः तुक्" इति च सिद्धान्तकौमुदी ।

† जेर्गिः स्यात् सनि ण्याञ्च । (५९९-६०१) आद्यन्तसूत्रस्थ-वा-द्वयमध्यवर्तित्वादस्य नित्यता । यथा जिगाय, जिगीषतीत्यादि । जेस्तुषन्नोसिवन्नीति वक्तव्यम् । अकर्मक-जिधातोः श्रुप् स्थाने क्विप्, अन्नु स्थाने च चणि भवतीत्यर्थः । पाणिनिः ७।३।५७ ।

आभ्यां रे परे श्नुः स्यात् वा घेऽर्थे। अक्ष्णोति अक्षति। *
(५८८) श्नुध्वोरित्युव्, अक्ष्णुवन्ति।
(५७३) ऊदित्वादिम् वा, आक्षीत्। (२१२) स्कादेः सो लोपः।

## ६०२। षढोः कः से। (ष-ढोः ६॥, कः १।, से ७।)।

षस्य ढस्य च कः स्यात् सकारे परे। आक्षीत्, आक्षिष्टां आष्टां, आक्षिषुः आक्षुः। †

एवं (४०) तक्षू कार्श्ये।

क्षमार्थः किं, निर्भर्त्सने सन्तक्षति।

(४१) णिक्ष चुम्बने।

(५४९) प्रणिक्षति प्रनिक्षति।

(४२) कृषौ विलेखने।

## ६०३। कृष मृश स्पृश तृप दृप सृपः सिच्यां वा।

(कृष—सृपः ५।, सिः १।, च्यां ७।, वा ।१।)।

एभ्यः सिर्वा स्यात् च्यां। ‡

---

* क्षमार्थेऽसौ तक्ष चेति क्षमार्थतक्ष, अक्षश्च क्षमार्थतक्ष चेति तस्मात्। यथा तक्ष्णोति तक्षति काष्ठं तक्षा, तनूकरोतीत्यर्थः। क्षमार्थः किं, सन्तक्षति चौरं साधुः, निर्भर्त्सयतीत्यर्थः। अक्ष्णोति अत्र श्नुप्रत्ययस्य उकारस्य गुणः। च्यां आक्षीदिति (५७३) इम्पक्षे, अनिम्पक्षेऽपि आक्षीदिति परसूत्रे वक्ष्यति। (२१२) स्कादेः सो लोपः इति सूत्रस्मरणार्थम्। पाणिनिः ३।१।७५,७६।

† आक्षीदिति अनिम्पक्षे, च्यां सिः, (५६१) ईम्, (२१२) कलोपे, अनेन षस्य कः (१११) षत्वम्। आष्टामिति अनिम्पक्षे, (५६२) सि-लोपे, (२१२) कलोपे, (४७) तस्य टः। आक्षुरिति अनिम्पक्षे कलोपे, षस्य कः, सेः सस्य षत्वं, (५६२) अन्स्थाने उस्। ढस्य कः यथा लेक्ष्यतीत्यत्र लिहधातोः (१७५) सूत्रेण हस्य ढत्वे अनेन ढस्य कत्वम्। पाणिनिः ८।२।४१।

‡ कृष च मृश चेत्यादि तस्मात्। पक्षे कृष मृश स्पृशां (६०५) अम्-प्राप्तिः, तृप दृपो

## ६०४ । वर्द्रोऽकिज्झसे ह्मयक्ष्जोस्तु नित्यं ।

(वा ।१।, ऋत् ।१।, रः १।, अकित्-झसि ७।, ह्मयक्ष्जोः ६।।, तु ।१।, नित्यं १।) ।

क्षपादीनाम् ऋकारो रः स्यात् वा अकित्झसे, ह्मयक्ष्जोस्तु नित्यं । अक्राक्षीत् अकार्क्षीत् । *

## ६०५ । ह्मशषोऽनिमिजुङोऽह्मः सक् च्यां श्लिषस्त्वालिङ्गने ।

(ह-श-षः ५।, अनिम्-इजुङः ५।, अ-ह्मः ५।, सक् ।१।, च्यां ७।, श्लिषः ५।, तु ।१।, आलिङ्गने ७।) ।

अनिमिजुङो ह-श-षान्तात् ह्म-वर्जात् सक् स्यात् च्यां, श्लिषतेस्त्वालिङ्गनेऽर्थे । अकृक्षत् । †

(४३) कृष हिंसायां ।

## ६०६ । वेम् · सह लुभ भृ स्तु शुष वस क्षम कृष रिषिषो स्तोऽरस्य ।

(वा ।१।, इम् ।१।, सह—इषोः ५।, तः ६।, अरस्य ६।) ।

---

सृपां (५६५) ङ-प्राप्तिः । "स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः" इति वार्त्तिकम् । अत्र लुप् न दृश्यते । व्याकरणान्तरेषु तु दृश्यते ।

* नास्ति कित् यस्मिन् सोऽकित्, स चासौ झस् चेति तस्मिन् । क्षपादयोऽनुवर्त्तन्ते । वाग्रहणं परत्वानुवृत्तिनिवृत्त्यर्थम् । अकित्-झसि इत्यनेन गुणिनि झसि इत्यर्थः, तेन दिदृक्षते सिसृक्षति इत्यत्र अनिम्-सनि (८०४) अगुणत्वे, न ऋकारस्य रः । केचित्तु अकित्कथनं ङित्-झस्प्राप्त्यर्थम्, तेन ह्म-यङ्लुकि दरीद्रष्ट इत्यादि । अक्राक्षीदिति क्षप-टीदि, सिः, इम्, अनेन प्रथमं ऋस्थाने रः, ततः (५७४) अकारस्य वृद्धिः, पक्षे ऋकारस्यैव वृद्धिः, अकार्क्षीदिति । उभयत्र (६०२) षस्य कः, षत्वम् । पाणिनिः ६।१।५८,५९ ।

† ह्म तालव्य-शश्च मूर्द्धन्य-ष चेति तस्मात् । नास्ति इम् यस्मात् सोऽनिम्, इच् उङ् यस्य स इजुङ्, अनिम् चासौ इजुङ् चेति तस्मात् । अनिमिजुङ इति ह्मशषो विशेषणम् ।

एभ्यस्तकारस्य इम् वा स्यात् । रोषिता रोष्टा । *

एवं (४४) रिष हिंसायां ।

(४५) उष दाहे ।

६०७ । दरिद्रा काश कास जागुषो वाम् क्यां ।

(दरिद्रा—उषः ५।, वा ।१।, आम् ।१।, क्यां ७।) ।

एभ्य आम् वा स्यात् क्यां । (५८१) अस्कृभ्वाम इति । ओषाम्बभूव उवोष । †

(४६) शश प्लुतगतौ ।

शशाश शशशतुः शशशिथ । ‡

(४७) मिहौ सेचने ।

(६०५) हयषोऽनिमिति सक् । (१७५) होढोभौ । अमिक्षत् । (७७) ढ्रोर्ढिर्घश्चानुरिति, मेढा । §

---

नास्ति इम् यत्र सोऽनिम् तस्मात् । अयं (५५१) सेर्बाधकः । अमिक्षदिति (६०२) सेर्विकल्पपक्षे अनेन सक्, षस्य कः, षत्वम् । पाणिनिः ३।१।४५,४६,४७ ।

* सह च लुभ च इष रुष रिष च वस च तुष अम च दम च रिष च इषुष तस्मात् । एषु केषाञ्चित् अप्राप्तौ केषाञ्चित् नित्ये प्राप्ते अयं वैकल्पिकविधिः । एभ्यो रभिन्नस्य तकारस्य इम् वा स्यादित्यर्थः । इषु-ग्रहणात् इषु इ वाञ्छे इत्यस्यैव विकल्पः । इष गत्यौ इष्य सर्पणे इत्येतयोर्नित्यमेव । पाणिनिः ७।२।४८ । भ्र स्तु युध वस तस्य धातव आकरे न दृश्यन्ते, नापि कस्मिंश्चित् व्याकरणे लब्धा अस्माभिः ।

† दरिद्रा-जागृधात्वोः (५८२) नित्ये प्राप्ते, अत्र विकल्पार्थं ग्रहणम् । आम्-विकल्पपक्षे उवोष इति (५८५) वः स्थाने उव् । पाणिनिः ३।१।३८ । ३५ सूत्रे तु नित्यम् ।

‡ शश-णप् (५५८,५६४,५७७) शशाश । शशशतुरित्यादौ (५७९) शशवर्जनात् न धेत्वादि । "शशेति तालव्यान्तपाठस्तु आकरविरुद्धत्वादुपेक्ष्य इति" प्रौढमनोरमा । पाणिनिमते शस् वधे लभ्ये वा ।

§ अमिक्षदिति (६०२) हस्य कः, षत्वम् । मेढा इति (५४२) गुणः, (१७५) हस्य ढः, (५७५) तस्य धः, (४७) धस्य ढः, (७०) ढे परे ढलोपः । अनन्तरस्यैवादौ गुणे, पूर्वस्य प्रसक्त्यभावात् न दीर्घः ।

(४८) दहो भस्मीकरणे ।

(१७६) दाद्दैर्घः । (१७७) झभान्तस्येति दस्य धः । अधाक्षीत् ।

(४९) चह कल्कने (शाठ्ये) ।

अचहीत्, (५७६) ह्मान्तत्वात् न त्रिः ।

(५०) शुच शोके ।

(६०६) शोचिता शोक्ता (२११) ।

(५१) ग्लै हर्षक्षये ।

## ९०८ । एचोऽशित्याः ।

(एचः ६।, अशिति ७।, आः १।) ।

धोरेच आः स्यात् अशिति । *

(५९८) यमरमेतीम्सनौ । अग्लासीत् ।

## ९०९ । णबातो डौः । (णप् ।१।, आतः ५।, डौः १।) ।

आदन्तात् परो णप् डौः स्यात् । जग्लौ । †

---

* "एच" इति धातोरन्त्यावयवस्यैव, तेन चढौकीदित्यादौ न स्यात् । एवम् अकृतस्यैव एच इति, तेन सोष्यतीत्यादौ न स्यात् । अशिति इति विषयसप्तमी, तेन आदौ आः, पश्चात् प्रत्ययोत्पत्तिः, अतएव सामग इत्यत्र आदन्तात् (९९७) ड-प्रत्ययः । अत अरे इति नोक्ता अशितीति कथनं धे-धातोः ध्यादि अधादित्यत्र लोपविधेर्बलवत्त्वादादौ सेर्लुकि रे परेऽपि आ-प्राप्त्यर्थम् । व्येधातोः यङ्लुकि व्वी यात् जाव्यायादित्यादौ च रे परेऽपि आ-प्राप्त्यर्थम् । (६६५) व्येधातोस्तु क्यां न स्यात् । पाणिनिः ६।१।४५ ।

† डौ इत्यस्य ड इत् (१२६) टि-लोपार्थम् । औ इति न कृत्वा डौ-करणं क्वचिदेकपदेऽपि सन्धिर्न स्यादिति सूचनार्थं, तेन तितउः (चालनी) असुमुईचौ अदमुईचौ इत्यादि सिद्धम् । तेन जग्लाऔ इत्यनिष्टं स्यात् । जग्लौ इति ग्लै-ग्ला-णप् । पाणिनिः ७।१।३४ । अत्र तु औ ।

## ९१०। उसेचोम्यखुराणि लोपः।

(उसि ७।, एचि ७।, इमि ७।, अखरापि ७।, लोपः १।)।

उसि एचि इमि अखोररस्यापि धोरातो लोपः स्यात्।

जग्मतुः जग्मुः जग्मिथ जग्माथ। *

## ९११। स्यादेर्ङेऽस्ये वा ख्यौ।

(स्यादेः ६।, ङे ।१।, अस्यः ६।, वा ।१।, ङाणौ ७।)।

स्यादेरादन्तस्य स्यावर्जस्य ङे स्यात् वा ख्यौ।

ग्लेयात् ग्लायात्। †

(५२) गै शब्दे।

## ९१२। दा मा गै हाक पिब सो स्थोऽरहसे त्वयपि ङी।

(दा—स्थः ६।, अरहसे ७।, तु ।१।, अयपि ७।, ङी ।१।)।

एषां ख्यौ ङे स्यात्, अरहसे त्वपो यप्वर्जे ङी स्यात्। गेयात्।‡

---

* न रोऽरः, नास्ति र्यस्मिन् सोऽरः, अस्वाभावस्येति अखरः, तस्य अप् अखराप् तस्मिन्। पृथक्पदकरणात् उसादौ अखोर्नान्वयः। उसि यथा अक्षुः, एचि—दद दधे, इमि—जग्मिथ, अखरापि—जग्मतुः, अन्यत्र: (११४५)। न्ते-यप् (५८९) वा इम्। पाणिनिः ६।४।६४।

† स आदिर्यस्य स स्यादिस्तस्य। ङा अपः ङाखस्तस्मिन्। ङे इत्यस्य ङ इत् (१०) अन्त्यस्य स्थाने। परसूत्रे स्थाग्रहणेनैव अत्र स्थाधातोरप्राप्तौ पुनरत्र स्यावर्जनं, परसूत्रे अरहसे त्वयपि ङीति प्रेषभागेनैव स्थाग्रहणस्य सार्थकत्वे, संयोगाद्यादन्तत्वात् अनेन ङाणौ स्थाधातोः विकल्पापत्तिनिवारणार्थम्। ग्लेयात् ग्लायादिति ङा यात्। पाणिनिः ६।४।६८।

‡ दाश मार्श्च्यादि द्वन्द्वे तस्य। अरहासौ हसश्चेति तस्मिन्। ङाणौ इत्यनुवर्तते, ततश्च विधिद्वयम्। यप्वर्जनादेव अरहसे इत्यस्य अपौ इति विशेषणं लब्धं, याहम्-ज्ञाविकल्पेति न्यायात्। दा इति दासंज्ञकः। मा इति माङ्रूपं, तेन मा च मानि,

(५३) ष्ट्यै संहतौ ध्वनौ ।

स्त्यायति । *

(५४) दै-प शोधने ।

(२८४) पित्त्वान्न दासंज्ञा । अदासीत् । दायात् । †

(५५) धे-ट पाने ।

(२५७) ट ईवर्थः । ‡

६१२ । श्रि श्वि स्रु द्रु कमोऽङ् ञे ञ्यां श्रिधेट-श्वन्येल्यर्द्दूनेस्तु वा । (श्रि—कमः ५।, अङ् ।१।, ञे ७, ञ्यां ७, श्रि-धेट-श्वनि-एलि-अर्दि-ऊनेः ५।, तु ।१।, वा ।१।) ।

आन्तादिभ्यो ञ्यां अङ् स्यात् धेऽर्थे, श्यादेस्तु वा । (५५८) धुडिङ्गखेति, अदधत् ।§

---

आ क्रुशि शब्दे, आ क् श च, मे ङ प्रतिदाने एषां ग्रहणम्। मे—ङी-वात् मेयात्। अदस्ती सिं, ८२१ सूत्रं द्रष्टव्यम्। अवपि सिं, ११०६ सूत्रं द्रष्टव्यम्। पाणिनिः ६।४।६७,६८।

* स्त्यायतीति (५६९) टो-वर्जनात् न यस सः।

† अदासीदिति (५९८) यमरमेति इमूसनी। दायादिति दासंज्ञाभावात् न ऐ।

‡ ट ईवर्थे इति, तेन सुधमयी, सनमयीत्यादि (१०१०)।

§ श्रिञ् श्वि स्रु द्रु कम पीति ग्रहात्। श्रिञ धेटञ श्वनिञ एलिञ अर्दिञ ऊनिञेति ग्रहात्, सूत्रमात् पुंस्त्वम्। द्रुरिति हन्त्यादिः। अन्यादिर्णान्तः, श्वनिरिति घटादित्वात् (७९८) ह्रस्वः, अदनधुरादिव। (७०० सूत्रे उदाहरणानि द्रष्टव्यानि।) अदधदिति धे-धातोः स्था-दि, अनेन अङ्, (६०८) ए-स्थाने आ, (५५८) द्वित्वं, (६१०) आ-लोपः। ञे सिं, अकारविधानां कटी दैवदत्तेन। (५४१) ञे अप् ई इति सूत्रे उक्तत्वेऽपि अम ञे इति पुनः ग्रहणं प्राचीनानुवादार्थं, "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति पाणिनिग्रहणात्। एवं (६१८) सूत्रेऽपि। पाणिनिः ३।१।४८,४९,५१।

## ६१४ ।० घेघ्राध्माच्छासः सेः पे लुग्वा ।

(धे—अ: ५।, घी: ६।, पे ७।, लुक् ।१।, वा ।१।)

अधात् अधासीत् । *

(५६) पा पाने ।

(५९७) ष्वादानेति पिब । पिबति । (५५२) भूस्थापिबेति सेर्लुक् । अपात्, पेयात् । †

(५७) घ्रा गन्धोपादाने ।

जिघ्रति । अघ्रात् अघ्रासीत् । ‡

(५८) ध्मा शब्दाग्निसंयोगयोः ।

धमति । अध्मासीत् ।

(५९) ष्ठा गतिनिवृत्तौ ।

तिष्ठति । अस्थात् । तिष्ठौ । स्थेयात् । §

(६०) म्ना अभ्यासे ।

मनति ।

---

* धे घ्रो छो सो षा इत्येभ्यः सेर्लुक् स्यात् पे । धे-ग्रहणं (५५२) सेर्लुगिति प्राप्ते विकल्पार्थम् । अधादिति पक्षे विकल्पपक्षे व्यो सिः, अनेन सेर्लुक्, पक्षे (५९८) इसुडसौ, अधासीदिति । पाणिनिः २।४।७८ ।

† पिबतीति पिबादेशस्य अदन्तत्वात् न गुणः । पेयात् (६१२) ए ।

‡ अघ्रादिति अनेन वा सेर्लुक् ।

§ अस्थादिति (५७२) अनादेशस्य धातोरपि ग्रहणम् । तिष्ठौ इति विपरीतादपि ग्रहणम् । स्थेयादिति (६१२) ए ।

(६१) दा-ञ दाने ।

प्रणि दद्यति । प्रणिदात् । देयात् । *

(६२) ह्वृ कौटिल्ये ।

## ६१५ । स्वादेर्ऋतो गुणं यङ् यक् ठौ रयो स्कुत्सु क्यां ।

(स्वादि-ऋर्ति-ऋत: ६।, ऋ ६।, यङ्-यक्-ठौरयो ७।, स्कु: ६।, तु ।१।, क्यां ७।) ।

स्वादेरर्ते ऋकारस्य गु: स्यात् यङि यकि ठौरयोरयो च, स्कुत्सु क्यामेव । अह्वरतु: । †

## ६१६ । नेड्वृतस्यपो ऽवस्कु: ।

(न ।१।, इम् ।१।, वृत: ५।, यप: ६।, च-ह-स्व-स्कु: ५।) ।

ह-ऋ-स्कृ-वर्जात् ऋकारान्तात् यप इम् न स्यात् । अह्वर्व० । ‡

---

* प्रणिवच्यति प्रणिदादिति (५४८) महायन्तनैवलम् ।

† स्व: संयोग आदिर्यस्य स स्वादि:, स्वादिश्च ऋर्तिश्च स्वाद्यर्ती, तयो: स्वत् स्वाद्यर्तृत् तस्य । संयोगादियर्ती: ऋ-धातोश्च ऋकारस्य इत्यर्थ: । कस्यादर्ययोत् स्वादिरिति महदन्तस्यैव, तेन स्वप्रभस्तुणा न प्राप्ति: । नास्ति कुत्रचित् कोऽपि ठौठोरस्त: ठौढाप्त:, यङ् च यक् च ऽठस्चेति तस्मिन् । ठायरिति ठौ-परस्मैपदस्यैव ग्रहणं, तेन स्मृषीष्ट इत्यादौ चात्मनेपदे (६५८) किस्वेऽपि ऋवेन न गुण: । स्कुरिति (७४५) सुमयुता-प्रक इत्यर्थ: । पाणिनि: ७।४।१०,११,२८,३०, वार्त्तिकञ्च ।

‡ इम स्वच स्वप ते, न विद्यते ते यस्य स: अयुक्ता तस्मात् । (५८४) नेमसुनिवर्जनेन अस्तातौहीनामस्य इम्निषेधेऽपि यप इमस्यात् यप इम्, तेन वरस्त्रिय इति, अन्यथ तु वरप इत्यादि । वृकतोरदितोऽपि (५७६) वैभूरिदितीय स्वरकत्वात् वरस्त्रिय वरकये इति वा इम् आदिप । यथा ह च स्तूनरिनादिवाय एव निषेधो मन्तव्य:, तेन अजागरिष इति । अह्वर्वं इत्यत्र (५८४) नेमसुनिवर्जनेन यप्यनिमुक्ताविमप्राप्तौ अनेन निषेध: । पाणिनि: ७।२।६२ ।

## ६१७। स्वस्सर्द्धनः। (स्य ६।, ऋत्-हन: ५।)।

ऋदन्त-हनिभ्यां स्यस्य इम् स्यात्। करिष्यति। *

(६२) स्वृ ञ शब्दोपतापयोः।

(५७२) वेमूदितीम् वा। अस्वारीत् अस्वार्षीत्। † सस्वरिव सस्वर्व।

(६४) सृ गतौ।

## ६१८। वत्क्रास्य ख्या लिप सिच ह्वो ञो ङे ञ्यां स्वस्तु वा लिप्स्थस्तु मे।

(पङ्क्ति—ञ: ५।, ङ: ६।, ङे ७।, ञ्यां ७।, स्व: ५।, तु ।१।, वा ।१।, लिप्स्थ: ५।, तु ।१।, मे ७)।

वत्क्रादेर्घेऽर्थे ङ: स्यात् ञ्यां, स्वस्थास्तु वा, लिपादेस्तु मे वा स्यात्। ‡

---

* ऋत हन च तजात्। स्य इति सकारपस्य कार्यं, तेन स्पति स्यतत् सन्तोस्यादिरेव। इम: वैकल्पिक अनुवृत्ति:, नतु मर्व्वविशेषणं, सामान्यविकानिम्-हन-धातोरिम्निषेधबोधनात्। स्वृधातोरुदित्त्वात् वेम्त्वेऽपि, विशेषविधानादनेन नित्यमिम्, तेन स्वरिष्यतीत्यपि। पाणिनि: ७।२।७०।

† अस्वारीत् अस्वार्षीत् (५०४) अजन्तत्वादुभयत्र च इस्वस्य वृद्धि: स्यात्, (१११) इत्यात् परस्य सस्य पत्वम्।

‡ वत्क्रिय पञ्चव ख्याच लिपच सिचच ह्वाच तत् तजात्। ञच ङच तु तजात् ञ:। वत्क्रिरिति पदादिमयोग-वच-धातुः (इतो वचादिरेऽपीति केचित्)। ख्या इति दिवादौ वेऽस्वधातुः। लिप्स्थ: इति बहुवचनं गणार्थं, लिप सिच ह्वे इति। वचधातो: इरित्त्वात् परस्मैपदे ङ: (५६५) सिद्ध एव, इह तु आत्मनेपदार्थ:। तेन (८०६) आत्मनेपदे नित्याङ्ग इति। पाणिनि: ३।१।५२,५३,५४।

६१९ । ऋदृशोर्गुः । (ऋदृशोः ६।, गः १।) ।

ऋवर्णान्तस्य च गः स्यात् ङे । असरत् असार्षीत् । *

६२० । ऋतो रिः शयक्ढीपे ।

(ऋत् ।१।, रिः १।, श-यक्-ढीपे ७।) ।

क्रियात् । †

(६५) ऋ गतौ ।

ऋच्छति । आरत् आर्षीत् । आर, आरतुः, आरिथ । अर्यात् । ‡

(६६) श्रु श्रवणे ।

६२१ । श्रोः शृर्वे रे ञिश्च ।

(श्रोः ५।, शृः १।, वे ७।, रे ७।, ञिः १।, च ।१।) ।

श्रुवो वेऽर्थे शृः स्यात् रे, श्नुश्च ञिः ।

शृणोति शृणुतः शृण्वन्ति । §

---

* दृश च ऋश्च तौ तयोः । चग्रहणात् ङे इति सप्तम्यन्तत्वेनानुवृत्तिः । असरदिति ङ-पक्षे गुणः, ङाभावपक्षे असार्षीदिति (५०४) वृद्धिः । पाणिनिः ७।४।१६ ।

† शश्च यक् च ढीपश्च तस्मिन् । ह्रस्व-ऋकारान्तो रिः स्यात् शे यकि ढीपे च परे । श—म्रियते । यकि—क्रियते । ढीपि—क्रियादिति, ह्रस्वान्त-रि-निर्देशादेव (५९०) न दीर्घः । पाणिनिः ७।४।२८ ।

‡ आरतुः ऋच्छत्यादिसुभयत्र (६१५) गः । आरिथेति (५८९) वर्जनात् न वेम् ।

§ श्रु-धातोः श्नौ इति शु इत्यस्य (५२५) ञिः, उकारश्रुत-रेफस्य चः । शुः श्नो बाधकः । श इत्, शुर्विकरणः । शृणोतु स्वादिगणीयमहत्त्वा श्वादिषु पाठात् क्वचित् श्रवतीत्यपि । शृणोतीत्यत्र ओकारस्य गुणः । शृण्वन्तीत्यत्र (५८८) शृणोरिति च, (१००) यत्वम् । पाणिनिः ३।१।७४ ।

९२२। नुपोऽस्योल्लोपो वृमि वा।

(नुपः ६।, अस्य ६।, उल्लोपः १।, वृमि ७।, वा।१।)।

अस्य नो-रूपस्य उकारस्य वा लोपः स्यात् वमयोः परयोः। सुन्वः सुनुवः सुन्मः सुनुमः। (५४७) ईर्लोपोऽस्वेति, सुन्व। सुषुव।*

(१७) सु गतौ।

९२३। सुस्रुधोः सेरिम् पे।

(सु-स्रु-धोः ५।, सेः ६।, इम् ।१।, पे ७।)।

असावीत्। सुषविथ, सुषुविथ। सविता सोता।†

(१८) स्रु गतौ।

(५११) ञिश्रीत्यङ्। असुस्रुवत्। सुस्रोथ, सुस्रुव।‡

(१९) दु गतौ।

अदावीत् अदौषीत्, दुदुविथ।§

---

* सुव उप् येति तस्य। न लोऽस्यतस्य। ततो वीमः उल्लोपः। व च म च वृम तस्मिन्। सुरच सुः, उप् तमादिश्च: अतः (५८८) उव्। सुनोमि तमोऽमौत्यासौ, लोप-स्वरादिश्चयोस्तु स्वरादिर्मविधिर्बलीयानिति न्यायात् प्रादौ सुव एव। सुषुव इति थ्या च, (५८४) थेसृस्रुम इति नियमात् न इम्। पाणिनिः ६।४।८७।

† सुश्च स्रुश्च धुश्च तस्मात्। सु स्रु धु धातुभ्यः सेरिम् स्यात् पे। सु धातोः (५०६) विकल्पे प्राप्ते नित्यार्थं वचनम्। स्रु धु इत्येतयोः (५८०) एकाजनुबन्धेन निषेधे वचनम्। पे किं, अहविष्ट अहोष्ट, अधविष्ट अधोष्ट। (५०२) वटुस्तुनोऽस्यास्य इति निषेधेन सुषविथ सुषुविथ इत्यादौ नित्यमिम्। सविता सोता इति (५०४) वा इम्। पाणिनिः ७।२।७२। अत्र सूत्रे षू धातुर्दीर्घान्तः पठितः, व्याकरणान्तरेषु तु ह्रस्वान्तः। तत्र कातन्त्रपञ्जिकाकृत् "स्तु सु धूञ्भ्यः परस्मै सिङ" इति क्रमदीश्वरसूत्रे गोयीचन्द्रः—"यस्तु दीर्घान्तो षूङ् प्रादौ पठ्यते तस्य सेट्-त्वात् असावीदिति सिध्यत्येव, किन्तु धूञोऽधोषीदित्यनिष्टरूपं स्यादित्येवमर्थं धूञोऽत्र वचनम्।"

‡ असुस्रुवदिति (५८८) उव्। एवम् अदुद्रुवत्। सुस्रोथेति थेसृस्रुमिति नियमेन (५८९) क्रादित्वस्य बाधितत्वात् न इम्।

§ अदावीद् अदौषीदिति (५०२) वटुस्तुनांसव्या इम् ञिः वा इम्। दुदुविथेति थेसृस्रु-मिति नियमाद् अत्र नित्यमिम्।

(७०) द्रु गतौ ।

अदुद्रुवत् ।  दुद्रुव ।

(७१) गम्लृ गतौ ।

गच्छति ।  (५६५) लिदित्वात् ङः, अगमत् ।  जगाम ।
(२२०) हनगमेत्युङ्लोपः, जग्मतुः जग्मुः ।  जगमिथ जगन्थ ।*

## ६२४ ।  गमोऽमे स इम् मार्हात्तु वा ।

(गमः ५।, अमे ७।, सः ६।, इम् ।१।, मार्हात् ५।, तु ।१।, वा ।१।) ।

गमः परस्य सस्य इम् स्यात् न तु मे, मर्योभ्यात्तु वा ।  गमिष्यति । †

(७२) सृप्लृ गतौ ।

अस्राप्सीत् असार्प्सीत् असृपत् । ‡

(७३) स्यन्दिरौ गति-शोषणयोः ।

## ६२५ ।  विष्कम्भा निर्व्वि-सु-निर्दुःसुपः सः षो,-निनिर्विस्फुर-स्फुल परिविस्कन्दाऽप्राणिषु-निष्परिविर्व्यनु-स्यन्दस्तु वा ।

(विष्कम्भा—सुपः ६।, सः १।, षः १।, निनिर्—स्यन्दः ६।, तु ।१।, वा ।१।) ।

---

* दुद्रुवेति वेमसृसृसृ इति नियमात् न इम् ।  जगमिथ जगन्थ इति (५८६) वा इम् ।

† सं+गच्छ [illegible] इत्यात्मनेपदम् [illegible] ।  (८७४) समो गम्यृच्छिभ्यामित्यात्मनेपदविधा-नात् [illegible] न इम् ।  आत्मनेपदयोः [illegible] तु [illegible] इम् ।  [illegible] ।

‡ (६०१) [illegible] इति, (६०४) वदव्रज इति अस्राप्सीत् असार्प्सीत्; [illegible] (५६५) लिदित्वात् ङः असृपत् ।

विष्कम्भाते वं-वर्ज-व्यादिपूर्वस्य स्पश सः षः स्यात्, व्यादि-पूर्व-स्फुर-स्फुलोः परिवि-स्कन्दतेः चमाविध-व्यादिपूर्वस्य स्कन्द-तेश्च वावा। परिष्कन्दति परिस्कन्दति। *

(७४) तॄ प्लवन-तरणयोः।

## ६२६। ॠतो गुः कित्ण्यां।

(ॠतः ६।, गुः १।, कित्-ण्यां ७)।

तेरतुः। †

## ६२७। वॄतो वेमोर्घोऽठौढौपसेः।

(वॄ-ॠतः ५।, वा ।१।, इमः ६।, घः १।, अ-ठौ-ढौ-पसेः ६)।

वृङो वॄञ ॠदन्ताच्च इमो घः स्यात् वा, न तु अः व्यः पसेश्च। तरीता तरिता। ठौ ढौ पसेस्तु तेरिथ, तरिषीष्ट, अतारिष्टां। ‡

---

* वेः स्कम्भः विष्कम्भः, निश्च दुश्च निर् च दुर् च तेभ्यः स्पष्, निर्वर्ती षः वचात् स-निर्वं:, निर्वचाद्यौ विसुनिदुःस्पष् चेति, पश्चात् विष्कम्भाय निर्वविसुनिदुःस्पष् च तस्य। निश्च निर् च विश्च ते, तेभ्यः स्फुर स्फुलौ, परि-विभ्यां स्कन्दः परिविस्कन्दः, निश्च परिश्च निर् च विश्च अभिश्च अनुश्च ते, तेभ्यः स्कन्द निपरिनिर्व्यभ्यनुस्कन्द, चमाचौ षः (कर्ता) यस्य सः चमाविधः, स्वचाद्यौ निपरिनिर्व्यभ्यनुस्कन्द चेति चमाविधनिपरिनिर्व्यभ्यनुस्कन्द, पश्चात् निनिर्वि-स्फुरस्फुलौ च परिविस्कन्दश्च चमाविधनिपरिनिर्व्यभ्यनुस्कन्द चेति तस्य। स्कम्भ इति शाब्दनिर्देशात् विष्कम्भतीत्यत्र षत्वं न स्यात्। निर्व इति वराश्रयपक्षाणां त्रिः व्यादिस्वर्थः। चमाविध इति शब्दविशेषणात् निष्कन्दते (गर्तं गच्छति) इत्यत्र न षत्वम्। पाणिनिः ८।३।७२, ७३,७४,७५,७६,७७,८८। अत्र निर्पूर्वकस्कन्दः न दृश्यते।

† कितादौ ठौ चेति कित्ठौ वचात्। तेरतुरिति चनेन गुणे, (५०८) चकारः एकारः द्विलोपश्च। दीर्घं ऋत इति किं, चकतुः। पाणिनिः ७।४।११।

‡ इच ऋच तयात्। पे त्रिः पत्निः, ठौ च ढौ च पत्निश्चेति, अ ठौढौपसि: अठौ-ढौपसिस्तस्य। इ इति इङ्-इञोर्ग्रहणम्। तृ-ता (५५७) इम्, (५७२) गुणः, अनेन इमो वा दीर्घः। तेरिथ इत्यत्र गुणादनन्तरं (५०८) चकार एकारः, द्विलोपश्च। अतारिष्टामिति (५७४) अनयत्वात् वृद्धिः। मुग्धबोधव्याकरणम् इत्यात्मनेपदचमात्मपदवाटैव। पाणिनिः ७।२।३८,३९,४०।

## ६२८ । ॠदिरणावुर्वोष्ठ्यात् ।

(ॠत् ।१।, इर् ।१।, अणौ ७।, उर् ।१।, तु ।१।, ओष्ठ्यात् ५।) ।

ॠकार इर् स्यादणौ, ओष्ठ्यात् परस्तु उर् । तीर्य्यात् । *

(७५) षन्जौ ञि सङ्गे ।

## ६२९ । षन्ज दन्श ष्वन्जोऽपि नलोपः ।

(षन्ज-दन्श-ष्वन्जः ६।, अपि ७।, न-लोपः १।) ।

निषजति । व्यषाङ्क्षीत् । निषषञ्ज, ससजतुः ससञ्जतुः । †

(७६) दृशिरौ प्रेक्षणे ।

पश्यति । अदर्शत् । (६०४) वर्द्धोऽक्विदिति, अद्राक्षीत् । ‡ (५८९) सृजदृशेतीम् वा, ददर्शिथ दद्रष्ठ ।

---

* अत्र पोः-(पवर्गात्) इति नोक्त्वा ओष्ठ्यादिति कथनं दन्त्योष्ठ्य(अन्तःस्थ)वकारस्यापि ग्रहणार्थं, तेन वृधातोः सनि वुवूर्षतीति (८०५) दीर्घे, अनेन ओष्ठ्यपरत्वादुर् । ओष्ठ्यादिति धात्ववयवादेव, तेन सम्-पूर्व्वकस्य ॠधातोः समीर्य्यादित्येव, न तु समूर्य्यात् । सार्व्वधिक-स्याप्यत्र ग्रहणं, तेन दधिर्य्यौर्वेति (८०५) सूत्रं द्रष्टव्यम् । तीर्य्यादिति तॄधातोः ढौ-यात्, अनेन इर्, (२२८) दीर्घः । पाणिनिः ७।१।१००,१०२ ।

† षन्जस्य दन्शस्य ष्वन्जस्य च तस्य । एषां नस्य लोपः स्यादपि । एभ्यः शप् ञित् इति न कृत्वा नलोपविधानं, दशि बन्ध् दर्शे इति इदनुबन्ध-चुरादीय-दन्शधातोः ञेर्व्विकल्पपक्षे दशति इत्यत्र (५६८) नलोपनिषेधेऽपि, अनेन नलोपार्थम् । निषजतीति (५७२) षत्वम् । व्यषाङ्क्षीदिति (५७४) वृद्धिः, (२११) कुङ्, (५०,५१) नस्थाने अनुस्वारस्तस्य च ङ । (१११) कवर्गात् सः षत्वम् । (५७२) अमुव्यवधानेऽपि षत्वम् । निषषञ्ज इति द्वित्वेऽपि द्वयोः षत्वम् । ससजतुः ससञ्जतुः (५६६) वा किद्भावः, (५६७) कित्पक्षे न-लोपः । पाणिनिः ६।४।२५ ।

‡ पश्यति (५९७) दृशस्थाने पश्य । अदर्शत् (५६५) ङः, (६१९) गुणः । ङविकल्प-पक्षे अद्राक्षीदिति अनिमत्वात् (५७४) वृद्धिः, (१५४) षङ्, (६०२) षस्य कः, (२११) षत्वम् ।

(७७) हन्त्रो वधवे।

अदाक्षीत्। *

(७८) कित-निवासे रोगापनयने संशये च।

**६३०। कित्तिज्गुपः सन्नेम् मान शान दान बधस्तु खेऽर्थे च।** (कित्—गुपः ५।, सन् ।१।, न ।१।, इम् ।१।, मान—बधः ५।, तु ।१।, खे: ७।, अर्थे ।१।, च ।१।)।

किताद्देः सन् स्यात्, इम् न स्यात्, मानादेस्तु खेऽर्थे च।

क्षमादेतेऽथ सन्देहे शान्ति-निन्दा-विचारणे।
निशानार्जवनिन्दासु बधजयेऽपि किती मतः॥ †

**६३१। सन्अ्याद्दि धुः।** (सन्-आदिः १।, धुः १।)।

सनन्तो अ्याद्यन्तश्च धुसंज्ञः स्यात्। ‡

---

* अदाक्षीदिति दन्श-धातो; टो-दि, इति: भवादित्वच।

† कित् च तिज् च गुप् च तस्मात्। मानश्च शानश्च दानश्च बधश्च तस्मात्। खनिर्दिष्टार्थत्वात् खार्थे एव सन् भवति। एतेषां धातूनां धात्वर्थान् निर्दिशति क्षमादिति। अत्र कतुक्तिचारी एते क्रियाद्यः अत्र क्रमात् सन्देहादिषु अष्टसु अर्थेषु मताः, कितः सन्देहेऽपि मतः। तेन कित—सन्देह-रोगापनयनयोः, तिज क्षमायाम्, गुप च निन्दायाम्, मान च विचारणे, शान च निशाने, दान च आर्जवे, बध च चित्तविकारे:। सन्देहः विरुद्धनैककोटिविषयकं ज्ञानम्, चिकित्सार्थे वधकर्म: यथा—व्याधिं चिकित्सति। सन्नन्तो रोगापनयनार्थ:। क्षान्तिः सहनम्। निन्दा दोषकथनाद्यात्मिका। विचारणम् तत्त्वनिर्णयं न वेति प्रमाणात् ज्ञानम्। निशानं तीक्ष्णीकरणम्। आर्जवम् ऋजुत्वम्। एतार्थेषु सनन्ता एव। पाणिनि: ३।१।५,६।

‡ अ्यादिश्च—चि (७७७), यम् (८०१), यङ् (८३०), काम्यच् (८४१), क्य (८४२), णिङ् (८४८), णि (८४८)—इति धातुः। सनन्ताद्यन्तानां धुसंज्ञाकरणं (१२८) तिबादिविभक्त्यर्थम्। पाणिनि: ३।१।३२।

६३२ । सन्यङन्तो द्विः । (सन्-यङ्-अन्तः ११, द्विः ११) ।

चिकित्सति । अचिकित्सीत् । चिकित्सामास । *

इति परस्मै-पादः । †

२य पादः—भवत् ।

(७९) एध ङ वृद्धौ ।

एधते । ऐधिष्ट । एधाञ्चक्रे । ‡

(८०) दद ङ दाने ।

(५७९) न-शसददेत्युक्तेः, दददे ।

(८१) ष्वक्क ङ सर्पणे ।

(५६९) न-ष्वोष्वकेत्युक्तेः, ष्वक्कते । सष्वक्के ।

---

* सन् च यङ् च सन्यङौ, तौ अन्ते यस्य स सन्यङन्तः । तद्गुणसंविज्ञानबहुव्रीहिरिय सन्-यङ्-समेतो द्विः स्यादित्यर्थः । कदाचिदतद्गुणसंविज्ञानबहुव्रीहौ केवलो धातुरपि द्विः, तेन लोपने इत्यत्र सनं हित्वा कुत्सधातोर्द्वित्वे, (८१५) लोपादेशः । चिकित्सतीत्यादि; कित: सन्, इण्निषेधे, (८०४) वर्णानिमौति वचनाभावात् गुणनिषेधे, द्वित्वे चिकित्स इति भागस्य धातुसंज्ञायां तिपादिकम् । (५८२) व्यान्तत्वादाम्, ततः (५८३) अस्प्रयोगः । पाणिनिः ६।१।९ ।

† पवतां परस्मैपदवतां धातूनां पादः एकार्थावच्छिन्नलक्षणसमूह इत्यर्थः ।

‡ एध-ते (५४१) अप् । एध-तन् (५५०,२२,५५१,५५४,१११,४०) ऐधिष्ट । एध-ए (५८२,५८३) । आत्मनेपदित्वात् केवलं कृञ्योगः ।

(८२) ऋज ङ आर्जवे ।

आर्जते । *

(८३) तिज ङ क्षमा-निशानयोः ।

तितिक्षते । †

(८४) ष्वन्जो ङ सङ्गे ।

निष्वजते । ‡

## ६३३ । नि वि परि ष्वन्ज स्तु सुमादेः सः षो ऽमि वा ।

(नि—सुमादेः ६।, सः ६।, षः १।, अमि ७, वा ।१।) ।

न्यष्वङ्क्त न्यस्वङ्क्त । सस्वजे सस्वञ्जे । §

## ६३४ । सद्स्वञ्जोर्द्व्यां नाखेः ।

(सद्-स्वञ्जोः ६॥, द्व्यां ७, न ।१।, अखेः ६।) ।

खिवर्जस्थानयोः सः षो न स्यात् द्व्यां । विषसजे विषस्वजे ।¶

---

* आर्जते इति ऋज-ए (५८०) ऋकारादित्वात् वैराम् ।

† तितिक्षते इति तिज (६२०,६१२,२११,६२१) सूत्रैः क्षिवित्व इति धातुः । (६१३ ...) आत्मनेपदम् ।

‡ निष्वजते (५६९,६२८,५०२) ।

§ सुम् आदिर्यस्य स सुमादिः, स्वन्ज च स्तु च सुमादिश्चेति । नि च वि च परि च ते, तेभ्यः स्वन्जस्तुसुमादिः तस्य । सुमादिः (५०२) सुम्, अनट् षिव, अषोट् इत्य इति । निविपरिभ्यः परेषामेषां सः षः स्यात् स अमि सति । न्यष्वङ्क्त इति नि-स्वन्ज-तन् (५५०, ५५१,५६२) सिलोपः, (२११,५०,५१) अनेन वा षत्वम् । सेः स्थानित्वात् (५६७) न नलोपः । सस्वजे सस्वञ्जे इति (५६६) वा किन्त्संज्ञायां, (५६७) नलोप-तदभावौ । पाणिनिः ८।३।७० ।

¶ सद् च स्वञ्ज च तौ तयोः । न खिरखिवस्य अखेः । विषसजे विषस्वजे इति

(८५) त्रपू ष लज्जायाम् ।

अत्रपिष्ट अत्रप्त । त्रेपे । *

(८६) जभ ङ् जभने ।

९३५ । नुम् जभोऽचि ।

(नुम् ।१।, जभः ६।, अचि ७।) ।

अजम्भिष्ट । †

(८७) ष्टुभ ङ् स्तम्भे ।

विष्टोभते । व्यष्टोभिष्ट । ‡

(८८) पण ङ् व्यवहारे स्तुतौ च ।

(५९१) कामऋतेत्यायः । पणायते ।

९३६ । सनः पभे घोर्वा त्वायात् ।

(सनः ५।, प-भे १॥, घोः ६।, वा ।१।, तु ।१।, आयात् ५।) ।

पणायति । अपणायिष्ट अपणिष्ट । पणायाञ्चक्रे पेणे । §

---

अनेन निषेधात् मूलस्य न षत्वं, येस्तु (५७२) षत्वमेव । त्वामिति किं, विषाच्यते इत्यत्र उभयोरेव षत्वम् । पाणिनिः ८।३।११८, वार्त्तिकानि काशिका च ।

* अत्रपिष्ट इति (५७३) वा इम्, पक्षे (५६२) सिलोपः अत्रप्त । त्रेपे इति (५७९) ञिलोपः, अकार एकारश्च ।

† जभो नुम् आदचि परे । मित्त्वादन्त्यात् परः । तवर्गजादावात्मनेपदिन एवेति बोध्यं, जभ जभने इत्यस्य तु जभतेत्यादि । अजम्भिष्ट इति इमि, अचि परे नुम् । एवं जम्भनमित्यादि । अचि किं, जब्धा । पाणिनिः ७।१।६१ ।

‡ विष्टोभते, स्तुभधातोः (५७२) षत्वम् । व्यष्टोभिष्ट इति अभ्यपि षत्वम् ।

§ घोः मूलधातुसम्बन्धिनौ प-भे सनः सनन्तात् सः, आयान्तात्तु वा । तत्राच परस्मैपदिधातोः सनन्तात् पं, आत्मनेपदिधातोः सनन्तात् भं, उभयपदिनः सनन्तादुभय-

६३७ । विच्छाऽस्तुतिपणो वायः ।

(विच्छ-अस्तुतिपण: ५।, वा ।१, आय: १।) ।

पणायते पणते । *

एवं (८८) पन स्तौति । †

(८०) कमु ङ कान्तौ ।

कामयते । (६१२) अयन्तत्वादङ् । ‡

६३८ । अङ्युङः स्वो ऽन्त्यलोपिधास्वृदितः ।

(जाति ७, उङः ६।, स्व: १।, अन्त्यलोपि-धास्-ऋदित: ६।) ।

अन्त्यलोपिनः धासो ऋकारेतश्चाधात्वस्य उङः स्वः स्यात् ञेः परे चङि परे । §

---

पदमिति । वाऽयस्तु वेति वा-शब्दो व्यवस्थितविकल्पार्थः, तेन वाऽयनेपदिन वाऽयन्तात् प-मै वा:, परस्मैपदिनस्तु पमेव । यतो गुपधातोः गोपायतीत्येव । पणायतीति वाऽयस्तु वैकल्य विकल्पपक्षे उदाहरणम् । अपणायिष्ट अपणिष्ट (५९२) वारि प्रत्ययोदाहरणम् । पाणिनिः ३।१।२८ ।

* न स्तुतिरस्तुतिः, अस्तुतौ पण अस्तुतिपण, विच्छश्च अस्तुतिपण चेति समाहारः । विच्छधातोः अस्तुत्यर्थात् पणश्च आयः स्यात् । स्तुतिवर्जनात् व्यवहारार्थे आत्मनेपदम् । व्यवहारश्च क्रयविक्रयलक्षणः । पाणिनिः ३।१।२८,११ ।

† एवं पन स्तुतौ (५९१) पायमत्यौ पनायते पनायति इत्यादि । ऐवो स्तुतौ ।

‡ कामयते इति (५९१) णिङ् इति, (५००) इती, कामि-धातोर्णि विभक्तिः ।

§ ञेः परोऽङ्‌ ञ्यङ् तस्मिन् । अन्त्यो लोपः अन्त्यलोपः, सोऽस्यास्तीति अन्त्यलोपी । ऋत् इत् यस्य स ऋदित् । अन्त्यलोपी च धास् च ऋदिच्चेति, तस्मात् अन्त्यलोपि स्वर । ञेः परे चङि परे इति अवचनात् ञेः पूर्ववर्तिनामधातोरुङः स्वः स्यादिति । अन्त्यलोपि-धास-ऋदित्— वान्तु—अचकथत् अययाचत् अचुचीकरदित्यादि । पाणिनिः ७।४।१,२ ।

९३९। खेः सन्वल्लघौ, घोर्ह्रस्वादेः र्घश्च, त्वनेकाच्योस्त्वकलिहले वा।

(खेः ६।, सन्वत् ।१।, ञौ ७।, घोः ६।, ह्रस्वादेः ६।, र्घः १।, च ।१।, त्वनेकाचोः ६॥, तु ।१।, अकलिहलेः ६।, वा ।१।)।

अनग्लोपिनः खेः ञौ अक्षरे परे सन्वत् कार्यं स्यात् आङि, घोश्च खेर्ह्रस्वादेः र्घः स्यात्, कलि-हलि-वर्जस्य तिः अनेकाचश्च सन्वद्वा स्यात्। *

९४०। स्वस्येत् सनि। (स्वस्य ६।, इत् ।१।, सनि ७)।

खेरवर्णस्य इत् स्यात् सनि परे। †

९४१। ञेर्लोपोऽनाल्विष्ण्वाय्यान्तेत्न्वामिम्ञिति।

(ञेः ६।, लोपः १।, अनाल्वि—ञिति ७)।

आलु इष्णु आय्य अन्त इत्नु आम् इम् ञित् एभ्योऽन्यत्र ञेर्लोपः स्यात्। ‡

---

* सन् इव सन्वत्, लिघ अनेकाच् तौ तयोः, कलिश्च हलिश्चेति कलि-हली, न कलिहली अकलिहली तस्य। अनग्लोपि-भावुद्दितामनुवर्त्तनेऽपि आवुद्दितां लघुस्वरयुक्ताभावपरत्वाभावाद्यानो, अकारः च तु दीर्घो इत्यस्य ऋदित्वोऽपि अनेकाच्त्वात् विशेषेण बाधितत्वात्, केवल-अनग्लोपिनः इति व्याख्यातम्। अनग्लोपिधातोः खेः सन्वत् कार्यं स्यात् आङि, लघ्वक्षरे परे। तथैव ह्रस्वादेर्धातोः खिर्यदि लघुर्भवति तदा तस्य दीर्घः स्यात्। कलि-हलि-भिन्न-चिरत्रस्य अनेकाच-धातोश्च खेः सन्वत् वा स्यादित्यर्थः। पाणिनि; ७।४।९३,९४, वार्त्तिकानि च।

† खेः अः इत्स्यात्। पाणिनिः ७।४।७९।

‡ आलु इष्णु आय्य अन्त इत्नु आम् च इम् च ञित् चे, न विद्यन्ते ते यत्र स अनाल्विष्णु। उदाहरणानि तु—स्पृहयालुः, धारयिष्णुः, स्पृहयाय्यः, मण्डयन्तः, स्तनयित्नुः, कारयामास, कारितवान्, इत्यादि। (१००४) सूत्रे ञिमृकादौ परे तु लोपः। पाणिनिः ६।४।५१,५२,५३,५४,५५।

अचीकमत अचकमत। कामयाञ्चक्रे चकमे। *

(८१) अय ङ गतौ।

अयिढ्वं अयिध्वं अयिद्ध्वं। अयाञ्चक्रे।

(८२) एवं, दय ङ गतौ।

(८३) स्फायी ङ वृद्धौ।

अस्फायिष्ट। †

## ६४२। योर्लोपो व्यस्वे।

(योः ६।, लोपः १।, व्यसि ७, अवे ७।)।

अस्फास्त। ‡

(८४) ओ प्यायी ङ वृद्धौ।

## ६४३। पद्स्तनोञ् ञे प्याय ताय दीप पूर जन बुधस्तु वा।

(पदः ५।, तनि ७, ञ्।१।, ञे ७, प्याय—बुधः ५।, तु ।१।, वा ।१।)।

---

* अचीकमत इति कम धातोः (५९२) ञिङ्, (५००) ङसिः, ञिसि प्रत्यय (६११) धातुसंज्ञा, ततः अण्, (६१२) चङ्, (६१८) ह्रस्वः, ञिसि प्रत्यय ञिले, ञि इत्युक्त वाँ,पे, अत्र चकारे, वेः सन्वत्त्वात् (६४०) अकारस्य इकारे, लघुनोदीर्घे, अबीन लोपः। ञिङो ञिकल्पत्वे, चङ् विनादित्वात्। कामयाञ्चक्रे इति कमि धातोः (५८२) आमन्ताद्धात्, ततः ञमलोपः। ञिङोऽभावे चकमे।

† अयिढ्वमिति (५५६,५५७) सलोपः, धस्य ढः। अस्फायिष्टेति (५७१) वा इड्।

‡ य व र ल वी लयोः। वकारो दन्तौष्ठ्यः। यवयोर्लोपः स्यात् व्यवे इति परे। अस्फास्तेति वर्णिकृष्ये य-लोपः। एवं स्फाया, स्फाता। किपी वहकृञि(८१४) कटीऽपारि-ञ्चये दीर्घेति, अर्थं वलोपः (४४१ सूत्रं द्रष्टव्यम्)। कपि किं, स्फायते ईकवे। वसी किं, दीव्यति। पाणिनिः ६।१।६६।

पदो घेऽर्थे इण् स्यात् तनि, प्यायादेस्तु वा। *

## ६४४। इणस्तन् लोप्यः।

(इण: ५।, तन् ।१।, लोप्य: १।)।

अप्यायि अप्यायिष्ट अप्यास्त। †

## ६४५। प्याय: पी यङ्क्णो:।

(प्याय: ६।, पी: १।, यङ्-क्णो: ७॥)।

पिप्ये। ‡

(८५) तायृ ङ सन्तानपालनयो:।

अतायि अतायिष्ट। §

(८६) ग्रल ङ चलने।

अग्रलिढ्वं अग्रलिध्वं अग्रलिढ्वं। ¶

---

* इणो च इत् चकारार्थः। दीपादिकोऽयम्। पाणिनिः ३।१।६०,६१।

† इणः परः तन् लोप्यः स्यात्। इणः इति सामान्यार्थं, तेन (८२१) एतनोर्येगित्वाविल-भेन ज्ञातादिचीडोऽपि तनो लोपः। पदसमीप् घे प्रत्यय तनः स्थाने इण् इति लाघवेऽपि, ज्यां सीरापत्तिः, तन्स्थानजातत्वेन इणो ङित्वात् घयोर्घोत्वम् गुणाभावश्च स्यात्। अप्यायिष्ट इति इणो विकल्पपक्षे (५७२) वा इम्। अप्यास्तेति इमोऽभावपक्षे सलोपः। पाणिनिः ६।४।१०४।

‡ प्याय-स्थाने पी: स्यात् यङि क्णाश्च। पिप्ये इति (५८८) य:। पाणिनिः ६।१।२९।

§ अतायीति तायधातोः तनि (६४३) इण्। पक्षे (५५४) अतायिष्ट।

¶ अग्रलिढ्वमिति (५५६,५५७) वा-द्वयेन पदत्रयम्।

(९७) षेवृ ङ सेवने।

परिषेवते, न्यषेविष्ट, सिषिवेवे। प्रतिषेवते। *

(९८) काशृ ङ दीप्तौ।

काशामास चकाशे। †

एवं (९९) कासृ ङ कुशब्दे।

(१००) ईहृ ङ चेष्टायां।

ऐहिढ्वं ऐहिध्वं ऐहिढ्वं। ‡

(१०१) रु ङ वधे गत्यां।

अरविष्ट अरोष्ट। रुरुविषे। §

(१०२) दे ङ पालने।

६४६। द्वे दैङो दिगिठ्यां।

(दे: ६।, दैङ: ६।, दिगि: १।, ठ्यां ७)।

द्विरुक्तस्य देङो दिगिः स्यात् ठ्यां। दिग्ये। ¶

---

* (५७२) परिषेवते, न्यषेविष्ट इति षत्वमपि; सिषिवेवे इति षेव षत्वम्। परि-नि-वि-पूर्वत्वाभावात् प्रतिषेवते इति न षत्वम्।

† काशामास इति (६००) वा आम्।

‡ ऐहिढ्वं (५८१, ५२६, ५१७)।

§ अरविष्ट अरोष्ट (५०४) वा इट्। रुरुविषे इति ठावर्जनात् (५८७) नित्यमिडिति इम्। (५८८) षत्वम्।

¶ दिग्ये इति द्विरुक्तस्य देङादेः दिगि-आदेशः, (५८८) इ-स्थाने यः। पाणिनिः ७।४।९।

(१०३) ष्टो ण्डी ङ समाधौ ।

भडयिष्ट । *

(१०४) गुप ङ गोपन-कुत्सनयोः ।

जुगुप्सते ।

(१०५) मान ङ विचारे ।

मीमांसते ।

(१०६) बध ङ निन्दायां ।

बीभत्सते । †

(१०७) द्युत ङ वृ दीप्तौ ।

(५६५) द्यामुलिदृद्युदिति ङः । तेनैक पं । अद्युतत्, अद्योतिष्ट । ‡

## ६४७ । द्युत्-स्वाप्योः सोर्जिः ।

(द्युत्-स्वाप्योः ६॥, सोः ६।, जिः १।) ।

दिद्युते । §

(१०८) वृत ङ वृ वर्त्तने ।

## ६४८ । वृद्भ्यो नेम् पे स्यसनो र्वा तङि ।

*(वृद्भ्यः ५॥, न ।१।, इम् ।१।, पे ७।, स्य-सनोः ६॥, वा ।१।, तु ।१।, तङि ७।) ।

---

* भडयिष्ट इति (५८०) डी-वर्जनात् न इम्निषेधः ।

† जुगुप्सते, मीमांसते बीभत्सते इति (६१०) सन्, मान-बधोः सोर्दीर्घ च । गुपधातोः (८०४) कुत्सितार्थे न ङः । (२७७) बध-धातोर्भस्य भः ।

‡ तेनैव प्रं (५६५) द्युतरयो पदे आकिमान्तसमर्थात् द्युतधातोः आत्मनेपदमित्यर्थः ।

§ द्युत स्वापिच नयोः । द्युतो आत्मनेपदस्य सोर्जिः स्यात् । दिद्युते इति पैः (५२५) ... ... जिः ७।१।६०।

वृतादेः स्य-सनोरिम् न स्यात् पे, आदन्यत्र तु वा।
अतएव पं। वर्त्स्यति। मे तु वर्त्तिष्यते। *

(१०९) स्यन्दू ङ वृ॰ स्रवणे।

निष्यन्दते निस्यन्दते घृतं। निस्यन्दते हस्तीति प्राणिवत्वान्न षः। †

(११०) क्लृपू ङ वृ॰ कल्पने।

## ६४९। क्लपः कृपो ऽक्लपादौ।

(क्लपः ६।, कृपः १।, अक्लपादौ ७)।

क्लपः स्थाने कृपः स्यात् न तु क्लपादौ। कल्पते। ‡

## ६५०। नेम् पे व्याः। (न।१।, इम्।१।, पे ७।, व्याः ६।)।

क्लृपो व्या इम् न स्यात् पे। अतएव पं। कल्प्ता।
पे किं, कल्पिता कल्प्ता। कल्प्स्यति, मे तु कल्पिष्यते कल्प्स्यते। §

---

* वृद्भ्यः इति बहुवचनं गणार्थम्। अतएव पमिति वृतादेरात्मनेपदिनः परस्मैपदे स्य-सनोरिम्निषेधादेव स्य-सनावुभयपदित्वमित्यर्थः। यथा वर्त्स्यति। सनि विवृत्सति। मे तु वर्त्तिष्यते, सनि विवर्त्तिषते। आदन्यत्र तु विवर्त्तिषा विवृत्सा इत्यादि। वृतादिश्च— वृतुर्वृधुः शृधुः स्यन्दू क्लृपूः पञ्च वृतादयः। पाणिनिः ७।२।५९, १।३।९२।

† घृतं निष्यन्दते द्रवीभवतीत्यर्थः, (१२५) अप्राणिवत्वात् वा षत्वम्। हस्ती निस्यन्दते मदधारवेण चीतो भवतीत्यर्थः, अत्र प्राणिवत्वात् न षत्वम्।

‡ क्लपा आदिः यस्य स क्लपादिः, मध्ययोगे तद्विधम्। क्लपः स्थाने कृपः स्यात् न तु क्लपा-प्रभृतिषु। क्लपादिर्यथा—क्लपा क्लपाय: क्लपच: क्लपीटच (कर्पटच) क्लपः क्लपी इति। कल्पते इति कृप-धातौ अपि लकारस्य गुणः अल्। पाणिनिः ८।२।१८। "कृपणादीनां प्रतिषेधः" इति वार्त्तिकञ्च।

§ अत्रापि अतएव पम्। तत्र—वृतादिः स्यात्तुभयपदित्वम्। वृतादेः वृतादेव-

(१११) व्यथ भङ् पीड़ायां ।

६५१ । व्यथ ग्रह ज्या वय व्यध वश व्यच प्रच्छ व्रश्च भ्रस्ज स्वप वच यजादेः खेर्जिठ्यां ।

(व्यथ—यजादेः ६।, खेः ६।, जिः १।, ठ्यां ७।) ।

एषां खेर्जिः स्यात् ठ्यां । विव्यथे । *

(११२) जि त्वरा भङ् सम्भ्रमे ।

अत्वरिढ्वं अत्वरिध्वं अत्वरिढ्वं । †

इति भवत्-पादः ‡ ।

---

गेयत्वात् ठ्यां स-सनोश्च उभयपदित्वम् । क्रपस्तु द्युतादित्वात् वृतादित्वात् नेम् पे ष्या इत्यनेन च, ठ्यां सस्नोः स्यात्र उभयपदित्वमिति, अन्यत्र सर्व्वे एवात्मनेपदिनः । कल्प्ता परस्मैपदे अनेन इम्निषेधः । कल्प्स्यतीति वृद्भ्यो नेम् पे इत्यनेन निषेधः । आत्मनेपदे तु (५७१) वा इम् । पाणिनिः ७।२।६०, १।३।९१ ।

* व्यथेत्यादि—यजादिश्चेति द्वन्द्वे तस्य । वय इह वेञ-स्थाने (६६१) वयादेशः । तस्य च वेञस्थानजातत्वेनैव यजादित्वात् जौ सिद्धे पुनरिह ग्रहणं (६६२) ठ्यां न वेञश्चामिति जिनिषेधस्य बाधनार्थम् । ग्रह प्रच्छ व्रश्च भ्रस्ज इति चतुर्णां खेर्जौ कृते, (५५९) ऋकारस्य अकारे, जौ• फलाभावेऽपीह ग्रहणं ग्रहादिगणार्थं, तेन गृह्यते पृच्छ्यते इत्यादौ (६६१) ग्रहादित्वात् जिः । यजादिस्तु—यजि वंपि वंहिश्चैव वेञ् व्येञौ ह्वयतिस्तथा, वदि वंसिश्च श्वयतिश्चैते नव यजादयः । विव्यथे इति विधिबलात्, खेराद्यचो लोपात् पश्चात् न स्यान्त-लोपः । व्य इत्यस्य जौ कृते, सकृत् द्विस्तु वेत्यनेन वि-इत्यस्य पुनर्न जिः । पाणिनिः ७।४।६८, ६।१।१७ ।

† अत्वरिढ्वमित्यादि (५५६, ५५७) विकल्पत्रये पदत्रयम् ।

‡ भवताम् आत्मनेपदवतां धातूनां पादः एकार्थावच्छिन्नसूत्रसमूह इत्यर्थः ।

—०—

धर्मं मादः—शियः ।

---

(११३) पत लृ ञ गत्यैश्वर्ययोः ।

६५२ । वच्यस-श्वि-पतां वोचस्य-श्व-पप्ता ङे ।

(वचि-वस-श्वि-पतां ६॥, वोच-वस्य-श्व-पप्ताः १॥, ङे ७।) ।

एवामिते क्रमात् स्यु ङे । अपप्तत् । *

(११४) व ञ टु वम उद्गिरणे ।

वेमतुः ववमतुः, वेमिथ ववमिथ ।

(११५) भ्रमु अ च चलने ।

(२८४) भ्रम क्रमेति श्यन् वा । भ्राम्यति भ्रमति । भ्रेमतुः बभ्रमतुः ।

(११६) सह अ ङ मर्षे ।

असहत असहत । (६०६) बेन्सहेतोम् वा । परिषहिता । †

६५३ । सह-वहोऽदो ढि ।

(सह-वहः ६।, अत् ।१।, ओ ।१।, ढि ७।) ।

---

* वचिश्च वसश्च श्विश्च पतश्च ते तेषाम्—

वोचश्च वस्यश्च श्वश्च पप्तश्च ते ते स्युः । वचिरिति अदादिक एव, श्रीकाद्रि-कात् क्रमाद्यभावात् । वस इति दिवादिक एव, भ्वादिकात् क्रमाद्यभावात् । प्रपप्तदिति प्र-नि-पत—टीदि, (५६५) आदिस्थात् ण:, णमेन प्रपादेश: । (५३८) सहायकनिर्देशात् । पाणिनिः ७।४।१७,१८,१९,२० । एतन्मते वचधातोः उम्-आगमः, श्विधातोः अ-आदेशः, पतधातोः पुम्-आगमः, वसधातोः थम्-आगमश्च स्यात् ।

† वेमतुरित्यादिः (५०९) वृवमभ्रमिति वा द्वितीयः अकारस्य एकारश्च । अवसहीति वि-सह—धी-त, (६११) वा णत्वम् । परिषहिता (५०२) नित्यं णत्वम् ।

सहवहोः अवर्णस्य ओ स्यात् ढे परे। निषोढा, (५७२) षोत्वाच्च सः।*

(११७) षद लृ जो विषादे गतौ।

निषीदति। न्यषदत्। निषसाद। प्रतेस्तु प्रतिसीदति।†

(११८) शद लृ औ शाते।

६५४। शदोऽपि सं। (शदः ५।, अपि ०।, सं १।)।

शीयते। अशदत्।‡

(११९) फण मि ष गतौ।

फेणतुः पफणतुः, फेणिथ पफणिथ।

(१२०) राजृ अ यं दीप्तौ।

रेजतुः रराजतुः, रेजे रराजे। (५७८) विधिबलादातोऽप्येत्वं।§

---

* निषोढा इति नि-सह—डी-ता, (६०६) इणोऽभावपक्षे (१७५) तस्य ढः, अनेन अकारस्य ओकारः, (५७२) सस्य षः, (८०) तस्य ढः, (७७) ढलोपः। एवं षोढव्यः। वोढा, वोढव्यः। पाणिनिः ६।३।११२।

† निषीदति, नि-षद-तिप्, (५९७) सीदादेशः। (५७२) षत्वम्। न्यषदत्—टौ-दि, (५६५) लदित्वात् ङः। अड्व्यवधानेऽपि षत्वम्। निषसाद—डौ-णप्, द्वित्वादिकं, (६२४) द्विर्भिन्नस्य षत्वनिषेधः, षोस्तु षत्वम्। (५०२) प्रतिवर्जनात् प्रतिसीदतीति न षत्वम्।

‡ अप्विषये शदो सं स्यात्, यत्र यत्र अप् तत्र तत्रोत्कमिणेदसिलर्थः। शीयते (५९७) शीयादेशः। अपि किं, अशदत्, अप टौ-दि (५६५) ङः। पाणिनिः १।३।६०।

§ फेणतुरित्यादि (५७२) फणादित्वात् वा एत्वं, द्विलोपश्च। विधिबलात् राजृभ्य च प्रभृतीनां फणादिपाठयोरादाकारस्यापि एत्वं द्विलोपश्च।

एवं (१२१) टु भ्राशृ ङ ष दीप्तौ।

भ्राश्यते भ्राशते। भ्रेशे बभ्राशे।

एवं (१२२) टु भ्लाशृ ङ ष भासि। *

(१२३) ष्वन प शब्दे।

विष्वणति अवष्वणति मांसं, व्यष्वणत्, विष्वेणतुः विषष्वणतुः। विस्वनति वीणा, निस्वनति भक्षं, (५७२) अवव्यवेत्युक्तेर्न षः।†

(१२४) खनु ञ विदारे।

(२३०) हनगमेत्युङ्लोपः, चख्नतुः चख्नुः।

## ६५५। खन-सन-जनां ङा झसे, ये तु वा।

(खन-सन-जनां ६॥, ङा ।१।, झसे ७।, ये ७।, तु ।१।, वा ।१।)।

खायात् खन्यात्। ‡

---

* भ्राश्यते इति (५९४) श्यन् वा। भ्रेशे इति फणादित्वात् आतोऽस्यैत्वम्। भ्राश-भ्लाशौ दन्त्यसान्तौ च।

† समन्तं मांसं भुङ्क्ते इत्यर्थः, अवष्वणतीति विधानबलात् अकारात् परस्यापि षत्वम्। व्यष्वणदिति वौ-दिप्, अभ्यवष्वणोऽपि षत्वम्। विष्वेणतुरिति फणादित्वात् वा एत्वं, द्विलोपश्च, विषष्वणापि षत्वम्। वीणा विस्वनति शब्दायते, अशनार्थभिन्नत्वात्; भक्षं निस्वनति भुङ्क्ते, वि-अवभिन्नपूर्वत्वात् न षत्वम्।

‡ एषां ङा स्यात् झसे परे, ये तु वा, [illegible] बाधे। अत्र पिति झसे परे न स्यादिति बोध्यं, तेन यङ्लुकि चंखन्ति चंखंसीत्यादि। (अतएव क्ङिति झलादौ परे इति पाणिनिः।) एवं अयङ्भिन्ने ये परे बोध्यं, तेन जन्यमित्यादि। पाणिनिः ६।४।४२,४३।

(१२५) चायृ ञ निशामे अर्चे ।

अचायीत्, (६४२) य्वोर्लोप इति, अचासीत् ।

(१२६) लष ञ स्पृहायां ।

लष्यति लषति । *

(१२७) गुहू ञ संवरणे ।

**६५६ । गुहो णोह्रः ।** (गुहः ६।, णोः ६।, ऊः १।) ।

गुहो णोह्रः स्यात् । गूहति गूहते । अगूहीत् अघुक्षत् । †

**६५७ । गुहदुहदिहलिहां टौमदन्त्ये न सिः सक् वा ।**

(गुह-दुह-दिह-लिहां ६॥, टौमदन्त्ये ७।, न ।१।, सिः १।, सक् ।१।, वा ।१।) ।

एषां टौमदन्त्ये परे सिर्न स्यात्, सक् च वा स्यात् ।

अगूढ़ अघुक्षत । ‡

---

* अचायीदिति (५७२) वा इम् । लष्यतीति (५९४) श्यन् वा ।

† ऊति (९८३) गुहां गोह्यमित्युदाहरता अचि परे एवायं विधिरिति सूचितं, तेन गूहिता गोढ़ा, गूहिष्यति घोक्ष्यतीत्यादि । अगूहीदिति (५७१) वा इम् । पक्षे अनिम्त्वात् (६०५) सक्, (१०५,१७७,६०२,१११) अघुक्षदिति । पाणिनिः ६।४।८९ ।

‡ ञ्या मं टौमं, टौमे दन्त्यः टौमदन्त्यस्तस्मिन् । एषां सि नं स्यादिति पञ्चमीं हित्वा षष्ठी-निर्देशेन, गुहधातोः सेम्पक्षे जातः सिः टौमदन्त्येऽचरे परे न तिष्ठेत्, सेर्लोपत्वेन झपो न प्रसङ्गः । अनिम्पक्षे (६०५) सूत्र स्यनेन जातः सक् च वा तिष्ठेदित्यर्थः, अतः सको-ऽभावपक्षेऽपि झपो न प्रसङ्गः । तथा दुह-दिह-लिहाम् अनिमिञ्झन्तत्वात् सिप्राप्तिरेव नास्ति, सक् तु वा स्यादेव, सकोऽभावपक्षे झपो न प्रसङ्गः, सक्षदगतो विप्रतिषेधो यद्बाधितं तद्बाधितमेवेति न्यायादित्यर्थः । अगूढ़ इति गुह-टौ-तम्, अनेन सेरभावे, (१०५३) हस्य ढः,(५७५)

## ६५८ । सकोऽल्लोपोऽच्यथ्वे ।

(सकः ६।, अत्-लोपः १।, अचि ७।, अथ्वे ७।) ।

सकोऽकारस्य लोपः स्यादथ्वे अचि परे ।

अगूहिषि अघुक्षि । अगुह्वहि अघुक्षावहि । दन्त्ये किं, अगूहिष्महि अघुक्षामहि । थ्वे किं, अगूहिषत अघुक्षन्त । *

(१२८) क्त अ क्त्वा ।

## ६५९ । इगुडुर्मढौस्यनिम् किद्गमस्तु वा ।

(इगुडुः ५।, म-ढौसि ।१।, अनिम् ।१।, कित् ।१।, गमः ५।, तु ।१।, वा ।१।) ।

---

तस्याने घः, (४०) धस्य ढः, (७७) ढलोपः पूर्वस्य च दीर्घः । अघुक्षत इति सक्, (१०५, १७७, ६०२, १११) । सको विकल्पपक्षे तु अगूढ इत्येव । मे किं, अघुक्षत् । (दन्त्यौष्ठ्योऽपि वकारो दन्त्यग्रहणेन गृह्यते, तेन अगुह्वहि अघुक्षावहि इति काशिका सिद्धान्तकौमुदी च ।) पाणिनिः ७।३।७२ ।

* अतो लोपः अल्लोपः । न थ्वम् अथ्वं तस्मिन् । बहुवचनमिदं अचि विषये द्रष्टव्यः । अगूहिषि—टीन्ड, (५७१) इम् । इम्-विकल्पपक्षे अघुक्षि (६०५) सक्, अनेन सकः अकार-लोपः, (१०५) हस्य ढः, (१७७) गस्य घः, (६०२) ढस्य कः, (१११) षत्वम् । वहि—अगुह्वहि ढिर्निषेधः, वकारस्य दन्त्यत्वेन भसत्वाभावात् ढो ढो भाविन्यासामार्ति । सक्पक्षे (१०८) अकारस्य आकारः । अगूहिष्महीति मकारस्य दन्त्यत्वाभावात् न विनिषेधः । इमी विकल्पपक्षे सक् । अगूहिषत इति (५५५) आत्मनेऽन्तस्य अवि अन्तस्थाने अत् । अघुक्षन्त इति इम्विकल्पपक्षे सक्, अत्र अ-वर्णमात्रेण न अकारलोपः, परन्तु (५६२) लोपोऽल्लोऽदे-ष्वोरित्यकारलोपः, तस्य स्थानिवत्त्वात् न अन्तस्थाने अत् । अकारलोपे अदन्तत्वाभावेऽपि अन्तं इति वचनं ज्ञापयति—(२६) लोपोऽल्लोपस्येरिति, (५६२) लोपोऽल्लोऽदेष्वोरिति, (७०५) दधातोपोऽसिमद्वोरित्येतेष्वल्लोऽन्यसूत्रेषु अकारलोपस्य स्थानिवत्त्वं नास्तीति । तेन (६७०) सुगम्लोऽच इत्यादिना अकारलोपे स्थानिवत्त्वनिषेधात्, (५५५) आत्मनेऽन्तस्य इत्यस्य प्राप्तौ दुहते दिहते लिहते इत्यादि सिद्धम् । पाणिनिः ७।३।७२ ।

इगुङ ऋवर्णान्ताच्च परा झे लिङा अनिम् झौ सिच् कित् स्यात्, गमस्तु वा। अहृत, अहृषातां। हृषीष्ट।*

(१२९) टु डु भृ ञ भृतिपुष्ट्योः।

बभृव।†

(१३०) दान ञ आर्जवे छिदि।

दीदांसति, दीदांसते।‡

एवं (१३१) शान ञ तेजे।

शीशांसति।

(१३२) भजौ ञ भागसेवयोः।

भेजे, भेजिथ बभक्थ।

(१३३) श्रि ञ सेवायां।

(६१३) श्रिश्रीत्यङ्, अशिश्रियत्। श्रयिता।§

---

* इक् उङ् यस्य स इगुङ्—भिद बुध सृज प्रभृतिः। इगुङ् च ऋच इगुङ्ऋ तस्मात्। झौ च सिचेति, झे (आत्मनेपदे) झौसि, मझौसि। नास्ति इम् यस्य सोऽनिम् इति मझौसेर्विशेषणम्।। गमस्तु आत्मनेपदे (८०५) समगत समगंस्त। मझौसि किं, अस्राक्षीत्, अस्राक्षीत्। अहृत इति तन्, सिः, अनेन कित्, (५६२) सेर्लोपः। मझौ यथा—भित्सीष्ट, भुत्सीष्ट। पाणिनिः १।२।११,१२,१३।

† बभृव इति (५८४) नेमसृत् इति इम्निषेधः।

‡ दीदांसतीत्यादि (६१०) सन्, खेञौ च।

§ भेजे इति (५७९) अः एः, खिलोपश्च। भेजिथ इति (५८९) वा इम्। पक्षे बभक्थ (२११) कुङ्। अशिश्रियदिति अङ्, द्वित्वादिक, (५८८) इयः। श्रयिता (५८७) श्रिवर्जनात् इम्।

(१२४) रञ्जो ञ रागे ।

६६० । रन्जो ऽप्घकानास्ध्विनौ न-लोपो ञौ तु मृगरमणे । (रन्जः ६।, घप्-घक-घन-घस्-ध्विणौ ७।, न-लोपः १।, ञौ ७।, तु ।१।, मृगरमणे ७।) ।

रजति रजते । ररजतुः ररञ्जतुः । *

(१२५) लिषो अ कान्तौ ।

अलिषत् । लिषोष्ट । †

(१२६) यजे ञो देवार्चा-दान-सङ्गतौ ।

(६५१) व्ययश्चेति ञिः, इयाज ।

६६१ । ग्रहस्वपाद्योः कङित्-कितो ञिः ।

(ग्रह-स्वपाद्योः ६॥, कङित्-कितोः ७॥, ञिः १।) ।

ग्रहादेः किति ङिति, स्वपादेः किति, ञिः स्यात् ।

ईजतुः ईजुः, इयजिथ इयष्ठ । ‡

---

* घप् च घक च घन च घस् च ध्विणिश्चेति तस्मिन् । एतेषु प्रत्ययेषु परेषु रन्जः न-लोपः स्यात्, ञौ परे तु मृगरमणेऽर्थे । ध्विणिरिति क्तप्रत्ययो वक्तव्यः, तस्मिन् रागोऽपि (८८४सूत्रटीका द्रष्टव्या) । रञ्जनमिति तु ल्यान्तस्यैव । रजति रजते इति अपि नलोपः । ररजतुः ररञ्जतुरिति (५६६) वा कित्संज्ञायां, (५६०) किति नलोपः । पाणिनिः ६।४।२६, ३।१।१४२, "रजकरजनरजःसूपसंख्यानं कर्त्तव्यम्," "णिजुदि च रञ्जेरुपसंख्यानं कर्त्तव्यम्," "रञ्जेर्णौ मृगरमण उपसंख्यानं कर्त्तव्यम्" इति वार्त्तिकानि च । मृगरमणमाखेटकमिति भट्टोजिदीक्षितः । पाखेटो मृगव्य मित्यमिरमरः ।

† अलिषदिति (६०५) सक् । लिषोष्ट (६५८) किच्चात् न गुणः ।

‡ ग्रहश्च स्वपश्च ग्रहस्वपौ, तौ आदौ ययोस्तौ तयोः । कङौ इतौ यस्य स कङित्, कङिच्च किच्च कङित्कितौ तयोः । (६५१) व्ययश्चेति सूत्रं पठिताः यजादयः स्वपादयश्च

(१३७) डुवपँ वपौ अ मुण्ड-बीजोप्त्योः ।

प्रण्युवाप ।

(१३८) वहँ औ प्रापणे ।

प्रण्यवाक्षीत्, अवोढ । उवाह, ऊहे । *

(१३९) वे ञे स्यूतौ ।

## ६६२ । ज्यां न वे-प्रच्छां ।

(ज्यां ७।, न ।१।, वे-प्रच्छां ६।।।) ।

वेञ प्रच्छि व्रश्चि भ्रस्जीनां जिर्न स्यात् ज्यां । ववौ, ववतुः । †

## ६६३ । वेञो वय् वा । (वेञः ६।, वय् ।१।, वा ।१।) ।

वेञो वय् स्याद्वा ज्यां । . उवाय, ऊयतुः । ‡

---

श्रेयाः । यज –अतुस् द्वित्वादि, व्यथयहेति खेर्जिः, अनेन मूलस्य जिः । एवं ईजुः । इयजिथ (५८९) वा इम् । पक्षे (१५४) षङ्, (४७) षस्य ठः । पाणिनिः ६।१।१५,१६ ।

* प्रण्युवाप प्र-नि-वप-णप्, द्वित्वादिकं, (६५१) खेर्जिः । (५४९) गदाद्यन्तर्गेणत्वम् । प्रण्यवाक्षीत् प्र-नि-वह-टौदि, (१७५) हस्य ढः, (६०२) ढस्य कः, (५७४) अनिमत्वात् वृद्धिः, गदाद्यन्तर्गेणत्वम् । अवोढ वह-टौतन्, (५६२) सिलोपः, हस्य ढः, (६५३) अकार ओकारः, (५७५) तस्य धः, (४७) धस्य ढः, (७७) ढलोपः । उवाह वह-ठौ-णप्, द्वित्वादिकं, (६५१) खेर्जिः । ऊहे खेर्जिः, (६६१) मूलस्य जिः ।

† प्रच्छाम् इति बहुवचनं गणार्थम् । वेञो जिनिषेधेऽपि तदादेशस्य वयो न जिनिषेधः, अन्यथा तत्र (६५१) वयो ग्रहणस्य वैयर्थ्यात् । वे-ठौ-णप् (६०८) एकार आकारः, द्वित्वादि, (६०९) णप् औः, ववौ, अत्र खेर्न जिः । एवं ववतुः, अत्र खेर्मूलस्य च जिनिषेधः । पाणिनिः ६।१।४०, वार्त्तिकञ्च ।

‡ उवाय इति अनेन वयादेशे, (६५१) खेर्जिः । ऊयतुरिति खेर्मूलस्य च जिः । पाणिनिः २।४।४१, ६।१।१८ ।

## ६६४ । य व: किति । (य ।१।, व: १।, किति ७।) ।

वेञो यस्य व: स्याद्वा व्यां किति । ऊवतु: । *

(१४०) व्ये ञे ह्वतो ।

## ६६५ । ना व्येञ्व्यां । (न ।१।, वा ।१।, व्ये: ६।, व्यां ७।) ।

व्येञ वा न स्यात् व्यां । विव्याय । †

## ६६६ । ञिं वान्त्य: किति ।

(ञिं २।, वा ।१।, अन्त्य: १।, किति ७।) ।

ह्वेञ्व्येञोऽन्त्यो भागो ञिं वा प्राप्नोति व्यां किति ।
विव्यतु: विव्ययतु:, विव्ययिथ । ‡

---

* वेञो यस्य वचनात् तदादेशस्य यस्यैव वकारोऽयमर्थः । ऊवतुरिति ऊयतुरितिवत् साध्यं, वैकल्पिकेन यकारस्य वकारः । पाणिनि: ६।१।३९ ।

† व्ये ञे ह्वतावित्यस्य व्यां विभक्तौ (६०८) वा न स्यात् । अनुवृत्तावपि व्यामित्युपादानं, ञितीत्यस्य वा इत्यस्य च निवृत्त्यर्थम् । विव्याय इति वा-निषेधे (६५१) वच्यादित्वात् ञोर्जिः, (५००) वृद्धिः, (१५) ऐ-स्थाने आय् । पाणिनि: ६।१।४६ ।

‡ (६६१) यङ्लपावोरित्यनेन प्राप्तस्य ञोर्जिंविकल्पविधानम् । ञिं वा प्राप्नोति इति व्यादौ ञि-विधाने पक्षात् यि इत्यस्य द्वित्वे, वच्यादित्वात् (६५१) ञोर्जिं-विधाने ऊयतुरित्यनिष्टरूपं स्यात्, (५२६) जि: पुनर्न स्यादित्यस्य नाम विषय: द्विर्भूतस्य ञे: प्राप्त्यभावात् । विव्यतुरिति व्ये व्ये इति द्वित्वे, (६५१) ञोर्जिः, पक्षेण मूलस्य जि:, (५८४) इस्थाने य । विव्ययतुरिति पक्षेण मूलस्य ञोर्जिंविकल्पपक्षे (२५) ए-स्थाने अय् । विव्ययिथ इति (५८९) थेन-वर्जनात्, (५५४) नित्यमिष्, अत्र च (५२६) पुनर्जिंविधाननिषेधात् यि इत्यस्य न ञ: । "अस्यैवा यङ्लपसामर्थ्यात् ञ्यादि: द्वैधं बाधित्वा सम्प्रसारणम्" इति वृत्ति: ।

(१४१) ह्वे ञै स्पर्धायां शब्दे च ॥

अह्वत्, अह्वत अह्वास्त । *

## ६६७ । ह्वो ह्वेर्जिः । (ह्वः ६।, ह्वेः ६।, जिः १।) ।

ह्वेर्ह्वो जिः स्यात् । जुहाव, जुहुवतुः । †

(१४२) ऐ वसो निवासे ।

## ६६८ । स त् स्वरे । (स ।६।, त् ।१।, सि ७, स्वरे ७।) ।

सस्य त स्यादरे से परे । अवात्सीत् अवात्तां, उवास ऊषतुः । ‡

(१४३) वदे वाचि ।

अच्छ-वदति । (५७४) व्रजवदेति व्रिः । अवादीत् । उवाद, ऊदतुः । §

---

* अह्वदिति ह्वे-टी-दि, (६१८) ङः, (६१०) आ-लोपः । अह्वत अह्वास्त इति, (६१८) लिम्ब्भस्तु मे वा इत्यनेन वा ङः ।

† जेः पुनरुपादानात् 'क्यां' किति, वा, इति अयायां नानुवृत्तिः । ह्वे-धातौ यंच लिमं तच चिमूंलस्य च जिः स्यादित्यर्थः । यथा अजूहवत् जुहावयति इत्यादि । जुहाव इति अनेन उभयच जिः, (५७७) वृद्धिः, (२५) औस्थाने आव् । जुहुवतुरिति (५८८) उस्थाने उव् । पाणिनिः ६।१।३२ ।

‡ अवात्सीत्, (५७४) अनिमत्वात् वृद्धिः, अनेन सस्य त । अवात्तामिति अन्तरङ्गत्वात् निरवकाशत्वाच्च आदौ सस्य तकारे पश्चात् सिलोपः । उवास ऊषतुः (६५१), यजादित्वात् वोर्जिः । (६६१) किति परे मूलस्य जिः । पाणिनिः ७।४।४९ ।

§ अच्छ-वदति (५७१) समासः, सम्मुखे वदतीत्यर्थः । उवाद ऊदतुः, यजादित्वात् जिः ।

(१४४) टु ओ श्वि इर् गति-वृद्ध्योः ।

(५६५) शासुलिदद्युदिति ङः वा । अश्वत् ।

(६१२) श्रिश्रीत्यङ् वा । अशिश्वियत् अश्वयीत् । *

## ६६८ । श्वेर्ञि र्वा यङ्-ञ्यो अङ्सनोः ।

(श्वेः ६।, ञिः १।, वा ।१।, यङ्-ञ्योः ७॥, अङ्-सनोः ७॥) ।

श्वेर्ञि र्वा स्यात् यङि ञ्यां ञेः परे अङि सनि च ।

शुशाव शिश्वाय, शुशुवतुः शिश्वियतुः । श्वयिता । शूयात् । †

इति मिश्रपादः । ‡

इति आद्यध्यायः ।

---

* अश्वत् ञि-टी-दि, ङः, (६५२) श्विश्वाने च । ङ-विकल्पपक्षे अङ्, ञित्वादि, (५८८) नृश्वोरिति इय् अशिश्वियत् । अङ्-विकल्पपक्षे ञ्यां सिः, (५५४) इम्, गुणः, (३५) एज्झाने अय् अश्वयीत् ।

† यङ् च ठी च ती तयोः । अङ् च सन् च अङ्सनी, ञेः परौ अङ्सनी, तयोः । शुशाव इति आदौ ञिः, पश्चात् ञित्वादिकम् । पक्षे शिश्वाय । एवं अतुसि (५८८) यथायोग्यम् उव् इय् । शूयादिति (६६१) ञिः । (५९०) दीर्घः । पाणिनिः ६।१।३०,३१ ।

‡ (११३—११८) संख्यान्तर्गत-भ्वादिगणीयानां, (११९—१२३) संख्यान्तर्गत-फणादिगणीयानां, (१२४—१२५) संख्यान्तर्गत-अनुबन्धानां, तथा (१२६—१४४) संख्यान्तर्गत-यजादिगणीयानां परस्मैपदवतामात्मनेपदवतामुभयपदवताञ्च धातूनामेकत्र सन्निवेशात् मिश्र इति पादनाम ।



# ६ष्ठः । १म-चतुर्गणाध्यायः ।

## १म पादः—अदादिः ।

### (१४५) अद भक्षणे ।

**६७० । लुगद्भ्यो ऽपः ।** (लुक् ।१।, अदभ्यः ५।३।, अपः ६।)।

अदादेः परस्यापो लुक् स्यात् । अत्ति । *

**६७१ । हुझसो हेर्धिः ।** (हु-झसः ५।, हेः ६।, धिः १।)।

हो झंसाच परस्य हे धिः स्यात् । अद्धि । †

**६७२ । झसाद्भ्यां दिसे लोपामौ ।**

(झस-अदभ्यां ५।२।, दि-सेः ६।, लोपामौ १।२।)।

झसात् परयो दिस्योर्लोपः स्यात्, अदः परयोरम् स्यात् । ‡

आदत् आदः ।

---

* अदभ्य इति बहुवचनं गणार्थम् । वे अप् रे श्यन अदादिवर्जनं न ज्ञात्वा अप लुक्-करणं कदाचित् अपः स्थित्यर्थं, तेन अहनदित्यादि । अपिच, (१०६९) अप्-विशिष्टधातोर्गुणविकल्पे, अदादिगणीयरुदधातोः रोदितं रुदितमित्यादि सिद्धम् (१०६९सूत्रटीका द्रष्टव्या) । लुक्करणात् युतः युवन्तीत्यादौ (९३) लुकि न तद्वेति निषेधात् न गुणः । पाणिनि: २।४।७२ ।

† हु—जुहुधि । अद—अद्धि । रुध—रुन्धि । वश—उड्ढि । चकास—चकाद्धि इत्यादि । (९५६) विशेषविधानात् तातङादेशस्थले न स्यात्, तेन त्वम् अत्तम् अत्तात् अद्धि वा । पाणिनि: ६।४।१०१ ।

‡ दि-सेरित्येकवचनं क्रमनिरासार्थम् । दि-सीरिति घ्या एव, ङ्यान्तु सि-व्यवधानादलभ्यः । पाणिनि: ६।१।६८, ७।३।१०० ।

## ६७३। घस्लृदः सन्ट्यल्घञि।

(घस्लृ ।१।, अदः ६।, सन्-टौ-अल्-घञि ७।)।

अदो घस्लृ स्यात् सनि ङ्यामलि घञि च। (५६५) लित्वात् ङः। अघसत्।*

## ६७४। व्यां वा। (व्यां ७।, वा ।१।)।

जघास आद। (२३०) हनगमेत्युङ्लोपः। जक्षतुः आदतुः, जघसिथ आदिथ।†

(१४६) प्सा च भक्षणे।

प्रप्साति।‡

## ६७५। द्विषविदातोऽनुस् वा।

(द्विष-विद्-आतः ५।, अन् ।१।, उस् ।१।, वा ।१।)।

द्वेष्टे वेत्ते रादन्ताच्च परोऽन् उस् स्याद्वा। अप्सुः अप्सान्।§

---

* सन् च टौ च अल् च घञ् चेति तस्मिन्। सनि जिघत्सति। व्यां, अघसत्, (२३०) ङ-वर्जनात् न उङ्-लोपः। अलि घञि च प्रघसः, घासः। (पाणिनिः २।४।३०) ल्यबादौ तु न घसादेशः। पाणिनिः २।४।३७,३८।

† अदो घस स्यात् वा व्याम्। जक्षतुः उङ्लोपे (६४) घस्य कः, (१११) शासवसघसीति षत्वम्। अद घस इति द्वाभ्यां धातुभ्यां आद जघास इत्यादि-सिद्धावपि एतत्सूत्रकरणं घसधातोरपि अदत्वज्ञापनार्थं, तेन (५८२) अदवर्जनादेव घसवर्जने सिद्धे, घसधातोः जघसिथ इत्यत्र (५८३) नित्यमिट्। पाणिनिः २।४।४०।

‡ (५३८) अदनईति षत्वम्।

§ अन् अन् इति द्वा एव, व्याम् तु द्विषः सकर्मकत्वाभावात् न प्रसङ्गः, तेन व्याम् चकितम्। विदातोस्तु क्विन्वर्जनात् अभीमाप्ती, (५६२) नित्यमुस् अभीविदुः, अयासिषुः। पाणिनिः ३।४।१०८,११०,११२।

(१४७) वश कान्तौ । *

वष्टि । (६६१) ग्रहस्वपाद्योरिति जिः । उष्टः उशन्ति । अवट् । उवाश । †

(१४८) हन हिंसा-गत्योः ।

## ६७६ । वनतनाद्यनिमां अम्लोपो झस्-यप्यतिक्ङपौ ।

(वन-तनाद्यनिमां ६।।।, अम्-लोपः १।, झस्-यपि ७।, अतिकि ७।, ङपौ ७।) ।

एषां अम्लोपः स्यात्, ङपौ झसे यपि च, नतु तिकि ।

प्रणिहतः । (१८८) हनो घ्नो घः । घ्नन्ति । प्रहण्वः प्रहन्वः, प्रहण्मः प्रहन्मः । ‡

## ६७७ । जह्येधि-शाधि हन्यस्ति-शास्ति हिना ।

(जहि-एधि-शाधि ।१।, हनि-असि-शासि ।६।, हिना ३।) ।

एषां हियुक्तानां क्रमादेते स्युः । जहि । §

---

* कान्तिः कामना, इच्छेति यावत् ।

† वश-लिप्, (१५४,४०) षढ्, तस्य टः । अवट् इति दी-दिप् (६७२,१५४,६४) । णौ-णप् उवाश (६५१) वे-र्जिः ।

‡ वन आदिर्यस्य स वनादिः । नास्ति इम् यस्मात् सः । वनश्च तनादिश्च अनिम् चेति तेषाम् । अम् झस् च प्रत्याहारौ । यप् इति (११७६) ल्यप्-स्थानजातः । तिक् (१००७) प्रत्ययः । नास्ति कर्यस्मिन् स तस्मिन्, ङपौ इति झसो विशेषणम् । एषामिति सम्बन्धात्तनादेर्निमाच्च । प्रणि-हत इति अनेन नलोपः ; (५४९) णत्वाद्यन्तनोर्वत्वम् । एवं कृत्वाम इत्यादि म-वान्तहनो वा णत्वम् । पाणिनिः ६।४।३७,३८,३९ ।

§ जहिश्च एधिश्च शाधिश्च क्रमात् । हनिश्च असिश्च शासिश्च तस्य । पाणिनिः ६।४।३५, ३६,११९ ।

## ६७८। हनो वधष्टीश्यसि टीमे तु वा।

(हन: ६।, वध: १।, टीश्यसि ७।, टीमे ७।, तु ।१।, वा ।१।)।

हनो वधः स्यात् श्यां श्यामसि च, टी-मे तु वा। अवधीत्। *

## ६७९। खेर्ह्नो घो ञ्णिति च।

(खे: ५।, ह्न: ६।, घ: १।, ञ्णिति ७।, च ।१।)।

खे: परस्य हनो हस्य घः स्यात्, ञिति णिति च।

जघान, जघ्नतुः। हन्ता। वध्यात्। प्रहणिष्यति। †

(१४९) यु अभिसर्पणे।

## ६८०। रपिद्धस्युवतो ऽद्वेर्व्रिः।

(र-पित्-हसि ७।, उत: ६।, अद्वे: ६।, व्रि: १।)।

अद्वेर्धोरुकारस्य व्रिः स्यात् पिति हसे रे।

यौति युतः युवन्ति। ‡

---

* टी च ढी च अद् चेति तस्मिन्। अद् इति (११२४) प्रत्ययः। ध्यादौ हन्तेः प्रयोगं निषिध्य औपदेशिक-वधधातुः प्रयुज्यते इति तात्पर्य्यम्। अवधीदिति श्यां हनो वधादेशे वधधातोरनेकाच्त्वात् (५५७) इम्, ततः (५६१,५६२) ईम्, सिलोपश्च। एवं (ढी) वध्यात्, (अद्) वधः। टीमे तु—आवधिष्ट आहत इत्यादि। (पाणिनिः १।२।८४, परन्तु इत्यादौ तु न वधादेशः।) पाणिनिः २।४।४२,४३,४४।

† अधागाहर्ध्वयं,, खेः परस्य हनो हस्य घः स्यादिति, ञिति णिति च परेऽपि घः स्यादिति च। खेः परत्वात् जघानिष जिघांसतीत्यादि। ञिति घातयति, णिति घातक इत्यादि। जघ्नतुरिति (२२०,१८९) उङ्-लोपो ङादेश्च। प्रहणिष्यतीति (६१७) इम्। (५४९) नादिहनमोर्नेति णत्वम्। पाणिनिः ७।३।५४,५५।

‡ र्-आदौ पिदादौ हस् चेति तस्मिन्। न द्विरुक्तस्य। यथा यौति नौति रौति। अद्वेः किं, जुहोति। युवन्ति (५८८) उव्। पाणिनिः ७।३।८९।

(१५०) यु ल मिश्रणे अमिश्रणे च।

यौति। यविता। *

(१५१) णु ल स्तुतौ।

अनावीत् अनौषीत्। नुनुविव। *

(१५२) क्ष्णु ल तेजने।

क्ष्णविता।

(१५३) ष्णु ल प्रस्नुत्यां। *

(५९६) स्नुक्रमोऽमे इति इम्। अस्नावीत्।

(१५४) इ-न ल गतौ। †

६८१। यिनोऽच्यणौ। (य।१।, इनः ६।, अचि ७।, अणौ ७)।

इनो यः स्यादणावचि। ‡ यन्ति।

६८२। गा क्यां। (गा।१।, क्यां ७)।

इनो गा स्यात् क्यां। अगात्। इयाय। §

---

* यविता, क्ष्णविता इति (५८७) प्रतिप्रसवात् (५५४) इम्। अनावीदिति (५०२) वा इम्। अजन्तत्वात् (५७४) त्रिः। नुनुविव, (५०२) अव्या इत्युक्तेः, नेमसुमिति (५८४) नियमात्, नित्यमिम्। गणपाठे ष्ण इति षोपदेशनिर्देशः। (५६९) ष्यायादौति षस्याने सः, स्नु इति धातुः।

† इ-न धातौ नकारः (५५२) मूस्थापिबेत्यादिषु विशेषज्ञापनार्थः।

‡ (५८८) नृध्वोरिति प्राप्तव्यस्य इयो बाधकः। पाणिनिः ६।४।८१ ५

§ इ-णप्, वित्वं, (५७७) मूलस्य वृद्धिः। (५८५) इरेः स्थाने इय। पाणिनिः २।४।४५।

६८३। खे: क्विति घं:। (खे: ६।, क्विति ७।, घं १।)।

इन: खे: घं: स्यात् क्विति ख्यां। ईयतु:। *

६८४। घगे ख्यां। (घगे: ६।, ख्यां ७।)।

घगेरिनो घं: स्यात् क्विति ख्यां। ईयात्। घगे: किं, अन्वियात्। †

(१५५) अधीक ङ स्मरणे। ‡

६८५। इन्वदिक:। (इन्वत् ।१।, इक: ६।)।

इन इव इक: कार्य्यं स्यात्, रूपञ्च तद्वत्। §

(१५६) या ङ गतौ।

प्रवियाति। ¶

एवं (१५७) वा ङ गमन-हिंसयो:।

---

* क्विर्धुतस्य इन धातो: ख्या अन्यत्र क्वितोऽसम्भवात् इतौ ख्यामिति व्याख्यातम्। ईयतुरिति, (६८१) यकारे, अनेन दीर्घ:। पाणिनि: ७।४।६९।

† (५९०) धौऽङ्ष्वरे इत्यनेन दीर्घे सिद्धेऽपि, अयं नियमार्थ:, तेन ख्यां क्विति घगेरिन एव दीर्घ: न तु अन्येरिति। पाणिनि: ७।४।२४।

‡ ङ-क: ककारविज्ञार्थ:। अधिपदग्रहणम् अन्यपूर्व्वस्य केवलस्य च प्रयोगनिरासार्थम्।

§ इनधातोरिव इकधातो: कार्य्यं स्यात्, रूपञ्च तद्विधानेन सर्व्वत्रैव स्यादिति अर्थ:, तेन (८०६) अधीनिकोरित्यत्रापि ग्रहणम्, अतएव इक-धातोरपि अधिजिगमिषतीति। भट्टी तु अधीतवौ रावणयोरध्यैधिषत अतिदिदेशिकस्यानित्यत्वेन इन्त्वस्याभावात् (६८१) यकारादेशं बाधित्वा, (५८८) इय-आदेश:। "इन्वदिक इति वक्तव्यम्" इति वार्त्तिकम्।

¶ प्रवियाति (५४८) गदनदेति णत्वम्।

(१५८) द्रा ख स्वप्ने पलायने च।

(१५९) ख्या ख ख्यातौ कथने।

अख्यत्। *

(१६०) मा ल च माने।

प्रणिमाति। मेयात्। *

(१६१) विद ख ज्ञाने।

## ६८६। वेत्तेः कौपं ठौपं वा।

(वेत्तेः ५।, कौपं १।, ठौपं १।, वा ।१।)।

विदः परस्य क्याः पस्य ठ्याः पं स्याद्वा।

वेद विदतुः विदुः, वेत्थ विदथुः विद, वेद विद्व विद्म। पक्षे सुगमं। †

## ६८७। ञाम् वा क्यां ग्यान्तु ञानु।

(ञाम् ।१।, वा ।१।, क्यां ७।, ग्यां ७।, तु ।१।, ञ ।१।, अनु ।१।)।

वेत्तेरक्यां ञाम् वा स्यात्, ग्यान्तु ञञ एवानुप्रयोगः। ‡

---

* अख्यदिति (६१८) ङः, (६१०) आलोपः। प्रणिमातीति (५४८) णदनदेति णत्वम्। मेयादिति (६१२) ऐ।

† स्थानिवदादेश इति न्यायात् ठौपस्य कौप-तुल्यत्वात् न विलं, (६८७) न ञाम्, न वा वेत्थ इत्यादाविम्। कौपस्थं कौपरस्मैपदविभक्तीनामाकारभेद इति। पाणिनिः ३।४।८३।

‡ ग्यान्तु इत्यनेन औपरेऽपि ञाम् वा स्यात्, तस्मात् ञञ एवानुप्रयोगः नतु अस्भुवो-रिति। [illegible] पाणिनिः ३।१।४१।

## ६८८। तनृभ्यः उप् रे वे।

(तनृभ्य: ५॥, उप् ।१।, रे ७।, वे ७।)।

विदाङ्करोतु वेत्तु। *

## ६८९। कृञो ऽदुगुणौ रे।

(कृञ: ६।, अत् ।१।, उ ।१।, गुणौ ७।, रे ७।)।

कृञो ऽकार उः स्यात् गुणौ रे। विदाङ्कुरुतां वित्तां। अविदुः अविदन्। †

## ६९०। व्यां सौ र वा दधोः।

(व्यां ७।, सौ ७।, र ।१।, वा ।१।, द-धोः ६॥)।

दधो रेफः स्याद्वा सौ व्यां। अवेः अवेत्, अवित्तं अवित्त। विदाम्बभूव विवेद। ‡

---

* तनृभ्य इति बहुवचनं गणार्थं, तनादिभ्य इत्यर्थः। उप: अपावितौ उकारश्चितिः, अपो बाधकोऽयम्। विदाङ्करोतु इति कृ-प्रयोगे, कृञस्तनादित्वात् उप्, उपि परेऽ(५४२) कृञो गुणः, पुनः तुप् परे उप उकारस्य गुणः। पाणिनिः ३।१।७९।

† नास्ति गः (गुणी प्रत्ययः) यस्मात् सोऽगुणम्, गुणौ इति रे इत्यस्य विशेषणम्। अगुणिप्रत्ययपूर्व्ववर्त्तिनि रे परे इत्यर्थः। विदाङ्कुरुतामिति तापि परे कृ इत्यस्य गुणे, विदाङ्कर् इति स्थिते, अनेन अकार उकारः। अविदुरिति झा अन्, (६०५) विदविद्भ्यां उस् वा। पाणिनिः ६।४।११०।

‡ अवेरिति विद्-दी-सिप्, (६०२) सिपो लोपः, तल्लोपे अवतधमिति न्यायादनेन दस्य रेफः, (१०६) रस्य विसर्गः। विदाम्बभूव (६८०) विकल्पेन आम्, (५८१) भू-प्रयोगः। एवं विदामास, विदाञ्चकार। पक्षे विवेद। पाणिनिः ८।२।७५।

(१६२) अस सा भुवि ।

## ६९१ । लोपोऽस्यसोर्ङिद्रसो रघ्यां ।

(लोपः १।, अस्ति अ-सोः ६॥, ङित्-र-सोः ७॥, अघ्यां ७।) ।

अस्तेरकारस्य ङिति रे, सस्य च से, लोपः स्यात्, नतु घ्यां । स्तः सन्ति, असि, एधि, आसीत् आस्तां । *

## ६९२ । भूरऱे । (भूः १।, अरे ७।) ।

अस्ते भूः स्यादरे । अभूत् । †

## ६९३ । प्रादुर्गीकः सः षो ऽच्ये ।

(प्रादुर्-गि-इकः ५।, सः ६।, षः १।, अच्-ये ७।) ।

प्रादुःषन्ति, प्रादुःष्यात् । निषन्ति । ‡

---

* अश्च स च असौ, अस्तेरसौ अस्त्यसौ तयोः । ङिश्चासौ रश्चेति ङिद्रः, ङिद्रश्च स च तौ तयोः । स इत्यनकारान्तग्रहणात् सि से स्व इति त्रयाणां ग्रहणम् । अरे परे (६९२) भू-आदेशेन अस-स्थित्यसम्भवात्, केवलं ङित्ग्रहणेन सिद्धे, रग्रहणम् अरे परे "लावण्य-उत्पाद्य इवास यत्नः" इत्यादौ कदाचि-दसधातोर्भू-आदेशनिषेधार्थम् । स्तः सन्ति उभयत्र ङिति रे परे अ-लोपः । असि इति से परे स-लोपः । ग्या हि (६७७) एधि । ग्या दिप् (५६१) ईम् । पाणिनिः ६।४।१११, ७।४।५० ।

† अरविषये असधातुस्थाने भूधातुरादिश्यते, तेनाभूधातु-निमित्तं सर्व्वं कार्य्यं स्यादिति । पाणिनिः २।४।५२ ।

‡ गेरिक् गीक्, प्रादुश्च गीक् च तस्मात् । प्रादुर्शब्दात् गेरिकश्च परस्य असधातोः सस्य षः स्यात् अचि ये च परे । अचि ये च किं, प्रादुःस्तः इत्यादौ न षत्वम् । पाणिनिः ८।३।८७ ।

(१६३) मृजू ष प शुद्धौ ।

### ९९४ । मृजोऽकङिति ञिर्वा त्वच्यणौ ।

(मृज: ६।, अकङिति ७।, ञि: १।, वा ।१।, तु ।१।, अचि ७।, अणौ ७)।

अकङिति मृजो ञि: स्यात् अचादावचि तु वा । मार्ष्टि मृष्ट:, मार्जन्ति मृजन्ति । *

(१६४) वच लो वाचि । †

(६५२) वचस्वखिपतामिति वोच । अवोचत् । उवाच ऊचतु: ‡

(१६५) रुदिर् ल घ रोदने ।

### ९९५ । रुद्भ्योऽयो हस्रस्येम् ।

(रुद्भ्य: ५।।, अय: ६।, हस्-रस्य ६।, इम् ।१।)।

रुदादे: परस्य अयस्य हसस्य रस्य इम् स्यात् । §
रोदिति रुदित: । अय: किं, रुद्यात् ।

---

* क-ङौ इतौ यस्य स कङित्, न कङित् अकङित् तस्मिन् । मृज इति मृजादीनाम्-मृजादीयवोर्वोर्ग्रहणम् । मृजो वा ञिरिच्छन्ते ङिति अकङितीति वचनं ञिमार्जनीयम् अनिषि सनि (८०४) अनुवृत्तेऽपि प्रतिपत्त्यर्थम् । मार्ष्टि अतेन इति:, (१२४) षत्व । पाणिनि: ७।२।११४, वार्त्तिकम् ।

† एतस्मात् धातो: अन्ति-अन्तु-अन्तौ नास्ति ।

‡ अवोचदिति (६१८) ङ: । उवाच (६५१) णि: । ऊचतु: (६५१,२६१) कि: ।

§ रुद्भ्य इति रुदादिभ्य इत्यर्थ:, 'स्वपश्च'(५६१) सूत्रे उक्त: । इम् धातो रवीति पैत्रकस्य । रोदिषये 'अभाती विचित्रं, तेन रोदिषतीत्यादौ (५५४) इम् आदेश । पाणिनि: ७।२।७६ ।

## ६९६ । दिस्योरम् वा । (वि-जोः ६।१, अम् ।१, वा ।१) ।

रुदादेः परयो दिंस्योरम् स्यात् । अरोदम् अरोदीत्, अरोदः अरोदीः । *

### (११६) ञि ष्वपो घ लु स्वप्ने ।

विस्वपिति, (६२५) सवत्वान्न षः । विषुष्वाप, दुःषुषुपतुः, (६२५) निर्वत्वात् षः । †

### (११७) अन घ लु प्राणने ।

प्राणिति प्राणिति । ‡

### (११८) श्वस घ लु प्राणने ।

श्वसिति । अश्वसीत् (५७६) श्वयादित्वान्न ञिः ।

### (११९) जक्ष घ लु घ भक्ष-हासयोः ।

जक्षिति ।

## ६९७ । अन्तोऽदहः । (अन्तः ६।, अत् ।१, हः ५।) ।

---

* द्विस्योरिति व्यक्त एव, व्यान्तु सि-व्यवधानादलाभः । अमो न इत् आदौ । अरोद-दिति अम्, पक्षे (५६१) ईम् अरोदीत् । एवं व्यः सिपि । व्यान्तु (५६५) न के भवदत् अरोदीदिति । पाणिनिः ७।३।९९ ।

† विषुष्वाप इत्यत्र (५७२) दयसादेरिति नियमात्, अत्र ष्वेर्ष पत्वं, स्थिनिषिचक्रं स्वस्य पत्वं (१११) क्रियादित्वेन स्यादेव । दुःषुषुपतुरित्यत्र गलगत्वादादौ (६६१) वौ कति, पक्षे च कति, पश्चात् षित्वमिति ।

‡ प्राणितीति (५४८) अनर्विधेर्विर्ष वा स्यात् ।

डेः परस्यान्तोऽत् स्यात्। जक्षति। *
(५६२) अनुस्सिडेरिति। अजक्षुः।

(१७०) जागृ च तु जागरणे।

९९८। जागुरसञ्ज्यां। (जः ११, उसि ७।, अज्यां ७।)।

डेरुसि परे गुः स्यात्, न तु ज्यां। अजागरुः, अजागः। अजागरीत्। जागरामास जजागार। †

९९९। जाग्रोऽणब्वीण्ङिति कसुकाने तु वा।

(जाग्रः ६।, अ-णप्-वि-इण्-ङिति ७।, कसु-काने ७।, तु ।१।, वा ।१।)।

जागर्गुः स्यात्, न तु णपि वौ इणि ङिति च, कसौ काने तु वा। अजागरतुः। ‡

---

* अन् इति ह्रस्वनिर्देशात् अन्ति अनु अन्तामित्यादीनां ग्रहणम्। डेरिति (१०४) सूत्रे भाषितात्। जक्ष-अन्ति जक्षति, एवं ददति। जिक्षोर्बन्तोऽन्त्यादौ (५४२) गपो लोपे स्थानिवत्त्वान्न अन्तोऽत्। पाणिनिः ७।१।४।

† अजागरुरिति जागृ-द्या अन्, (५६२) अन उस्, अनेन गुणः। ज्यान्तु जुहुवुः। अजागः—द्याः सिप्, (५४२) गुणः, (६०२) सिपो लोपः, र विसर्गः। अजागरीत् (५०४) न वृद्धिः। जागरामास (६००) वा आम्। पाणिनिः ७।३।८३।

‡ जाग इति सूत्रत्वात् न वृः (१४१)। अप् च विश्च इण् च ङिच्चेति तत्, पश्चात् नञर्थेन तत्सिन्। णप्प्रभृतिषु गुणनिषेधात् अन्यत्र सर्वत्रैव गुणः स्यादित्यर्थः। णौ जागरयति, घञि जागरः, यकि जागर्यते, यपि प्रजागर्य, डौ-यात् जागर्यादित्यादि। णपादौ तु जजागार, जागृविः (११११), अजागारि, जाग्रतः जाग्रतीत्यादि। कसुकाने (वे) जजागर्वान् जजागृवान्, (ङे) जजागराणः जजागृवाणः। पाणिनिः ७।३।८५।

(१७१) दरिद्रा च सु दुर्गत्यां ।

## ७०० । दरिद्रो ङि र्हस्वेऽणौ ह्रागभ्योस्तु वा ।

(दरिद्रः ६।, ङिः १।, हस्-रे ७, अणौ ७, ह्राक्-भ्योः ६॥, तु ।१।, वा ।१।) ।

दरिद्राते ङिः स्यात् अणौ हसे रे परे, ह्रागभ्योस्तु वा ।
दरिद्रितः । *

## ७०१ । आह्योरा लोप्योऽणौ हसे त्वदः ।

(आ-ह्योः ६॥, आ ।१।, लोप्यः १।, अणौ ७।, हसे ७।, तु ।१।, इं ।१।, अदः ६।) ।

आ इत्यस्य ह्रेश्च आ लोप्यः स्यात्, अणौ हसे तु दावर्ज-भ्रो आत् । दरिद्रति । †

## ७०२ । दरिद्र आलोपोऽसनकानेऽरे व्याम्तु वा।

(दरिद्रः ६।, आलोपः १।, अ-सन्-अक-अने ७।, अरे ७।, व्यां ७।, तु ।१।, वा।१।) ।

दरिद्र आलोपः स्यादरे, नतु सनि अके अने च, व्याम्तु वा ।
अदरिद्रीत् अदरिद्रासीत् । दरिद्रामास ददरिद्र । दरिद्र्यात् । ‡

---

* ह्राक् च भीश्च तयोः । ङ इत् (१७) अन्त्यस्य आकारस्य स्थाने । पाणिनिः ६।४।११४,११५,११६ ।

† आश्च ह्रिश्च तौ तयोः । अत्र अणौ रे इति वक्तव्यं, तेन ख्याधातोर्यङि चाख्यायते इत्यादौ न प्रसङ्गः । अणौ हसे तु क्रीणीते जहीते इत्यादि । दा-धा-धात्वोस्तु दत्ते, धत्ते । दरिद्रति (६९७) अन् अत्, अनेन आलोपः । पाणिनिः ६।४।११२,११३ ।

‡ सन् च अकश्च अनश्च तत्, न तत् असनकानं तस्मिन् । यथा दिदरिद्रासति, दरिद्रायकः, दरिद्राणम् । अत्र हरिकारिका —"न दरिद्रायके लोपो दरिद्राणे च नेष्यते । दिरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥" अपि दरिद्रामास (६०७) वा आम्, पक्षे अन-रङ्गत्वादादौ आलोपे ददरिद्र । पाणिन्यादयस्तु णौ-आदिशं बलवन्तं मत्वा ददरिद्रौ इत्युदाहरन्ति । "तत्तु चाक्षि ददरिद्रेति तन्निर्मूलमेव" इति सिद्धान्तकौमुदी । श्रीकृष्णमीरमापि—"यदपि ददरिद्रे त्यस्य समर्थनार्थमुक्तमुत्सारवविशेषाभावादौकारविधानमिति, तदपि रभसात्, तस्मिन् पक्षे आमो दुर्वारत्वात् ।" तत्त्वबोधिन्यप्येतदेव सुस्पष्टमाह । सारस्वते, कलापे, सुपद्मे,

(१७२) चकास च सु दीप्तौ।

(६७१) झभस्तो हेर्धिः। चकाधि। (६४) झप्‌झस्तोरिति सस्य दः। चकाद्धि। *

७०३। घ्यां दौ त सः। (घ्यां ७, दौ ७, त ।१, सः ६।)।

घ्यां दौ परे सस्य त स्यात्। अचकात्। †

७०४। सौ वा। (सौ ७, वा ।१)।

अचकात् अचकाः। ‡

(१७३) शास च सु शासने।

७०५। शास्वङ्विङ्हस्ङेऽणौ क्वौ त्वाशासश्च। (शास-वङ् ।१, इन् ।१, हस्ङे ७, अणौ ७, क्वौ ७, तु ।१, आशासः ६।, च ।१)।

शास्तेरङ इत् स्यात् अणौ हसे ङे च, क्वौ तु आशासश्च। शिष्टः। शाधि। अशिषत्। §

---

संधिप्रकारे, प्रवीणतरत्वादाचार्य इत्यादिरूपो इत्येव पदं सिध्यति। अतो मुग्धबोधोक्तं इत्यादिरूपकं व्याख्यातृभिः समर्थितमपि न समीचीनं प्रतिभाति। वार्त्तिकवचनम्।

* चकाधि (५५६) सलोपः, पक्षे चकाद्धि।

† तिबादावचनमयमर्थिनाभिन्नम्। अचकात् (६०२) दिपो लोपः। अनेन सस्य त्। पाणिनिः ८।२।७२। लभते सस्य दः।

‡ सस्य त आशा घ्यां सौ परे। अचकात् अचकाः (६०२) सिपो लोपः। पाणिनि ८।२।७४।

§ शास इङ् शासङ् वत्। इन् च अस्य तदित्वम्। अणौ इति तुलतो इणो विशेषणम्। शास इति शास च सु शासने इत्यस्यैव। क्वौ तु आशासश्च इति आपूर्वकशासः क्वौ च पाणिनि प्रभृति क्विपि एव, अणौ इसे तु आशासे इत्यादौ आत्मनेपदीयस्य इत् न स्यात्। क्विपि यथा, मित्रं शासतीति मित्रशीः, आशास्ते इति आशीः (१०११)। शिष्ट इति आशासस्य इः, (१११) शासवसीति सत्वम्। शाधि (६००)। शा हि, (५६५) अशिषत्। पाणिनिः ६।४।३४, वार्त्तिकानि च।

(१७४) चक्ष ङ व वदे ।

चष्टे । *

७०६ । चक्षः क्शाञ् ख्याञ् ऽरेऽत्यागोससने ।

(चक्षः ६।, क्शाञ्-ख्याञ् ।१।, अरे ७।, अत्यागोससने ७) ।

चक्षः क्शाञ् ख्याञ् स्यादरे, न तु वर्जने उसि असि अने च । अक्शासीत् अक्शास्त, अख्यत् अख्यत । त्यागी तु समचक्षिष्ट ।†

७०७ । क्शां वा । (क्शां ७, वा ।१।) ।

चक्शौ चक्शे, चख्यौ चख्ये, चचक्षे । ‡

(१७५) ईड ङ व स्तुतौ ।

ईट्टे । §

७०८ । सध्वो रसेम् जनीडीशः ।

(स-ध्वः ६।, रस ६।, इम् ।१।, जन-ईड-ईशः ५।) ।

---

* चक्षः कथनम् । चष्टे इति चक्ष-ते (२११) क-लोपः ।

† क्शाञ् च ख्याञ् च तत् । न रोऽरस्तस्मिन् । त्यागश्च उस् च अस् च अनश्च तत्, नञ्योगे तस्मिन् । क्शाञ् ख्याञ् इत्युभयोर्ञानुबन्धादुभयपदम्, अरे इति विषयसप्तमी, तेन विभक्त्युत्पत्तेः पूर्व्वम् एतौ स्यातामिति । वर्जनेऽर्थे उसादौ प्रत्यये च न स्यात् । क्शाञ् इति ताळव्यमध्य इति पाणिनि-क्रमदीश्वरौ । मतान्तरानुरोधात् वोपदेवेन दन्त्यमध्यः कथितः, लिपिकरप्रमादो वा । दन्त्यपदादेशविधानसामर्थ्यात् षत्वं न स्यादिति । अक्शासीदिति (५९८) इम्लुकी । अक्शास्त (५८७) एकाजादन्तत्वान्नेम् । अख्यत् अख्यत इति (६१८) ङः, (६१०) आलोपः । समचक्षिष्ट व्यक्तवानित्यर्थः । उसादौ तु चक्षुः, नृचक्षाः, विचक्षणः । पाणिनिः २।४।५४, वार्त्तिकानि च ।

‡ चक्षः क्शाञ् ख्याञ् च आदेशौ स्याताम् । विषयसप्तमीयं, तेन आदादेशेऽप्यु-भयपदम् । पाणिनिः २।४।५५ ।

§ ईड-ते, (४०) तस टः, (६४) डस टः ।

एभ्यः परस्य सस्य ध्वस्य च रस्य इम् स्यात्। ईडिषे ईडिध्वे। *

(१७६) आस ङ ल उपवेशने।

आस्ते। (५८२) विंजादीत्याम् आसाञ्चक्रे।

(१७७) वस ङ ल आच्छादने।

वसिता वस्ता। †

(१७८) निसि ङ ल चुम्बने।

प्रणिंस्ते प्रनिंस्ते। ‡

(१७९) षू ङ ल प्रसवे।

सूते।

**७०९। सूतेर्न गुर्ण्यौ।** (सूतेः ६।, न ।१।, गुः १।, ण्यौ ७।)।

सुवे। § (५७१) वेमूदितीम् वा। असविष्ट असोष्ट।

(१८०) शी ङ ल शयने।

**७१०। शीङो रे गुः।** (शीङः ६।, रे ७।, गुः १।)।

---

* जन इति १९९संख्यकस्य जुहोत्यादेरेव, न तु २१४संख्यकस्य दैवादिकस्य, तस्य श्यना व्यवधानात्। अप्राप्ते विधिरयं न तु नियमः, तेन जनिता ईडिता इत्यादौ (५५४) वमोऽरस्येतीम् स्यादेव। ईडिषे ईडिध्वे इति ध्वाः से ध्वे चानेन इम्। एवं ईश ङ ऐश्वर्ये, ईशे इत्यादि। पाणिनिः ७।२।७७,७८। तन्मते ध्वाः ध्वमि ऐडिध्वम् ऐड्ढ्वम् इत्युभयम्। इति सिद्धान्तकौमुदी। "ध्वे इति सतटेरेत्वस्य ग्रहणात् लङि ध्वमि न भवितव्यमिटा। लोटि पुनरेकदेशविकृतस्यानन्यत्वात् भवितव्यमिटा।" इति काशिका।

† वसिता वस्ता इति (६०६) वा इम्।

‡ प्रणिंस्ते प्रनिंस्ते इति (५४९) णत्वं निंस निन्देति वा णत्वम्।

§ षू ङ ल धातो र्गु र्न स्यात् ण्याम्। सुवे सू-एप् अनेन अगुवतो (५८८) उव्। पाणिनिः ७।३।८८।

शेते शयाने । *

## ७११ । मान्तो रम् विदस्तु वा ।

(मान्तः ६।, रम् ।१।, विदः ५।, तु ।१।, वा ।१।) ।

शीङः परस्य मस्यान्तो रम् स्यात्, वेत्तेस्तु वा । शेरते । अशयिष्ट । †

(१८१) अधी इङ् ल अध्ययने । ‡

अधीते ।

## ७१२ । गीङ्टीष्योर्वा ।

(गी ।१।, इङः ६।, टी-ष्योः ७॥, वा ।१।) ।

इङो गी स्यात् वा टी-ष्योः परयोः । संज्ञात गुः । अध्यगीष्ट अध्येष्ट । §

## ७१३ । ष्यां गा अट्ङ्सनोस्तु वा ।

(ष्यां ७।, गा ।१।, अट्ङ्-सनोः ७॥, तु ।१।, वा ।१।) ।

---

* शीङो गुः स्यात् रे परे, गुणनिमित्ते अगुणनिमित्ते चेत्यर्थः । पाणिनिः ७।४।२१ ।

† मस्यान्तु मान्त् तस्य । विद इति शीङ-साहचर्य्यात् अदादिपठितस्यैव ग्रहणम् । शेरते इति शी-अन्ते, अनेन अन्तस्थाने रम्, मिरस्यादादौ, एकदेशविकृतमनन्यवत् भवतीति न्यायात् पूर्व्वेण गुणः । विदस्तु संविद्रते संविदते, (८७५) आत्मनेपदम् । अशयिष्ट शी-टीतन् (५८७) सूत्रस्य प्रतिप्रसवात् (५५४) इम् । पाणिनिः ७।१।६,७ ।

‡ गणपाठे अधिपूर्व्वकस्य इङ-धातोर्निर्द्देशात् अधिपूर्व्वकस्यैव प्रयोगः, न तु केवलस्य । [illegible] अधीयाते (५८८) इव ।

§ संज्ञाच गुः, गी इति दीर्घनिर्द्देशाच्च गुण इत्यर्थः । अध्यगीष्ट, अधि-इ-टी-सन्, गी-आदेशः, इडागमविधानत्वात् न इम् । गी-आदेशस्य विकल्पपक्षे (५८१) पुनरप्यागमे अध्येष्ट । पाणिनिः २।४।५० । अत्र गाङ्-आदेशः, पश्चात् ई-आदेशः ।

इङो गा स्यात् ण्यां, णेः परे अङि सनि च वा। अधिजगे। अध्यगीष्यत अध्यैष्यत। *

(१८२) दीधी ङं च लु देवने दीप्तौ।

७१४। दीधीवेव्यो न गुः। (दीधी-वेव्यः ६।, न ।१।, गुः १।)।

दीध्ये। †

७१५। लोप्योऽन्तो य्योः। (लोप्यः १।, अन्तः १।, य्योः ७।)।

दीधी-वेव्यो-रन्तो लोप्यः स्यात् यकारिवर्णयोः। अदीधिष्ट। ‡

(१८३) एवं वेवी ङं च लु ई-स-वत्।

(१८४) द्विषो अ स वेरे।

(६७५) द्विषविदातोऽनुस् वा। अद्विषुः अद्विषन्। अद्विष्ट। अद्विषत्। §

---

* अङ् च सन् च अङ्-सनौ, णेः अङ्-सनौ ण्यङ्-सनौ तयोः। अधिजगे अधि-इ-ण्या ए, गा-आदेशे द्वित्वादौ, (६१०) आल्लोपः। णी-अत, (७१२) गो-आदेशे अध्यगीष्यत, विकल्पपक्षे अध्यैष्यत। ण्यङ्-सनोस्तु अध्यजीगपत् अध्यापिपत्, अधिजिगापयिषति अध्यापिपयिषति। पाणिनिः २।४।४८,५१।

† दीधी च वेवी च समाहारे द्वन्द्वः, द्विवचनान्तत्वे परसूत्रे अनुवर्तमानयोः-अंशासङ्गत-प्रसङ्गः स्यात्। एतयो र्गुं न स्यात् सर्वत्र। णी-ऐप् (५८८) दीध्ये, एवं दीध्यनीयमित्यादि। पाणिनिः १।१।६।

‡ य च इश्च तौ यौ तयोः य्योः। स्ता-सनि ईरिम्, अनेन ईलोपे अदीधिष्ट। य परे—आदीध्य, आवेव्य। य्योः किं, आदीध्यनम्, आवेव्यनम्। पाणिनिः ७।४।५३।

§ वेवी ङं च लु ई-स-वदित्यनेन ईयातोः सर्वे धर्मा भीष्यन्ते, यथा "ई-स कान्ति-गति-व्याप्ति-क्षेप-प्रजन-खादने" इति कविकल्पद्रुमे। सिद्धान्तकौमुद्यान्तु "वेवीङ् वेतिना तुल्ये। वेतिनोत्यनेन तुल्यार्थे वर्तते स्वयं:"—इति कथनेन भेदकं समर्थौ विज्ञेयः।

(१८५) दुहो अ स दोहने ।

अधुक्षत्, अधुक्षत अदुग्ध । *

(१८६) एवं दिहो अ स लेपने ।

प्रधिदेग्धि । † अधिक्षत् ।

(१८७) ऊर्णुं अ,स आच्छादने ।

## ७१६ । वोर्णोः पिद्धसे वा ।

(वा ।१।, ऊर्णोः ६।, पित्-हस्-रे ७।, वः १।) ।

ऊर्णो णुः स्याद्वा पिति हसे रे । ‡ ऊर्णोति, ऊर्णौति ।

(६८०) रपिद्धसुत इति विः ।

## ७१७ । ध्यां । (ध्यां ७।) ।

ऊर्णो णुः स्यात् पिति हसे ध्यां । और्णोत् । §

## ७१८ । वृञ्ब्रिध्यां । (वृ-ऊर्णु-ब्रिः १।, ध्यां ७।) ।

---

अधिक्षुरिति क्षा अम्, ऊस्विकल्पपक्षे अधिक्षन् । अधिक्ष थ्या-स । अधिक्षदिति क्षा दि, (६०५) सक्, (६०२,१११) ।

* अधुक्षत् दुह-टी दि, (६०५) सक्, (१०५) हस ढः, (१७७) दस घः, (६०२,१११) [illegible] कः, षत्वञ्च । थ्यासन् अधुक्षत अदुग्ध (६५७) गुहदुहीति.न सिः सक् वा ।

† प्रधिदेग्धि (५४९) गदाद्यन्त-मेवं लम् ।

‡ पिद्धसी हस् पाती रथेति वक्तिन् । (६८०) रपिद्धसुत इति प्राप्तस्त्वोर्विशेषोऽयं, विकल्पपक्षे ठ्विरेव । पिति किं, ऊर्णुतः । हसि किं, ऊर्णवानि । पाणिनिः ७।३।९० ।

§ नित्यार्थं पृथक् विधानम् । पाणिनिः ७।३।९१ ।

ऊर्णोः णुः उव् त्रिः एते सु-र्व्वा । प्रौर्णवीत् प्रौर्णुवीत् प्रौर्णावीत् । *

७१९ । नाजन्तादेरादि द्विः ।

(न ।१।, अजन्तादेः ६।, आदिः १।, द्विः १।) ।

अन्तादिस्थिताचो धो-रादि द्विर्न स्यात् । †

७२० । स्यादौ नबद्रोऽये ।

(स्यादौ ७।, न-ब-द-र: १॥, अयि ७।) ।

स्यादौ स्थिता न ब द रा द्वि र्न स्यु र्न तु ये । ऊर्णुनाव । ‡

७२१ । ङिदिम् वोर्णोः ।

(ङित् ।१।, इम् ।१।, वा ।१।, ऊर्णोः ५।) ।

ऊर्णोः पर इम् ङित् स्याद्वा । ऊर्णुविता ऊर्णविता । §

---

* वृद्ध उव् च त्रिष, समाहारे पुंस्त्वं सौत्रात् । गुणे प्रौर्णवीत्, उवि प्रौर्णुवीत्, वृद्धौ प्रौर्णावीत् । पाणिनिः १।२।३, ७।३।६ ।

† अन्तश्च आदिश्च तौ अन्तादी, अचौ अन्तादी यस्य स तस्य । तस्य धातोरादौ अन्ते च स्वरवर्णः, तस्य आदिवर्णं द्वित्वा द्वित्वं स्यादित्यर्थः । पाणिनिः ६।१।२ ।

‡ स्यः संयोगस्तस्मादित्यर्थम् । न च ब च द च र च ते । अयि इति परस्थित-यकारेण संयुक्ताः पूर्व्ववर्त्तिनो न ब द राः द्विः स्युरित्यर्थः । यद्यपि अजन्तादेर्धोरित्यनुवर्त्तते, अन्यथा दुद्राव दद्रौ इत्यादौ दकारस्य द्वित्वनिषेधापत्तिः । नस्य यथा, उन्दधातोः उन्दि-दिषति । बस्य यथा, उब्जधातोः उब्जिजिषति । दस्य यथा, अड्डधातोः अड्डिडिषति । रस्य यथा, ऊर्णुनाव इति ऊर्णुधातोः, णुशब्देन जकारं रकारेण द्वित्वा, सुंःअस्य द्वित्वम् । स्यादौ किं, भगधातोः भाविविषति । अयि किं, अरार्य्यते । पाणिनिः ६।१।३, वार्त्तिकवचन ।

§ ऊर्णुविता इति अनेन इमो ङित्त्वे (४८८) उव् । पक्षे गुणः । पाणिनिः १।२।३ ।

(१८८) ष्टुञ् स्तुतौ ।

## ७२२ । पिद्धलश्चेम् ब्रुवो यङ्लुग्तुस्तोस्तु वा ।

(पित्-हल्-रस ६।, ईम् ।१।, ब्रुवः ५।, यङ्लुक्-तु-रु-स्तोः ५।, तु ।१।, वा ।१।) ।

ब्रुवः परस्य पितो हलो रस्य ईम् स्यात् यङ्लुगादेस्तु वा ।
स्तवीति स्तौति, अभिष्टौति । व्यष्टावीत् व्यस्तावीत् । अस्तोष्ट ।
तुष्टुव । स्तविता स्तोता । *

(१८९) टु क्षु शब्दे ।

क्षविता । †

(१९०) रु शब्दे ।

रवीति रौति । रविता रोता । †

(१९१) तु वृत्ति-हिंसा-पूर्णेषु ।

तवीति तौति । तविता तोता । †

---

* पित् आसौ हल् चासौ रश्चेति पिद्धलस्तस्य । यङो लुक् यस्मात् स यङ्लुक्, स च [illegible] तुश्च स्तुश्चेति तस्मात् । स्तवीति स्तु-तिप्, शप्, तस्य लुक्, अनेन ईम्, उकारस्य गुणः, [illegible] अव् । पक्षे (६८०) वृद्धिः स्तौति । अभिष्टौति (५७२) षत्वम् । व्यष्टावीदिति [illegible] सक्, अजन्तत्वात् (५७४) वृद्धिः, (६२२) गिविपरीति वा षत्वम् । अस्तोष्ट इति आत्मनेपदे (६२३) न इट्, आदौ गुणे, ह्रस्वपरत्वाभावात् न (५६२) सिलोपः । तुष्टुव [illegible] अत्वा च, (५८४) नेसड्स्नमिति न इम् । स्तविता स्तोता (६०६) वा इम् । यङ्लुकि [illegible] तोतवीति तोतोति (४४० पृष्ठं द्रष्टव्यम्) । पाणिनिः ७।३।९३,९४,९५ । एतन्मते पुनः [illegible] अपित्स्वपि वा भवति । तेन ब्रुवीतः ब्रूतः, तुवीतः तुतः, स्तुवीतः स्तुतः [illegible] ।

† क्षविता इति (५८७) प्रतिप्रसवात् (५५४) इम् । रविता रोता (५७२) वद्ध्युमो-[illegible] इति वा इम् । "तु ञ वृत्तिहिंसापूर्णेषु" इति कविकल्पद्रुमः । "[illegible]" इति तु सिद्धान्तकौमुदी । तविता तोता इति (६०६) वा इम् ।

(१८२) ब्रू ञ वा उक्तौ।

ब्रवीति।

७२३। पञ्च तिप् पञ्च णब्वाहश्च।

(पञ्च ।१॥, तिप् ।१॥, पञ्च ।१॥, णप् ।१॥, वा ।१।, आहः ।१।, च ।१।)।

ब्रुवः परेषां पञ्चानां तिबादीनां पञ्च णबादयो वा स्युः, ब्रुव-आहः स्यात्। आह आहतुः आहुः। *

७२४। हस्त थि। (हः ६।, तः ।१।, थि ७)।

आहो हस्य तः स्यात् थे परे। आत्थ आहथुः। पक्षे सुगमं। †

७२५। वचोऽरे। (वचः १।, अरे ७।)।

ब्रुवो वचः स्यादरे। अवोचत्। उवाच, ऊचे। ‡

---

* तिप् णप् च एतयो रेकवचनान्तत्वं यथार्थं, तिबादयः पञ्च, णबादयः पञ्च इत्यर्थः। आहादेशो णबाद्यादेशपक्षे एव। आह इत्यत्र अकार उच्चारणार्थः। तिबादि-स्थाने णबादि-करणात् न द्वित्वं, न इम्, नापि अतीतकालप्रतीतिः। (कविभिस्तु "विनिन्द्यमाहेति स्फुटमाह माधवः" इत्यादौ वामनमतेन आहादिकं भूते प्रयुज्यते।) तिपो णप्, तसोऽतुस्, अन्तेः उस्, सिपस्थप्, थसोऽथुस् इति क्रमः। आह इति ब्रू-तिप्, णप् आहश्च आदेशौ, एवं आहतुरित्यादि। पाणिनिः ३।४।८४।

† आह इत्यस्य विभक्तिव्यत्ययेन अनुवृत्तिः। आत्थ इति सिपः स्थाने थप्, आह आदेशः, अनेन हस्य तः। (७२२) पित्त्वसंनियोग ब्रुवः सकपरत्वात् अत्र न ईम्। पाणिनिः ८।२।३५।

‡ विभक्तिव्यत्ययेन ब्रू इत्यस्यानुवृत्तिः। अरे इति विषयसप्तमी, तेन (९०४) 'णाद्य' इत्यत्र ब्रूधातोः वच्-आदेशं समाश्रित्य (८०१) इत्यनेन अङ्। एवं क्यां (६१८) सम्प्रसारणेऽति सम्प्रसारणं भविष्यतीति समाश्रित्य सम्प्रसारणात् पूर्वमेव वचादेशः। एवं सर्वत्र परत्वादसार्वधातुकविषये वचादेशः। ततः सर्वत्र ब्रूञो ञानुबन्धात् उभयपदं, तेन अवोचत् अवोचत इत्यादि, (६१८) सम्प्रसारणे, (६५२) णादेशः। उवाच इति णप्, (६५१) द्वित्वं। ऊचे इति (६५१) द्वेः, (६६१) मूलस्यापि त्रिः। पाणिनिः २।४।५३।



(१९३) हु लि होमे।

७२६। ह्वादौ रे द्विः। (ह्वादिः १।, रे ७।, द्विः १।)।

ह्वादि द्विः स्यात् रे परे। जुहोति।*

७२७। ह्वो वच्यणौ। (ह्वः ६।, व् ।१।, अचि ७।, अणौ ७।)।

होरुकारस्य व् स्यात् अणावचि रे। जुह्वति। जुहुधि।†

७२८। पश्चाम् वा भी-ह्री-भृ-हो ण्यां।

(पश्चाम् ।१।, वा ।१।, भी-ह्री-भृ-हो: ५।, ण्यां ७)।

एभ्यः पश्चाम् वा स्यात् ण्यां। जुहवामास जुहाव।‡

---

* हु: (धातु:) आदिर्यस्य स ह्वादि:। गणपाठे लि-इतां धातूनाम् अदादित्वं ह्वादित्वञ्च। जुहोति हु-तिप्, (५४१) शप्, (६७०) तस्य लुक्, द्वित्वं, (५५९) खोर्हस्य ज:, (५४२) मूलस्य गुण:। (६८०) रपित्त्वस्त प्रत्यय द्वित्ववर्जनात् न वृद्धि:। पाणिनि: २।४।७५, ६।१।१०।

† होव ह्व: तस्य ह्व:। (५८८) जुघ्नोरिति उव्प्राप्तेर्बाधकोऽयम्। जुह्वति, अन्ति (६६०) अन्तोऽत्, अनेन व्। अचौ किं; जुहवानि। रे किं, जुहवतु:। जुहुधि (६७१) धि:। पाणिनि: ६।४।८७।

‡ पश्चाम: पित्त्वात् गुण:, णित्त्वात् रसंज्ञायां (७२६) द्वित्वम्, आम्-स्थिति:। जुहवामास इति; हु-णप्, पश्चाम्, द्वित्वादि, (५८१) अस्प्रयोग:। एवं भी-ह्री-भृञोऽपि। पश्चमो द्वित्वाभावे जुहाव। पाणिनि: ३।१।३९। एतन्मते आम्।

(१९४) ञि भी लि भीत्यां।

बिभेति। (७००) दरिद्रो ङिरिति, बिभितः बिभीतः, बिभ्यति। बिभयामास बिभाय। *

(१९५) ह्री लि लज्जायां।

जिह्रयामास जिह्राय। *

(१९६) पृ लि पालने।

७२९। पृभादे ङि: खे रे।

(पृ-ऋ-भ-आदे: ६।, ङि: १।, खे: ६।, रे ७।)।

पृ-ऋ-भ-माङ्-हाङां खे ङिः स्यात् रे। पिपर्त्ति। †

७३०। पुर्वो वा। (पु: ६।, र्वः १।, वा।१।)।

पिपूर्त्तः पिपृतः। पपरतुः पप्रतुः, (५७९) गुणत्वान्न एः। ‡

---

* बिभेति भी-तिप्, द्वित्वादिकम्। तस् बिभितः, क्ङौ इति ङित्वादन्त्यस्य ईकारस्य स्थाने इः, पक्षे बिभीतः। अन्ति बिभ्यति (६९०) अन्त अत्, (५८८) ईस्थाने य। णप् बिभयामास, पक्षान् अनुप्रयोगश्च, पक्षे बिभाय। एवं ह्री-णप् जिह्रयामास जिह्राय।

† पृ लि पूर्त्तौ इति पाठस्तु कविकल्पद्रुमविरोधित्वात् न गृहीतः। पृच ऋच आदिश्च तत्तत्र। आदिस्तु २०५-२०७ संख्याक भ-प्रभृति ह्रादिगणसमाप्तिपर्य्यन्ताः; तस्मात् आह भ-माङ्-हाङामिति। यथा—पिपर्त्ति इयर्त्ति बिभर्त्ति मिमीते जिहीते इति। रे किं, पपार बभार इत्यादि। पिपर्त्तीति द्वित्वे ऋः स्थाने ङिः, ङ इत् ऋरन्त्यस्य स्थाने इः। पाणिनिः ७।४।७६,७७।

‡ पृधातो दीर्घः स्याद्वा। अनिष्टत्वात् ऋः रे इति च नानुवर्त्तते। ञि पॄ लि तु पालने इति दीर्घान्त पॄ धातौ स्थितेऽपि एतत्सूत्रकरणं ह्रस्वान्तस्यापि दीर्घान्तवत् पद-साधनार्थम्। पिपूर्त्त इति दीर्घे क्ते (१९८) उर्, (२२८) दीर्घः। णपाम् पपरतु-रिति दीर्घपक्षे (६१६) गुणः। (५७९) गुणवत्त्वात् न ऋलोपः णकारस्यापि एव। पाणिनौ दीर्घान्तत्वात् नास्य सूत्रस्यावसरः। "ह्रस्वान्तोऽयमिति केचित्" इति तु सिद्धान्तकौमुदी।

(१८७) ओ हा-क ति त्यागे ।

जहाति, जहितः जहीतः, जहति । *

## ७३१ । हाकोऽन्तलोपः स्यां ।

(हाकः ६।, अन्तलोपः १।, स्यां ७।) ।

जह्यात् । †

## ७३२ । हौ ङा वा । (हौ ७।, ङा ।१।, वा ।१।) ।

हाको ङा स्यात् वा हौ । जहाहि जहिहि जहीहि ।

हेयात् । ‡

(१८८) ऋट लिं गत्यां ।

इयर्त्ति । §

(१८९) जन म लि ङ जनौ ।

जज्ञिषे, जज्ञिध्वे । ¶

---

* जहितः हा-तस् (७००) दरिद्रो ङितीति वा ङिः, पक्षे (७०१) आद्योरिति ई । अन्ति अहति, आद्योरिति आ-लोपः, (६९०) अन्त अत् ।

† हाक-धातोराल्लोपः स्यात् स्याम् । हाको ह् स्यामिति कृते सिद्धावपि, धातौ द्वित्वं पश्चादन्तलोप इति ज्ञापनार्थम् अन्तलोपः इति कथितं, तेन जहादिति धातौ द्वित्वे पश्चात् मूलस्य धात्वोः, अन्यथा (५३०) शासन्धात्वोर्दृषि द्विरिति नियमेन हसे परे पश्चात् द्वित्वे धीरहन्तस्याभावात् स्यात् । एवं जहित इत्यादौ धात्वोरेव द्वित्वम् । पाणिनिः ६।४।११८ ।

‡ जहाहि इत्यादि धातौ द्विः पश्चात् ङा, ङिः, ईच । ङा-यात् हेयात् (६१२) के । पाणिनिः ६।४।११७ ।

§ इयर्त्ति, (७२९) पृधातोरिति ओर्ङिः, (५८५) इयः, मूलधातोर्गुणः । एवम् इयृतः, इयृति । ध्या द्विप् ताम् अन्, ऐयः ऐयृताम् ऐयरुः इत्यादि ।

¶ कविकल्पद्रुमे "जनी म ङ जनी, जन म लि ङ ष"-इति पाठो दृश्यते । सिद्धान्तकौमुद्याञ्च "जन जनने । जजन्ति ।" इत्यादि-परस्मैपदप्रयोगो दृश्यते । वोपदेवस्तु 'ष'-त्वात् जनुधातुजनुवर्त्तं आत्मनेपदं लिखितवान्, तदनुसारात् वैदिकलेऽपि सर्वधर्म्मसत-

(२००) णिजिरो ञ लि पोषणे शोधने च।

७३३। निजां खे रे णुः। (निजां ६॥. खे: ६।, रे ७।, णु: १।)।

निज-विज-विषां खे णुः स्यात् रे। नेनेक्ति नेनिक्तः। *

७३४। न ह्युकोऽपि। (न ।१।, हुकः ६।, अपि ७।)।

हेकडो णु नं स्यादपि परे।‡ नेनिजानि। †

एवं (२०१) विजिरो ञ लि विवेके।

(२०२) विषि लिं ओ व्याप्तौ।

अविषत् अविक्षत्। ‡

(२०३) डु दा ञ लि दाने।

प्रणिददाति। अद इत्युक्ते-रालोपः। दत्ते। §

---

मवलम्ब्य भाषायां प्रयुक्तवांश्च (कलापे आख्यातस्य चतुर्थपादे, "अनिघ्योश्च" इति सूत्रस्य पञ्जी द्रष्टव्या)।अजिघ्रिषे जन क्या: से, (७०८) इम्, (२२०) उङ्लोपः, (४६) नस्य ञ। घे अजिघ्ये।

* निजामिति बहुत्वं गणार्थं, गणश्च गणपाठे ह्यष्टुभयपदिसमापकपर्य्यन्तः इत्यत आह निज-विज-विषामिति। अतएव पाणिनौ निजां त्रयाणामित्युक्तम्। निज-तिप् नेनेक्ति (२११) कुङ्। एवं विज वेवेक्ति, विष वेवेष्टि इत्यादि। अत्र विष-धातोरपि वेवेष्टीति वक्तव्यम्। पाणिनि: ७।४।७५।

† हेकङ् ह्युङ् तस्य। अत्र अपि इति र-विषये एव। अतएव पाणिनौ सार्व्वधातुके इत्युक्तम्। निज-आनिप् श्लिवादिकम्, अनेन मूलस्य गुणनिषेधे नेनिजानि, एवं वेविजानि। यङ्लुकि लोलुहीति मोमुषीति इत्यादि। ह्युकः किं, जुहवानि। रे किं, निनेज। अपि किं, नेनेक्ति। पाणिनि: ७।३।८७।

‡ विष-टी-दि, (५६५) इरित्वात् वा ङः। पक्षे (६०५) सक्, अविषत् अविक्षत्।

§ प्र-नि-दा-तिप्, (५४९) गद-इत्यत्र नेर्णत्वम्। ते दत्ते (७०१) आ लोपः, दा-वर्जनात् न ईः।

## ७३५। ह्वो र्दा-धो र्दे-धे ह्वौ।

(ह्वोः ६॥, दा-धोः ६॥, दे-धे ।२॥, ह्वौ ७।)।

ह्वेर्दाञो ह्वेर्धाञो दे धे च स्यात् ह्वौ। देहि। *

## ७३६। स्थादोर्ङिः टौमे न णुः।

(स्थादोः ६॥, ङिः १।, टौमे ७।, न ।१।, णुः १।)।

स्था-दो ङिः स्यात् टौमे, तस्य च न णुः। अदित अदिषातां।†

(२०४) डु धा ञ् लि धारणे।

प्रणिदधाति।

## ७३७। धो द धो ऽन्तलोपे तथि।

(धः ६।, द ।१।, धः १।, अन्तलोपे ७।, त-थि ७।)।

धाञो दस्य धः स्यात् तथयोः परयोः, अन्तलोपे सति।

धत्ते। धेहि। अधित।‡

---

* दाच धाच तौ तयोः दाधोः। दे च धे च इति लुप्तप्रथमा-द्विवचनं क्रमार्थम्। अत्र डु दा ञ् लि, डु धा ञ् लि इति द्वयोरेव ग्रहणम्, अन्येषां दासंज्ञकानां ह्वौ परे द्वित्वा-सम्भवात्। दा-हि द्वित्वं, द्वित्वस्यैव दे-आदेशः देहि, एवं धेहि। पाणिनिः ६।४।११९।

† स्थाच दाच तौ तयोः। ङ इत् यस्य तस्य स्थाने। अत्र दा इति दासंज्ञकः। दा-टी-तम् अदित (५६२) झलात् झसि सि-लोपः। आताम् अदिषातां झल्परत्वाभावात् सि-लोपाभावः। पाणिनिः १।२।१७।

‡ धाञो दकारस्य भावना धैरेव। अन्तलोपे (७०१) आलोपे सति। धत्ते इति धा-ते द्वित्वं (५५९) वीर्णस्य दः, (७०१) ब्रूयस्य आलोपः, अनेन द्वे दस्य धः। एवं धत्तः धत्थ इत्यादि। अतृद्धि भरे इत्यादौ तु, (१००) क्रमान्मसेति दस्य धः। अत्र अन्तौ तथि इति कृते सिद्धावपि अन्तलोपे इति कथनं, अन्तर्लुकि स-झयन्तोः दाधोतः दाधीत्यताम् इत्यत्र (६१२) झी-आदेशे दस्य धकारापत्तिवारणार्थम्। पाणिनिः ८।२।३८।

(२०५) डु भृ ञ भि धृति-पुष्ट्योः ।

बिभृतः, बिभ्रति । बिभरामास बभार । *

(२०६) मा-ङ भि शब्दे ।

प्रथिर्मिमीते मिमाते मिमते । *

एवं (२०७) ओ हा-ङ भि गतौ । *

इति ह्वादि-पादः ।

---

## २य पादः—दिवादिः ।

---

(२०८) दिवु क्रीड़ायां ।

### ७३८ । दिव-सु-तुद-रुध-क्र्यादे र्यन्श्नश्ना: घिद्वे रे ।

(दिव-आदेः ५।, यन्—ना: १॥, घित् ।१॥, वे ७, रे ७) ।

एभ्यो वेऽर्थे यन् नु श नम् ना एते रे परे क्रमात् स्युः, ते च घितः । दीव्यति । *

---

* बिभर्ति इति पदं (७२१) सूत्रस्य टीकायां प्रदर्शितम् । बिभ्रति अ-त्वात् (५२०) नस्य लुक् । अप् बिभरामास, (७२८) वा पक्षाम्, (७२१) पौर्णिः । मा-ङ्-ते मिमी (७०१) ईः, व्याते अते (७०१) व्यालोपः मिमाते मिमते इति । एवं हा-ङ्—जिहीते जिहाते जिहते ।

---

* दिवश्च सुश्च तुदश्च रुधश्च क्रीश्चेति, ते आदयो येषां तथात् । व्यादि-शब्दस्य प्रत्येकं सम्बन्धः । यन् च नुश्च शश्च नम् च नाश्च ते । घ इत् येषां ते घित् इति बहुव्रीहिः, ते च घितः इत्यनेन दिवादिः श्यन्, स्वादिः श्नुः, तुदादिः शः, रुधादिः श्नम्, क्र्यादिः श्ना इति । घित्करणात् (५२०) सार्वधातुकम्, अपित्त्वात् (५२१) ङित्त्वं, अनादौ परे (५४२) न गुणः ।

(२०९) षिवु तन्तुसन्ताने ।

सीव्यति । असेवीत् असेवीत् । *

(२१०) नृती य नर्त्तने ।

७३९ । नृत् छृद चृत् कृत् तृदो ऽसो ऽसे-रिम् वा । (इम्—इदः ५।, असः ६।, असेः ६।, इम् ।१।, वा ।१।) ।

एभ्यः परस्यासस्य सिवर्जस्य सस्य इम् स्यात् । नर्त्तिष्यति नर्त्स्यति । सौ तु अनर्त्तीत् । †

(२११) त्रसी य भये ।

(५८४) भ्रमक्लमेति श्यन् वा । त्रस्यति त्रसति । तत्रास त्रेसतुः तत्रसतुः । ‡

---

एते त्रयो बाधकाः । श्य् इति श्यकारानुबन्धात् (१०) शबादिरन्त्याचः परो भवन्नपि श्यं बाधते । अपि च शबादेरिति षष्ठ्यन्तत्वेन षष्ठी बोध्यः, विकरणकर्मसमवाये भूयसां स्यात् शबर्थकत्वमिति न्यायेन च पञ्चम्यन्तत्वेन प्रयुक्तः (श्यो एव इति प्रयोगात्) । दीव्यति दिव-श्यप्, श्यन्, *(२२७) दीर्घः । पाणिनिः १।१।६८,७३,७७,७८,८१ । एतन्मते श्यन्=श्य (१०सूत्रटीका द्रष्टव्या) ।

* सिवीव्यति (५०२) पत्वम् । असेवीत् (६११) वा पत्वम् ।

† नृत इत्यादि द्वन्द्वः । परस्याङ्गी सवेति तस्य परस्य । नृत्-स्यति वा इम् । एवम् अनर्त्तिष्यत् अनर्त्स्यत्, निनर्त्तिषति निनृत्सति । अनर्त्तीदिति टी-डि, (५५४) निवृत्तिम् । पाणिनिः ७।२।५७ ।

‡ त्रसति क्लमुविकल्पने श्यप् । अत-वतुस् (५७९) वा द्विर्लोपः, अकारस्य एकारश्च । पक्षे तत्रसतुः ।

(२१२) जॄ इर्षं जरायां ।

जीर्य्यति । अजरत् अजारीत् । जेरतुः अजरतुः । जरीता जरिता । *

(२१३) शो य निशाने ।

७४० । यन्योश्शमादिमिदो लोपर्वणु ।

(यनि ७।, ओ-शमादि-मिदः ६।, लोप-र्वण १।) ।

ओकारस्य लोपः शमादे र्घौ मिदे र्बुः स्यात् यनि । †

श्यति । अशात् अशासीत् । ‡

एवं (२१४) छो य लूनौ ।

(२१५) षो य नाशे ।

प्रणिष्यति । न्यषात् न्यषासीत् । सेयात् । §

---

* जीर्य्यतीति जॄ-तिप्, श्यन्, (६१८) इर्, (२२८) दीर्घः । अजरत्, टौ-दि, (५६५) वा ङः, (६१९) गुणः । पक्षे अजारीत् सौ पे (५०४) वृद्धिः । जेरतुः अजरतुः, (६२६) गुणः, (५७९) वा द्विर्लोपः च एत्वं । जरीता इति (६२०) इमां वा दीर्घः । ●

† ओश्च शमादिश्च मिद् च तस्य । लोपश्च र्घश्च र्बुश्च तत् । उभयत्र समाहारे समान्वयः । गणपाठे श इत् शमादिः, सच—शम भ्रम दम श्रम तम क्षम मद क्लम इति अष्ट । पाणिनिः ७।३।७१,७४,८२ ।

‡ श्यति, शो-तिप्, श्यन्, ओर्लोपः । अशात् टौ दि, (६०८) ओदन्ते वा, (६१७) वा सेर्लुक् । पक्षे (५९८) इमूसकौ अशासीत् ।

§ प्रणिष्यति प्र-नि-सो-तिप्, (५१८) नदादयन-नेः णत्वम् । न्यषात् न्यषासीत् (५०६) अत्रापि षत्वम् । सेयात् डी-यात् (६१२) एः ।

(२१६) दो य च्छेदे ।

प्रत्यदात् । देयात् । *

(२१७) राधो य हिंसे ।

रेधतुः रराधतुः । वधार्थः किं, आरराधतुः । *

(२१८) व्यधो ताडे ।

विध्यति । विव्याध, विविधतुः । †

(२१९) पुषो लृ पोषणे ।

(५६५) ग्रासुलिद्युतादिति ङः । अपुषत् । †

(२२०) ष्णिहो ञि लृ स्नेहे ।

अस्निहत् । आलिङ्गने तु अस्निहत् । †

(२२१) रध्य् लृ पाकहिंसयोः ।

७४१ । नुम् रधो मुषां नश्मसजो रभलभो ऽनठीमव्ये झस्यरव्यपि । (नुम् ।१।, रधः ६।, मुषां ६।३।, नश्-मस्जः ६।, रभ-लभः ।६।, अनठीमपि ७।, ए ७।, झसि ७।, अरव्यपि ७।) ।

---

* प्रत्यदात्, प्र-नि-दो-टी दि, (६०८) घोस्थाने था, (५५२) सेर्लुक् दासंज्ञकत्वात्, (५४९) मदायन्त-गे कंखम् । देयात्, (६१२) के । रेधतुः, राध (वधार्थ) ठौ अतुस्, किवं, (५७९) विधिबलात् वा किवलोपः आ एव । पक्षे रराधतुः । आराधनार्थे तु आरराधतुः अत्र न एः ।

† विध्यति, व्यध-तिप् (६६१) जिः । णप् विव्याध (६५१) वीजिः° । अतुस् विविधतुः, वीः मूलस्य च जिः । अपुषत्, पुषादित्वात् (५६५) ङः । अस्निहत् (६०५) सङ् ।

रधठीवर्जमृवर्जेऽचि, शुषादेरस्ते, नश्-मस्जो भंषे, रभलभो रठीवर्जेऽचि, नुम् स्यात् । अरन्धत् । रधिता रद्धा । व्यान्तु ररन्धिव रेध्व, ररन्धिम रेध्म । *

(२२२) तृप्तू जि तृ प्रीणने ।

अतर्पीत् अत्राप्सीत् अतार्प्सीत् अतृपत् । †

एवं (२२३) दृप्तु दर्जि हर्षोत्कारयोः ।

(२२४) मुह्लू जि लृ वैचित्ते ।

मोहिता । (१७८) मुहां घङिति, मोग्धा मोढा । ‡

---

* न ठौ अठौ, अथ्या इम् अठीम्, नास्ति अठीम् यत्र सः अनठीम्, अनठीम् चासौ अच्चेति अनठीमच् तस्मिन् । रध ठौ च रध्ठौ, न रध्ठौ अरध्ठौ, तयोरच् अरध्ठच् तस्मिन् । रधधातोः थ्या इमि सामान्ये अचि च परे नुम् स्यात्, थ्या इमिति अधविम् इति न स्यादिति तात्पर्यम् । ठीमचि इति कृते तु ररन्धुरित्यादौ थ्या अचि नुमोऽप्राप्तिरूपमनिष्टं स्यात् । शुषामिति बहुवचनं गणार्थं, तेन शुषादीनिति, शुषादिश्च—पचारान्तगणा धातवः— शुष क्लिष लिप लुप ज्ञल पिदादयः । अस्ते इति तुदादित्वाज्जाते अ-प्रत्यये परे इत्यर्थः, तेन अस्ति शोष इति । भंषे इति भय-भकारादि । रठीवर्जेऽचीति रमिति ठीमिति अचि परे इत्यर्थः । अरन्धदिति रध-टी-दि, पुषादित्वात् (५६५) ङः, तस्मिन् अचि परे अनेन नुम्, मित्त्वात् (१०) अन्त्यात् परे, न-स्थितिः, उकारविभ्रमार्थः । नुम्बिरशास्तेय (५६०) इमुङ् न इत्यनेन न नलोपः । रधिता इति रध-डी-ता, (५०२) रधादित्वात् वा इम् । ठी-व ररन्धिव, अत्र थ्या इति नुम् । इमो विकल्पपक्षे (५०८) ठिलोपः, अकारस्य एकारः । एवं ठी-म । पाणिनिः ७।१।५८,६०,६१,६२,६३,६४ ।

† तृप-टी-दि, (६०१) वा सिः, (५०२) वा इम्, अतर्पीत् । इमोऽभावपक्षे, (६०४) ऋस्थाने वा रः, अनिमत्त्वात् (५०४) अकारस्य वृद्धिः अत्राप्सीत् । रस्य विकल्पपक्षे, अकारस्य वृद्धिः अतार्प्सीत् । दीर्घविकल्पपक्षे (५६५) ङः अतृपत् ।

‡ मोहिता, मुह-डी-ता, (५०२) वा इम् । इमो विकल्पपक्षे मोग्धा, अन्यो विकल्पपक्षे मोढा, धर्मरक्षणादावी गुणे, (१०५) हस्य ढः, (५०५) तस्य धः, (४७) धस्य ढः, (७७) ढलोपः ।

(२२५) णश नृ यू नाशे।

७४२। नश नेश वा ङे। (नश ।१।, नेश ।१।, वा ।१।, ङे ७।)।

प्रानेशत् प्रानशत्। नशिता प्रनंग्धा प्रनंष्टा, षशान्तत्वात् (५४८) न णः। *

(२२६) शमु ष्य इर् उपशमे।

प्रशिशाम्यन्ति। †

(२२७) क्लमु भिर् ग्लानौ।

क्लाम्यति क्लामति। †

(२२८) असु इर् क्षेपे।

आस्थत्। †

(२२९) यसु इर् यत्ने।

यस्यति यसति, संयस्यति संयसति। अन्यत्र प्रयस्यति। ‡

(२३०) लुभ्य इर् गार्द्धे।

लोभिता लोब्धा। ‡

(२३१) ञीर् मिदा स्नेहे।

मेद्यति। ‡

(२३२) षू यो ङ सूतौ।

असविष्ट असोष्ट। ‡

---

* णशधातो र्नेश आत् वा ङे। नश-टौ-दि (५६५) ङः, वा नेश-आदेशः। (५४८) शान्तत्वात् नस्य णत्वम्। णौ-ता (५७२) वा इम् नशिता। इमो विकल्पपक्षे प्रपूर्व्व-नश-णौ-ता (७४१) नुम्, (१७८) षड्। षडो विकल्पपक्षे (१५४) षड्, (४०) तस्थाने टः। "नशिमन्योरलिट्येत्वं वक्तव्यम्" इति ६।४।१२० सूत्रव्याख्याने काशिकाधृतं वार्त्तिकम्।

† प्रशिशाम्यति, (७४०) शमादित्वात् दीर्घः, (५४८) मदायन्त-नी णत्वम्। क्लाम्यति (५९४) वा श्यन्, शमादित्वात् दीर्घः। विकल्पपक्षे शप् (५९१) ष्ठिवुक्लमीति दीर्घः, क्लामति। आस्थत् असु-टौ-दि, (५६५) ङः, (६५२) अस्थादेशः। पक्षे आसीदिति।

‡ यस—संपूर्व्वक-यसधातोः (५९४) श्यन् वा, संपूर्व्वकादन्यत्र (७३८) नित्यं श्यन् प्रयस्यति। लुभ-णौ-ता, (६०६) वा इम् लोभिता लोब्धा। मिद-तिप् श्यन् (७४०) मिदेर्गुणः मेद्यति। षू—तङ्, (५७२) वा इम्, असविष्ट असोष्ट।

(२३३) षो दी ङ य क्षये ।

## ७४३ । दीङस्त्र्यां यन् यप्णौ ङा सनि तु वा ।

(दीङ: ६।, त्र्यां ७।, यन् ।१।, यप्-णौ ७।, ङा ।१।, सनि ७, तु ।१।, वा ।१।) ।

दीङस्त्र्यां यन्, यपि णौ च ङा, सनि तु वा स्यात् ।

अदास्त । दिदीये । *

(२३४) जनी'म्य ङ प्रादुर्भावे ।

जायते । †

## ७४४ । जनवधः सेमो ऽकमवमाचमो ञ्णित्-ञदिणि स्वो ऽमयमविस्रमस्तु वा ।

(जन-वध: ६।, सेमम: ६।, अ-कमवमाचम: ६।, ञ्णित्-ञदिणि ७।, स्व: १।, अम-यम-विस्रम: ६।, तु ।१।, वा ।१।) ।

जनो वधः सेमोऽमन्तस्य च कमवमाचम-वर्जस्य स्वः स्यात् ञ्णिति ञति इणि च, अम-यम-विस्रमस्तु वा । अजनि अजनिष्ट । जज्ञे । ‡

---

* यप् च णुय समाहारे तस्मिन् । यप् इह (११०६) ल्यप्स्थाने जात: प्रत्यय: । णुरिह गुणप्राप्तियोग्य इत्यर्थ: । सनि तु ङा वा स्यादिति । अदास्त इति दो-टी-सम्, सिः, अनेन गुणिनि परे ङा, ङित्त्वादन्त्यस्य स्थाने । क्या ए, दिदीये, अनेन यन् नित्त्वादन्ते । णौ (गुणयोग्ये) दापयति । यपि प्रदाय । णौ किं, दीयते । सनि दिदासते दिदीषते । पाणिनि: ६।४।६३, ६।१।५० । "सनि दीङ:" इति कातन्त्रम् ।

† जायते, जन-ते, श्यन्, (५८७) आदेश: ।

‡ जनश्च वधश्च तयोः । इमा सह वर्तमान: सेम्, सेम् चासौ अम् चेति तस्य । कमश्च वमश्च चा-चम् च ते, न सन्ति ते यत्र स तस्य । ञ च ण च ञ्णौ, तौ इतौ यस्य स ञ्णित्, ञ्णिच्चासौ ञश्चेति ञ्णित्ञत्, ञ्णित्ञश्च इण् च तस्मिन् । अमश्च यमश्च विस्रम च तस्य । अकमवमाचम इति सेमम इत्यस्य विशेषणम् । ञ्णिति ञति, ञ-इत् ण-इत् ञप्रत्यये परे इत्यर्थ: । यथा—घञ्, जन्म वध्यम् । णक, जनक: वधक इत्यादि ।

(२३५) दीपी ङ्य ऋ दीपने ।

अदीपि अदीपिष्ट । *

एवं (२३६) पूरी ङ्य प्यायने ।

(२३७) पद्यौ ङ गतौ ।

(६४३) पदस्तनोण् घे इति । प्रत्यपादि, अपत्सातां । *

(२३८) बुध्यौ ङ अवगमने ।

अबोधि अबुद्ध । *

(२३९) नह्यौ ञ बन्धे ।

(२३७) नहो धङ् भौ । अनात्सीत्, अनद्ध । *

इति दिवादि-पादः ।

---

५य पादः—स्वादिः ।

(२४०) षु ञ न बन्धे ।

सुनोति, अभिषुणोति, सुनुतः सुन्वन्ति ।

(६२३) स्तुसुधोरितौम् । व्यषावीत् । असविष्ट असोष्ट । सुषुविव ।

विसविष्यति विसोष्यति, (५७२) स्यान्तत्वात्र षः । †

---

अजनि, जन-टौ-तन्, (६४३) इण्, (६४४) तन्लोपः, (५७७) वृद्धिः, अनेन ह्रस्वः । पक्षे च्चौ सिः, अजनिष्ट । ठौ-ए, जज्ञे चित्वं, (२३०) उङ्लोपः, (४६) नस्थाने ञ । पाणिनिः ७।३।३४,३५, वार्त्तिकञ्च ।

* दीप-टौ-तन् (६४३) इण् वा, (६४४) तन्लोपः, अदीपि । इणो विकल्पपक्षे अदीपिष्ट । प्रत्यपादीति (५४९) णत्वम् । अबुद्ध इति बुध-तन्, इणो विकल्पपक्षे सिः, (५६२) सिलोपः । अनात्सीदिति अनिम्त्वात् (५७४) वृद्धिः ।

† सु-तिप्, (७१८) स्वादेः नुः, (५४२) गुणः, सुनोति । अभिषुणोति, (५८२) षत्वं, (१०७) णत्वम् । सुनुतः ङित्वात्र गुः । सुन्वन्ति, (५८८) उकारस्य वः । व्यषावीत्, वि-सु-टौ-दि (५७२) अभ्यपि षत्वम् । टौ-तन् (५७३) वा इम्, असविष्ट असोष्ट । ठौ-व सुषुविव, (५७३) वृद्धसुनीत्यत्या इति इम्-विकल्प-निषेधात् (५८४) नेमस्वृमिति नियमेन नित्यमिम्, (५८८) उव्, (१११) षत्वम् ।

(२४१) डु मि ञ न क्षेपे।

७४५। मिम्यो र्यप्यौ ञ्याऽखलालि सिवस्तु वा।

(मिम्यो: ६॥, यप्-यौ ७, ञ ।१।, ण-खल्-णालि ७, सिव: ६।, तु ।१।, वा ।१।)।

अमासीत्। प्रामास्त। *

(२४२) चि ञ न चित्यां।

७४६। चेः किर्वा सन्ञ्योः।

(चे: ६।, कि: १।, वा ।१।, सन्-ञ्यो: ७॥)।

चिकाय चिचाय। चिक्ये चिच्ये। †

(२४३) स्तृ ञ न स्तृतौ।

७४७। स्वाद्यृद्दु-रक्षु वेम् सन्मठीसेः।

(स्वादि-ऋत्-अत्-उ: ५।, अक्षु: ५।, वा ।१।, इम् ।१।, सन्-मठीसि: ६।)।

स्नावर्ज-स्वाद्यृदन्ता-हदन्ताच्च हचो हच्च सनो मे स्नितयो-ठींस्योश्च इम् स्याद्वा। अस्तरिष्ट अस्तृत। स्तरिषीष्ट स्तृषीष्ट। ‡

---

* मि ञ न, मी ङ् य, मी ञ न, मी कि, एषां ञ आत् अपि मुग्धबोधन-बोध्ये च, गत्तु खलि णलि च, योपानोद्य वा, क इम् चन्मण स्थाने। अमासीत्, डी-दि, सि:, अनेन ञ, आदन्तत्वात् (१९८) इमूद्‌णी। प्रमास्त, अदायन-मी चैकम्। पाणिनि: ६।१।५०,५१, वार्त्तिकञ्च।

† सनि—चिकीषति चिचीषति। सन्ञ्यो: किं, चेचीयते। पाणिनि: ७।३।५८।

‡ स आदि र्यस्य स आदि:, आदिवाची स्वेति आघृत, आघृत चात् इकेति अचात्। नाथि स्त वर्जिम् योऽस्तस्याव्। ठी च सिच्‌ठीति, मे (आत्मनेपदे) ठीसि: मठीसि:, सन् च मठीसिच तस्य। स्वर्ण-संयोगादि-ऋदन्तात्, दीर्घ-ऋदन्तात्, उभयपदि-ऋत:, आत्मने-पदि-ऋतच ग्रहणं:। अस्तरिष्ट इति स्त-टी-तन्, अनेन वैरिम्, गणम् गुण:। इमो विकल्प-पक्षे अस्तृत, (६५८) धी: सिज्वत् न गुण:, (६६८) स्तिर्णीय:। एवं डी-षीष्ट। पाणिनि: ७।२।४१,४२,४३।

(२४४) वृ ञ न वृतौ ।

अवारीत् । अवरीष्ट अवरिष्ट अवृत । ववरिथ, ववृव । वरिषीष्ट वृषीष्ट । *

(२४५) धु ञ न कम्पे ।

(६२१) स्तुधोरितीम्, अधावीत् ।

(२४६) हि न वर्द्धने गतौ ।

प्रहिणोति । †

७४८ । हेः खेरनङि घिः ।

(हेः ६।, खेः ५।, अनङि ७, घिः १।) ।

खेः परस्य हेः घिः स्यान्न तु अङि । जिघाय । ‡

(२४७) क्षि न क्षतौ हिंसे ।

७४९ । क्षिचिण्व्योः क्षधौ श्नौ ।

(क्षि-चिण्व्योः ६॥, क्ष-धौ १॥, श्नौ ७) ।

क्षणोति । अक्षणीत् (५६८) अतएवेदितो गुण् । चक्षण । क्षणिता । क्षण्यात् । §

---

* अवारीत्, ञ-टी-दि, (५८०) ञ इत्यस्य प्रतिप्रसवात् (५५४) इम् । अवरीष्ट, ञ-टी-सम्, सिः, अनेन वा इम्, (६२०) इमो वा दीर्घः, दीर्घ-विकल्पपक्षे अवरिष्ट, इमो-विकल्पपक्षे अवृत, (६५९) सेः कित्वात् न गुणः, (५६२) सिलोपः । ववरिथ, ञ-टी-थप् (६१६) प्रतिप्रसवात् (५५४) इम् । ववृव टी-व, (५८४) इम्निषेधः । टी-सीष्ट वरिषीष्ट वृषीष्ट, अनेन वा इम् । इमोऽभावपक्षे (६५९) कित्संज्ञा ।

† (५४८) इनलोप्याविभ्यामिति णत्वम् ।

‡ अङि तु, अजीहयत् । पाणिनिः ७।३।५६ ।

§ क्षि-चिण्व्योरिकाराद्यनन्त्यात् विभक्त्युत्पत्तेः पूर्वं कृत् क्षि इत्यत्र चिण्व इत्येतयोः श्नौ परे क्ष धि आदेशौ स्यातामित्यर्थः । अक्षणीदित्यादौ अकारस्य इत्संज्ञत्वेन अकारान्तत्वाभावात् तस्मिन् परे (५०) न गत्वालापः ।

(२४८) दन्भु न दम्भे।

देभतुः ददम्भतुः। *

## ७५०। श्रन्थ-ग्रन्थ-दन्भां थपि न-लोपो वा। †

(श्रन्थ-ग्रन्थ-दन्भां ६॥, थपि ७।, नलोपः १।, वा।१।)।

देभिथ ददम्भिथ।

(२४९) धिवि न प्रीतौ।

धिनोति।

(२५०) श्रम्भु ञ न श्रान्ति-संहत्योः।

(५८०) श्राम्तादिति लेरात्। श्रामम्भे।

इति स्वादि-पादः।

---

४र्थ पादः—तुदादिः।

(२५१) तुदो ञ श व्यथे।

तुदति तुदते।

(२५२) भ्रस्जो ञ श पाके।

भृज्जति। अभ्राक्षीत्। ‡

## ७५१। भ्रस्जोऽरे वौ भर्ज वा।

(भ्रस्जः ६।, अरे ७।, वौ ७।, भर्ज।१।, वा।१।)।

---

* देभतुरिति (५६६) वा कित्संज्ञायां, (५६०) नलोपे, (५०९) दभयत्वात् द्विलोपः, अकार एकारश्च।

† श्रथ थप् किता इति ज्ञाते, दभि थपि इत्येतयोरिदन्तुमभ्रयोः थप्-विभक्तौ (५६८) नलोपनिषेधापत्तिः स्यात्। "श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वेति व्याकरणान्तरम्" इति भट्टोजिदीक्षितः।

‡ तुदत्यादि (७२८) श प्रत्ययः, तस्य ङित्त्वात् न गुणः। भृज्जति (६६१) जिः, अर्थात् रस्य ऋः। एवं भृज्जते। अभ्राक्षीत्, भ्रस्ज-दी-दि, चणिमत्वात् (५७३) इडिः, (२१६) स्वादेः सलोपः, (१५४) षड्, (६०२) षस्य कः, (१११) षीः तस्य षत्वम्।

अभार्क्षीत् । बभर्ज बभ्रज्ज, बभ्रज्जे बभर्जे । *

(२५३) मुच ॡौ अ ञ प मोचने ।

(७४१) मुच् रध इति मुच् । मुञ्चति । अमुचत्, अमुक्त । †

(२५४) ञि लिपौ अ ञ प लेपने ।

अलिपत् । अलिपत अलिप्त । ‡

(२५५) षिचो अ ञ प क्षरणे ।

निषिञ्चति । न्यषिचत् । न्यषिचत न्यषिक्त । निषिषेच । ‡

(२५६) कृती ञ प च्छिदि ।

(७३८) कृतृच्छृदितीम् वा । कर्तिष्यति कर्त्स्यति ।

(२५७) षू ञ प्रेरे ।

विसुवति । व्यषावीत् । §

---

* न रः परस्मिन् । अस्जो भर्ज् वा स्यात् परे धौ गुणसाधनयो॰न्ये इत्यर्थः । भर्जपक्षे अभार्क्षीत् । एवं अभाष्ट अभर्ष्ट । बभर्ज बभ्रज्ज इति ठौ-णप्, वा भर्जादेशः, (६४) सस्य दः, (४६) दस्य जः । बभर्ज, ठौ-ए (५६६) कित्त्वेऽपि (६६२) ञ्यां न वेग्रहणमिति ञिनिषेधः । कित्त्वाभावपक्षे गुणसाधनयोग्यत्वे सति भर्जादेशः । पाणिनिः ६।४।४७ ।

† अमुचत्, मुच-टौ-दि (५६५) ञिदित्त्वात् ङः । अमुक्त इति आत्मनेपदे ङस्याभावे सिः, धौदित्त्वादिमोऽभावे (६५८) सेः कित्त्वात् न गुणः, ततः (५६२) सेर्लोपः ।

‡ लिप-टौ-दि, (६१८) ङः, अलिपत् । टौ-तन्, आत्मनेपदे तेनैव वा ङः । पक्षे सिः (६५९) कित्संज्ञा, (५६२) सेर्लोपः । निषिञ्चति, नि-षिच-तिप् (७४१) नुम्, (५७२) षत्वम् । टौ-दि, टौ-तन्, लिपवत् साध्यम्, अभ्यव्यवायेऽपि षत्वम् । टौ-णप् निषिषेच, (५७२) द्वित्वेऽपि षत्वम् ।

§ विसुवति, वि-सू-तिप् (५८८) शव्, (५७२) षत्वम् । व्यषावीत् (५७९) वृद्धिरिति सूचे सुति-सुय-षत्वात् अजात् (५५४) नित्यमिम्, (५७४) अजन्तत्वात् वृद्धिः, अभ्यपि षत्वम् ।

(२५८) व्रश्चू श छेदे।

वृश्चति। अव्रश्चीत् अव्राक्षीत्। वव्रश्च वव्रश्चतुः। *

(२५९) ऋच्छ श गमनमोहकाठिन्येषु। †

७५२। ऋच्छो घुट्यां। (ऋच्छः ६।, घः १।, घ्यां ७)।

आनर्च्छ। †

(२६०) कॄ श विक्षेपे।

(६२८) ऋदिरचाविति इर्। किरति। चकरतुः। करीता करिता। ‡

७५३। प्रत्युपोपात् क्रः सुम् हिंसाच्छेदे।

(प्रति-उप-उपात् ५।, क्रः ६।, सुम् ।१।, हिंसा-च्छेदे ७)।

प्रत्युपाद्धिंसायां उपाच्छेदे किरतेः सुम् स्यात्। प्रतिस्किरति उपस्किरति। §

(२६१) तृम्प श प्रीणने।

---

* व्रश्च-दिप् (६६१) तिः, वृश्चति। टी-दि (५०२) ऊदित्वात् वा इम्। पक्षे (५०४) अनिम्त्वात् वृद्धिः, (१५४) षत्, निमित्तापाये नैमित्तिकस्याप्यपाय इति न्यायेन षत्वनिमित्तकस्य शस्य पुनर्दर्शनाले (२११) स्तादेः स-लोपः; (६०२) षस्य कः, (१११) कषयोः क्षत्वम्। वव्रश्चतुः (६६२) जिनिषेधः।

† कविकल्पद्रुमे "ऋच्छ श मूर्त्तौ गमनमोहयोः" इति दृश्यते। सिद्धान्तकौमुद्यान्तु "गतीन्द्रियप्रलयमूर्त्तिभावेषु" इति लिखितम्। ऋच्छो घः स्यात् घ्याम्। ऋच्छ-धातोर्वोऽकुलो-ऽभावात्, ऋतुसादिविभक्तौ च विच्यात् गुणाप्राप्तौ विधिरयं सामान्यतोऽपिवचः। तेन आनर्च्छ आनर्च्छतुरित्यादि, (५८०) घिः स्थाने आन्। पाणिनिः ७।४।११।

‡ चकरतुः (६२६) गुणः। करीता करिता (५५७) इम्, (६२७) इमो वा दीर्घः।

§ प्रतिश्च उपश्च प्रत्युपं, प्रत्युपश्च उपश्च प्रत्युपोपं तस्मात्। हिंसा च छेदश्च हिंसाच्छेदं तस्मिन्। प्रतिस्किरति हिनस्ति, उपस्किरति छिनत्ति छिनत्ति वा इत्यर्थः। (५०७) परि नि वि शेष समिष्वङ्गे चर अभिपूर्वकस्य न पत्वम्। पाणिनिः ६।१।१४०,१४२।

७५४। ढन्पां न-लुक् वा य-यौ।

(ढन्पां ६॥, न ।१।, लुक् ।१।, वा ।१।, य-यौ ७।)।

ढन्प तुन्प ढन्फ तुन्फ रिन्फ गुन्फ ढन्भ उन्भ शुन्भां नकारस्य लुक् वा स्यात् ये यौ च। ढपति ढम्पति। *

(२६२) चृती-श प हिंसे।

चर्तिस्यति चर्त्स्यति। †

(२६३) प्रच्छो श प्रीप्से।

पृच्छति। अप्राक्षीत्। पप्रच्छ पप्रच्छतुः। ‡

(२६४) सृजो श विसर्गे।

अस्राक्षीत्। ससर्जिथ सस्रष्ठ। §

(२६५) टु मस्जो श स्नाने।

मज्जति। अमाङ्क्षीत्। ¶

(२६६) स्पृशो श स्पृशि।

अस्प्राक्षीत् अस्पार्क्षीत् अस्पृक्षत्। ‖

---

* बहुवचनं गणार्थम्। गणश्च हवी गवसम्रारकः स्वयं स्पष्टीकृतः। यौ इति गुण-लावण्ययोर्मध्यवर्त्ती प्रत्ययः। यथा, तर्पयति ढम्पयतीत्यादि। ढपतीति शे परे न-लुक्। विकल्पपक्षे (५०) मकारानुस्वारः, (५१) अनुस्वारस्य मः। वार्त्तिकम्।

† (७२८) वा इम्।

‡ पृच्छतीति (६६१) जिः। अप्राक्षीदिति (१५७) वृद्, (६०२) सस कः, (१०४) षत्विमूलात् इकिः, (१११) षत्वम्। पप्रच्छतुरित्यत्र (६६२) न जिः।

§ सृज-डौ-दि, सिः, (५६१) सिस्वनी ईम्, (६०३) जित्वं स्वरादौ टः, (१०४) षकारस्य इकिः, (११५७) वृद्, (६०२) सस कः, (१११) षत्वम्। डौ-थप्, (५८६) वा इम्। इम्-विकल्पपक्षे वृद्, (४७) षस्य ठः।

¶ मस्ज-तिप् (६४) सस्वाने दः, (४६) दस्वने जः। डौ-दि, (७०१) वृद्, (२११) सलोपः, (५०) मकारानुस्वारः, (५१) अनुस्वारस्य ङः।

‖ स्पृश-डौ-दि, (६०३) सिः, (६०४) अ टः, अतः इकिः, वृद्, सस कः, [illegible] विकल्पपक्षे षकारस्य इकिः। सि-विकल्पपक्षे (६०५) सक्।

(२६७) विच्छ ञ गतौ।

विच्छायति विच्छति। अविच्छायीत् अविच्छीत्। *

(२६८) मृशो ञ मृशि।

अम्राक्षीत् अमार्क्षीत् अमृक्षत्। †

(२६९) इषु ञ वाञ्छे।

इच्छति। (१०६) वेमसहेतोरट् वा, एषिता एष्टा। †

(२७०) कुट ञि कौटिल्ये।

७५५। कुटां गुञ्णी ञ्णिति।

(कुटां ६॥, गु-ञी १॥, ञ्णिति ७॥)।

कुटादे र्गुणवृद्धी स्यात् ञिति णिति च, नान्यत्र। अकुटीत्। चुकोट। ‡

(२७१) व्यच ञि व्याजे।

विचति। विव्याच, विविचतुः। §

---

* विच्छ-तिप् (१२७) आयः, (१२१) धातुसंज्ञा, ततः भ्वादित्वात् तिप्शपौ। आय-विकल्पपक्षे तुदादित्वात् शः। टी-दि अदन्।

† मृश-टी-दि, अमृक्षत्। इष-ति (५८७) इच्छ-आदेशः।

‡ ञ च ण च ञ्णौ, तौ इतौ यस्य स ञ्णित् तद्भिन्नम्। ञित्-णितोः परयोः गुण-वृद्ध्योः सिद्धौ पुनर्विधानं नियमार्थं, तेन कुटादीनां ञित्णिद्भ्यामन्यत्र गुणवृद्धी न स्तः इति नियमः। ञित्-णितोस्तु गुणप्राप्तौ गुणः, वृद्धिप्राप्तौ वृद्धिरित्यर्थः। अतएव, अकुटीत् कुटिष्यति कुटनमित्यादौ न गुणः। नू णि सनि इत्यादीनां अनुपोदित्वात् न गुणोऽन्य च इति, अनुपलब्धत्वात् च। एवं गुणिष्यतीत्यादि। कुटादिश्च—कुट पुट कुच गुज गुड छिप छुर स्फुट त्रुट तुट चुट छुट जुड कड लुट कृड कुड पुड घुट तुड थुड स्थुड खुड स्फुर (स्फुल) स्फुड (स्फर) व्रुड त्रुड क्रुड भृड गुर णू धू गु ध्रु (कुच) कु (कू)। जिघ्रति जिघ इति द्वौ विकल्पेन कुटादिगणान्तर्गतौ भवत इति प्राचीनाः। पाणिनिः १।२।१।

§ विचति (६६१) ञिः।

७५६। ञ्णो जि-दत्तियदसि।

(ञ्णः ६।, जिः १।, ञ्णिदसि ७।)।

विचिता। *

(२७२) चुट ञि च्छेदे।

चुट्यति चुटति। †

(२७३) स्फुर ञि स्फूर्त्तौ।

निष्फुरति निस्फुरति। ‡

एवं (२७४) स्फुल ञि स्फूर्त्ति-चलनयोः।

(२७५) नू ञि स्तवने।

अनुवीत्। नुनाव। §

(२७६) मृ ङ म्रि मृतौ।

७५७। मृङः टौङो मं। (मृङः ५।, टौङ: ७, मं १।)।

यां यां-मत्ये च मृङो मं स्यात्। ¶ (६२०) ऋद्रिः ययक्टौपि।

---

* ञ च ण च ञ्णौ, तौ इतौ यस्य स ञ्णित्, ञ्णिच्च अस् च ञ्णिदस्, तत्र्योऽ ... तत्रिन्। ञ्णो जि: स्यात् न तु जिति णिति परे च। यथा विचिता विचिष्यति विच्यते विव्याच विविचतुरित्यादि। जिति णिति परे तु—व्यापयति व्यापक: उदव्यचा: (१०२२)। पाणिनिमते तु (६।१।१६) किति ङिति परे एव जि:, नान्यत्र। "व्यचे: कुटादित्वमनसीति वक्तव्यम्" इति वार्त्तिकम्।

† (५९४) भ्रमादमेति श्यन् वा।

‡ (६२५) निसस्फूँ ति वा षत्वम्।

§ अनुवीदिति कुटादित्वात् गुणवृद्धोर्निषेधे, (५८८) नुवोरित्युव्।

¶ टौ च ङी च यस्य टौङं तस्मिन् विषयसप्तमी। मृङो ङित्वेऽपि यां क्यात् ... च विषये मं स्यादिति नियम:, अन्यत्र तु परस्मैपदमेव। आत्मनेपदसूत्रस्थाने परस्मैपदिनो व्यपिदिति न्यायेन कदाचित्त्वन्यदपि स्यादिति केचित्। पाणिनि: १।३।६१ टि-विधेयोऽपि:।

म्रियते, अमृत, मृषीष्ट । मृङ् लिं, ममार, मरिष्यति । *

(२७७) ओ विजी ङ ष भी-कम्पे ।

७५८ । विजेर्युर्नेमि । (विजेः ६।, युः १।, न ।१।, इमि ७) ।

विजेर्युं नं स्यादिमि । अविजिष्ट । †

इति तुदादि-पादः ।

१म चतुर्गणाध्यायः ।

---

## ७मः । २य-चतुर्गणाध्यायः ।

---

१म पादः—रुधादिः ।

(२७८) रुधिरी ङ ञि आवरणे ।

रुणद्धि । *

७५९ । नसो न् श्नौ । (नसः ६।, न् ।१।, रे ७।, श्नौ ७) ।

नसो नकारः स्यादश्नो रे । रुन्धः रुन्धन्ति । †

---

* म्रियते (५८८) इत्यादि इव । अमृत मृषीष्ट, उभयत्र (६५९) ङित्त्वं ।

† विजिः किदिम् इति क्वचित् सिचावपि अतार्थमेवं ब्रूयात् ।। पाणिनिः १।२।२ ।।

---

* रुध-ति (७६८) श्नम्, [illegible] (२०) [illegible] ; (१०७) धत्वं, (१०५) दत्वं च, (६०) [illegible] ।

† [illegible] नसोऽलत्वपात् [illegible] रे इति [illegible] । [illegible] । [illegible] न् [illegible] । [illegible] । नकारस्य लोपः । तवर्गयुक्त-नकारस्य [illegible] (४८ सूत्रं द्रष्टव्यम्) । पाणिनिः [illegible] ।

अवृणत्, अवृणः अवृणत् । अवृणत् परीवृतीत् । *

(२७८) छृदु ञ धिर् देवने ।

(७२८) छर्दिष्यति छर्त्स्यति ।

एवं (२८०) तृदु ञ धिर्मादरे ।

(२८१) तृह ध हिंसे ।

७६० । तृह इम् पिद्धले ।(तृहः ६।, इम् ।१।, पित्-हल्-रे ७)।

तृहो नम इम् स्यात् पिति हले रे । तृणेढि तृण्ढः तृंहन्ति । अतर्हीत् अतृणत् । †

(२८२) हिसि ध कि हिंसे ।

७६१ । नणो न लोपः । (नणः ५।, न ।१।, लोपः १।)

हिनस्ति । ‡

(२८३) अञ्जू ध जि व्यक्ति-गति-म्रक्षणे ।

अनक्ति । §

---

* अवृणदिति ध्वा दिप्, (६७२) ईर्लोपः, (६४) धस्य त (द वा) । ध्वाः सिप्, (६९०) [illegible] रेफे, रस्य विसर्गः ; रेफाविसर्गे (६४) [illegible] त् । [illegible] (५६१) [illegible] [illegible] परीवृतीत् ।

† [illegible] ॥ [illegible] । तृह-तिप्, [illegible] नम्, [illegible] तृण्ह [illegible] (१०५) [illegible] ढः, (५०१) [illegible], (४०) [illegible] ढः, (७७) ढलोपः, (१००) णत्वं, तृणेढि । तृह-तस्, तृण्ढः, (७५९) नणो [illegible] (४०) [illegible] पूर्ववत् । [illegible] तृंहन्ति, (५०) नस्यानुस्वारः । टौ-हि, (५०२) [illegible] इम् अतर्हीत्, [illegible] (६०५) [illegible] (१०५) [illegible] ढः, (६०९) [illegible], (१११) [illegible] । [illegible] [illegible] पाणिनिः ७।३।९२ ।

‡ [illegible] । [illegible] ।

## ७६२ । अनुबः सेरिम् पे ।

(अनुबः ५।, सेः ६।, इम् ।१।, पे ७।) ।

अनुबः परस्य सेरिम् स्यात् पे । प्राणीत्, प्राणम । *

(२८४) जि इन्धी क ध दीप्तौ ।

इन्धाञ्चक्रे । †

इति रुधादि-पादः ।

---

२य पादः—तनादिः ।

(२८५) तनु ञ द विस्तृतौ ।

तनोति तनुतः तन्वन्ति, तन्वः तनुवः तन्मः तनुमः । *

## ७६३ । सेर्लुक् त-थासो स्तन्थोऽक्वौ ।

(सेः ६।, लुक् ।१।, त-थासोः ७॥, तन्थः ५॥, अक्वौ ५।, वा ।१।) ।

अवर्जात् तनादेः सेर्लुक् स्याद्वा त-थासोः परयोः ।

अतत अतनिष्ट, अतथाः अतनिष्ठाः । †

---

* अनुबधातोरुदित्वाद्वेमते नित्यार्थं विधानम् । ईरन्ध्र, प्रणिता अनुत्ता, प्राणिषति अनुष्यति इत्यादि । प्राणीदिति (५८०) आस्तादिति ईटाम् । पाणिनिः ७।२।७६ ।

† (५८२) विंशादीनाम्, (५८३) इन्धेश्च ।

---

* तनोति (६८८) ऊप्, (५४२) उप उकारस्य गुणः । तन्वन्तीत्यादौ (२१) उवाद्वः । तनुव इत्यादौ (६२२) उकारलोपो वा ।

† तथ थास् च तौ तथौ । तन्धातुवर्णात् न इति भावोमितरत्रेव । अनया परस्मै-पदस्य तां तं त एषु अतानिष्टाम् अतानिष्टम् अतानिष्ट एष्वपि प्रवृत्तिः । तयोरिमुखी विधानमपि बाहुल्यं अष्टार्थम् । अतत अतथाः इति, अनेन सेर्लुकि, अनुस्वारलोपात् (२६) अनादिः

(२८६) षणु अ द दाने।

सनोति। असात असनिष्ट, असाथाः असनिष्ठाः। सायात् सन्यात्। *

(२८७) क्षणु अ द वधे।

अक्षणीत्। †

(२८८) क्षिणु अ द हिंसायां।

७६४। नोप्युको गुर्वा त्वृतः। (न ।१।, उपि ७।, उकः ६।, गुः १।, वा ।१।, तु ।१।, ऋतः ६।)।

क्षिणोति। ‡

(२८९) ऋणु अ द गतौ।

ऋणोति अर्णोति। ‡

(२९०) डु कृञ अ द करणे।

करोति। ‡

७६५। कुरुवलोपो ऽव्ये। (कुः ५।, उव्-लोपः १।, अव्ये ७।)।

कुर्व्वः कुर्मः, कुर्य्यात्। अकार्ष। §

---

अक्षतमिति न्यायेन गुणि-सौ परे आर्धनिषेधे, त-थयोः तथासोः परयोः (६०६) अन्-लोपः। अनुः किं, असात असाथाः उभयत्र (६५९) सौ. किञ्वात् गुणाभावे, (५६२) नित्यं सिञ्लोपः। पाणिनिः २।४।७९।

* असातिष्ठादि पक्षेण सेडुक्ति, (६५५) जनसनेति आ, पक्षे (५५४) सेटिम्। सायात् सन्यादिति विकल्पेन आ।

† अक्षणीदिति (५७६) हयवर्णनात् न वृद्धिः।

‡ उपि उको गु र्न स्यात्, ऋत ऋकारस्य तु वा। क्षिणु-ति, (६८८) उप्, तस्मिन् परे क्षिण उक इकारस्य न गुणः, तिपि परे उप उकारस्य (५४२) गुणः। ऋणोति अर्णोति, अत्र उक ऋकारस्य वा गुणनिषेधः, एवं तृणोति तर्णोति इत्यादि। उकः किं, कृ-तिप् करोति, अत्र धातु-ऋकारस्य नित्यं गुणः। पाणिनौ भाष्यादिमतम्।

§ व य म र य ल व अव्यं तस्मिन्। कृञः परस्य उपो लोपः स्यात् वे मे क्ये च परे। कुर्व्वः इत्यादि व म य परेषु उपो लोपः, (२२८) अंगप्रत्ययोक्त इत्यत्र कुरवर्णनात् न दीर्घः।

## ७६६ । समपरेः सुमुपात्तु भूषा-सङ्घ-प्रतियत्न-विकृताध्याहारे ।

(सम्-परेः ५।, सुम् ।१।, उपात् ५।, तु ।१।, भूषा-सङ्घ-प्रतियत्न-विकृताध्याहारे ७।) ।

आभ्यां कृञः सुम् स्यात् उपात्तु भूषादावर्थे । संस्करोति, समस्कषातां, समस्कारिष, समस्कारिव, संस्क्रियात्, संस्कषीष्ट । परिष्करोति, पर्य्यष्कार्षीत् पर्यस्कार्षीत्, उपस्करोति । *

## ७६७ । हस्ते पाणौ प्राध्वं जीविकोपनिषदौ व्यस्य कृञि स-तिरो मध्ये पदे निवचने मनस्युरस्युपाजेऽन्वाजे साक्षादादेस्तु वा । †

(हस्ते—उपनिषदः ५।, व्यस्य ६।, कृञि ७।, सः १।, तिरस्—साक्षादादेः ५।, तु ।१।, वा ।१।) ।

हस्तेकरोति, तिरस्करोति करोति-तिरः ।

इति तनादि-पादः ।

---

करोतीत्यत्र, सोपसर्गादिसयोस्तु सरात्मा विधिर्बलीति न्यायेन गुण एव । ठी-व चकार (५८४) नेमसुमिति निषेधात् न इम् । पाणि॰ ६।४।१०८,१०९ ।

* सम्-परिभ्यां कृञः सुम् स्यात्, सुम उकारेत् पित्त्वार्थः, मकारेत् (१०) कथालोपादौ सकारस्थितिः । पर्य्यायनिधानेऽपि पाणिनिमतैकवाक्यत्वात् भूषासङ्घयोरेव ; "सम्पूर्वस्य क्वचिदभूषणेऽपि सुट्" इति सिद्धान्तकौमुदी । उपात्तु भूषादावर्थे । भूषा अलङ्करणम् । सङ्घः समूहः (समवाय इति पा.) । प्रतियत्नो गुणान्तराधानम् । विकृतं स्वरूपान्यथाभावः (वैकृतमिति पा.) । अध्याहारो वाक्यस्य आकाङ्क्षितैकदेशपूरणम् । समस्कषातां ठी-पातां, (७४०) सम्बर्ज्जनात् न इम् । (६५८) कितसंज्ञाया न गुणः । समस्कारिष ठी-थप्, (६१९) सम्बर्ज्जनात् इम् । समस्कारिव ठी-व, (५८४) नदुमिति वचनादिम् । संस्क्रियादिति ठी-यात्, (६११) कृञः आशिषीति कृतः कुरादेशः । (६१०) सक्कमे रिः । संस्कषीष्ट (६५८) कितसंज्ञायां न गुणः । परिष्करोति (१७०) षत्वम् । ठी-दि (६१६) सिचवकोः पत्वम् । पाणिनिः ६।१।१३७,१३८,१३९ ।

† हस्ते इत्यादिः उपनिषदन्तस्य अव्ययस्य कृञ् धातौ सहपदे नित्यं समासः स्यात्,

(२८१) क्षु ओ अ ग द्रव्यविपर्य्यये ।

क्षोणाति । (७०१) ग्राङ्गोरिति, क्षोणन्ति ।

(२८२) स्कु अ ग न उद्धृतौ ।

७६८। स्कु स्कन्भु स्कुन्भु स्तन्भु स्तुन्भुभ्यः स्नुस्नौ वे रे । (स्कु—स्तुन्भुभ्यः ५म, स्नु-स्नौ १म, वे ७, रे ७)।

एभ्यो वेऽर्थे स्नुः स्ना च स्यात् रे परे । *

स्कुनोति स्कुनाति, विस्कभ्नोति (६२५) विस्कभ्नेति षः—विष्कभ्नाति । एवं विस्कुभ्नोति विस्कुभ्नाति, विष्टभ्नोति विष्टभ्नाति, व्यष्टभत् व्यष्टम्भीत्, वितष्टम्भ । स्तुभ्नोति स्तुभ्नाति । †

(२८३) मी अ ग वधे ।

(७४५) मिम्योरिति ङा, अमासीत् ममास ।

---

तिरःप्रभृतिषु वा । एव समासः एकपदीभावमात्रं, नतु द्वन्द्वादिरेकतमः । समासकरणञ्च (२६६) पूर्ब्बनिपात-नियमार्थं ज्ञापो यथार्थञ्च । हस्ते पाणौ स्वीकारे (उपयमने इति पा.) । प्राध्वं बन्धनानुकूल्ये । जीविकोपनिषदौ उपमायाम् । तिरोऽन्तर्धौ । मध्ये पदे निवचने मनसि उरसि इति पञ्च अनत्याधाने एव, अत्याधाने तु उरसि कृत्वा हस्तं शेते, पदे कृत्वा मस्तकं शेते वा, इत्यादौ न समासः । उपाजे अन्वाजे बलाधानार्थे । साक्षादादिरभूत-तद्भावे । आदिना—मिथ्या चह्रा नमस् आविस् प्राद्रुस् वषिस् वशे इत्यादि । पाणिनिः १।४।७१—७९, वार्त्तिकञ्च ।

---

* [illegible] स्तुन्भ स्तन्भ स्कुन्भ स्कु रोधने इति चत्वारः सौत्रा धातवः । पूर्ब्बधातुपाठे वे न दृश्यन्ते [illegible] पदविशेषसाधनार्थं सूत्रे तु दृश्यन्ते ते सौत्राः । स्कु आदयः पञ्च स्वादिगणीयाः क्र्यादिगणीयाश्च । "स्कु च आप्रवणे" इति सिद्धान्तकौमुदी । "स्तन्भु स्तुन्भु स्तम्भने, स्कुन्भु निष्कोषणे, स्कुन्भु धारणे" इति माधवः । पाणिनिः ३।१।८२ ।

† विस्कभ्नु इति सूत्रे ना-प्रत्ययस्य ङित्त्वात् विस्कभ्नोतीत्यत्र न णत्वम् । विष्टभ्नोति विष्टभ्नाति उभयत्र (५७२) षोऽत इति षत्वं । व्यष्टभदित्यादि (५६५) ङे वा, [illegible] व्यष्टम्भीदिति षत्वम् । वितष्टम्भेति द्विरुक्तयापीष्यपि षत्वम् ।

(२९४) पू ञ गि शोधने ।

## ७६९ । प्वादेः ह्रस्वो ने ष्यादेस्तु वा ।

(पू-आदेः ६।, ह्रस्वः १।, ने ७।, ष्ट-आदेः ६।, तु ।१।, वा ।१।) ।

प्वादीनां ह्रस्वः स्यात् ना-स्थे परे ष्यादेस्तु वा । पुनाति । *

(२९५) कॄ ञ गि हिंसे ।

अकरीष्ट अकरिष्ट अकीर्ष्ट । करिषीष्ट कीर्षीष्ट । †

(२९६) धू ञ गि कम्पे ।

धुनाति । अधावीत् अधोवीत् । ‡

(२९७) ग्रह ञ गादाने ।

गृह्णाति । ‡

## ७७० । हसाच्नानो ह्नौ ।

(हसात् ५।, ना ।१।, आनः १।, ह्नौ ७।) ।

हसात् परो ना आनः स्यात् ह्नौ परे । गृहाण । अग्रहीत् । जग्राह जगृहतुः जग्रहिथ । §

---

* ने नाप्रत्यये परे इत्यर्थः । प्वादिस्तु—पू लू धू कॄ शॄ दॄ जॄ स्तॄ पॄ वॄ दॄ भॄ मॄ गॄ झॄ नॄ ऋ ज्या री ली व्ली (ब्ली) प्री ल्वी (प्वी) भी इति । ज्या नि जरायामित्यस्य प्वादिपाठस्तु—जीनः जीनवानित्यत्र स्वादित्वात् (१०५२) तस्याने न । पाणिनिः ७।३।८० ।

† अकरीष्टेत्यादि (७४७) इम्, (६२७) वा इमो दीर्घः, इमो विकल्पपक्षे (६५९) किन्त्वंज्ञायां, (६२८) ऋकारस्य इर्, (२२८) दीर्घः । एवं डी-सीष्ट वा [illegible]पक्षे ऋ इर्, तस्य दीर्घः ।

‡ (५०१) वेटूदिदिति वा इम्, पक्षे (५०४) अनिम्त्वात् वृद्धिः । ग्रहादि (६६१) ञि:, रस्थाने ऋ ।

§ ग्रह-जीर्णेति (६६१) ञि:, अनेन ना-स्थाने आन, (५४०) अकारात् ह्रिलोपः । एवं बधान पुषाण मुषाण इत्यादि । हसात् किं, जानीहि । अग्रहीदिति (५०९) [illegible] ञि: । जगृहतुः (६६१) ञि: । पाणिनिः ३।१।८३ ।

## ७७१ । ग्रहेरिमो घोऽक्त्यां ।

(ग्रहेः ५।, इमः ६।, घः १।, अक्त्यां ७)।

ग्रहेः परस्य इमो घः स्यात्, न तु क्त्यां । ग्रहीता । *

(२९८) शॄ श गि हिंसे ।

## ७७२ । शॄपॄद्रां ह्वो वा किट्क्यां ।

(शॄ-पॄ-द्रां ६॥, ह्वः १।, वा ।१।, कित्-क्यां ७)।

एषां ह्वः स्यात् किति क्यां वा । शश्रतुः शशरतुः । †

एवं (२९९,३००) पॄ श गि पालने, दॄ श गि विदारे ।

(३०१) ज्या श गि जरायां ।

जिनाति, जिज्यौ । ‡

(३०२) व्री श गि वृत्यां ।

व्रिणाति व्रीणाति । ‡

(३०३) ज्ञा श बोधे ।

जानाति । ‡

(३०४) श्रन्थ श मोचे ।

श्रथ्नाति । श्रेथतुः शश्रन्थतुः, श्रेथिथ शश्रन्थिथ । ‡

---

* एवं ग्रहीतुं ग्रहीष्यति इत्यादि । क्यान्तु जगृहिव जगृहिम । पाणिनिः ७।२।३७ ।

† शश्रतुरिति ह्रस्वाभावपक्षे (६२६) गुणः । एवं पप्रतुः पपरतुः, दद्रतुः ददरतुः । पाणिनिः ७।४।१२ ।

‡ जिनातीत्यादि (६६१) जिः या स्थाने इः । व्रिणातीत्यादि (७६९) वा ह्रस्वः । जानातीति (५९०) जा-आदेशः । श्रथ्नातीति (५६७) न-लोपः । श्रेथतुरित्यादि (५६६) कित्त्वे न-लोपः, (५७९) त्विलोपादिश्च । थप् (७५०) अन्यपक्षेऽपि न-लोपपक्षे त्विलोपादि ।

एवं (२०४) भक्ष म दर्शे ।

(२०६) क्रुध म निष्कोषे ।

(५७२) वेमुदितीम् वा । निरकोषीत् निरकुषत् । *

(२०७) चम म भोजने ।

चमिता चष्टा । †

(२०८) ह्रृ ग वरणे ।

अवरीष्ट अवरिष्ट अवृत । वहृषे । वरिषीष्ट वृषीष्ट । ‡

इति क्र्यादि-पादः ।

---

## ४र्थ पादः—चुरादिः ।

---

(२०९) चुर ञि स्तेये ।

**७७३ । चुर्भ्यो ञि वा ।** (चुर्भ्यः ५म, ञिः १म, वा ।१म) ।

चुरादे ञिः स्यात्ता स्वार्थे । चोरयति चोरयते । अचूचुरत् । चोरयामास । चोर्य्यात् । पक्षे चोरतीत्यादि । *

---

* निरकुषदिति ञनिमृपक्षे (६०५) सक्, (६०२) सक वा:, (११६) मलम् ।

† चमिता चष्टा (६०६) वेमसहतीम् वा, (१५९) षत्, (४०) तवाने ट ।

‡ अवरीष्टेत्यादि (७४०) वा इम्, (६२७) प्रभो वा दीर्घः, अनिम्-पक्षे (६५८) ङी: किद्वं, (५६२) सिचोपः । ठी-सी वहषे, (५८४) नेमहृमिति इम्-निषेधः । वरिषीष्टेत्यादि (७४०) इम्, पक्षे (६५८) कित्संज्ञायां न गुणः ।

---

* वा-शब्दस्य व्यवस्थावाचित्वात् चुरादिभ्यो ञिर्नित्यः, [illegible] (णिजन्त[illegible] वचनात्) युजादिभ्यो वा [illegible] । पक्षे [illegible] [illegible] [illegible]रित्यर्थः । यत्तु चुरधातोः ञि-[illegible] पक्षे चोरतीत्युदाहरणं [illegible] [illegible] चुरादेरनित्यत्वज्ञापनार्थम् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

(२१०) कृत [illegible] संशब्दने ।

७७४ ।　कीर्त्तिः कृतः । (कीर्तिः १।, कृतः ६।) ।

कृतः कीर्त्तिः स्यात् ञौ ।　कीर्त्तयति । *

(२११) गण त् क संख्याने ।

७७५ ।　हसाल्लोपोऽमिल्वद्योः ।
(हसात् ५।, लोपः १।, अमिति ७।, वत्-योः ६॥) ।

हसात् परयोः वकार-यकारयोर्लोपः स्यादमिति । गणयति ।†

७७६ ।　वेङ् गणकथः खेऽङि ।
(वा ।१।, ईङ् ।१।, गण-कथः ६।, खेः ६।, आङि ७।) ।

---

स्वार्थे ञिः । चुरादिभ्यो ञे ञिस्वेऽपि उभयपदं न स्यात्, अन्यथा [illegible] वितर्के इत्यादि-[illegible] स्यात्, तेन ञितचुरादि-[illegible], ञितचुरादिरुभयपदम्, [illegible] चुरादिः परस्मैपदमिति । यत्तु अत्र उभयपदोदाहरणं तत् कदाचित् [illegible] । [illegible]-[illegible] चुर-ञिः, (५४२) गुणः, चोरि इति (६११) धातुसंज्ञायां, तिप्-शप्-गुणाः । चोरि-[illegible], (५५०) [illegible], (६११) [illegible], (५५८) [illegible], (५६४) [illegible] परभागस्य रि [illegible] लोपः, (५५९) [illegible] [illegible] उकारे, (६१८) [illegible] इति [illegible], (६१९) [illegible], (६४१) [illegible]-[illegible] ।　[illegible], (५८२,५८३) [illegible] ।　[illegible], [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।　[illegible]: ४।१।११ ।　[illegible] [illegible] [illegible] ।　[illegible] (चुरादि) [illegible]—[illegible] ।

* [illegible] [illegible], [illegible] [illegible] कदाचित् [illegible] न [illegible] [illegible] [illegible] ।　पाणिनिः ७।४।१०१, ८।२।७८ ।

† [illegible] ।　[illegible] [illegible] [illegible], [illegible] न स्यात् ।　[illegible] [illegible], [illegible] ।　[illegible] [illegible], [illegible] ।　[illegible] [illegible] [illegible]-[illegible] ।　[illegible] [illegible]

गच-कथयोः श्चेरीङ् स्यात् वा अङि । अजीगणत् अजगणत्,
(६१८) अगृबोपित्वाच ह्रः । *

(६१२) कथ तु क वाक्यप्रबन्धे ।

अचीकथत् अचकथत् । *

इति चुरादि-पादः ॥

३य-चतुर्गणाध्यायः ।

---

८मः । ३य-चतुर्गणाध्यायः ।

१म पादः—आन्तः ।

## ७७७ । ञिः प्रेरणे । (ञिः १, प्रेरणे ७) ।

धौ ञिः स्यात् प्रेरणेऽर्थे । *

---

घत्वात् न ह्रस्वः, एवं कृच तु व्याभाष-मन्गुधोरित्यादीनां कृचमबोधादौ न कृत्यः । पाणिनिः ६।४।४८,४९ ।

* ईङः व्यागुपत्वात् ञत्वमवंस्थानि भवति । अजीगणदित्यादि अत्र ञिः पूर्वसूत्रेण ञकारलोपे अपि ञिघातोः टौ-ङि, (६११) अङ्, ततः ञित्यादि, अनेन श्चेः स्थाने ईङ्, ततो (६३१) ञेर्लोपः । ईङो विकल्पपक्षे अजगणदिति । (६१८) श्चेः ह्रस्वदिति सूत्रे अगृबोपि-वर्जनात् श्चेः स्थाने न ह्रः । एवं अचीकथत् अचकथदित्यादि । पाणिनिः ७।४।९७ । सूत्रेऽस्य अदन्ताद्युरिव पठितौ नतु कथधातुः ; अतएव अचकथदित्येवाह भट्टोजिदीक्षितः ।

---

* अत्रैवत् ञिवताञित्यादि ञिवाह ञिवोजनं प्रेरणम् । यथा भवं कार्यं कारय-तीत्यादि । अपितमे गूढ़भाट । यथा परिजनः कुर्या वर्धयतीत्यादि । चौरिति व्याख्यानं सर्वप्रकारव्यापारार्थे, तेन अवनं प्रेरयति आवयति, पाठयन्तं प्रेरयति पाठयति, पिठि-पसन्तं प्रेरयति पिपठिषयति, चौरयन्तं प्रेरयति चौरयति, पिपठीषन्तं प्रेरयति पिपठीषयति, पीपीडयन्तं प्रेरयति पीपीडयति, पटीकुर्वन्तं प्रेरयति पटीकारयति, पुत्रकाम्यन्तं प्रेरयति पुत्रकाम्ययतीत्यादि । प्रेरणार्थेऽपि क्वचिदपि ञिः, यथा पिता पुत्रेण ञिवं प्रियं ग्राहयतीत्यादि,

कुर्वन्तं प्रेरयति कारयति । अचीकरत् । *

अजग्लासत् अडुढौकत् । अशूशवत् अशिश्वयत् ।

व्यतस्तम्भत्, पर्यषीषिवत्, व्यषीषहत् । (५७२) साक्त्वान्न षः । †

अचीचकासत् अचचकासत् । औन्दिदत् औजिजत् आञ्जिजत् आर्चिचत् । अररक्षत् अललक्षत् । अजीहयत्, (७४८) अनग्लोत्वुके न चिः । अदिध्वनत् अध्वनयीत्, ऐलिलत् ऐलयीत्, आर्दिदत् आर्दयीत्, औनिनत् औनयीत् । ‡

---

अत्र पुत्रः पाठयतेरेव कर्ता नतु पठतेः, तेन (२८४) पुत्रस्य कर्मत्वं न स्यात् । ओर्जिन्यात् आन्तर्यातोदभयपदप्राप्तिः । विशेषस्तु ८६१ सूत्रे द्रष्टव्यः । पाणिनिः १।१।२६ ।

* कारयतीत्यादि, कृ-णिः (५७७) अच्चेणो वृद्धिः, कारि इति (६११) धातुसंज्ञा, ततस्तिप्-शपादि । कुर्वन्तं प्रेरितवान् अचीकरत्, (५१७) प्रागप्रकाणार्थादपि चिरिति सूत्रात् (८१६) अतएव णौ चिल्ले श्रिरिति नयानाणार्थनियमेन, कृ इति धातुसंज्ञायां, टी-दि, (५५०) अमागमः, (६१२) णिश्रीत्यङ्,* (५५८) क्षृ इत्यस्य द्विले, (५६४) सैराचप इति सैरिकारस्य लोपे, (५५९) ऋकारस्य अकारे ककारस्य च चकारे, ततः (५७७) वृद्धिः, अचकारि इति स्थिते, (६१८) आकारस्य ह्रस्वे (६१९) सन्वत्त्वे, (६४०) सेरकारस्य इकारे, पुनः (६१९) लघुनिदीर्घे, (६७१) णेर्लोपः । एवं सर्वत्र साधनप्रकारः ।

† ग्लासतं प्रेरितवत् अजग्लासदित्यत्र (६१८) ग्लासवर्जनात् न ह्रस्वः । ढौकमानं प्रेरितवत् अडुढौकदित्यत्र (६१८) ऋदित्वर्जनात् न ह्रस्वः । श्वयन्तं प्रेरितवत् अशूशवदित्यत्र श्वि-णिः, (५१७) प्रागप्रकाण्यादिति नियमात् णादौ द्विले, (६६९) णेर्विभेति वाशब्दस्य व्यवस्था वीर्लूपस्य च णिः श्वयुत्र वस्थाने ऊः, ततो वृद्ध्यादिकम् । णि-विकल्पपक्षे अशिश्वयदिति । विष्टभ्रमानं प्रेरितवत् व्यतस्तम्भत्, परिषीव्यन्तं प्रेरितवत् पर्यषीषिवत्, विषहमानं प्रेरितवत् व्यषीषहत्, एषु (५७२) साक्त्वात् न षः । पर्यादिनिमित्तकं षोः षत्वं न स्यात्, णिनिमित्तकत्तु सूत्रपातोः षत्वं (१११) क्रियादित्येन सार्वविपि नोपतिश्च ।

‡ चकासतं प्रेरितवत् अचीचकासत् अचचकासत्, ऋदित्वात् (६१८) उपधा न ह्रस्वः, चनिकाप्लात् (६२९) वा सन्वद्भावः । उन्द णौ डेरे, उब्ज आर्जवे, अञ्ज व्यक्तिम्रक्षणकान्तिगतिषु, अर्च च पूजौ—इति चतुर्णां धातूनाम्—उन्दन्तम्, उब्जन्तम्, अञ्जन्तम्, अर्चन्तम् प्रेरितवानिति अर्थे, णौ कृत्ति स्थिते अदि अजि अर्चि इति स्थिते, (०१९) अजादेर्द्वितीयस्य द्वित्वं (०२१) नन्द्राः संयोगादय इति (टीका द्रष्टव्या) न द द र इति स्थिता दि जि जि चि एषां द्विले (५५९) हलादिःशेषः,

७७८। स्मृदृत्वरप्रथम्रदस्तृस्पशोऽङ् खेऽर्थ्यङि चेष्टवेष्टोस्तु वा।

(स्मृ—प्रथ: ६।, अङ् ।१।, खे: ६।, आङि ७।, चेष्टवेष्टो: ६।।, तु ।१।, वा ।१।)।

एषां खेरङ् स्यात् आङि चेष्ट-वेष्टोस्तु वा।

असस्मरत् अददरत् अतत्वरत् अपप्रथत् अमम्रदत् अतस्तरत् अपस्पशत्, अचचेष्टत् अचिचेष्टत्, अववेष्टत् अविवेष्टत्। *

७७९। भ्राज भास भास भाष दीप जीव मील पीड कण वण भण श्रण लप लुप लुट ह्वेठां वोङः खुः। (भ्राज—ह्वेठां ६।।, वा ।१।, उङ: ६।, खु: १।)।

---

औन्दिदत् औञ्जिजत् आड्डिडत् आर्चिचदिति। रञ्जमाणं प्रेरितवत् अरञ्जत्, अललक्षत्, (६१९) गुरुवालघुपरत्वात् न सन्वद्भाव:। द्विषन्तं प्रेरितवत् अजीहयत्। जि भज रवे, द्रव न भये, अर्द्द पीडायां, जन तृप परितोषे—इति चतुर्णां—अजजनत्, इवयनत्, अर्द्दनत् जनयन्तं प्रेरितवदिति वाक्ये औ ञति म्वनि ऐनि अर्द्दि जनि इति चतुर्णां (६१५) वा अङ्, एनि जनि इति द्वयो: (७१९) आद्यस्य द्वित्वा द्वित्वं, अर्द्दि इत्यत्र (७१९,७२०) आद्यस्य रस्य द्वित्वा द्वि इत्यस्य द्वित्वम्। अजोऽभावपक्षे (५५१) ञ्यां ञि:, इनाद्वित्वं, ञनि परे (६५१) न ञि लोप:, (५०७) निषिद्धत् न वृद्धि:। अनि इत्यत्र (५००) वृद्धी, (७९८) घटादित्वात् ह्रस्व:।

† स्मृ इत्यनेन स्मृ स्मृतौ, स्मृ न चौत्कण्ठ इति द्वयम्; दृ न जि विदारे; त्वि त्वरा अङ् सदे; प्रथ मे षङ् ख्याती; म्रद न षङ् चौर्दे; स्तृ न जि छादने; स्पश न सत्र बाधने; एषां समानां चौरङ्विधानात् (६४०) वाऽप्रीत् वर्णीति इर्त्व न स्यात्, (६१९) चौव च चौवाद्यपि न सादिर्वत:। चेष्ट-वेष्टोस्तु चौरङोऽभावपक्षे गुरुवर्णपरत्वात् (६१९) सन्वद्भावप्रात्तौ चौदीर्घौ न स्यात्। असस्मरदित्यादि—स्मरन्तं, दीर्णन्तं, त्वरमाणं, प्रथमानं, म्रदमानं, स्तृण्वन्तं, स्पशन्तं बाधमानं वा, चेष्टमानं, वेष्टमानं प्रेरितवदिति वाक्यानि। स्पश इ ज ग्रहणे इति इत्यर्थकस्पशोर्णिचेर्वशीति वाचिन्, द्विपमानं प्रेरितवदिति वाक्यम्। केचित्तु स्तृ छादने इति ग्रहणात्-स्तृधातुरप न प्रतीत:, तन्न तु अतिस्तरदित्येव भवेत्। पाणिनि: ७।४।९५,९६॥

एषामुङः वः स्यात् वा अङि। अविभ्रजत् अवभ्राजत्। *

७८०। ऋदुङो धुः। (वा ।१।, ऋदुङः ६।, धुः १।)।

ऋदुङो धोर्धुरेव स्यात् वा अङि। अवीवृतत् अववर्त्तत्। †

७८१। स्वपो जिः। (स्वपः ६।, जिः १।)।

स्वपो जिः स्यात् अङि। असूषुपत्। ‡

७८२। शा छा सा ह्वा व्ये वे पां औ यन्।

(शा—पां ६॥, औ ७।, यन् ।१।)।

एषां औ परे यन् स्यात्। शाययति पाययति। §

---

* टु भ्राजृ ङ च भासि, टु भास ङ च भासि, भासृ ङ दीप्तौ, भाषृ ङ वाचि, दीपी ङ च दीपने, जीव च प्राणने, मील निमेषे, पीड़ क बाधे, कणृ आर्त्तस्वरे, च रण शब्दे, च भण शब्दे, श्रण क दाने, च लप भाषे, लुप च श प ऌ ओ छेदे, लुण्ठ च विलोड़ने, हेठृ च बाधे—षोड़शैते। टु भासृ ङ च भासि इति व्याख्यातोऽपि अत्र गृहीतः। इह हेठधातुमपि भाष्यकारः पठति। अत्र वामनत्वं वामनमध्यपठितेन णित्वनिवारणार्थम्। एतेषु गणपाठे भासधातोरंशसम्बद्धनुबन्धः भ्राजधातोश्च ऋदनुबन्धाभावः क्वचिदशुद्धपाठादिति दुर्गादासः, वस्तुतस्तु प्रामादिक-एवेति। "भ्राजभासोर्व्यत्यासयमपाणिनीयम्" इति काशिका। अविभ्रजदित्यादि, भ्राजमानं प्रैरिरदित्यादि वाक्यम्। पाणिनिः ७।४।३, वार्त्तिकञ्च। अत्र भासधातुर्न इष्यते, भाष्ये च एतधातुरपिकोऽस्ति।

† वृत् ङक् वस च ऋदुङ् तस। [पाणिनौ कृत्धातोः अचीकृतदिति साधनार्थम् 'उपधाया ऋर्वर्णस्य' इत्युक्तम्, इह तु ऋद्-उङः इति द्रष्टव्यम्।] आन्तस्य ऋतप्रभृति-ऋदुङ्धातोः डौणिकलो गुणनिवृत्तिर्वा काद्यिवर्णः। कृपधातोः (६७८) कृपादेशेऽपि ऋदुङ्प्रकृतिकत्वात् अचीकृपत् अचकल्पदिति एवमेव स्यात्। अत्र वामनत्वं परत्वाद्वृत्तिनिवृत्त्यर्थम्। अवीवृतदिति वर्त्तमानं प्रैरिरदिति वाक्यम्। पाणिनिः ७।४।७।

‡ असूषुपदिति स्वपनं प्रैरिरत्, स्वप-णिः स्वापि धातुः, डौ-द्वि अङ् षणेन षिः, इति स्वप णिः, (६५८) षोत्व षीर्घत्वादि धः, (१११) षत्वम्। पाणिनिः ६।१।१८।

§ शो य निशाने, छो य छेदे, षो य नाशे, ह्वे औ स्पर्द्धे, व्ये औ छादे, वे औ सन्तौ, पा पाने, पै शोषे इति धवम्। यगो न हन् चले। शानं प्रेरयति शाययति, पिबन्तं प्रेरयति पाययति। पाणिनिः ७।३।३७।

७८३ । ह्रः पिबः पीप्यो अङि ।

(ह्र: ६।, पिब: ६।, पीप्य: १।, अङि ७)।

अपीप्यत् । *

७८४ । ह्री व्ली री क्नूय् क्ष्माय्यातां पग् युक् च ञौ । (ह्री—आतां ६।।, पग् ।१।, य: १।, च ।१।, ञौ ७)।

ह्रेपयति व्लेपयति रेपयति क्नोपयति अर्पयति क्ष्मापयति दापयति । †

७८५ । स्थोङो अङी: । (स्थोङ: ६।, अङि ७, इ: १।)।

तिष्ठतेरङ इ: स्यात् अङि । अतिष्ठिपत् । ‡

७८६ । घ्रो वा । (घ्र: ६।, वा ।१।)।

अजिघ्रिपत् अजिघ्रपत् । §

---

* पिबतस्य पा पाने इत्यस्य पीप्य: स्यात् अङि । पिबन्तं प्रैरिरत् अपीप्यत् । पिब: किं, पै शोषणे अपीपयत्, पा च रक्षणे अपीपलत् । पाणिनि: ७।४।४ ।

† ह्री लज्जे, व्ली वि गत्यां, री रीङ् च स्रवणे री लि स्रवे इति च, क्नूयी च दुर्गन्धे, [illegible] [illegible] गत्यां [illegible] प्रापे च इति पचं, [illegible] च [illegible] इति [illegible] [illegible] [illegible] पग् [illegible] [illegible] [illegible] पट, [illegible] [illegible] । ह्रेपयतीत्यादौ पचि कृते, पकारस्यापि [illegible] [illegible] (११२) [illegible] गुण-विधानम् । क्नोपयति [illegible] [illegible] परे पकारस्य [illegible] (७०५) [illegible] [illegible] । [illegible] [illegible] अपि, तेन ई च पाचने (६०८) [illegible], [illegible] [illegible] [illegible] आपयतीत्यादि, (७९२) [illegible] वा । जिह्रियतं, [illegible], [illegible] [illegible] वा, [illegible], [illegible] [illegible] [illegible] वा, [illegible], [illegible] [illegible] [illegible] । पाणिनि: ७।३।३६ । [illegible] ।

‡ [illegible] [illegible] [illegible] [illegible] । पचि कृते [illegible] [illegible] इ: [illegible] [illegible] । अतिष्ठिपदिति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible], (११६) [illegible] । पाणिनि: ७।४।५ ।

§ घ्रा धातो: पचि कृते घ्राप-[illegible] [illegible] इ: [illegible] [illegible] । [illegible] [illegible]

## ७८७। पाति-स्फायोर्लन्-वङौ णौ।

(पाति-स्फायोः ६।, लन्-वङौ १।, णौ ७।)।

पालयति स्फावयति। *

## ७८८। प्री-धूञो नन् वा। (प्री-धूञोः ६।, नन् ।१।, वा ।१।)।

प्रीणयति प्राययति, धूनयति धावयति। †

## ७८९। रुहः पङ् वा। (रुहः ६।, पङ् ।१।, वा ।१।)।

रोपयति रोहयति। ‡

## ७९०। शदोऽगतौ तङ्। (शदः ६।, अ-गतौ ७।, तङ् ।१।)।

शातयति। गतौ तु, गाः शादयति गोपः। §

---

ऊर्णुरदिति वाक्ये णौ परे आप ईत्वस्य वा इः, ततः णिपि इत्वस्य द्वित्वादि। इकाराभाव-पक्षे आपि इत्वस्य द्वित्वादौ, (६१८) उभो ऋले, (६१९) सन्वद्भावे, (६४०) ओरिले, ओर्गुरुवत्वात् (६३८) दीर्घाभावे, (६४१) ओरोपि, ऊर्णुनवदिति। पाणिनिः ७।४।६।

* पा च रक्षणे इत्यस्य लन्, स्फायी च वृद्धौ इत्यस्य वङ् स्यात् णौ। लनो णित्वादन्ते, वङो ङित्वादन्त्यस्य स्थाने। पान्तं प्रेरयति, स्फायमानं प्रेरयतीति वाक्यद्वयम्। पाणिनिः ७।३।३७, "पातेर्लुग्वचनम्" इति वार्त्तिकञ्च।

† प्रीञ् धूञ् प्रीधूञौ, तौ च तौ णौ (आनुपूर्व्वी) चेति तयोः। प्री ञ् तर्पणे प्री ङ् कान्तौ इति द्वयोः, धू ञ कम्पने इत्यस्य च नन् स्यात् णौ। नित्वादन्ते। धूञ इति आनुबन्धग्रहणात् नान्येषामित्यर्थः। प्रीणन्तं प्रीयमाणं वा प्रेरयति, धून्वन्तं प्रेरयति इति वाक्यद्वयम्। ननोऽभावपक्षे (५००) धान्ते णो वृद्धिः। "णिच्प्रकरणे धूञ्प्रीञोर्नुग्वचनम्" इति वार्त्तिकम्।

‡ रुह जन्मनि प्रादुर्भावे इत्यस्य पङ् स्यात् णौ, ङित्वादन्त्यस्य स्थाने। पङ् इत्यस्य प्राग्विनिवेशनम्। रुप-धातोः रोपयतीति सिद्धमपि, रोपयतीत्यस्य उत्पादनार्थबोधनार्थं रुहः पङ्-विधानम्। रोहन्तं प्रेरयतीति वाक्यम्। पाणिनिः ७।३।४३।

§ शद् लृ शातने इति इत्यस्य तङ् स्यात् णौ, न तु गतौ। शीयमानं प्रेरयति शातयति, पातयतीत्यर्थः। गावोऽपि तु शादयति गमयतीत्यर्थः। पाणिनिः ७।३।४२।

### ७९१ । स्नाल्यो रुंनमौ स्नेहद्रवे वा ।

(स्ना-ल्योः ६।२, रुन्-नमौ १।२, स्नेहद्रवे ७।१, वा ।१।)।

स्नाते रुंन् लियो नम् स्यात् स्नेहद्रवेऽर्थे ञौ वा । विलाययति विलापयति । विलीनयति, (७४५) लियोरिति ञा वा, विलापयति विलाययति घृतं । स्नेहद्रवे किं, लोहं विलापयति विलाययति । *

### ७९२ । वो जन् धृतौ । (वः ६।१, जन् ।१।, धृतौ ७।)।

व्राते जन् स्यात् कम्पने ञौ । वाजयति । धृतौ किं, श्येयाम् वापयति । †

### ७९३ । क्रीजीङो ऽपा चि स्मुर प्रजनार्थ-वीनाम्तु वा ।

(क्री-जि-इङः ६।३, अप् ।१।, आ ।१।, चि-स्मुर-प्रजनार्थ-वीनां ६।३, तु ।१।, वा ।१।)।

एषामप् वा स्यात् ञौ, आदेशु वा । क्रापयति जापयति अध्यापयति । ‡

---

* स्नेहस्य घृतादिद्रवीकरणं स्नेहद्रवः । "स्नेहविपातने" इति पाणिनिः । "स्नेहद्रव-द्रावणे" इति क्रमदीश्वरः । [illegible] ली श्लि द्रावणे इत्येतयोर्ग्रहणम् । "लीलीङोः" इति क्रमदीश्वरः (तिङन्तपादे ४५० सूत्रम्)। विलायन्तं प्रेरयति विलाययति, पक्षे (७८४) आदन्तत्वात् पप् विलापयति । विलायन्तं प्रेरयति विलीनयति । [illegible] द्रावयतीत्यर्थः । पाणिनिः ७।३।३९ ।

† [illegible] वातेरित्यत्र वाययतेरिति पाठं युक्तमिति तत्त्वबोधिनी । (वो वै शोषे) वायन्तं प्रेरयतीति वाजो वाजयति कम्पयतीत्यर्थः । श्येयाम् वापयति शोषयतीत्यर्थः । पाणिनिः ७।३।३८ । [illegible] विवक्षितं, न तु वा च गतिगन्धनयोरिति [illegible], [illegible] पापवीयर्जयतीत्यादिविषये वै इत्यस्य युक् (पप्) मा भूत्, इति काशिका तत्त्वबोधिनी च ।

‡ क्रीञ जिप इङ् च समाहारे [illegible] । [illegible] मतॊ [illegible] प्रजनार्थः [illegible] वीरिति प्रजनार्थवीः, चिश्च स्मुरश्च प्रजनार्थवीश्च तेषाम् । वीनामित्रि (११०) [illegible] सूत्रात् । तु श्री च न [illegible], चि [illegible], [illegible] च [illegible], [illegible]

अध्यजीगपत् अध्यापिपत् । चापयति चाययति । चपयति चययति (७९८) मित्त्वात् ह्रस्व इति प्रक्रियारत्ने दृष्टं । स्फारयति स्फोरयति । वापयति वाययति, गाः पुरोवातो गर्भं ग्राहयतीत्यर्थः । *

### ७९४ । स्मिभ्यो घात् स्वार्थे मञ्च ।

(स्मिभ्योः ६।।, घात् ५।, स्वार्थे ७।, मं १।, च ।१।) ।

अनयोरच आ स्यात् घात् स्वार्थे ञो मञ्च । विस्मापयते भापयते मुण्डः । घात् किं, कुञ्चिकयैनं विस्माययति भाययति । †

### ७९५ । भी भीष् वा । (भीः १।, भीष् ।१।, वा ।१।) ।

भियो घ-भये भीष् स्याद्वा ञो मञ्च । भीषयते मुण्डः । ‡

---

ज्ञापयतीत्यादि—ज्ञीवन्तं जयन्तम् अधीयानञ्च प्रेरयतीति वाक्यानि । अनेन अचः स्थाने आ, ततः (७८४) आदन्तत्वात् पक् । पाणिनिः ६।१।४८,५४,५५ ।

* अध्यजीगपदिति अधि-इ-टी-दि, (७१२) गा-आदेशे, पक्, ततः गापि इत्यस्य द्वित्वादि गा-आदेशस्य विकल्पपक्षे अनेन इस्थाने आ, ततः अधि आपि इति स्थिते (७१९) पि इत्यस्य द्वित्वे अध्यापिपदिति । चापयतीत्यादि—चिन्वन्तं प्रेरयति, चि-णि, अनेन इस्थाने आ, ततः पक्; पक्षे (५००,२५) इत्यादि । प्रक्रियारत्नं वैयाकरणग्रन्थविशेषः । स्फुरन्तं प्रेरयति अनेन वा उकारस्य आ । विजन्तं वियन्तं वा प्रेरयति वापयति, अनेन आ, ततः पक् । पक्षे इत्यादि । पुरोवातः पूर्व्वदिग्वायुः । वर्षासु पूर्व्ववायौ वाति गावो गर्भं गृह्णन्तीति प्रसिद्धिः ।

† स्मि ङ स्मिते, ञि भी ञि भीत्याम्, अनयोरर्थौ यदि प्रयोजककर्तृतः प्रतीयते तदा अच आ, आत्मनेपदञ्च स्यादित्यर्थः, अन्यथा आ न स्यात् आत्मनेपदञ्च न स्यादिति । विस्मयमानं बिभ्यतञ्च प्रेरयति अनेन आ, ततः पक्, आत्मनेपदमेव । मुण्डः मुण्डितमस्तको जन इति दुर्गादासः । एवं विस्मापयते भापयते इत्यादिषु कर्तृत एव धात्वर्थप्रतीतिः । अन्यत्र कुञ्चिकया तत्सदृशविशेषेण करणेन एनं जनं कश्चित् विस्मापयति भाययति, एवं कुञ्चिकादिना विस्माययति भाययति इत्यादिषु करणकारकात् धात्वर्थनिष्पत्तिः न तु कर्तृतः, कुत्रापि अचः स्थाने आ न स्यात्, आत्मनेपदञ्च न स्यात् । पाणिनिः ६।१।५६,५७, १।३।६८ ।

‡ धात्वर्थे कर्तृतो भये निष्पन्ने इत्यर्थः । पक्षे पूर्व्वसूत्रेण भापयते इति । एवं भीषयते जनः । घात् किं, कुञ्चिकया एनं भाययति । पाणिनिः ७।३।४० ।

७९६ । दुषेरोद् । (दुषेः ६।, औत् ।१।, ञः ६।) ।

दुषेरोकार ञः स्यात् ञौ । दूषयति । *

७९७ । चिद्विकारे वा । (चिद्विकारे ७।, वा ।१।) ।

दूषयति दोषयति चित्तं । †

७९८ । घटादि जनी जृष क्नस रञ्जाम् मारतोषनिशान-निशामार्थ-ञ्चां ह्रो ऽकमामचमो ओखमोस्तु घंच आगुच ।

(घटादि—ञ्चां ६॥, ह्रः १।, अकमामचमः ६।, ओखमोः ७॥, तु ।१।, घं: १।, च ।१।, आगुः ६।, च ।१।) ।

घटादेरिमन्तस्य मारार्थं-भ्रष ञौ ह्रः स्यात् नतु कमाम-चमां, ञेः परयो-रिखमोस्तु घंच आगुच ह्रो घं: । ‡

---

* दुंषी वैकृते इत्यस्य ञि-निमित्तके गुणे कृते दोषि इत्यस्य ओकारस्य ञः स्यादित्यर्थः । दुषि घं: इति कृते तु; दोषः दोषयं इत्यादि पदं न सिध्यति । दूषयतिति तु व्याकरणेन । दूषणं प्रेरयतीति वाक्यम् । पाणिनिः ६।४।९० ।

† चित् मनः तस्य विकारश्चिद्विकारः [चित्तविराग इति पाणिनिः], तस्मिन्नर्थे दुषेर्ञौ कृते ओकार ञः स्याद् इत्यर्थः । दूषयति दोषयति चित्तं, क्रोध इति शेषः । पाणिनिः ६।४।९१ ।

‡ मारश्च तोषश्च निशानश्च निशामश्च ते अर्थाः यस्य सः मारतोषनिशाननिशामार्थः, स चासौ भ्रषेति मारतोषनिशाननिशामार्थभ्रषः । घटादिश्च जनीश्च जृषश्च क्नसश्च रञ्जश्च भ्रषश्च मारतोषनिशाननिशामार्थभ्रष ते तेषाम् । कम च अम च चम च कमामचम, न कमामचम अकमामचम तस्य । इख् (८२१) च खम् (११८२) च इखमौ, ञेः परौ इखमौ ओखमौ तयोः । गणपाठे समाप्तस्यन्तो घटादिः, अतएव घट ष ङ चेष्टे इत्यस्य घटयं, नतु घट ष विधि इत्यस्य । घटादिना वाचनीयानां आगुपधानां ग्रहणम् । अनीशब्देन जनी जनि प्रादुर्भावे इत्यस्य ग्रहणं; जन ज वि न्य इत्यस्य जातुमस्कोऽपि न ग्रहणं । जृष वयोहानौ कु ष्णि वि व्याप्ति-धस्तकांगति । क्नसः इत्यनेन चलनकाथक ग्रहणम्; क्न चल कलं इति स्वाञ्चन्तर्गतस्य ग्रहणम् । मारो मारणं, तोषः परितोषणं, निशानं तीक्ष्णीकरणं; निशामो दर्शनं

-घटयति व्यथयति प्रथयति, जनयति जरयति क्नसयति, रञ्जयति मृगान् रमयति, क्षपयति । कमादेस्तु, कामयति चामयति चामयति । *

७९९ । ज्वल ह्वल ह्मल ग्ला स्ना वन रम नमो ऽगे ष्वा । (ज्वल—नमः ६।, अ-गे: ६।, वा ।१।) ।

एषामगेर्वा स्वः स्यादा णौ । ज्वलयति ज्वालयति, ग्लपयति ग्लापयति ।

अगे: किं प्रज्वलयति प्रग्लापयति । †

८०० । वा शम यम फण णिस्खदां ।

(वा ।१।, शम यम फण णि-स्खदां ६॥) ।

---

प्रेरणम् । क्रमेण यथा—ज्ञपयति मृगं वीरः, ज्ञपयति पुत्रं पिता, ज्ञपयति खड्गं कर्म्मकारः, ज्ञपयति रूपं कामिनी । मिश्रामी मानप्रेरणमिति क्रमदीश्वराद्यः, अतएव विज्ञापनार्थे विज्ञप्तिरित्यपि प्रयोगः । एतद्भिन्नेऽर्थे ज्ञापयति । पाणिनिः ६।४।९२,९३, ७।३।३४, वार्त्तिकञ्च।

* घटमानं, व्यथमानं, प्रथमानं, जायमानं, जीर्य्यन्तं, क्नसन्तं, रज्यन्तं, रममाणं, जानन्तं, कामयमानं, चमन्तं, चमन्तञ्च, प्रत्येकं प्रेरयतीति वाक्यानि । रञ्जयतीत्यस्य मृगान् रमयतीत्यर्थः, "मृगरमणमात्रविवक्षम्" इति भट्टोजिदीक्षितः । तेन (६६०) मृगरमणार्थे न-लोपः । रमयतीत्यनेन चमन्तोदाहरणञ्च दर्शितम् । जीवनोस्तु—घटिं घाटिं, घटं घटं घाटं घाटमित्यादि । आयन्तु—चामरि चामारि, जागरं जागरं जागारं जागारम् ।

† ज्वल दीप्तौ, ह्वल चलने, ह्मल च चलने, ग्लै हर्षक्षये, ष्णा च शौचे, वनुम् याचने, रमु क्रीडायाम्, नमो नत्याम् । पूर्वसूत्रे ज्ञा-जोरमन्ती चर्चेयाच नित्यप्राप्तौ विधिरयम् । अतएव प्रज्वलयतीत्यादी घटादित्वात् नित्यं ह्रस्वः, प्रग्लापयति प्रग्लापयतीत्युभयत्र च क्रमः । ज्वलन्तं ग्लायन्तञ्च प्रेरयतीति वाक्यद्वयम् । रम इत्यत्र यम इति क्वचित् पाठः । आयन्तु ।

एषां स्वः स्वाद्वा ञौ । शमयति शामयति, यमयति याम-यति, फणयति फाणयति, परिस्खदयति परिस्खादयति । *

## ८०१ । हनस्तङ्-ऽचण्णिपि ञ्णिति ।

(हनः ६।, तङ् ।१।, अ-चण्-इपि ७।, ञ्णिति ७।) ।

ञिति णिति च परे हन्तेस्तङ् स्यात् न तु चणि इपि च । घातयति । †

## ८०२ । यिः सन् वेर्ष्यो ह्यिः ।

(यिः १।, सन् ।१।, वा ।१।, ईर्ष्यः ६।, ह्यिः १।) ।

ऐर्ष्यियत् । ‡

इति आद्य-पादः ।

---

* शैः स्वाद निस्खद, शम च यम च फण च निस्खद च तेषाम् । अत्र शामव्द्स्य आव-स्थया प्रमुखिर्ग शमे प्रत्यय नित्यं ह्रस्वः, शम इ आलोचे शमेस नित्यं ह्रस्वाभावः । ञौ यमु उपरमे प्रत्यय नित्यं ह्रस्वः, यम क जि परिवेषणे प्रत्यय तुं विकल्पेन । एवं अव-परि-पूर्व-कस्येव स्खदस्य वा ह्रस्व इति कातन्त्रायाः, अपपूर्वकस्य केवलस्य च घटादित्वात् नित्यमेव ह्रस्व-इति । शामनं शामयमानं वा, यमयन्तं, फणन्तं, परिस्खदमानच प्रेरयतीति वाक्यानि । भाष्यम् ।

† चण् च इप् च चणिप्, न चणिप् अचणिप् तस्मिन् । ञ च ण च ञ्णौ, तौ इतौ यस्य स ञ्णित् तस्मिन् । हनो ह इत् पञ्चम स्यात्। हन्तं प्रेरयतीति वाक्ये हन-णि, अनेन हनो तङ्स्यानि त, (६०८) ह-स्थाने घ, (५००) वृद्धिः, घाति इति (६११) धातुः । चणि-चोस्तु अजान, अघानि । पाणिनिः ७।३।३२ ।

‡ ञौ इति निमित्तौ सति ईर्ष्यधातोः विरेव यिः आदिस्येकोऽर्थः । सनि इति तु सि-वो ह्यिः स्यात्, सन् च वा ह्यिः आदिस्यपरोऽर्थः । ईर्ष्यन्तं प्रैरिरदिति वाक्ये ईर्ष्य-णि, (७७५) ड-लोपस्य निमित्तोऽपि धीर्ष्यिविधानसामर्थ्यात् यलोपाभावे ईर्ष्यि प्रत्यय (६५१) धातुर्भवति ही द्वि, (६१२) अट्, ततः अनेन वैकल्पं यि प्रत्यय सिनि, (६०१) ईर्षोपि ऐर्ष्यियदिति । सनि तु (५५७) इनि, दुर्ष प्रत्यय सिने ईर्ष्यियिषति, हनो सिने ईर्ष्यियिषति । "ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्" इति वार्तिकम् ।

---



## ८०३। सन्निच्छायां। (सन् ।१।, इच्छायां ७।)।

धोः परः सन् स्यादिच्छार्थे। अत्तुमिच्छति जिघत्सति। दिदासते दिदीषते, दिद्योतिषते, उतिच्छिषति उचिच्छिषति, अधिजिगापयिषति अध्यापिपयिषति, सुस्रावयिषति सिस्रावयिषति, शुशावयिषति। *

---

* यस्य धातो र्योऽर्थस्तद्विषयाया-मिच्छायां तस्मात् धातोः सन् स्यादित्यर्थः। अत्तुमिच्छतीति वाक्येन, इच्छायां तुमुन्गर्भायामेव, नतु अदनमिच्छतीत्यादिरूपायाम्। "तुंगर्भादिच्छायां" सन्निति जौमराः। इच्छासनन्तात् पुनर्न सन्, इच्छाया इच्छान्तरासम्भवात्। स्वार्थसनन्तात्तु स्यादेव, चिकित्सिषतीत्यादि। अचेतनस्य इच्छाया असम्भवेऽपि नदीकूलं पिपतिषतीत्यादौ विवक्षायां सन्। सन्प्रत्ययश्च वक्तुरिच्छया वैकल्पिक एव, पक्षे वाक्यस्यैव स्थितिरिति। सनो न इत् चिह्नार्थः, अदन-स-स्थितिः। जिघत्सतीत्यादि—अद-सन्, (६७२) घस-आदेशः, (६६८) सस्य त्, घत्स इति, ततः (६१२) द्वित्वादि, जिघत्स इति (६११) धातुसंज्ञा, ततः तिप्, शप्, (५४२) शपोऽकार-लोपः। सनन्तधातोः (६२६) सनः पूर्वे प्रत्ययेन परस्मैपदादिनियमः। दातुमिच्छति दो-सन् (७४१) ईत् वा, दास इत्यस्य द्वित्वादि, पक्षे दीस इत्यस्य द्वित्वादि। द्योतितुमिच्छति द्युत-सन्, (५५४) इट्, द्वित्वं, (६४७) ओर्वि:। उच्छितुमिच्छति उच्छ-सन्, इट्, उच्छिष इति स्थिते, (७१९) उकारं हित्वा छिष इत्यस्य द्वित्वे, (५९९) छेऽन्त्यस्य वा च। अध्यापयितुमिच्छति अधि-इ-णि-सन्, (७१३) इङो वा गा-आदेशः, (७८४) आदन्तत्वात् पक्, गापि-धातुः, ततः (५५४) इट्, गुणः, एदन्ते अय्, गापयिष इत्यस्य द्वित्वं जिगापयिष धातुः, ततः तिबादि। पक्षे (७८६) इ स्थाने आ, पक्, आपयिष इति स्थिते (७१९) आकारं हित्वा, पयिष इत्यस्य द्वित्वादि। स्रावयितुमिच्छति स्रु-णि-सन्, (६६९) स्रवणोर्विकल्पेन इः, (५९०) अनभ्यासस्यैवेति नियमेन अ ष स इत्यस्य द्वित्वे, ततः (५७०) ह्रस्वादि, इकारादि च। इ-विकल्प-पक्षे णि ष स इत्यस्य द्वित्वादि। शावयितुमिच्छति शे-णि-सन् (६०८) एदन्तानां वा, शा ण्यन्त इत्यस्य द्वित्वे (६६०) विकल्पे-शे-धातोर्वि:, शा-आयस्याभावात् (७८२) अस्योऽस्वी, ह्रस्वादि, इकारादि च। पाणिनिः ३।१।७। अथ सूत्रे विकल्पः।

८०४ । गुर्नोनिमि । (गुः १।, न ।१।, अनिमि ७।) ।

अनिमि सनि गुर्न स्यात् । विवृत्सति विवर्त्तिषते, निनृत्सति निनर्त्तिषति, तितरीषति तितरिषति तितीर्षति । *

८०५ । घों ऽजझनिङ्गमां । (घं: १।, अज्झनिङ्गमां ६॥) ।

अजन्तस्य हन्ते-रिङः स्थाने आतस्य गमश्च घं: स्यात् अनिमि सनि । दुध्रूर्षति दिध्वरिषति, वुवूर्षति विवरीषति विवरिषति, सञ्चिस्कीर्षति, जिगीषति, चिकीषति चिचीषति, जिघांसति ।†

८०६ । गमीनिङः । (गमि ।१।, इन्-इङोः ६॥) ।

---

* नास्ति इम् यस्य सः अनिम् तस्मिन्, सनि इत्यस्य विशेषणम् । सन् इत्यस्य विभक्ति-व्यत्ययेन अनुवृत्तिः । यत्र गुणस्थानं सम्भवति तत्रैव सनोऽगुणित्वं, तेन जिघांसतीत्यादौ (६०६) न अम्-लोपः । वर्त्तितुमिच्छति विवृत्सति (६४८) अतएव पद् इत्यनेन भाविपरस्मैपदे, (६४८) इट्। नेम् पे इति इम्निषेधे गुणनिषेधः, ततः इत्यस्य द्वित्वादि । आत्मनेपदे तु इमि, गुणः । नर्त्तितुमिच्छति निनृत्सति निनर्त्तिषति, (७३९) इमोऽभावपक्षे गुणाभावः, इम्पक्षे गुण एव । तरीतुमिच्छतीति पदत्रयं, तॄ-सन् (७४०) वा इम्, (६२०) इमो वा दीर्घः । अनिम्-पक्षे अगुणत्वात् (६२८) ऋस्थाने इर्, (२२८) तस्य दीर्घः । पाणिनिः १।२।१०

† इको नम् इङ्गम्, अच् च हन् च इङ्गम् च तेषां । दुध्रूर्षतीत्यादि ध्वर्त्तुमिच्छति ध्वृ-सन् (७४०) अनिम्पक्षे अनेन दीर्घे, अनादृकारादौ (६२८) उर्, ततो द्वित्वादि,(२२८) दीर्घः, दुध्व् ऊ-धातोर्द्वित्वादि । इम्पक्षे दिध्वरिषति । वरीतुमिच्छति वृ-सन् (७४०) इमो विकल्प-पक्षे अनेन दीर्घे, ऋस्थाने उर्, ततो द्वित्वादिकम् । इम्पक्षे (६२०) इमो वा दीर्घः । संस्कर्तुमिच्छति संस्कृ-सन् (७४०) आवर्जनात् न इम्, अनेन दीर्घे, (६२८) ऋस्थाने इर्, तस्य दीर्घः । जेतुमिच्छति जि-सन् (६००) जि-आदेशः, अनेन दीर्घे जीव इत्यस्य द्वित्वादि । चेतुमिच्छति चि-सन्, (७४६) वा कि-आदेशः, अनेन दीर्घः । हन्तुमिच्छति हन-सन्, अनेन दीर्घः, ततश्च इत्यस्य द्वित्वादि, (६७९) हस्य घः । पाणिनिः ६।४।१६ ।

इणिकोः स्थाने गमिः स्यात् सनि । जिगमिषति, अधिजिगांसते । *

८०७ । **नेमुगुहग्रहः** । (न ।१।, इम् ।१।, उ-गुह-ग्रहः ५।)।

उवर्णान्तात् गुहो ग्रहश्च सन इम् न स्यात् । जुहूषति, बुभूषति, जुघुक्षति । †

८०८ । **ग्रहस्वपप्रच्छां जिः** । (ग्रह-स्वप-प्रच्छां ६।॥, जिः १।)।

एषां जिः स्यात् सनि । जिघृक्षति, सुषुप्सति । ‡

८०९ । **स्मिङ पूङ ऋ अनज अशू क्रिर गिर द्रिय धिय प्रच्छ इम्** । (स्मिङ-पूङ-ऋ-अनज-अशू—प्रच्छः ५।, इम् ।१।)।

---

* गमिरिति इकारानुबन्धेन गमधात्वादेशः स्यादित्यर्थः । गमधातुनैव पदसिद्धौ इनः स्थाने गमादेशकरणं, गमनार्थस्य इन-धातोर्गमादेशः स्यात्, ज्ञानार्थस्य न स्यादिति ज्ञापनार्थं, तेन ज्ञानार्थे प्रतीषिषतीति (८१९) सनन्तश्लेषे स्वयमुदाहृतम् । एतुमिच्छति इ-सन्, गमादेशे (६२४) गमोऽमे स इम् इति इम्, गमिष इत्यस्य द्वित्वादि । अध्येतुमिच्छति अधि-इ-सन्, गमादेशे (८०५) दीर्घे, इङः स्थानिवत्त्वादात्मनेपदविषये, गमोऽमे स इमित्यत्र आत्मनेपदवर्जनादिमोऽभावे, गांस इत्यस्य द्वित्वादि । पाणिनिः २।४।४७,४८ । अत्र वक्तव्यम्—(२।४।४६) इति पाणिनिसूत्रेण इण्धातोः सन्वत् ण्यन्तेऽपि गमादेशः, बोधनार्थे तु न भवति । यथा गमयतीति । बोधनार्थे तु प्रत्याययति इति तट्टीका ।

† उश्च गुहश्च ग्रहश्च तस्मात् । उः उवर्णान्तः । होतुमिच्छति हु-सन्, (८०५) दीर्घे हूष इत्यस्य द्वित्वादि । एवं ह्वातुमिच्छति, ह्वे-सन्, (६०८) ए-स्थाने आ, ह्वास इत्यस्य द्वित्वे, (६९७) द्वित्वस्य जिः, ततः दीर्घे जुहूषति, अत्रापि उदन्तत्वादनेन इम्-निषेधः । भवितुमिच्छति बुभूषति दीर्घोदन्तत्वादिम्निषेधः । गूहितुमिच्छति गुह-सन्, अनेन इम्निषेधः, (१०५) हस्य ढः, (१००) गस्य घः, (६०२) ढस्य कः, घुक्ष इत्यस्य द्वित्वादि । पाणिनिः ७।२।१२।

‡ ग्रहीतुमिच्छति ग्रह-सन्, पूर्वसूत्रेण इम्निषेधः, अनेन जिः, हस्य ढः, गस्य घः, ढस्य कः, घृक्ष इत्यस्य द्वित्वादि । स्वप्तुमिच्छति स्वप-सन् षादित्वात्सेम्, अनेन जिः, सुप्स इत्यस्य द्वित्वादि, (१११) षत्वम् । पाणिनिः १।२।८, ६।१।१६ ।

एभ्यः परस्य सन इम् स्यात्। सिस्मयिषते पिपविषते अरिरिषति अञ्जिजिषति अशिशिषते चिकरिषति पिपृच्छिषति। *

८१०। भस्ज श्रि स्वृ यूर्णु भर दरिद्रा सन तन पत ऋधज्ञिंदम्भिवो वा। (भस्ज—इस: ५।, वा।१।)।

एभ्यः सन इम् स्याद्वा। बिभर्जिषति बिभ्रज्जिषति बिभ्रक्षति, शिश्रयिषति शिश्रीषति, सिस्वरिषति सुस्वूर्षति, यियविषति युयूषति, ऊर्णुनुविषति ऊर्णुनविषति ऊर्णुनूषति, बिभरिषति बुभूर्षति, दिदरिद्रिषति दिदरिद्रासति, सिसनिषति सिषासति, तितनिषति तितंसति,—तितांसतीत्येके। पिपतिषति। †

---

* स्मिङ् च पूङ् च ऋश्च अनूज च अशूङ् किरश्च गिरश्च द्रियश्च ध्रियश्च प्रच्छ च तस्मात्। स्मिङ्-पूङो ङकारः आत्मनेपदित्व-ज्ञापनार्थः। अशू इति ऊकारानुबन्धः। किर गिर द्रिय ध्रिय इति कॄ गॄ दृ धृ इत्येषां ग्रहणम्। स्मि ऋ दृ धृ एषां (५८७) एकाजिवर्णान्तत्वात् एकाजृवर्णान्तत्वाच, पू इत्यस्य (८०७) उवर्णान्तत्वात्, प्रच्छ इत्यस्य भौदित्वाच इमोऽप्राप्तौ, अनूज अशू एतयोरूदित्वात् (५७२), कॄ गॄ एतयोश्च (७४७) विकल्पप्राप्तौ, नित्यार्थं विधानम्। स्मेतुं पवितुं अर्तुं अञ्जितुं अशितुं करीतुं प्रष्टुञ्च प्रत्येकमिच्छतीति वाक्यानि। सिस्मयिषते इत्यत्र (८१९) स्मिञोरिति नियमेन मूलधातोर्न द्वित्वम्। पिपविषते इति पू इ स इत्यत्र (५९०) ज्ञानपूर्वात्वेऽपि सिरिति नियमेन आदौ द्वित्वे, (८१६) अवज्ञमाव-अयत्नोरित्यनेन ओदकारस्य ऽः। अरिरिषति ऋ इ स इत्यत्र ऋकारस्य गुणे अरि इत्यत्र (७१९) आद्यचं हित्वा रिः इत्यस्य द्वित्वम्। अञ्जिजिषति अनूजिष इत्यत्र आद्यचं, (७२०) नकारश्च, हित्वा जिष इत्यस्य द्वित्वम्। अशिशिषते इति अकारं हित्वा द्वित्वम्। चिकरिषति इत्यत्र (६५७) इमो दीर्घे चिकरीषति इति च भवति। सिद्धान्तकौमुदीमते तु दीर्घो नेष्टः। एवं जिगरीषति जिगरिषति, दिदरिषति, दिधरिषति। पिपृच्छिषति (८०८) पूर्वसूत्रेण किः। पाणिनिः ७।२।७४,७५।

† भस्ज च श्रिश्च स्वृश्च युश्च ऊर्णुश्च भरश्च दरिद्राश्च सनश्च तनश्च पतश्च ऋधश्च ज्ञपिश्च दम्भ च इव च तस्मात्। भस्जो ज भ पाके, श्रि ञ सेवायां, स्वृ क शब्दोपतापयोः, यु ञ मिश्रणे, ऊर्णु ञ ज आच्छादने, भ ञ भरणे इति भौवादिकस्य ग्रहणं नतु ञ डि भरि-

८११। मि मी मा दा रभ लभ शक पत पद हिंसार्थराधोऽचोऽनिम्सनौस् खिलोपश्च।

(मि—राध: ६।, अच: ६।, अनिम्सनि ७।, इस् ।१।, खिलोप: १।, च ।१।)।

एषामच इस् स्यात् खिलोपश्चानिम्सनि। (२१२) स्यादेः सो लोपः। पित्सति। जिज्ञपयिषति। *

---

पुष्योरिति गुणोत्वादिः, अस्य तु बुभूर्षतीत्येव। दरिद्रा अ लु दुर्गत्यां, वन दु अ दाने, तनु अ ड़ विस्तारे, पत लृ अ गत्यां, पत्ल ऊं ऐश्वर्ये इति द्वयं, ज्ञा क्य मारणादौ, ऋध्नु णि वृद्धौ, दम्भु न दम्भे, इव इति इवान्तः दिव षिव ष्ठिवादिः। स्वृधातो वेम्त्वेऽपि अस्य ग्रहणं, व टु यु गो-स्वृध्या इति (५७२) एषां वेमामपि सनि वेम्त्वं नास्तीति ज्ञापनार्थं, तेन नेमुगुडग्रह इति इम्-निषेधे वस्वपति दुद्रूषति सुसूषति गुगूषतीत्येव। भर्तुमिच्छति भ्रस्ज-सन्, अनेन इम् (७५१) वा भर्जादेशे बिभर्जिषतीत्यादि। पक्षे भ्रस्ज इ स इति (६४) सस्य द, (४६) दस्य ज, भज्जिष इत्यस्य द्वित्वादि। इमो विकल्पपक्षे (२१२) स्यादेः स-लोपे, (१५४) षड्, (६०२) षस्य क, भक्ष इत्यस्य द्वित्वादि। श्रयितुमिच्छति इमोऽभावपक्षे (८०५) दीर्घः, श्रीष इत्यस्य द्वित्वादि। स्वरितुं स्वर्तुं वा इच्छति अनिम्पक्षे ऋकारस्य दीर्घे, (६२८) उर्, (२२८) तस्य दीर्घे, सूर्ष इत्यस्य द्वित्वादि। यवितुमिच्छति यु इ स इत्यस्य (५२७) प्रागन्यकार्य्यादिति नियमेन आदौ द्वित्वे ततो गुणादौ युयविष इत्यस्य (८१६) पीर्वकारस्य इः। ऊर्णवितुमिच्छति ऊर्णु इ स इत्यस्य (७२१) इमो द्वित्वे, (५८८) उकारस्य उव्, ऊर्णुविष इत्यस्य, (७१९,७२०) ऊ रेफ हित्वा णुविष इत्यस्य द्वित्वादि। इमो द्वित्वविकल्पपक्षे गुणः। अनिम्पक्षे अनिम्सनि (८०५) दीर्घः। मर्तुमिच्छति, अनिम्पक्षे ऋकारस्य दीर्घः, ऋस्थाने उर्, तस्य दीर्घः, मूर्ष इत्यस्य द्वित्वादि। दरिद्रितुमिच्छति, अनेन इम्, (६१०) आ-लोपः, दरिद्रिष इत्यस्य द्वित्वादि। अनिम्पक्षे (७०२) सम्प्रवर्तमानाकारलोपः। सनितुमिच्छति (८१९) जिस्नोरिति नियमात् न मूलस्य षत्वम्। अनिम्पक्षे (६५५) आ, सास इत्यस्य द्वित्वादि। तनितुमिच्छति, अनिम्पक्षे (५०) नस्यानुस्वारे, तंस इत्यस्य द्वित्वादि। (८०४) धर्मागमिनोऽत्र गुणसम्भावनायामेव अनिम्सनोऽगुणत्वम्, अतएवात्र अगुणत्वाभावे (६७६) न अम्लोपः। एवं इति पाणिनीय-व्याख्यान-ग्रन्थाः, तनोतेरनिम्सनि वा दीर्घमिच्छन्तीत्यर्थः (पाणिनिः ६।४।१७)। पतितुमिच्छति पिपतिषति। पाणिनिः ७।२।४९, वार्त्तिकञ्च।

* दु मि ञ न क्षेपे; मी ञ य वधे, मी ङि गत्यामिति द्वयं; मा इति मा ङ य माने; मा ङ ञि शब्दे, मा ङ य च, मे ङ प्रतिदाने, मे ङ व ञु च इति चय; दा इति दाण्संज्ञकाः,

८१२ । ज्ञपर्द्धापामीर्ध्यः । (ज्ञप-ऋध-आपां ६॥, ईर्ध्यः १॥) ।

एषामच ई ईर् ई एते क्रमात् स्युः खिलोपश्चानिम्सनि । ज्ञीप्सति । अर्द्दिधिषति ईर्त्सति । दिदृधिषति । *

८१३ । दम्भो यौ । (दम्भः ६।, यौ ७॥) ।

दम्भे-रच इ ई च स्यादनिमि सनि खिलोपश्च । धिप्सति धीप्सति अनकारनिर्देशात् । दिदेविषति । †

८१४ । क्वोः ऊटावणौ असक्वौ यङ्लुग्वोस्तु वा ।

(क्वोः ६॥, ऊटौ १॥, अणौ ७, असक्वौ ७, यङ्लुक्-वोः ७॥, तु ।१।, वा ।१।) ।

---

तेन दा च लुनौ, दा न दाने, धु दा ञ च्छि च, दे ङ पालने, दो य च्छेदे, धु धा ञ क्षिपारवे, धे ट पाने इति सप्त ; रभो ङ रामस्ये ; लभो ङ लाभे ; शक ङ य, शक न ञ शक्तौ इति द्वयं ; पत ल ज गत्यां, पत ङैश्वर्य्ये इति द्वयं ; पदो ङ गतौ ; राधो सिद्धौ,अत्र तु हिंसार्थः । एषामच इस् स्यादित्यर्थः । शक-धातोः सनते ऋदित्वात् वैमुख्येऽपि अनुवादिना नित्यमनिम्त्वम् । पित्सतीत्यादि, पतितुमिच्छति पूर्व्वसूत्रेण अनिम्पक्षे पत स इत्यस्य द्वित्वे, अनेन खिलोपे, अकारस्य इस् पिसतस इति स्थिते स्वादेः स-लोपः । अपयित्सुमिच्छति अपि-सन्, पूर्व्ववत् इम्, गुणादौ अपयिस इत्यस्य द्वित्वादि । पाणिनिः ७।४।५४, वार्त्तिकञ्च ।

* ज्ञपश्च ऋध च आप च तेषाम् । ईच ईर् च ईच ते ईर्ध्यः । ज्ञप इत्यस्य अचः स्थाने ई, ऋधः ईर्, आपः ई इति क्रमः । ज्ञप्सतीति (८१०) अनिम्पक्षे अनेन खिलोपः अस्थाने ईच, (६४१) जेर्लोपः । अर्द्दितुमिच्छति ऋध-सन् (८१०) अस्त्र इति इम्, अर्द्दिम इत्यस्य र्ध रस द्वित्वा धिष इत्यस्य द्वित्वादि । अनिम्पक्षे (६४) ऋध इत्यस्य र्ध द्वित्वा ध इत्यस्य द्वित्वे, अनेन खिलोपः, अस्थाने ईर् च । दम्भितुमिच्छति दम्भ-सन् (८१०) अस्त्र इति इम् । पाणिनिः ७।४।५५,५८ ।

† इच ईच इ, तौ यौ । धिप्सतीत्यादि, दम्भ-सन्, (८१०) अस्त्र इत्यनेन इमोऽभावपक्षे, अत्र सूत्रे दम्भ इति स-नकारनिर्देशात् गुणसञ्चारमात्राभावेऽपि अनिमि सनि न-लोपः, ततः (१०७) दस च, (६४) भस प, धस इत्यस्य द्वित्वं, अनेन खिलोपः, अकारस्य इ, ई च । देविषति दिव-सन्, अस्त्र इत्यनेन इत्वत्वात् वा इम् । पाणिनिः ७।४।५६ ।

इकार-वकारयोः यकारोटौ स्याताम् अचो अवे क्वौ च, यङ्-लुकि वे च वा स्तः। दुद्यूषति ।*
भिक्षति दिक्षति धिक्षति, रिप्सते लिप्सते, घिप्सति, पिक्षते, प्रतिरिप्सति, हिंसार्थः किं, आरिराप्सति। ईप्सति ।†

## ८१५। मुचोऽढे हेर्मोच वा सनि।

(मुचः ६।, अढे ७।, हेः ६।, मोच ।१।, वा ।१।, सनि ७।)।

अढस्य मुचो हेः स्थाने मोच वा स्यात् सनि। मोच्यते मुमुक्षते ।‡

---

* इ च व च क्वौ तयोः। य च ऊट् च तौ। अम् च क्विप् तस्मिन्। यङ्लुक् च व च यङ्लुग्वौ तयोः। अम् प्रत्याहारः। इ-स्थाने यः, व-स्थाने ऊट्—इति क्रमः। यथा-विति पृथक्पदकरणात् यङ्लुकि तत्सम्बन्धाभावे गुणिनि अगुणे च अढे वा स्तः, वकारे तु यङ्लुकि अन्यत्र च सर्वस्मिन् वकारे वा स्तः ; क्विपः पृथक्पदकरणात् केवलं क्विपी वकारे नित्य-मित्यर्थः। दुद्यूषतीति दिव-सन्, इटोऽभावपक्षे अनिमूसनोऽगुणत्वे, अनेन वस्थाने ऊ, यू इत्यस्य द्वित्वादि। पाणिनिः ६।४।१९, भाष्यञ्च।

† अस्यानयोरुभयोदाहरणान्युक्तानि, मिमीमादित्यस्य उदाहरणान्याह—भिक्षतीत्यादि, मेतुं मातुं वा इच्छति मि क्षी मा एतेभ्यः सन्, अनिमूसनि अचः स्थाने इस् मिस्स इति (६६८) सस्य त, अभ्यासलोपः। आत्मनेपदित्वात् मित्सते इत्येव। दातुमिच्छति दा-सन्, धातुमिच्छति धा-सन्, मित्सतिवत् साध्यम्। रब्धुमिच्छति लब्धुमिच्छति रभ-लभाभ्यां सन्, अकारस्य इस् (२१२) स्वादेः सलोपः,*(६४) भस्य प, रिप्स इति द्वित्वं, अभ्यासलोपः। शक्तुमिच्छति शक-सन्, अचः स्थाने इस्, स्वादेः सलोपः, सनः सस्य (१११) षत्वं, शिक्ष इत्यस्य द्वित्वं, द्वित्वलोपः, शिक्षते इति च। पत्तुमिच्छति पद-सन्, इस्, स्वादेः सलोपः, पत्स इत्यस्य द्वित्वं, द्वित्वलोपः। प्रतिराद्धुमिच्छति, प्रतिराध-धातुः हिंसार्थः, अतएव अचः स्थाने इस् द्वित्वलोपश्च। आराध-धातुराराधनार्थः, अतो न इस्-द्वित्वलोपौ। आप्तुमिच्छति आप-सन् (८१२) आ स्थाने ई, ईप्स इत्यस्य द्वित्वं, द्वित्वलोपश्च।

‡ ढकाराभावोऽढं तस्मिन्। अकर्मके सतीत्यर्थः। ढस्तौ अढस्य इति मुचो विशेषणम्। अढस्य हेर्मुचो मोच वा स्यात् सनीति कथनात् सनं विना केवलस्य मुचो स्थितिरिति तात्पर्यम्। मोक्तुमिच्छति अढविवक्षायां पापात् स्वयं मुक्तो भवितुमिच्छतीत्यर्थः, मुच-सन्, चोरित्यनेन विकल्पेन मुचो मोचादेशे (२११) कुङ्, (१११) षत्वं, मोच इति धातुः, पक्षे मुमुक्ष-धातुः।

## ८१६ । अयल्पोः खोर्य्ये ।

(अ-यल्-पोः ५।, खोः ६।, इ ।१।, ए ७।) ।

खेदवर्णस्य अकार-यल-पवर्गात् परे यवर्णे परे इः स्यात् सनि । जु गतौ, जिजावयिषति । रिरावयिषति, पिपावयिषति बिभावयिषति । अयल्पोः किं, नुनावयिषति । अतएव औ द्विले ञिः । *

## ८१७ । स्रु श्रु स्रु द्रु प्रु प्लु च्युङां वा ।

(स्रु—च्युङां ६॥, वा ।१।) ।

शिश्रावयिषति शुश्रावयिषति । †

---

कर्मकर्तृत्वादात्मनेपदम् । मठे इति किं, मुमुक्षति वत्सं गोपः, अत्र न षत्वं नात्मनेपदञ्च । पाणिनिः ७।४।५७ ।

* अश्च यल् च पुश्च तस्मात् । खोः ख्युःतस्य । ए इति य-शब्दात् सप्तमी । अकारात् य ल र स्मात् पवर्गाच्च परस्थितो योऽवर्णस्तस्मिन् परे खोवर्णस्य इः स्यात् अव्यवहितसप्तमी-ऽत्रस्य वात् अव्यवहिते सप्तमीत्यर्थः । जु गताविति धातुपाठः । जावयितुमिच्छति जु-णि-सन् (५२७) षागवृक्षाद्यृद्धिषि द्विरिति नियमेन जु इ स इत्यस्य द्विले पश्चात् ञ्यादौ जुजावयिष इति स्थिते, अनेन अकारात् परे यवर्णे परे खोवर्णस्य इः । एवं रावयितुमिच्छति, पावयितुमिच्छति, भावयितुमिच्छतीत्यादि । नावयितुमिच्छतीत्यत्र नकारपरस्थितावर्णे परे न स्यादिति । एवं नुनावयिषति शुशावयिषतीत्यादिषु न स्यात् । अथवा ञेरिरदित्यादिविषये अजीगवदित्यादिष्वपि (६१८) खोः सन्वद्भावे अनेन खोवर्णस्य इः । अतएव औ, द्विले, पश्चात् ञिरिति प्राक्‌ञ्याद्यृद्धित्वस्य सारार्थः । पाणिनिः ७।४।८० ।

† स्रु च श्रु च स्रु च द्रु च प्रु च प्लु च च्युङ् च तेषाम् । स्रु गतौ, श्रु श्रवणे, स्रु च प्रस्रुतौ, द्रु, प्रु प्लु च्युङ् च गतौ, एषां षण्णां खोवर्णस्य इः स्यात् सनि, अव्यवहितावर्णस्य अव्यवहितेऽवर्णे परे इत्यर्थः । स्रु प्रभृति धातुग्रहणात् अयल्पोरिति नानुवर्तते । स्रावयितुमिच्छति स्रु णि सन् द्विलादौ खोवर्णस्य वा इः । एवं श्रवणं ञेरिरदित्यादिविषये स्रु-णि डौ इ, अङ्, स्रु इ इत्यस्य द्विलादौ, खोः सन्वद्भावे, अनेन खोवर्णस्य वा इः, असिस्रवत् असुस्रवदित्यादि । पाणिनिः ७।४।८१ । अत्र सूत्रे सुधातुर्न द्रष्टव्यः ।

८१८। व्युक्तो य्वो झसादेः सेमः क्वाच किद्वा रुदविदमुषस्तु नित्यं।

(व्युक्तः ५।, य-वः ५।, झसादेः ५।, सेमः ५।, क्वाच् ।१।, च ।१।, कित् ।१।, वा ।१।, रुद-विद-मुषः ५।, तु ।१।, नित्यं १।)।

झसादेः सेम उकारोङ इकारोङश्च वान्तवर्जात् सन् क्वाच कित् वा स्यात्, रुदादेस्तु नित्यं। रुरुचिषते रुरोचिषते, लिलिखिषति लिलेखिषति। रुदादेस्तु, रुरुदिषति विविदिषति मुमुषिषति। वान्तः किं, दिदेविषति। *

८१९। अिस्त्वोः खेः सः षः षण्यस्विदस्वदसहः। (अि-स्त्वोः ६।।, खेः ५।, सः १।, षः १।, षणि ७।, अ-स्विद्-स्वद्-सहः ६।)।

खेः परस्य अन्त-स्तोस्थोः सस्य षत्वभूते षणि षः स्यात्, न तु स्विद-स्वद-सहां। सुष्वापयिषति तुष्टूषति। अिस्त्वोः किं, सिसिक्षति। षणीति किं, तिष्ठासति। खेः किं, प्रतीषिषति। †

इति सनन्त पादः।

---

* उच इच यौ, तौ उङौ यस्य स व्युक्त तस्मात्। नास्ति व (वकारान्तः) यत्र सः यव तस्मात्। इकारोकारोङ्-वर्ज्यवकारान्त-धातोरभावात् यव न इति दत्त एव। झस आदि-र्यस्य तस्मात्। इमा सह वर्तमानः सेम् तस्मात्। क्वाच इति चकारेण प्रकरणबलात् सन् प्राप्यते। रोचितुमिच्छति रुच-सन्-श, यनेन सनः कित्त्वे गुणाभावः, पक्षिण [illegible] [illegible]। पक्षे गुणे रोचिष इत्यत्र [illegible]। एवं लेखितुमिच्छति। रोदितुमिच्छति वेदितुमिच्छति मोषितुमिच्छतीति त्रिषु नित्यं सनः कित्त्वम्; अपि पक्षिणा रोचिषा [illegible]। देवितुमिच्छतीत्यत्र [illegible] न कित्त्वम्। एवं दिदेविषा। पाणिनिः १।२।८,२६।

† सनन्तो नियमोऽयम्। षत्वभूते षणि खिर्निमित्तकं सूत्रयतोः [illegible] [illegible] [illegible] [illegible]। षत्वभूते सणि, तथा [illegible] षत्वभूते षण्यपि [illegible] [illegible] [illegible]। स्विद-स्वद-सहां आगमासिद्ध निषेधः। स्वापयितुमिच्छति, स्वप-णि-सन् [illegible]

## ३य पादः—यङन्तः ।

८२० । मूत्र सूत्र सूचाटयर्त्त्यशूर्णु हलाद्येकाचो ऽशुभकपो मुहुर्भृशार्थे यङ् ।

(मूत्र—एकाच: ५।, अशुभकप: ५।, मुहुर्भृशार्थे ७, यङ् ।१)।

एभ्य: शुभकपवर्जेभ्यो यङ् स्यात् पौनःपुन्ये अतिशये चार्थे । *

८२१ । गत्यर्थाद् गॄ लुप सद चर जप जभ दन्श दहो वक्रगर्हे । (गत्यर्थात् ५।, गॄ—दह: ५।, वक्रगर्हे ७)।

गत्यर्थात् वक्रे, गॄादे गर्हायां, यङ् स्यात्, न तु पूर्वोक्ते, तद्युक्ते तु स्यात् । †

---

प्रत्यय द्वित्वे, (६४०) चेर्गि:, (१११) सन: सस्य मूलधातोश्च षत्वम् । सोतुमिच्छति सु-सन् (८०५) दीर्घ:,सूस इत्यस्य द्वित्वम्, उभयत्र षत्वम् । सीसुमिच्छति सिव-सन् (२११) ऊट्, सिस्यूस प्रत्यस्य द्वित्वम्,(१११) सन: सस्य षत्व, आन्त-स्तु-भिन्नत्वात् मूलस्य न षत्वम् । एवं सुसूषतीत्यादि । स्थातुमिच्छति स्था-सन् स्थास इत्यस्य द्वित्वादौ, निमित्ताभावात् सन: षत्वाभावे, एतन्नियम-बहिर्भूतत्वात्, (१११) मूलस्य षत्वम् । प्रत्येतुमिच्छति प्रति-इ-सन्, (७१८) इकारं हित्वा केवलं सन एव द्वित्वे, (६४०) चेरित्वे, सन: सस्य षत्वे, मूलधातुनिमित्तकं षि: सस्य षत्वं स्यादेव, अत षि: परस्थितमूलधात्वभावादेतन्नियमप्रवेशानवकाश: । सिषादिषु सिसेदयिषतीत्यादौ न षत्वम् । पाणिनि: ८।३।६१,६२ ।

* हलादिर्यासौ एकाचेति हलाद्येकाच् । मूत्र सूत्र सूच अट च अर्त्त च अशूर्णु च हलाद्येकाचेति तस्मात् । न विद्येते शुभकपौ यत्र तस्मात् । मुहुश्च भृशश्च मुहुर्भृशौ तयोरर्थस्तस्मिन् । हलाद्येकाच इति सामान्यपदत्वात्, मूत्रसूत्रसूचानामनेकाच्त्वेन पठितत्वात् अट अर्त्त ऊर्णु अनेकाच अजादित्वात् अप्राप्तौ इत्यनुक्ति: । यङो ङानुबन्ध: आत्मनेपदार्थ:, अकार-उच्चारणार्थ: । हलादि: किं, अटाटीयते । एकाच: किं, पुन:पुनर्जागर्त्ति । पाणिनि: ३।१।२२, वार्त्तिकं भाष्यञ्च । "अत्र लोलये रोचते इत्यत्र यङ् नेति भाष्यम् । पौन:पुन्ये तु स्यादेव ।" इति सिद्धान्तकौमुदी ।

† गॄ च लुप च सद च चर च जप च जभ च दन्श च दह च तस्मात् । वक्रञ्च गर्हा

८२२ । खे वुँः । (खेः ६।, वुँः १।) ।

यङि परे खेर्वुँः स्यात् । पुनः पुनरतिशयेन वा मूत्रयति मोमूत्र्यते, सोसूत्र्यते सोसूच्यते । *

८२३ । घों ऽनितः । (घंः १।, अ-नितः ६।) ।

अ-नकारेतः खेः घंः स्यात् यङि । अटाट्यते अशाश्यते अरार्यते अर्णोनूयते । † देदीयते मेमीयते जेगीयते जेघ्रीयते पेपीयते सेषीयते तेष्ठीयते । ‡

---

च यङगर्दं तस्मिन् । गत्यर्थादिति लुलुपादेरिति च पृथक् पदकरणं यङगर्ध्यां यथासङ्ख्यार्थं, तेन गत्यर्थात् यङ् गर्हायामिति । न तु पूर्व्वोक्ते इति एभ्यो लुलुभं स्यार्थे न स्यात्, तत् कुले लुलुरर्थेन भयार्थेन वा युक्तयोर्यङगर्हयोस्तु स्यादित्यर्थः । अत गत्यर्थादिति इत्यर्थे वाच्य एव, पूर्व्वसूत्रे सामान्यतो ग्रहणात् । पाणिनि: ३।१।२३,२४ ।

* पुनःपुनरतिशयेन वा इत्यत्र क्रियाविशेषणे तृतीया । मूत्रत् क प्रस्रावे, मूत्रधातोः चुरादित्वात् ञिः, (७७५) अकारलोपे, मूत्रिधातोर्यङ्, (६४१) ञिलोपः, मूत्र्य इत्यस्य (६३८) द्वित्वं, शेषात्यचो लोपे, अनेन गुणे, मोमूत्र्य इति (६२१) धातुसंज्ञायां, यङन्तत्वात् आत्मनेपदं, ते शप्, (५४२) शपोऽकारलोपः, मोमूत्र्यते इति । एवं सूत्रत् क सोसूत्र्यते, सूचत् क सोसूच्यते । पाणिनि: ७।४।८२ ।

† न इत् येषां ते नितः (णीञ् णुञ् रीञ्), न विद्यन्ते नितो यस्य सोऽनित् तस्य, खेरित्यस्य विशेषणम् । अटाट्यत इति, अट गतौ, पुनःपुनरतिशयेन वा वक्रम् अटति, (केवलं) वक्रम् अटतीति वा, इत्यर्थे अट-यङ् अट्य इति, (७१८) टकारं हित्वा ट्य इत्यस्य द्वित्वम्, शेषात्यचः इति यकारलोपे, अनेन अकारस्य दीर्घः । एवं पुनःपुनरश्नाति अशाश्यते । पुनःपुनर्भृशम् ऋच्छति इयर्त्ति वा अरार्य्यते, ऋ-यङ् (६१५) गुणः, अर्य इत्यस्य यकारं हित्वा, (७२०) न-द्वि इति वचनात् र्य इत्यस्य द्वित्वे, शेषात्यच इति य-लोपे, अरर्य इत्यस्य अनेन अ दीर्घः । पुनः पुनरूर्णोति ऊर्णु-यङ् (५९०) दीर्घः, ऊर्णूय इत्यस्य (७१८,७२०) र्ण रूप हित्वा नूय इत्यस्य द्वित्वे, खेर्वुः, रेफसम्बन्धाभावात् मूत्रधातोर्णकारस्य दन्त्यत्वम् । पाणिनि: ७।४।८३ ।

‡ इत्यर्थेकाव्य उदाहरणान्याह पुनःपुनर्ददाति दा-यङ् (६१२) घौ, दीय इत्यस्य

मोमूयते मेम्रीयते, जाजप्यते, चेक्रीयते चेक्षीयते, तिरि-स्रिष्यते, यङ्लाघ चः।* एवं डजति माजम्यते।

८२४। ग्रो र लः। (लः ६।, र ।१।, लः १।)।

गिरते रो लः स्यात् यङि। गर्हितं गिरति जेगिल्यते। लोलु-प्यते सासद्यते।†

८२५। को स्रु र्वा। (कोः ६।, सुः १।, वा ।१।)।

कोः स्रुः स्याद्वा यङि। चोकूयते कोकूयते।‡

८२६। नीन् वञ्च स्रंस ध्वंस भ्रंश कस पत पद स्कन्दां। (नीन् ।१।, वञ्च—स्कन्दां ६।)।

एषां ञेर्नीन् स्यात् यङि। वनीवच्यते।§

---

त्यादि। एवं पुनःपुनर्जागर्ति, मामति, जहाति, पिबति, जाति, तिष्ठति। सो वा इति यथोर्मूर्धन्य (१११) बलम्।

* पुनःपुनर्मयति मि-यङ् (६६८) चिकत्वेन मिः, (५९०) दीर्घः, मूय इत्यस्य त्यादि, पयी मीय इत्यस्य त्यादि। पुनःपुनः चरति चृ-यङ् (६१५) गुणः, चर्य इत्यस्य त्यादि। क्र-यङ् (४९०) यस्थाने रो, क्रीय इत्यस्य त्यादि। सं-क्र-यङ् (७६६) सुम् इति, (६१ [illegible] कृषु क्यामिवेति नियमात् न गुणः। वि-पूर्व्वक-स्रिष-यङ् विसेसिष्यते, (५७२) षत्व [illegible] निमित्तं चिकित्सितमपि फलं न स्यात्, 'दम्यन्तादीनां' इति विधानवत् निषेधेऽपि तथा।

† गृ॒ निगरणे, यङ्, (६२८) यस्थाने इर्, पक्षेण र ल, गिल्य इत्यस्य त्यादि। [illegible] गिरतेर्दितिर्वचनात् यस्थाने जेगीर्यते इत्येव। गर्हितं लुम्पति लोलुप्यते, गर्हितं सीदति सासद्यते। पाणिनिः ८।१।२०।

‡ मण्डूकगत्या कोरित्यस्यानुवृत्तिः। कु ङ शब्दे, पुनःपुनः कवते इति कु-यङ्, (५९०) दीर्घः, पक्षेण वा चिकु-आदेशः। पाणिनिः ७।४।६१।

§ वञ्चु गत्यां, स्रन्सु खङ् अंशे, ध्वन्सु खङ् गती, भ्रन्श ख ङ चाधःपाते (तालव्यान्तः, पाणिनिमते दन्त्यान्तः), कस ल गती, पत ल ज गत्यां, पद ङीचे—पदो ङ गती इति केचन,

८२७। अम जप जभ दह दन्श भन्ज पश यपो ऽतो नुन् खवयस्तु वा।

(अम—यप: ६।, अत: ६।, नुन् ।१।, ख-व-य: ६।, तु ।१।, वा ।१।)।

अमन्तानां जपादीनाञ्च यदन्तस्य ये नुन् स्यात् यङि, खवया-न्तस्य तु वा। अम्बम्यते आमाम्यते ।*

८२८। हनो वा ग्नी। (हन: ६।, वा ।१।, ग्नी ।१।)।

जेघ्नीयते जङ्घन्यते। अम्मम्यते। चञ्चल्यते चाचल्यते, मम्मव्यते मामव्यते, दन्दव्यते दादव्यते। †

---

स्कन्दिरो गति-शोषणयोः इति। नीनो न इत् यत्ने। चप पत ष्ठ ज गत्यामित्यस्यैव ग्रहणम्, पत ऐश्वर्ये इत्यस्य तु पापत्यते इत्येव, तेन (१११८) पापतिरिति स्वयमुदाहरिष्यति। वञ्च वचति, वन्च-यङ्, (५६७) न-लोपे, वच इत्यस्य द्वित्वे, अनेन ये नीन् वनीवच्यते, (८२२) नकारेत्वात् न दीर्घः। एवं सनीस्रस्यते, दनीध्वस्यते, बनीभ्रस्यते, चनीकस्यते, पनीपत्यते, पनीपद्यते, चनीस्कद्यते। पाणिनिः ७।४।८४।

* अम् प्रत्याहारः। अमश जपश जभश दहश दन्शश भन्जश पशश अप च तस्य। अत्र नुनः केवलं न इत् यत्ने, न तु उकार इत्, यतो नु-रनुस्वारः, अन्यथा यंयम्यते रंरम्यते इत्यादौ अस्य्परत्वाभावात् (५०) अनुस्वारो न स्यात्। येन विधिस्तदन्तस्येति न्यायात् ख-व-य इति खान्त-वान्त-यान्तानामित्यर्थः। ल-य-मध्यपाठात् वकारोऽत्र दन्त्यः। पुनः पुनर्गच्छति अम-यङ्,(६५५) ज्ञा-प्रादिमस्य विकल्पपक्षे अम इत्यस्य द्वित्वम्, अनेन ये नुन्, (५१) अनुस्वारस्य नित्यं अम्। कौमरास्तु अनुस्वारस्य दान्तत्वं परिकल्प्य (५२) वा अम् कुर्व्वन्ति (तिङन्त-पादस्य ५६० सूत्रे गोयीचन्द्रः)। नकारेत्वात् (८२२) ये न दीर्घः। अम-स्थाने (६५५) ज्ञा-प्रादिमपक्षे आमामायते इति। एतत्सूत्रोदाहरणाय प्रादौ ज्ञाभावपक्षो दर्शितः। पाणिनिः ७।४।८५,८६। अथ मपधातुर्न दृश्यते।

† हन-धातुः ग्नी स्यात् यङि। पुनःपुनर्हन्ति हन-यङ् ग्नीव इत्यस्य द्वित्वादि। विकल्प-पक्षे हन्त इत्यस्य द्वित्वे, पूर्व्वेण ये नुन्, (६७९) घेः परस्य हस्य घः। गर्हितं जपति जञ्जप्यते। एवं जञ्जभ्यते, दन्दह्यते, दन्दशते, बम्भज्यते, पम्पश्यते, यंयम्यते। वक्रं चलति, पुनःपुनश्चलति, वक्रं दवति, एतेषु पूर्व्वेण वा नुन्। नुन्पक्षे ये न दीर्घः। "हन्तेर्हिंसायां यङि ग्नीभावो वाच्यः" इति वार्त्तिकम्।

## ८२९। चरफलोरुच्चोकोनं धुः।

(चर-फलोः ६।, उत् ।१।, च ।१।, उकः ६।, न ।१।, धुः १।)।

चरफलोः येङुन् स्यात् उकः उकारस्य यङि, तस्य च न धुः। चञ्चूर्य्यते पम्फुल्यते। *

## ८३०। रीनृत्वतः। (रीन् ।१।, ऋत्वतः ६।)।

ऋकारवतो धोः स्वेः रीन् स्यात् यङि। वरीवृत्यते। †

## ८३१। व्येस्वपस्यमो ञिः। (व्ये-स्वप-स्यमः ६।, ञिः १।)।

एषां ञिः स्यात् यङि। वेवीयते सोषुप्यते सेसिम्यते। ‡

## ८३२। न वधः। (न ।१।, वधः ६।)।

वधेर्ञिर्न स्यात् यङि। वावध्यते। §

---

* येङुन् इति अनुवर्त्तते, स्वेरकोऽभावात् मूलधातोरुकः उकारस्य। यङ्लुकि प्रत्ययस्य लुकः निषेधार्थं न चरितार्थम्। चञ्च्  चरति अर्थे प्रत्यय द्विःत्वे येङुन्, मूलधातोरुक उकारः, (२२८) अस्य दीर्घः। पुनःपुनः फलति पम्फुल्यते। पाणिनिः ७।४।८७,८८।

† ऋत् विद्यते यस्य स ऋत्वान् तस्य। ऋकारवतः इत्यनेन यदा ऋकारश्रुतिः तदैव धोः स्वेः रीन् स्यात्, तेन चेक्रीयते इत्यादौ (४९७) ऋकारस्य रीभावे न रीन्। यङ्लुकि तु वरीवर्त्तीत्यादौ स्यादेव। एवं प्रच्छ-भ्रस्ज-व्रश्चादीनां (६६१) ञौ कृते ऋकारवत्त्वात् रीन् स्यात्, तेन वरीवृश्च्यते परीपृच्छ्यते बरीभृज्ज्यते इत्यादि। पुनःपुनर्नृत्यति नृत-यङ् प्रत्यय द्विःत्वे स्वेः रीन्, नृत्यादित्वात् णत्वाभावः। एवं दरीदृश्यते इत्यादि। पाणिनिः ७।४।९०, वार्त्तिकञ्च।

‡ (६६१) स्वपादिः ञिति ञिरिति नियमात् अप्राप्तौ विधिरयम्। ञानिष्टत्वात् ञीरित्यर्थः। व्ये वेञ् इत्यादि, स्वप वस्तु शयने, स्यमु ध्वाने, पुनःपुनर्व्ययतीत्यादि वाक्यानि। व्ये-यङ्, अनेन ञिः, (५९०) दीर्घः, वीय प्रत्यय द्विःत्वादि। स्वप-यङ् ञिः सुप प्रत्यय द्विःत्वादि, (१११) षत्वम्। स्यम-यङ् ञिः सिम प्रत्यय द्विःत्वादि। पाणिनिः ६।१।१९।

§ वधादित्वात् प्राप्तौ निषेधः। वध च वान्ती, पुनःपुनर्वधति। पाणिनिः ६।१।२०।

**८३३। चायः की।** (चायः ६।, की ।१।)।

चायतेः की स्यात् यङि। चेकीयते। *

**८३४। घ्राध्मो ङीं।** (घ्रा-ध्मोः ६॥, ङी ।१।)।

जेघ्रीयते देध्मीयते। †

**८३५। शीङो ङ्य् येऽणौ।**

(शीङः ६।, ङ्य् ।१।, ये ७।, अणौ ७।)।

शाशय्यते। ‡

---

यङ्लुगन्तः।

**८३६। यङो लुग्वाऽपो लुक् पं द्वि वादि च धृत्वान्तु वाऽनि तु नित्यं नोतः।**

(यङः ६।, लुक् ।१।, वा ।१।, अपः ६।, लुक् ।१।, पं १।, द्विः १।, वादि ।१।, च ।१।, धृत्वं १।, तु ।१।, वा ।१।, अनि ७।, तु ।१।, नित्यं १।, न ।१।, उतः ५।)।

यङो लुक् स्याद्वा, लुकि सति अपो लुक् पं द्वित्वं वेर्षुरित्यादि कार्यञ्च स्यात्, धुयङ्घोत्वन्तु वा स्यात्, अनि तु नित्यं लुक् स्यात्, उदन्तात्त्वनि न स्यात्। §

---

* पाणिनिः ६।१।२१।

† ङी इत्यस्य ङ इत्, अन्यस्य स्थाने। पुनःपुनर्जिघ्रति, पुनःपुनर्धमतीति यङ्। पाणिनिः ७।४।३१।

‡ शीधातो [illegible] स्यात् अयौ ये, [illegible] स्थाने, [illegible]। [illegible] पुनःपुनः [illegible] पाणिनिः ७।४।२२।

§ यङो लुक्-[illegible] (४८०) [illegible], (६१५) [illegible], (५६०) [illegible]

बोभवीति बोभोति, बोभूतः बोभुवति। अबोभवीत् अबोभोत् अबोभूतां अबोभुवन्, अबोभूत् अबोभुवीत्, बोभुवाञ्चकार। *

वनीवञ्चीति वनीवङ्क्ति, वनीवक्तः, वनीवचति। जङ्गमीति जङ्गन्ति, जङ्गतः, जङ्ग्मति जङ्गमति; जङ्गमीमि जङ्गन्मि, जङ्गन्वः, जङ्गन्मः।, जङ्घनीति जङ्घन्ति, जङ्घतः, जङ्घ्नति जङ्घनति। †

---

न स्तुः, यङन्तत्वेन विहितं कार्य्यं स्यादेव, तेन धातुसंज्ञा व्यामाम् च स्यात्। स्तादि-कार्य्यस्य यङि परे विहितस्य लुकि न भवति निषेधादप्राप्ते वचनम्। ध्रुवग्रहणोक्तमिति, यत्र क्वचित् सूत्रे धातुविशेषग्रहणपूर्व्वकं यत् कार्य्यमुक्तं तद्वा स्यादिति। अनि तु इति (९९३) पचादित्वादनि कृते तस्मिन् परे नित्यं यङो लुक् स्यात्, कृलोदनधातोस्तु अनि परे न लुक् स्यात्। पाणिनिः २।४।७४, भाष्यञ्च।

तिपा अपानुबन्धेन निर्दिष्टं यत् गणेन च। यत्रैकाच्-ग्रहणं किञ्चित् पञ्चैतानि न यङ्लुकि। आचार्य्या यङ्लुकोऽनन्ति सेट्कत्वमनिटामपि॥ इति प्राचीनवचनमपि स्मरणीयम्। (६८६) वेवेत्त्यादौ तिपा निर्दिष्टत्वात्, (५७२) स्वर इति अपा, (७१०) शीङ इति ङानुबन्धेन, (९९५) चक्षः इत्यादौ गणेन, (५७६) एकाचः ग्रहणत्वात्, तत्तत् कार्य्यं न स्यादिति। अनिटां सेट्कत्वं (८४१) वेभिदिता इत्यादौ।

* पुनःपुनर्भवति यङ्लुकि, भू-यङ् तस्य लुक्, द्वित्वं बोभू-बः, बोभू इत्यस्य धातुसंज्ञात्वात् तिप्, अप् तस्य लुक्, (७२२) ईम्, गुणः, बोभवीति। ईमो विकल्पपक्षे गुणः, बोभोति। एवं सर्व्वत्र। बोभू-तस्, ङित्त्वात् न गुणः। अन्ति (६९०) अन्-स्थाने अत्, (५८८) उव्, बोभुवति। बो-दिप् (७२२) ईम् वा, अबोभवीत् अबोभोत्, बो-ता अबोभूतां, बो-अन्, (५६२) भूवर्ज्जनात् न [illegible], (५८८) उव्, अबोभुवन्। टी-दि (५५२) ध्रुवग्रहणोक्तत्वात् वा सिचोपः अबोभूत्, पक्षे अबोभुवीत्, (८४१) अरे गुणनिषेधात् उव्। डौ-यङ् (५८२) [illegible], उव्, [illegible] (५८२) आमबोभ:।

† वञ्च-यङ्लुक्, द्वित्वादि, (८२६) [illegible] वनीवञ्च-धातोस्तिप्, ईम्। ईमो विकल्प-पक्षे (२११) कुत्व, (५०,५१) [illegible]। [illegible] (५६०) न-लोपः। अन्ति, (६९०) [illegible] अत्, न-लोपः। गम-यङ्लुक् (८२०) [illegible], [illegible] वा ईम्। पक्षे [illegible] न। [illegible], (६७६) [illegible]। अन्ति (२६०) [illegible] वा [illegible], [illegible] अत्। तिप् ईम् वा, पक्षे (२०२) [illegible]। [illegible] न। हन-यङ्लुक् [illegible], [illegible] (६७८) [illegible]।

चञ्चुरीति चञ्चूर्त्ति। जाजातः जङ्गतः, जङ्ग्मति जङ्ग-मति। आजातः अञ्जतः, अञ्ज्ञति अञ्जनति। देदिवीति देद्योति देदेति, देद्यूतः देदितः, देद्युवः देदिवः। वेविच्छीति वेवेष्टि, वेविश्नः वेविच्छ्वः। *

८३७। शाकः खे नं घें:। (शाकः ६।, खेः ६।, न ।१।, घें: १।)।

जङ्खेति जङ्खनति। †

८३८। दन्शो न-लोपो वा।

(दन्शः ६।, न-लोपः १।, वा ।१।)।

दन्दशीति दन्दंशीति दन्दष्टि दन्दंष्टि। ‡

८३९। ञि र्नं वा। (ञिः १।, न ।१।, वा ।१।)।

---

* चर-यङ्लुक् (८२९) येर्नुन् उक् उकारस्य, तेनैव गुणनिषेधः, ईमोऽभावपक्षे (२२८) उकारस्य दीर्घः। गम-यङ्लुक्, तस् (६५५) धुञ्जत्वात् वा ङादित्वे, अमन्तत्वाभावात् येर्नं नुग्, (८२२) दीर्घः। पक्षे अमन्तत्वात् येर्नुं न्। झि (२२०) वा उङ्लोपः, अन्त अत्। आगमादेशयोर्मध्ये बलीयानागमो विधिरिति न्यायात् तिप्सिप्प्रभृतिषु आदौ (७२२) ईमि ङादेशाभावे जङ्गमीति जङ्गन्तीत्यादि, ईमो विकल्पपक्षेऽपि पिति झसे परे निषेधात् न ङा इति बोध्यम्। जन-यङ्लुक् गमवत्। दिव-यङ्लुक् देदिव धातुः तिपि देदिवीति (७२४) निषेधात् न गुणः। ईमो विकल्पपक्षे (८१४) वस्यानि ऊट्, तस्य गुणः। ऊटो विकल्पपक्षे (६४२) वलोपः, ततो गुणः। तस् वस् उभयत्र वा ऊट्, पक्षे वलोपश्च। विच्छ-यङ्लुक् वेविच्छधातुः, तिप्, ईमो विकल्पपक्षे (८१४) छस्य शः, गुणः, (१५४) षड्। वस्, वा छस्य शः।

† शाकधातोः खेः घौं न स्यात् वा यङ्लुकि। (८२२) घौऽमित इति प्राप्त-दीर्घस्य निषेधोऽयम्। जङ्खेति (७२२) ईम्, सन्धिः। सिद्धान्तकौमुदीमते तु न दीर्घनिषेधः, तेन जाङ्खेति जाङ्खाति इति।

‡ दन्श-धातो र्नकारस्य लोपः स्याद्वा यङ्लुकि। दन्दशीतीति ईम्पक्षे [illegible] नकार-लोपः, पक्षेऽम्पक्षेऽपि वा नकारलोपः। (८२७) येर्नुं न्, पक्षिम्पक्षे (१५५) [illegible] (४०) तस्यापि ट। पाणिनिः ७।४।८६, अत्र सूत्रे नित्यम्।

चाञ्चपीति चोचुपीति चाञ्चप्ति चोचोप्ति।*

### ८४०। रीतो रिन्‌रनौ वा।

(रीत: ६।, रिन्-रनौ १॥, वा।१।)।

रीत: स्थाने रिन्‌रनौ वा स्त: यङ्लुकि।

चरिकरीति चर्करीति चरीकरीति चरिकर्त्ति चर्कर्त्ति चरी-कर्त्ति।†

### ८४१। यङ्लुक्यलोपे ऽरे न गुणौ।

(यङ्लुक्-अलोपे ७।, अरे ७।, न।१।, गु-णौ १॥)।

बेभिदिता मर्मृजिता। अरे किं, बेभेत्ति मर्मार्ष्टि।‡

इति यङन्त-पादः।

---

* यङ्निमित्तक एव जि मं स्यात् वा यङ्लुकि, तेन (८११) ओयप्‌सयो जिरित्यस्यैव निषेधः। जिर्वेति इति जिमात्रस्यैव विकल्पो भवति। वस्तुतस्तु (६६१) पराद्दिर्विनित्यमेव। चोचुपीति चोचोप्ति उभयत्र आदौ जि: पश्चात् द्वित्वादि। चोचुपीतीत्यत्र (७१४) गुणनिषेधः। एवं ञे—वाव्यंति वेवयीति वाव्याति वेवेति। सम—संसमीति सेसिमीति संसन्ति सेसेन्ति। पाणिनिमते नित्यम्।

† सूत्रत्वात् समासाभावः। अत्र वा-ग्रहणं परत्र नित्यत्वार्थम्। रीत: स्थाने इति रीत उत्पत्तिस्थाने इत्यर्थः, अन्यथा नित्यात् रीतोऽन्ते रिन्‌रन्प्रसक्ति: स्यात्। रनोऽकार उच्चारणार्थः। ऋ यङ्लुक्, ईत्पक्षे रिन्‌रनौ, अनीत्पक्षेऽपि रिन्‌रनौ, अतएव षट् पदानि। एवं वृत्—वरिवृतीति वर्वृतीति वरीवृतीति वरिवर्त्ति वर्वर्त्ति वरीवर्त्ति इत्यादि। अन्यमते तु चरिकरीति चरकरीति चरिकर्त्ति चरकर्त्ति, अत्र (५८५) समानवर्णे परे लोपः। पाणिनि: ७।४।९१,९२।

‡ यङ्लुक् च अलोपश्च तस्मिन्। यङो लुकि अलोपे च सति अरे परे गुणौ न स्याताम्। पुन:पुनरतिशयेन वा भेत्ता बेभिदिता, बेभिद्-णी-ता (५५४) इत्, अनेन गुणनिषेधः। पुन:-पुनर्मार्जिता मर्मृजिता, पूर्वसूत्रेण मे: रत्, मर्मृज-णी-ता, इत्, (६९४) मृजोऽकाजित्वाभावेन प्राप्तौ अनेन वृद्धिनिषेधः। अलोपे तु (८३१) संजिजिषिता इत्यादि। अन्यमते तु यङ्-लुकोर्णौ जौ इति विकल्पेन वृद्धिं कुर्वन्ति, पोप्यमानि पोपुषयतीत्यादि (संशयवादे सिकन्त-पादे ४६० सूत्रे)। पाणिनि: १।१।४।

## ८४२। ञेः काम्यक् स्वेच्छायां।

(ञेः ५।, काम्यक् ।१।, स्वेच्छायां ७।)।

ञेः परः काम्यक् स्यात् आत्मेच्छायां। आत्मनः पुत्रमिच्छति पुत्रकाम्यति। *

## ८४३। क्योऽव्यमाद् यश्च।

(क्यः १।, अव्यमात् ५।, ई ।१।, यः १।, च ।१।)।

मान्त-व्य-वर्जात् ञेः क्यः स्यात् स्वेच्छायां, तस्मिन्नवर्णं ई स्यात्।†

पुत्रीयति। (४२१) ओदौतोऽव्यदिति। गव्यति नाव्यति। (४८७) यङ्व्यक्ये इति। कर्त्रीयति। (२५८) आश्रपो च गार्गीयति। ‡

---

* स्वस्य इच्छायाः कर्मभूतं यन्नितं यदि परमतादिविशेषणात् आत्मभिन्न-सम्बन्धिपदार्था पेक्षणं न स्यात् तदा तस्मात् काम्यक् स्यादित्यर्थः, तेन महान्तं पुत्रमिच्छति इत्यादौ न स्यात्; समासे तु महापुत्रमिच्छति राजपुत्रमिच्छति इत्यादौ स्यादेवेति। काम्यकः किस्वात् आत्मनो स्रुचिमिच्छति स्रुचिकाम्यतीत्यादौ न गुणः। आत्मनः पुत्रमिच्छतीति वाक्यविन्यासात् द्वितीयान्तात् ञेरिति बोध्यं, तेन आत्मनः पुत्र इच्छति इत्यत्र न स्यादिति। पुत्रकाम्यतीति पुत्रमिति द्वितीयान्तात् काम्यक्, (२१८) ञेर्लुक् स्ये वेति स्ये परे ञेर्लुकि, पुत्रकाम्य इति (६२१) धातुसंज्ञायां, तिप्-शपौ, (५४२) अकारलोपश्च। पाणिनिः ३।१।९।

†, न च व्यश्च व्यं, नास्ति व्यं यत्र सोऽव्यस्तस्मात्। मकारान्तम् अव्ययञ्च त्यक्त्वा प्रात्यादिविषयः। अत्र चकारेण काम्यक् च स्यादिति सूचितम्। तेन सर्वस्मात् ञिसूत्रात् क्यः काम्यक् च स्यात्, मकारान्तादव्ययाच्च केवलं काम्यगेवेति निष्कर्षः। [illegible] पुत्रीयति पुत्रार्थः, क-वृत्तिः। पाणिनिः ३।१।८, ७।४।३३, वार्त्तिकञ्च।

‡ आत्मनो गामिच्छति गामिच्छतात् क्यः, तस्मिन् परे अकारस्य ईः, गामीय इति

८४४। न-लोपः क्यङ्क्ये । (न-लोपः १।, क्य-ङ्क्ये ७)।

राजीयति । *

८४५। ह्रसात्तयोर्व्वारे ।

(ह्रसात् ५।, तयोः ६॥, वा ।१।, आरे ७)।

ह्रसात् परयोः क्य-ङ्क्ययोर्लोपः स्याद्वा आरे । समिधिता समिध्यिता । † अम्वरात् किं, किंकाम्यति खःकाम्यति । ‡

---

धातुः। एवं पुत्रीयतीत्यादि। पूर्व्वसूत्रेण मानकाम्यतीत्यपि। अवर्णस्य ई-कथनात् कन्यामिच्छति, कन्यीयति, अत्र आकारस्य ई। कन्याकाम्यतीति च पूर्व्वसूत्रेण। गामिच्छति गव्यति, नावमिच्छति नाव्यति, उभयत्र यस्य अव्ययावात् (२५) क्रमेण अव् आव् च। आत्मन कर्त्तारमिच्छति, कर्त्तरि री। एवं धात्रीयति। गर्गस्यापत्यं गार्ग्यः गर्गशब्दात् यः, ततः गार्ग्यमिच्छति, क्ये परे यलोपः, अकार ईच।

* नान्तस्य ले नकारलोपः स्यात् क्ये ङ्क्ये च परे। (११८) नो लुप् फेऽवादित्यनेन विरामे परे नकारस्य लुपि सति (१५) तदादिविधि न स्यादित्यतो लोपविधानम्।

एतच्च क्यङ्क्ययोः सतोः विरामविहितं किमपि कार्य्यं न स्यादित्यप्यनुसन्धेयं, तेन विवासमिच्छति विवस्यति, अत्र न (१८४) दन्। लिहमिच्छति, लिह्यति, अत्र न (१७५) हस्य ढ। दुहमिच्छति दुह्यति, अत्र न (१७६) हस्य घ। वाचमिच्छति वाच्यति, अत्र न (२११) कुह्। पुमांसमिच्छति पुंस्यति, अत्र न (१९२) स्यान्तलुप्। नमः करोति नमस्यति, अत्र न (१०२) विसर्गः। सर्पिरिच्छति धनुरिच्छति सर्पिष्यति धनुष्यति इत्यादौ न (२२७) रत्। गिरमिच्छति गीर्य्यति पुरमिच्छति पूर्य्यति इत्यादौ तु विरामविहितत्वाभावात् (२२८) इत्वो दीर्घः। पाणिनिः ८।२।७।

राजानमिच्छति पूर्व्वसूत्रेण क्यः, अनेन न-लोपः, ततः पूर्व्वेण अकारस्य ईः।

† विभक्तिविपरिणामेन क्य-ङ्क्ययोरनुवृत्तिः। समिधमैच्छत् इति वाक्ये क्यः, समिध्यधातुः, तौ-ता, (५५४) इम्, अनेन वा यलोपः। एवं दृषदमैच्छत् दृषदिता दृषद्यिता। ह्रसात् किं, वाचीयिता। आरे किं, समिध्यति। पाणिनिः ६।४।५०।

‡ (८५२) औडत्यादिरस्य अनुदृशस्यत्वात्—किमिच्छति खरिच्छति, एतयोः पूर्व्वेण काम्यच्। एवं उर्जःकाम्यतीत्यादि।

८४६। धनोदकाशन-वृषाश्वस्य गृद्धिपानाशन-आभार्थे ङा उनङ् ङा सन् सनसनौ क्ये न षः।

(धन—क्षीः ६।, गृद्ध—अर्थे ७।, ङा ।१।, उनङ् ।१।, ङा ।१।, सन् ।१।, सन्-असनौ १।।, क्ये ७।, न ।१।, षः १।)।

धनस्य गृद्धौ ङा, उदकस्य पाने उनङ्, अशनस्य अशने ङा, वृषाश्वयोर्आभे सन्, लेरर्थे काम्ये सन् असन् च स्यात्, क्ये— सः षो न स्यात्। *

धनायति उदन्यति अशनायति वृषस्यति अश्वस्यति, दधिस्यति दध्यस्यति। गृद्धादौ किं, धनीयति। †

---

* वृषश्च अश्वश्च वृषाश्वं, धनञ्च उदकञ्च अशनञ्च वृषाश्वञ्च लिश्चेति तस्य। गृद्धश्च पानञ्च अशनञ्च (अशनं) आभश्च अर्थश्च तस्मिन्। सन् च असन् च सनसनौ। धनशब्दस्य गृद्धौ काम्ये ङा, ङ इत् अन्त्यस्य स्थाने; उदकस्य पाने काम्ये उनङ्, ङकारौ इतौ, अन-स्थितिः; अशनस्य अशने काम्ये ङा; वृषाश्वयोर्आभे काम्ये सन्, न इत् अन्ते, आभो मैथुनं; एतद्भिन्न-लिङ्गस्य अर्थे काम्ये सन् असन् च स्यात्, क्ये परे इति सर्व्वत्र योजनीयम्। क्ये परे इति वचनात् इच्छाप्राप्तौ, पुनस्तत्रौ काम्ये इति वचनात् अतिवाञ्छायामित्यर्थो बोध्यः। सः षो न स्यादिति एतत् सनादेशस्यैव, तेन धनुष्यति सर्पिष्यतीत्यादौ षत्वं स्यादेव। सर्व्वत्र कर्त्तृ-कारकादेव स्यादिति। पाणिनिः ७।४।३४, ७।१।५१, वार्त्तिकं काशिका च।

† धनं गृद्धीतुमिच्छति धनायति ङा, धनशब्दस्यार्थसङ्कोचनं प्राचीनानां मतं, तेन धनं धनायतीत्यादिप्रयोगः। उदकं पातुमिच्छति उनङ्, ङित्वात् उदकशब्दस्य अन्त्यस्य अकारस्य स्थाने उन्, ङित्वात् उदक् इत्यस्य (१२६) टेः अक्भागस्य लोपः, उदन्य-धातुः। अशनं (भक्ष्यादि) भोक्तुमिच्छति ङा, तथापि अर्थसङ्कोचे अशनायति पायसम् इत्यपि प्रयोगः। वृषीव आचरतः पुरुषः, वृषम् अश्वं वा अन्तुं (सङ्गमयितुम्) इच्छति; अत्र च अर्थसङ्कोचेनैव पुरुषं वृषस्यतीत्येव प्रयोगः। दधि इच्छति सन् असन् च, न षत्वम्। अत्र लिङ्गस्य अर्थे काम्ये इति वचनात् नैव अर्थसङ्कोचः, तेन दध्यस्यति नगरम् इति न स्यात्। एवं क्षीरस्यति क्षीरस्यतीत्यादि। भाष्ये इत्यादिरिहाप्यत्र वकारान्तस्य लिङ्गस्येति केचित्। गृद्धा-दावर्थे किं, धनीयतीत्यादि। अशनादौ (अशनायती) किं, (अशनायतीति भेदः), सुप्यात्मनः क्यच्-धनीयति-उदक् उदकीयति, अशनीयति, वृषीयति, अश्वीयति।

८४७। ङश्चोपमानादाचारे क्यः।

(ङ-श्चोपमानात् ५।, आचारे ७।, क्यः १।)।

ङात् ङाश्चोपमानात् क्यः स्यादाचारेऽर्थे। शिवमिवाचरति शिवीयति विष्णुं, विष्णाविवाचरति विष्णूयति शिवे। *

८४८। धात् क्यङौ सलोपश्च वा गल्भ-क्लीब-होडात्तु मं। (धात् ५।, क्यङ-ङौ १।।, स-लोपः १।, च ।१।, वा ।१।, गल्भ-क्लीब-होडात् ५।, तु ।१।, मं १।)।

धादुपमानादाचारेऽर्थे क्यङ-ङौ स्तः, सस्य च वा लोपः, गल्भादेस्तु ङावपि मं। कृष्ण इवाचरति कृष्णायते कृष्णति, स्वायते स्वति, आमास (५८२) त्वान्तत्वादाम्। पयायते पयस्यते। गल्भायते गल्भते। †

---

* ङश्च ङश्च ङं, ङश्च तदुपमानश्चेति ङश्चोपमानं तस्मात्। उपमानवाचकात् कर्मपदादधिकरणपदाच्च क्यः स्यात् आचारेऽर्थे। विष्णुं शिवमिव आचरति, शिवे विष्णौ इव आचरति, उभयत्र क्यः, (८४१) क्यात्स्य ई, विष्णूयतीत्यत्र (५९०) दीर्घः। [illegible] शिवुकरणात् [illegible] शिवौ [illegible] स्यादिति बोध्यम्। [illegible] परे न-लोपो न स्यादिति [illegible], तेन राजनि इवाचरति राजन्यति पुरी। [illegible] [illegible] पदम् [illegible] [illegible] [illegible] स्याच्चम्। पाणिनिः ३।१।१०, वार्त्तिकञ्च।

† [illegible] उपमानादित्यनुवृत्तम्, [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] विधीयते। [illegible] इति (५९०) [illegible] इति दीर्घः। एवं [illegible] विष्णूयते। (५९०) [illegible] (४२१) [illegible] [illegible] (२५८) [illegible] (८०७) [illegible] [illegible] (२२०) [illegible] [illegible], [illegible] [illegible] [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible], [illegible] (४२६) [illegible] [illegible] (६२१) [illegible] [illegible], (५०६) [illegible] एवं [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] (५०७) [illegible]

## ८४९ । भृशादेः च्व्यर्थे वा त-स-लोपश्च ।

(भृशादिः ५।, च्व्यर्थे ७, वा ।१।, त-स-लोपः १।, च ।१।) ।

भृशादेः च्व्यर्थे ञ-क्वौ वा स्तः, तस्मिन् त-स-लोपश्च ।

भृशायते भृशति भृशीभवति । चेतायते ग्रमायते वेहायते । *

## ८५० । डाज्लोहितादेः पश्च ।

(डाच्-लोहितादिः ५।, पं १।, च ।१।) ।

डाजन्तात् लोहितादेश्च च्व्यर्थे ञ-क्वौ वा स्तः पश्च । पटपटायते पटपटायति पटपटाति पटपटास्यात् । लोहितायते लोहितायति लोहितति लोहितीस्यात्, धर्म्मायते धर्म्मायति धर्म्मति धर्म्मीस्यात् । †

---

पव इवाचरति क्यः, वा सलोपश्च । ओजायते अप्सरायते दुर्मनायते एतेषु नित्यं सलोपो वक्तव्यः । नपुंसक इवाचरति क्यः क्विप्, उभयत्रात्मनेपदम् । एवं क्लीबायते क्लीबते, होडायते होडते । नपुंसकेऽप्सरारौ, क्लीबो नपुंसकः, होड लोप्तम् । पाणिनिः ३।१।११, वार्त्तिकञ्च ।

* अत्र आदिर्भृशस्य तत्वात् । च्व्यर्थो अभूततद्भावः तस्मिन् । तश्च सश्च तौ तयोर्लोपः त-स-लोपः । ञ-क्वौ तस्मिन् इति ञे क्वौ च परे त-स-लोपौ नित्यं इत्यर्थः । अभृशो भृशो भवति ञः भृशायते, क्विः भृशति, पक्षे (४२५) च्विः भृशीभवति । एवम् अचेतश्चेतो भवति चेतायते ञः, सलोपः, (५९०) दीर्घः । क्विः चेतति, पक्षे चेतीभवति । अत्र (४९८) सलोपः । अग्रमत् ग्रमत् भवति ञ-क्वौ, ग्रमायते ग्रमति, उभयत्र तलोपः, पक्षे ग्रमद्भवति । एवम् अवेहत् वेहत् भवति वेहायते वेहति वेहद्भवति (वेहत् गर्भोपघातिनी गौः) । भृशादिश्च—भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् वेहत् ग्रमत् उन्मनस् सुमनस् दुर्मनस् अभिमनस् ओजस् तेजस् रजस् सुरजस् वर्चस् डाह्मण्डवान्, लोहित वर्ण हरित नील नम्र फेन मद्र भद्र वर्षन् निद्रा कृपा करुणा इति वार्त्तिकम् । अत्र निद्रादिशब्दो धर्म्मवचनोऽपि अभूततद्भावात् धर्म्मिवचन एव, तेन निद्रावति जनः अनिद्रावान् निद्रावान् भवतीत्यर्थः । पाणिनिः ३।१।१२ ।

† यद्यपि (५०१) सम्प्रति ऊर्ध्वेषु परेषु डाच् विहित-स्तथापि अत्र डाजन्तात् क्विविधानसामर्थ्यात् ञ-क्वि-विषयेऽपि डाच् स्यादिति मन्तव्यम् । पचेति पचादिषु [illegible] प्रातिपदिकत्वेऽपि स्यादिति सूचितम् । अपटत् पटत् स्यात् इति [illegible] द्वित्वादौ पटपटा इति डाजन्तात् ञः आत्मनेपदं परस्मैपदञ्च; क्विः पटपटाति, [illegible]

## ८५१ । शब्दसुखकष्टादेः कृतिवेदपापे क्यः ।

(शब्द-सुख-कष्टादेः ५।, कृति-वेद-पापे ७।, क्यः १)।

शब्दादेः कृतौ सुखादेरनुभवे कष्टादेः पापार्थे प्रवृत्तिरित्यर्थे क्यः स्यात् । शब्दं करोति शब्दायते, वैरायते । सुखमनुभवति सुखायते, दुःखायते । कष्टं पापं करोति कष्टायते । *

## ८५२ । वाष्पोष्मफेनधूमादुद्वान्तौ ।

(वाष्प—धूमात् ५।, उद्वान्तौ ७)।

वाष्पायते उष्मायते फेनायते धूमायते । †

---

पक्षे च्विः । एवम् अलोहितो लोहितो भवति, अवर्मा वर्मा भवति । लोहितादिश्च— भृशादिश्चैव लोहितादयो ज्ञेयाः । पाणिनिः ३।१।१२, १।१।६० । अत्र प्रथमोक्त-पाणिनि-सूत्रे भाष्यकृता यत् वार्त्तिकमुल्लिखितं तत्र चादिशब्दो नास्ति, यथा "लोहितडाज्भ्यः क्यष्वचनम् ।" तदर्थेव तत्रैव लिखितः, यथा "लोहितडाज्भ्यः क्यष् वक्तव्यः । लोहितायति लोहितायते । पटपटायति पटपटायते ।......यान्यन्यानि लोहितादीनि । भृशादिष्वितराणि ।* भृशादिष्वितराणि पठितव्यानि । किं प्रयोजनम् । ङित इति नित्यमात्मनेपदं यथा स्यात् ।"— एतावता भाष्यकारेण इदमेवाभिप्रेतं यत्, केवललोहितप्रातिपदिकस्यैव विकल्पेनात्मनेपदित्वम्, आदिपदबोध्यानामन्येषान्तु नित्यमात्मनेपदित्वम् । वामन-भट्टोजिदीक्षित-प्रभृतीनामपि तदेव मतम् । बोपदेवेन तु सर्ववर्माचार्य-पद्मनाभदत्त-क्रमदीश्वरादीनां मतमवलम्ब्य लोहितादि-गणान्तर्गतानां सर्वेषामेव प्रातिपदिकानां विकल्पेनात्मनेपदित्वं लिखितम् । सम्प्रत्यस्तु काशिकायाम् भृशादिगणे लोहितादिगणे पेत्युभयत्र दृश्यते इति सुधीभिर्विभावनीयम् ।

* शब्दस्य सुखस्य कष्टस्य यत् आदिर्गणः तस्मात् । कृतिश्च वेदश्च पापञ्च तस्मिन् । वेद इति विद ज्ञाने इत्यस्य घञि रूपम् । पापार्थे पापजनक-कर्मणि । कष्टं कर्म करोति कष्टजनक-कर्म कर्तुं प्रवर्त्तते इत्यर्थः । शब्दादिः—शब्द वैर प्रतीपाद कलहनीहार-दुर्दिनाः, कलहः सुदिनं मेघः कोटा अट्टा पटा तथा, सीका सोटा च पोटा च श्रुत कल्पादि-रीरितः । सुखादिश्च—सुखं दुःखञ्च तृप्तञ्च कृपणः करुणस्तथा, प्रतीपालीकसोढाञ्च-कृच्छ्रा-स्रायाः सुखादयः । कष्टादिश्च—कष्टञ्च सत्री गहनञ्च कक्षः कृच्छ्रञ्च कष्टादिषु पञ्च सन्ताः । पाणिनिः ३।१।१४,१७,१८ ।

† एभ्यो क्यः स्यादुद्वान्तौ उद्गिरणार्थे इत्यर्थः । पाणिनिः ३।१।१६, वार्त्तिकञ्च ।

८५३ । रोमन्थाद्वर्त्ये । (रोमन्थात् ५।, वर्त्ये ७)।

रोमन्थायते गौः । *

८५४ । नमस्तपोवरिवःकण्ड्वादिभ्यः क्यः कृतौ ।

(नमस्—कण्ड्वादिभ्यः ५॥, क्यः १।, कृतौ ७)।

नमस्करोति नमस्यति, तपस्यति, वरिवस्यति, कण्डूयति कण्डूयते, चिचीयते, मह्रीयते, हृणीयते । †

८५५ । लेः कृत्याख्याने ञिः ।

(लेः ५।, कृति-आख्याने ७।, ञिः १)।

लेः परो ञिः स्यात् कृतावाख्याने च । प्रश्नं करोति आचष्टे वा प्रश्नयति, जडयति औडिढत् । औजिढदित्येके । (४६८) लुक् महद्दिनामिति । ईप्सन्तमाचष्टे ईप्सयति । स्रुग्वन्तमाचष्टे स्रुचयति । स्रग्विनमाचष्टे स्रजयति । ‡

---

* पूर्व्वस्मादुदात्तो प्रत्ययस्याप्यनुवर्त्तनम् बोध्यं, तेन उद्गीर्य्य-चर्व्वणे अर्थे रोमन्थात् क्यः स्यादित्यर्थः । रोमन्थायते उद्गीर्य्य चर्व्वयतीत्यर्थः । पाणिनिः ३।१।१५ ।

† नमस् च तपस् च वरिवस् च कण्ड्वादिश्च तेभ्यः । एभ्यः क्यः स्यात् कृतौ अर्थे । वरिवस्शब्देन सेवा उच्यते । कण्ड्वादिगणमध्ये कण्डू-शब्दस्य आनुबन्धेन, चिची मही हृणी शब्दानां ङानुबन्धेन च, (क्यप्रत्ययेऽपि) यथासम्भवम् उभयपदम् आत्मनेपदञ्च । कण्ड्वादिश—कण्डूञ् चिचीङ् महीङ् हृणीङ् असु मन्तु वल्गु लोट तिरस् उरस् नमस् पयस् उषस् कुषुभ मगध मेधा सुख दुःख सुरण भुरण वरण दूवण चवर सपर वरण भिषज् अहवह एला वेला सेला शीखा रेखा पम्पस प्रभृतिः । आकृतिगणोऽयम् । पाणिनिः ३।१।१४,१८,२७ ।

‡ अनुक्तावपि कृताविति कथनं स्पष्टार्थम् । लेरिति कथनात् दाधकार्थ्यं न सार्वत्रिकम्, तेन लभयतीत्यादौ न (२११) वृद्धिः । ञ इत् (२१८) सुखमासार्थम् । प्रश्नयति[illegible] अन्यपि (४६७) ञित्वात् (१२६) टिलोपे प्रकि इति (६२१) धातुसंज्ञा । जडधातोः लेः जडिः,

८५६। श्वेताश्वाश्वतरगालोड़िताह्वरकस्याश्वतरेतक-लोपः। (श्वेताश्व—आह्वरकस्य ६।, अश्व—क-लोपः १।)।

श्वेताश्वमाचष्टे श्वेतयति, अश्वयति, गालोड़यति, आह्वरयति। *

८५७। नाप् सत्यार्थवेदेकाजतः।

(नाप् ।१।, सत्यार्थवेदेकाजतः ६।)।

सत्यादे रेकाचोऽकारान्तस्य च ञौ नाप् स्यात्, न इत्। सत्यापयति अर्थापयति वेदापयति स्नापयति। (४७०)वाढ़ान्तिकेति साधादयः, साधयति। प्रशस्यमाचष्टे श्रापयति। †

---

जडिमाचष्टे इति जडि-शब्दात् ञिः, ञित्वात् टिलोपे जडिधातुः। जडिमाख्यातवान् अजि-टी-दि, अमागमः, (५८१) पुनरमागमः, (६१२) अङ्, (७१८) उकारं हित्वा डि इत्यस्य द्वित्वादि, (६४१) ओर्लोपे अजीजडत्। एवं श्वामण्यादयः। ईश्वन्तमिति ईश्वधातोः क्विप्, ईट्, ततः ईट् विद्यते यस्य इति (४४१) मतुः, (१५४) मस्य व, (१५५) वस्य च, (६७) उस्य ट, (५८) टस्य च, ईश्वान्। अनेन ञिः, मतुलुक्, या यस्य ञिकस्य पूर्वा प्रकृतिः सा तथैव आयात् पुनरासन्न-प्र-स्थितिः, ईशि धातुः। एवं मुग्धनं उक्तिनम् आचष्टे, मतु-विनीर्लुक्, पूर्वावयवस्थितिः। (४६८) सृङ् अवविनामिति बहुवचनेन अनट् ञवतु अन् अद् आनस्लुलोप्—एषां लुक् वक्तव्यः, तेन गमनमाचष्टे गमयति, गतवन्तमाचष्टे गमयति, पच्यमाचष्टे पचयति, यथमाचष्टे यातयति, प्रज्ञापोमाचष्टे प्रज्ञयति इत्यादि। एवं कर्तारमाचष्टे कारयति (४६८)। "तत् करोति तदाचष्टे।" वार्त्तिकवचनम्।

* श्वेताश्वस्य अश्वतरस्य गालोड़ितस्य आह्वरकस्य तत् तस्य। अश्वस्य तरस्य इतस्य कस्य तेषां लोपः। एषां श्वेताश्वादीनामंशानां लोपः कादिस्यर्थः। अश्वतरमाचष्टे, गालोड़ितमाचष्टे, आह्वरकमाचष्टे। (उन्मादमोहेन रोमाञ्चे मूर्छे गालोड़ितो मतः। आह्वरकमहङ्कारम्।) आख्यम्। संक्षिप्तसारे तु तिङन्तपादे ४२० सूत्रस्य टीकायां "श्वेताश्वमाचष्टे श्वेतयति श्वैताश्वयति, अश्वतरम् अश्वयति अश्वतरयति, गालोड़ितमाचष्टे गालोड़यति गालोड़ितयति, आह्वरकम् आह्वरयति आह्वरकयति" इति लिखितम्।

† एकाचावो अत् येषां ते एकाजतः, तस्य अर्थस्य वेदस्य एकाजतश्च तत् तथा। सत्यमाचष्टे, अर्थमाचष्टे, वेदमाचष्टे, स्नमाचष्टे इति वाक्यानि। बाढ़माचष्टे साधयति।

८५८। णिः कल्यादेः। (णिः १।, कल्यादेः ५।)।

कल्यादेरर्थविशेषे णिः स्यात्। कलिं गृह्णाति कलयति, अचकलत्। हलयति, अजहलत्। व्रतयति, अवीव्रतत् अवव्रतत्। वर्णयति, त्वचयति। तूस्तानि विहन्ति वितूस्तयति। वस्त्रं संछादयति संवस्त्रयति।*

वर्म्मणा संनह्यति संवर्म्मयति। चूर्णैरवध्वंसते अवचूर्णयति। हस्तिना अतिक्रामति अतिहस्तयति। वीणया उपगायति उपवीणयति। तूलैरवकुष्णाति अवतूलयति। श्लोकैरुपस्तौति उपश्लोकयति। सेनया अभिमुखं याति अभिषेणयति। अभिषिषेणयिषति। रूपं पश्यति रूपयति। लोमान्यनुमार्ष्टि अनुलोमयति। हस्तौ निरस्यति अतिहस्तयति।

---

एवम् अन्तिकमाचष्टे नेदयति, स्थूलमाचष्टे स्थवयति, दूरमाचष्टे दवयति (संक्षिप्तसारे तु "दूराद्य" इति सूत्रं दृश्यते, दूरयति दवयति। दूरयत्यवनते विवस्वतीति कालिदासः—इति उदाहरणञ्च दर्शितम्), युवानं यवयति, (४७४) कन्-आदेशे कनयति, क्षिप्रं क्षेपयति, क्षुद्रं क्षोदयति, प्रियं प्रापयति, स्थिरं स्थापयति, स्फिरं स्फापयति, उरुं वरयति, गुरुं गरयति, बहुलं बंहयति, तृप्रं त्रपयति, दीर्घं द्राघयति, ह्रस्वं ह्रसयति, वृद्धं वर्षयति, (४७२) ज्य-आदेशे ज्यापयति, वृन्दारकं वृन्दयति। वक्तारं (४६८) टिलोपे वाचयति। (४७१) प्रशस्यस्य श्र-आदेशे श्रापयति, (४७२) ज्यापयतीति च। (४७३) पृथुं प्रथयति, मृदुं म्रदयति, कृशं क्रशयति, भृशं भ्रशयति, दृढं द्रढयति, परिवृढं परिव्रढयति। (४७४) अल्पं कनयति अल्पयति, बहु आचष्टे भावयति, बहोर्भूरिति वक्तव्यम्। वार्त्तिकम्।

* कलिरादिर्यस्य स कल्यादिस्तस्मात्। कलि-हली कामधेनु-सम्मतावेवाकारान्ताविति प्राञ्चः। व्रती चाकारान्ते च (८५५) पूर्व्वेण णिविधानात् अत्र अर्थविशेषे आदिग्रहणम्। अर्थश्च स्वयं विज्ञेयोऽति, कलिं गृह्णातीत्यादि। कलिशब्दात् णिः, (४६०) णित्, टिलोपः, कलि इति धातुः। अचकलदिति (६१८) कलि-हलि-वर्जनात् न सन्वद्भावः। एवं हलिं गृह्णाति, व्रतं गृह्णाति। अवीव्रतदिति (६१८) विकल्पेन सन्वद्भावः। वर्णं (वर्णग्रहणं) गृह्णाति, त्वचं गृह्णाति। वितूस्तयति, तूस्तरहितं करोतीत्यर्थः। (तूस्तं रेणौ च पापे च जटायाञ्च गलुग्रहणमिति मेदिनी।) संवस्त्रयति परिदधातीत्यर्थः। पाणिनिः ३।१।२५, वार्त्तिकञ्च।

पुच्छमुत्क्षिपति उत्पुच्छयते । आण्डानि संचिनोति संभाण्डयते । चीवरं संमार्जयति परिदधाति वा सञ्चीवरयते भिक्षुः । *

**८५८ । ञिधोर्यथेष्टं द्विः, कण्ड्वाद्यजाद्योस्तु तृतीयानाद्योः ।**

(ञिधोः ६।, यथेष्टं २।, द्विः १।, कण्ड्वादि-अजाद्योः ६॥, तु ।१।, तृतीयानाद्योः ६॥) ।

पुपुच्छीयियिषति पुतिच्छीयिषति पुत्रीयियिषति, पुत्रीयियिषति, पुपुतित्रीयियियिषति । कण्डूयियिषति, अशिश्वीयिषति । †

इति ञिधु-पादः ।

३य-चतुर्गणाध्यायः ।

---

* वर्मणा कवचेन संनह्यति बध्नातीत्यर्थः । "संनह्यते" इति क्रमदीश्वरः । चूर्णैश्चूर्णद्रव्यैः अवध्वंसते अवकिरतीत्यर्थः, नाशयतीति कश्चित् । हस्तिना इत्युपलक्षणम्, अश्वेन अतिक्रामति अत्यश्वयतीत्यपि स्यात् । तूस्तैः परिमापकदण्डैरवकुष्णाति परिमातीत्यर्थः । अभिषेणयतीति (५७२) सेना इति णत्वे, (१०७) षत्वम् । अभिषेणयितुमिच्छति इति वाक्ये सेनिधातोः सन् (५५७) इम्, ञित्वादौ, दन्त्यस्यादेरिति षिचस्य षत्वम् । ["रूपं पश्यति निरूपयति" इति, "हस्तौ निरस्यति अतिहस्तयते" इति, "चीवरं समर्जयति (वसते)" इति तु क्रमदीश्वरः ।] भाण्डानि मूलधनानि संचिनोति संचितानि करोतीत्यर्थः । (भाण्डं पात्रे वणिङ्मूलधने भूषाश्वभूषयोरिति मेदिनी ।) अत्र संवर्मयतीत्यादिषु समस्तोदाहरणेषु करणकारकेभ्य एव ञिः, अतएवैते सकर्मकाः प्रयोगाः, अन्येषु कर्मकारकेभ्यः, तेन प्रायशः अकर्मका इति । एषूदाहरणेषु पुच्छभाण्डचीवरेभ्यः आत्मनेपदम्, अन्येभ्यः परस्मैपदं प्राचीनसम्मतम् । पाणिनिः ३।१।२५,२० ।

† आदौ ञिः पश्चात् धुः ञिधुः नामधातुरिति यावत्, तदन्तगतिस्य यथेष्टं (क्रिया-विशेषणम्) । कण्ड्वादिर्यस्य स कण्ड्वादिः, अच् आदिर्यस्य सः अजादिः । कण्ड्वादिश्च अजादिश्च तयोः । तृतीयश्च अनादिश्च तयोः । यथेष्टमिति क्रमेण युगपद्वा इत्यर्थः, तथाच कदाचित् प्रथमवर्णस्य, कदाचित् द्वितीयादेः, कदाचित् सर्वेषां युगपत्, कण्ड्वादितृतीयवर्णेन, अजादेश्च आदिवर्णं विना द्वितीयस्य तृतीयादेर्वा द्वित्वं इत्यर्थः । पुत्रमिवाचरति पुत्रीयति इति वाक्ये (८४०) क्यः पुत्रीय-धातुः, ततः पुत्रीयितुमिच्छति सन् (५५७) इम्, पु त्री यि ष इत्यत्र पुत्रादीनां क्रमेण युगपच्च द्वित्वम् । कण्डूं करोतीति वाक्ये (८५०) यक्, ततः कण्डूयितुमिच्छति सन्, इम्, कण्डूयिष इत्यत्र तृतीयवर्णस्य यि इत्यस्य द्वित्वम् । अश्वमिवाचरति अश्वीयति (८४०) क्यः, अश्वीयितुमिच्छतीति सन्, अश्वीयिष इति श्वी-द्वितीयस्य द्वित्वम् । कश्चित् तत्र द्वित्वे अश्वीयियिषति, इदं न चतुर्थस्यापि । ज्ञानिनामानि ।

१म पादः—पं ।

८६० । घे पं परानु-क्ष—प्रत्यभ्यति-क्षिप—प्र-वह—परि-मृष—व्यापरि-रमो वा तूप-रमः ।

(घे ७।, पं १।, परा-अनु-क्ष, प्रति-अभि-अति-क्षिप, प्र-वह, परि-मृष, वि-आ-परि-रमः ५।, वा ।१।, तु ।१।, उप-रमः ५।) ।

एभ्यः पं स्यात् घे, उप-रमस्तु वा । पराकरोति अनुकरोति, प्रतिक्षिपति, प्रवहति, परिमृष्यति, विरमति आरमति परिरमति, उपरमति उपरमते विष्णुः । *

८६१ । कम्यान्नार्थेङ्बुधयुधप्रुद्रुस्रुजननशोऽज्ञिप्राणिचाढ़ाञ्च ञेः ।

(कम्प—नशः ५।, अज्ञि-प्राणिचाढ़ात् ५।, च ।१।, ञेः ५।) ।

चलयति भोजयति, अध्यापयति बोधयति योधयति प्रावयति द्रावयति स्रावयति जनयति नाशयति, शाययति …

* परानुभ्यां क्षः परानुक्षः, प्रत्यभ्यतिभ्यः क्षिपः प्रत्यभ्यतिक्षिपः, प्राद्वहः प्रवहः, परेर्मृषः परिमृषः, व्यापरिभ्यो रम व्यापरिरम । ततः, परानुक्षश्च प्रत्यभ्यतिक्षिपश्च प्रवहश्च परिमृषश्च व्यापरिरम चेति तस्मात् । अनेन नियमेन क्ष क्षिप वह मृष प्रति धातुभ्यो विरुद्धेऽपि चात्मने-पदं न स्यात् । वेदेवि (२८६) विहितो विहिता वेपाजग्यादीनामित्र न कर्तृभिप्राये फलवत्यपि आत्मने पदं स्यात् । विष्णुः उपरमति उपरमते ओपूर्वतीत्यर्थः । पाणिनिः १।३।७९—८५ ।

यशोदा । अप्राणिचात् किं, शोषयते व्रीहिं । अडात् किं, भक्तिं कारयते । अणौ किं, क्षपयते हरिः । *

इति प-पादः ।

---

२य पादः—मं ।

---

८६२ । वि-परा-जि—परि-व्यव-क्री—नि-विशानुप्रच्छो मं । (वि—प्रच्छ: ५।, मं १।) ।

एभ्यो मं स्यात् वै । विजयते पराजयते, परिक्रीणीते, निविशते, आनुते आपृच्छते । *

---

* चलनम्, अदनं भोजनं, ते अर्थौ येषां ते चलनाद्यर्थाः, ते च इङ् च बुधश्च युधश्च प्रुश्च द्रुश्च स्रुश्च जनश्च नशश्च तस्मात् । प्राणी चो यस्य स प्राणिचः, नास्ति डं यस्य सोऽडः, प्राणिचश्चासौ अडश्चेति प्राणिचाडः, अणौ प्राणिचाडः अणिप्राणिचाडस्तस्मात् । एभ्यो ण्यन्तेभ्यः पं स्यात् वै, एतेन फलवत्कर्त्तर्यपि आत्मनेपदं न स्यादिति बोध्यम् । चलयति कम्पयतीति च घटादित्वात् ह्रस्वः । आदयति अन्नमिति, अन्नः अत्ति इति प्राणिकर्तृकोऽकर्मकः, ततो ण्यन्तात् परस्मैपदं ; व्रीहिः शुष्यतीति अप्राणिकर्तृकोऽकर्मकः, तेन ण्यन्तात् परस्मैपदनियमाभावे उभयपदम् । क्षपयते इति क्षपत् च तत्क्षती निपातनात्, सुतराम् अण्यन्तावस्थाया-मसत्त्वात् नैतन्नियमप्रसङ्गः, अतएव प्रेरणण्यन्ते उभयपदमेव । पाणिनिः १।३।८६,८७,८८ ।

---

* वि-पराभ्यां जिः, परि-व्यवेभ्यः क्रीः, नेर्विशः, आङो नु-प्रच्छौ । ततः विपराजिश्च परिव्यवक्रीश्च निविशश्च आङ्नुप्रच्छौ चेति तस्मात् । वै इति पूर्वादनुवर्त्तते । नु क्री च न फल-विपर्यये इत्यादि आत्मनेपदाभावात्मनेपद-विधानम् अफलवत्कर्तर्यपि आत्मनेपदप्राप्त्यर्थम् । एवं सर्वत्र । नि-विश इत्यनेन प्रविविशतीत्यादौ न मं स्यात् । अनुपसर्गे तु भविष्यत्, यथा, नयानुद्भासनवपुर्विचरतीति वार्त्तिकमतम् । "दधुषा शैशिरी भयुरत्रे निविशते अप्रविशत्येव तु वनानि विशतीति पाठम्" इति सिद्धान्तकौमुदी । पाणिनिः १।३।१७,१८,१९, वार्त्तिकञ्च ।

## ८६३। आ-दाञो ऽस्यप्रसारे।

(आ-दाञः ५।, अस्यप्रसारे ७।)।

आदत्ते। आस्यप्रसारे तु, व्याददाति मुखं व्याघ्रः। *

## ८६४। आ-गमेः क्षान्तौ। (आ-गमेः ५।, क्षान्तौ ७)।

आगमयते कालं। †

## ८६५। पर्य्यन्ववाङः क्रीडः।

(परि-अनु-अव-आङः ५।, क्रीडः ५।)।

परिक्रीडते अनुक्रीडते अवक्रीडते आक्रीडते। ‡

## ८६६। समो ऽकूजने। (समः ५।, अकूजने ७)।

संक्रीडते। कूजने तु, संक्रीडति चक्रं। §

## ८६७। क्रो ऽपाद्धर्षोऽभवासेच्छे चतुष्पाद्वौ

## तुम् च। (क्रः ५।, अपात् ५।, हर्षाभवासेच्छे ७।, चतुष्पाद्वौ ७।, तुम।१।, च।१।)।

---

* आस्यम् आननं, तस्य प्रसारो विस्तारणं आस्यप्रसारः, नञ्योगे तद्भिन्नम्। आङ्पूर्व्वात् दाञो तं स्यात् पे, न तु आस्यप्रसारे। आदत्ते गृह्णाति, व्याददाति विस्तारयतीत्यर्थः। पाणिनिः १।३।२०। अत्र पाणिनिसूत्रे "अनास्यविहरणे" इत्युक्तम्। "अनास्येति किं, मुखं व्याददाति। आस्यग्रहणमविवक्षितम्। विपादिकां व्याददाति। पादस्फोटो विपादिका। नदी कूलं व्याददाति।" इति सिद्धान्तकौमुदी। "अकर्त्रभिप्रायार्थमिदं, तेन व्यादत्ते पिपीलिकाः पतङ्गमुखमिति प्रयोगः आस्यविहरणेऽपि सिद्धः।" इति तत्त्वबोधिनी।

† णिजन्तोऽयम्, क्षान्तिः प्रतीक्षणम्। आङ्पूर्व्वात् गमयतेस्तं स्यात् पे क्षान्तौ (प्रतीक्षायाम्)। आगमयते कालं प्रतीक्षते इत्यर्थः। आगमयतादौ अर्थे परस्मैपदमेव। वार्त्तिकम्।

‡ परिश्च अनुश्च अवश्च आङ् च तस्मात्। एभ्यः क्रीडतेस्तं स्यात् पे। समर्थेभ्यः एव एभ्यो न स्यादिति वक्तव्यं, तेन माणवकमनु क्रीडति। पाणिनिः १।३।२१। अयोगे न स्यात्।

§ संपूर्व्वात् क्रीडतेस्तं स्यात् पे, न तु कूजने। कूजनं-अव्यक्तशब्दः। वार्त्तिकम्।

अपस्किरते मत्तो वृषभः कुक्कुटः श्वा वा। अन्यत्र मत्तोऽपकिरति, मत्तोऽपकिरत्यश्वः। *

८६८। शपथाशीर्गत्यनुकारे शप-नाथ-ह्रुञः।

(शपथ-आशी-गत्यनुकारे ७, शप-नाथ-ह्रुञः ५।)।

कृष्णाय शपते गोपी। मोक्षाय नाथते मुनिः। पैतृकमनुहरते अश्वः। †

८६९। प्रतिज्ञा-निर्णय-प्रकाशे संप्रव्यवाच्च स्थः।

(प्रतिज्ञा-निर्णय-प्रकाशे ७, सं-प्र-वि-अवात् ५।, च ।१।, स्थः ५।)।

---

* अन्नञ्च वासश्च तौ, तयोरिच्छा अन्नवासेच्छा, हर्षश्च अन्नवासेच्छा च ते विद्येते यस्य स हर्षान्नवासेच्छावान् तस्मिन्। चतुष्पाच्च विश्च तयोरस्मिन्। चतुष्पात् पशुः, विः पक्षी। हर्षवति, अन्नेच्छावति, वासेच्छावति वा, चतुष्पदि पक्षिणि वा कर्त्तरि सति अपात् किरतेर्मं स्यात्, तस्य सुम् चेत्यर्थः। अपस्किरते, मत्तो हृष्टः वृषभः, कुक्कुटः भक्षार्थी भूमिमालिखति, श्वा वा वासार्थी भूमिमालिखतीत्यर्थः। अत्र कृधातुरालिखनार्थे एव बोध्यः। चतुष्पादि किं, मत्तोऽपकिरति पुरुषो भूमिमालिखति। हर्षान्नवासेच्छे इति किं, गजः अश्वो अत्रं अपकिरति ऊर्द्ध्वं क्षिपतीत्यर्थः। अत्र तुल्ययोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिरिति न्यायेन आत्मनेपदाभावपक्षे सुमपि न स्यादिति। "अत्र हर्षे सत्यपि आलेखना- भावात् सुटोऽप्राप्तिः।" तत्त्वबोधिनी। पाणिनिः ६।१।१४२। "किरतेर्हर्षजीविकाकुलाय- करणेषु वाच्यम्" इति वार्त्तिके हर्षादयस्त्रयो विषयाः उक्ताः, तत्र हर्षो विक्षेपस्य कारणम् इतरे फले। इति सिद्धान्तकौमुदी।

† शपो आक्रोशे वर्त्तमानात् शपथे, नाथृ च याच्ञोपतापैश्वर्याशीःषु इत्यस्मात् आशिषि, हृञ हरणे इत्यस्मात् गत्यनुकारे, मं स्यात् वै। शपथः पुत्रादिशरीरस्पर्शादिना मिथ्यानिरसनम्, आशीः इष्टार्थाविष्करणं, गत्यनुकारो गतिसदृशीकरणम्। गोपी कृष्णाय शपते, कृष्णपितृ- शरीरं स्पृष्ट्वा मयैतन्न कृतमिति दिव्येन कृष्णं तोषयितुमिच्छतीत्यर्थः। शपथादन्यत्र नियमाभावा- दुभयपदमेव। मुनिर्मोक्षाय नाथते मोक्षो मे भूयादित्याशास्ते इत्यर्थः। उभयत्र (२९४) चतुर्थी। नाथधातोः आत्मनेपदित्वेऽपि आशिषोऽन्यत्र परस्मैपदमेव। अश्वः पैतृकं पितृ- सम्बन्धिनं गमनमपि यावत् अनुहरते अनुकरोति पितृवत् गच्छतीत्यर्थः। गतिग्रहणात् रूपाद्यनुकारे न स्यादिति। "शप उपालम्भे," "आशिषि नाथः," "हरतेर्गतताच्छील्ये" इति वार्त्तिकत्रयम्।

नित्यं शब्दमातिष्ठते। त्वयि तिष्ठते विवादः। रामाय तिष्ठते सीता। सन्तिष्ठते प्रतिष्ठते वितिष्ठते अवतिष्ठते समवस्थित।*

८७०। उदोऽनूर्द्ध्वेहे। (उदः ५।, अनूर्द्ध्वेहे ७।)।

मुक्तावुत्तिष्ठते। अन्यत्र आसनादुत्तिष्ठति, ग्रामाच्छतमुत्तिष्ठति।†

८७१। मन्त्रेणोपात्। (मन्त्रेण ३।, उपात् ५।)।

गायत्र्या उपतिष्ठते अर्कं।‡

८७२। मैत्र्यध्वसङ्गाराधे। (मैत्री-अध्व-सङ्ग-आराधे ७।)।

सन्तमुपतिष्ठते साधुः। गङ्गामुपतिष्ठते पन्थाः। पतिमुप-

---

* प्रतिज्ञादावर्थे तिष्ठतेर्मं स्यात्, सं-प्र-वि-अवेभ्यो यस्मिन् कस्मिन्नप्यर्थे मं स्यात् चे, चकारात् अर्थद्वयम्। प्रतिज्ञा अङ्गीकारः, निर्णयो निश्चयः, प्रकाशः स्वाभिप्रायप्रकटनम्। नित्यं शब्दमातिष्ठते, नित्यमिति शब्दस्य विशेषणं, शब्दो नित्य इति प्रतिज्ञां करोतीत्यर्थः, मीमांसक इति शेषः। त्वयि विवादस्तिष्ठती इति निर्णयः। सीता रामाय तिष्ठते स्वाभिप्रायं प्रकाशयतीत्यर्थः; (२९४) चतुर्थी। समवस्थित इति (७२६) ङिः। पाणिनिः १।३।२२,२३, वार्त्तिकञ्च।

† न ऊर्द्धम् अनूर्द्धम्, अनूर्द्धे ईहा (चेष्टा) [इच्छापूर्व्विका चेष्टा ईहा इति तत्त्वबोधिनी] यस्य सः अनूर्द्धेहस्तस्मिन्, अनूर्द्धेहे इति कर्तुर्विशेषणम्। उत्पूर्व्वात् स्थाधातोर्मं स्यात् अनूर्द्ध-विषये चेष्टमाने कर्त्तरि। मुक्तौ उत्तिष्ठते मुक्तिविषये चेष्टते इत्यर्थः। आसनादुत्तिष्ठतीति कर्त्तुरूर्द्धचेष्टत्वान्न मं। ग्रामात् शतमुत्तिष्ठतीति शतमुत्पद्यते इत्यर्थः, शतस्य कर्तुरिच्छा-पूर्व्विकायाश्चेष्टाया अभावान्न मं। पाणिनिः १।३।२४।

‡ मन्त्रकरणे धात्वर्थे मन्त्रकरणिकया स्तुत्या इत्यर्थः उपात् स्थो मं स्यात् चे। गायत्र्या मन्त्रेण अर्कं सूर्यम् उपास्ते इत्यर्थः। मन्त्रेण किं, युवतिर्यौवनेन भर्त्तारमुपतिष्ठति। कविः श्लोकैः राजानमुपतिष्ठति। "उपतिष्ठते इत्यस्य तु समीपावस्थानमेवार्थः। न च तत्र वह्न्यादिवन्मन्त्रस्य करणत्वं न सम्भवतीति वाच्यम्। उपस्थानसमये तत्रोपयोगाभावेऽपि तत्सत्त्वे स्तुत्याद्युपयोगादुपस्थानकरणत्वं मन्त्रस्य न विरुध्यते।" "आदित्यमुपतिष्ठते [illegible] [illegible] तदभिमुखतया तिष्ठतीत्यर्थ इत्याहुः।" इति तत्त्वबोधिनी। पाणिनिः १।३।२५।

तिष्ठते नारी। विष्णुमुपतिष्ठते वैष्णवः। *

८७३। लिप्सायां वा। (लिप्सायां ७, वा ।१।)।

भिक्षुर्धार्म्मिकमुपतिष्ठते उपतिष्ठति वा। †

८७४। अढात्। (अढात् ५।)।

ग्राममुपतिष्ठते। ‡

८७५। समो गमृच्छप्रच्छस्वृश्रुवेत्त्यर्त्तिदृशः।

(समः ५।, गम-ऋच्छ-प्रच्छ-स्वृ-श्रु-वेत्ति-अर्त्ति-दृश: ५।)।

सङ्गच्छते, समगत समगंस्त, सङ्गसीष्ट सङ्गंसीष्ट। समृच्छते, संपृच्छते, संस्वरते, संशृणुते, संविद्रते संविदते, समियृते, सम्पश्यते। अढात् किं गङ्गां सङ्गच्छति। §

---

* मित्रस्य भावो मैत्री, पथ्या पन्थाः, सङ्गः सङ्गमः, आराध आराधनम्। एष्वर्थेषु उपात् स्थो मं स्यात् ये। अध्वनि कर्त्तरि सतीति भावः। साधुः सन्तं साधुम् उपतिष्ठते मित्रं करोतीत्यर्थः। "गङ्गामुपतिष्ठते पन्थाः गङ्गां गच्छतीत्यर्थः। पथि कर्त्तरि किं, पन्थानमुपतिष्ठति। पतिमुपतिष्ठते पत्न्या सह सङ्गं करोतीत्यर्थः। विष्णुमुपतिष्ठते आराधयतीत्यर्थः। "उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्" इति वार्त्तिकम्।

† लब्धुमिच्छा लिप्सा। लिप्सार्थे उपात् स्थो मं स्याद्वा ये। धार्म्मिकमुपतिष्ठते उपतिष्ठति वा—धार्म्मिकात् (धनं) लब्धुमिच्छतीत्यर्थः। वार्त्तिकम्।

‡ उपात् अकर्म्मकात् स्थो मं स्यात् ये। विभाषाया-मध्यवर्त्तित्वान्नित्यम्। ग्राममुपतिष्ठते ग्रामम् उपस्थितं भवतीत्यर्थः। पाणिनिः १।३।२६।

§ गम च ऋच्छश्च प्रच्छश्च स्वृश्च श्रुश्च वेत्तिश्च अर्त्तिश्च दृश चेति तस्मात्। अढादित्यनुवर्त्तते। समः परेभ्यः अकर्म्मकेभ्य एभ्यो मं स्यात् ये। एते सकर्म्मका अपि विवक्षावशादकर्म्मकाः। समगतेति सम्-गम टी-तस्, सिः, (६५८) धेः सिलुक्, (६०६) गम्-लोपः, (५६२) दीर्घः। सिदृशाभावपक्षे (५०) मस्यानुस्वारः। एवं टी-सीष्ट। समृच्छते संपृच्छते तुदादित्वात् शः, (६६१) प्रच्छो गिः। संशृणुते (६२१) श्रुः शिव। संविद्रते इत्यादि अन्ते (५५६) अन्त-स्थाने अतं, (७२२) विकल्पेन रम्। समियृते इति अर्त्ति धातोः (७२६) शिमे, (७२६) वि-शिः, (५८३) ह्रस्वानि इव। अर्त्ति-ग्रहणेन औणादिकस्यापि, तेन समृच्छते इति च। पाणिनिः १।३।२९, [१।२।१३,७।१।७] वार्त्तिकश्च। अकर्म्मकावत्ति वार्त्तिकमिष्यते।

## ८७६। गेर्वास्योह्यो ठे च।

(गेः ५।, वा ।१।, अस्योहः ५।, ठे ७।, च ।१।)।

निरस्यते निरस्यति, समूहते समूहति।*

## ८७७। गेरूहः स्वो येऽणौ।

(गेः ५।, ऊहः ६।, स्वः १।, ये ७।, अणौ ७।)।

ब्रह्म समुह्यात्।†

## ८७८। आत्माङ्गठादठाच्चा-हनयमः।

(आत्माङ्गठात् ५।, अठात् ५।, च ।१।, आ-हन-यमः ५।)।

उर आहते, पादमायच्छते। आहते आयच्छते। अन्यत्र शत्रुमाहन्ति, परशिर आयच्छति।‡

## ८७९। हनः कित् सिः। (हनः ५।, कित् ।१।, सिः १।)।

---

* असु क्षेपे, ऊह वितर्के। गेः पराभ्यामाभ्यां मं स्याद्वा ठे; ठे कर्मणि विद्यमाने, चकारात् अकर्मणि च। महर्षिस्तु "अकर्मकादिति निवृत्तम्" इति लिखितवान्। उदाहरणञ्च दर्शितवान्—"वर्मं निरस्यति निरस्यते"। वार्त्तिकम्।

† गेः परस्य ऊहधातोः स्वः स्यादणौ ये परे। ब्रह्म वेदं परमेश्वरं वा समुह्यात् ब्रह्मविषये वितर्कं क्रियादित्यर्थः। पूर्व्वसूत्रेण आत्मनेपदविकल्पपक्षे ठौ-यात्, अत्र ह्रस्वः। पाणिनिः ७।४।२३॥

‡ आत्मनः अङ्गं ठं यस्य स आत्माङ्गठस्तस्मात्। नास्ति ठं यस्य सोऽठस्तस्मात्। हन च यम् च हनयम्, आङो हनयम् आहनयम् तस्मात्। अन्यत्र,अगत्या पै मं स्यादुक्तत्वे। स्वाङ्गकर्मकात् अकर्मकाच्च आङ्पूर्व्व-हनयमाभ्यां पै मं स्यात्। स्वाङ्गठादिति नोक्त्वा आत्माङ्गठादिति करणं, (२६५) पारिभाषिक-स्वाङ्ग-व्यावृत्त्यर्थम्, अतएव परशिर आयच्छतीत्यत्र नात्मनेपदम्। उरो वक्षः आहते ताड़यतीत्यर्थः, पादं चरणम् आयच्छते दीर्घं करोतीत्यर्थः। अकर्मकविवक्षायाम् आहते ताड़ितो भवति, आयच्छते दीर्घो भवतीत्यर्थः। "कथमाजघ्ने विषमविलोचनस्य वक्षः" इति भारविः, "आहस्व मा रघूत्तमम्" इति भट्टिः, "प्रमाद एवायमिति भागवृत्तिः।" इति सिद्धान्तकौमुदी। पाणिनिः १।३।२८, भाष्यञ्च।

हनः परः सिः 'कित्' आत् । आहत आवधिष्ट, आहसातां आवधिषातां । *

८८० । यमः सूचने वा तूद्वाहे ।

(यमः ५।, सूचने ७।, वा ।१।, तु ।१।, उद्वाहे ७।)।

आयत । रामः सीतामुपायत उपायंस्त । †

८८१ । व्युत्तपः । ‡ (व-उत्-तपः ५।)।

वितपते उत्तपते पाणिं जनः । ‡ आत्मात्कठादठाच्च किं, मणीं वितपत्यर्कः ।

८८२ । तपोठाद् यक् च रे ।

(तपोठात् ५।, यक् ।१।, च ।१।, रे ७।)।

तप्यते तपस्तापसः । रे किं, अतप्त । §

---

* आहत इति पूर्व्वेणात्मनेपदे, (९०८) वधादेश-विकल्पपक्षे अनेन सिः कित्त्वात् (९०६) अम्लोपः, ततः (५६२) सिलोपः । वधादेशपक्षे (५५४) इम् आवधिष्ट । एवं टो-आताम् । पाणिनिः १।२।१४,[२।४।४४] ।

† यमः परः सिः कित् आत् आत्मनेपदे सूचने अर्थे, विवाहार्थे तु वा । सूचनम् इङ्गितादिना विज्ञापनम् । "परेषु प्रच्छादयमानस्यावद्यस्य आविष्करणम्" इति काशिका । आयत इति आ-यम, पूर्व्वेणात्मनेपदे टो-तम्, सिः, अनेन सेः कित्त्वं, (९०६) अम्लोपः । उपायतेत्यादि (९०८) उपयम इति वचनात् पूर्व्वेणात्मनेपदे अनेन विकल्पेन सेः कित्त्वम् । पाणिनिः १।२।१५,१६ ।

‡ आभ्यां पराद् आत्मार्थकठादठाच्च तपो ये सं आत् । तत्कूलकर्ता वै सं स्वस्तुपसर्गे । जनः पाणिं हस्तम् उत्तप्तं करोतीत्यर्थः । एवं जनः उत्तप्तो भवतीति भावार्थे वितपते उत्तपते । "सुवर्णमुत्तपति । चैत्रो मैत्रस्य पाणिमुत्तपति" इति सिद्धान्तकौमुदी । पाणिनिः १।३।२७, आर्षं, वार्त्तिकञ्च ।

§ तपः ठं (कर्म्म) यस्य स तपोठस्तस्मात् । इदं विधानात् कुरिति आत्मपदमिति । तपोठादित्यनेन आत्मार्थकठादठावीति च निरस्तम् । तपःकर्म्मकात् तपो सं आत् ये रे यक् तु आदित्यर्थः । अप तप् तपो आपतः । तपस्यतो जनः कालेनातिमत्यर्थः । एवं

८८३ । सृजः श्राद्धयात् तनोत्व च ।

(सृजः ५।, श्राद्धयात् ५।, तनि ७, इक् ।१।, च ।१।) ।

सृज्यते स्रजं भक्तः। असर्जि। श्राद्धयात् किं, सृजति स्रजं मालिकः।*

८८४ । निसंव्युपह्वः । (नि-सं-वि-उप-ह्वः ५।) ।

निह्वयते संह्वयते विह्वयते उपह्वयते । †

८८५ । स्पर्द्धाया-माङः । (अर्द्धायां ७, आङः ५।) ।

कृष्णश्चाणूरमाह्वयते । ‡

८८६ । सूचनावक्षेपणसेवासाहसप्रतियत्न-कथोपयोगे कृञः । (सूचन—उपयोगे ७।, कृञः ५।) ।

अपकुरुते, श्येनो वर्त्तिकामुपकुरुते, विष्णुं प्रकुरुते, परदारान् प्रकुरुते, एधोदकस्योपस्कुरुते, गाथाः प्रकुरुते, शतं प्रकुरुते । §

---

तप्येत तप्यवान् अतप्यत। अतप्तेति टौ-तन्, निमित्तमतविशेषात् सिरेव, न तु यक्, चौरिकादेः, (५६१) सिलोपः। पाणिनिः ३।१।८७,८८।

* श्रद्धापूर्वक-भाषावोर्थः (११५०) श्रद्धा इति, श्रद्धा विद्यतेऽस्येति (४४६) प्रज्ञादित्वात् णः श्राद्धः, श्राद्धः णः यत्र सः श्राद्धयत्वात्। श्राद्धयात् सृजो मं स्यात् षे, तनि परे इक्, चकारात् ए परे यक् च स्यादित्यर्थः। भक्तः श्रद्धाविशिष्टो जनः स्रजं मालां सृज्यते रचयतीत्यर्थः। असर्जीति तन्, इक् सिचाधकः, (६४४) तन्लोपः। मालिको न श्राद्धवान्। वार्त्तिकद्वयम्।

† नि सम् वि उप एभ्यः परात् ह्वेञो मं स्यात् षे। अनिष्टत्वात् धनिचोर्नानुवृत्तिः। पाणिनिः १।३।३०।

‡ आङः परात् ह्वेञो मं स्यात् षे स्पर्द्धायां गम्यमानायाम्। स्पर्द्धा पराभिभवेच्छा। चाणूरं मल्लमाह्वयतेत्यर्थः। स्पर्द्धायां किं, पिता पुत्रमाह्वयति। पाणिनिः १।३।३१।

§ सूचनाद्यर्थेषु कृञो मं स्यात् षे। सूचनं—परदोषाविष्करणम्, अवक्षेपणं भर्त्सनं, सेवा—अनुवृत्तिः, साहसं—परदारादिगमनाद्याचरणं हिंसा-चौर्य-परदाराभिमर्शादि-

८८७। अधेः शक्तौ। (अधेः ५।, शक्तौ ७)।

दैत्यानधिकुरुते कृष्णः। *

८८८। अशब्दठाद्वेः। (अशब्दठात् ५।, वेः ५।)।

स्वरान् विकुरुते, वायुर्विकुरुते। अन्यत्र चित्तं विकरोति कामः। †

८८९। मानार्च्चोत्क्षेपोपनयनभृतिविगणनव्ययेषु नीञः। (मान—व्ययेषु ७।।।, नीञः ५।)।

शास्त्रे नयते, विष्णुं नयते, दण्डमुन्नयते, पुत्रमुपनयते, भृत्यमुपनयते, ऋणं विनयते, द्रव्यं विनयते। ‡

---

प्रतियत्नो—गुणान्तराधानं, कथा—आख्यानम्, उपयोगो—धर्म्मार्थं द्रव्यविनियोगः। अपकुरुते कस्यचित् दोषमाविष्करोतीत्यर्थः। श्येनो वर्त्तिकामुपकुरुते भर्त्सयतीत्यर्थः। वर्त्तिकाश्येनौ पक्षिविशेषौ। विष्णुं प्रकुरुते सेवते इत्यर्थः। परदारान् प्रकुरुते साहसात् तेषु प्रवर्त्तते इत्यर्थः। एधः काष्ठं तस्य उदकं रसः, एधोदकस्य काष्ठरसस्य उपस्कुरुते अग्निसंयोगेन गुणान्तराधानं करोतीत्यर्थः, प्रतियत्नार्थे (७६६) षष्ठी। गाथाः प्रकुरुते कथयतीत्यर्थः। शतं प्रकुरुते शत द्रव्याणि विनियुङ्क्ते इत्यर्थः। पाणिनिः १।३।३२। अत्र सूत्रे सूचनमित्यत्र गन्धनपदं प्रयुक्तं, तस्यार्थश्च प्राणनाशानुकूल सूचनम्। हिंसा इति भट्टोजिदीक्षितः।

* अधिपूर्व्वात् कृञः मं स्यात् चे शक्तौ। शक्तिरभिभवः। दैत्यानधिकुरुते कृष्णः अभिभवतीत्यर्थः। शक्तौ किं, अर्थमधिकरोति। पाणिनिः १।३।३३। अत्र प्रसहनं अत्राभिभवश्च इति सिद्धान्तकौमुदी।

† अशब्दो ठं यस्य सः अशब्दठः, नास्ति ठं यस्य सोऽठः, अशब्दश्च अठश्च तस्मात्। वेः परात् अशब्दकर्म्मकादकर्म्मकाच्च कृञः मं स्यात् चे। स्वरान् अशब्दान् विकुरुते विविधं करोतीत्यर्थः। वायुर्विकुरुते विकृतो भवतीत्यर्थः। पाणिनिः १।३।३४,३५।

‡ मानं प्रमेयनिश्चयः, अर्चा पूजा, उत्क्षेप उन्नयनम्, उपनयनं यज्ञोपवीतदानसंस्कारः, भृतिर्वेतनं, विगणनम् ऋणशोधः, व्ययो विनियोगः। एष्वर्थेषु नीञो मं स्यात् चे। शास्त्रे नयते प्रमेयनिश्चयं करोति, विष्णुं पूजयति, दण्डमुत्क्षिपति, पुत्रं यज्ञोपवीतदानेन संस्करोति, भृत्यमुपनयते भृत्याय वेतनं ददाति, ऋणं शोधयति, द्रव्यं विनियुङ्क्ते इत्यर्थः। पाणिनिः १।३।३६।

## ८९०। कर्त्तृस्थामूर्त्तढात्। (कर्त्तृस्थामूर्त्तढात् ५।)।

क्रोधं विनयते। कर्त्तृस्थं किं, गुरोः क्रोधं विनयति। अमूर्त्तं किं, गण्डं विनयति। *

## ८९१। वृत्त्युत्साहतायने क्रमः—परोपक्रमः।

(वृत्ति-उत्साह-तायने ७।, परा-उप-क्रमः ५।)।

शास्त्रे क्रमते बुद्धिः। धर्म्माय क्रमते साधुः। सतां श्रीः क्रमते। पराक्रमते उपक्रमते। †

## ८९२। आङो भोद्गमे। (आङः ५।, भोद्गमे ७।)।

आक्रमते अर्कः। भोद्गमे किं, आक्रामति धूमः, खं व्याप्नोतीत्यर्थः। ‡

## ८९३। वेः पद्भिः। (वेः ५।, पद्भिः ३॥)।

साधु विक्रमते वाजी। पद्भिः किं, वाजिना विक्रामति राजा। §

---

* थे कर्त्तरि तिष्ठतीति स्थं, कर्त्तृस्थम् अमूर्त्तं ढं यस्य स तस्मात्, णीञो मं स्यात् धे। क्रोधं विनयते शमयतीत्यर्थः, अत्र क्रोधः कर्त्तृस्थः। गण्डं व्रणम्। "विनयन्ति नयन्ति पौरुषमिति कर्त्तृगामित्वाविवक्षायां भविष्यति" इति सिद्धान्तकौमुदी। पाणिनिः १।३।३७।

† वृत्तिरप्रतिबन्धः, उत्साह उद्यमः, तायनं वृद्धिः (स्फीतता)। एष्वर्थेषु क्रमः परोपक्रमस्य च मं स्यात् धे। परोपग्रहणमन्योपसर्ग-निरासाय। शास्त्रे वर्द्धते बुद्धिः क्रमते अप्रतिहता भवति। धर्म्माय क्रमते उत्सहते। सतां श्रीर्वर्द्धते। पाणिनिः १।३।३८,३९।

‡ भान्तीति भानि (९९७) आदन्तात् चे कः। भानां चन्द्रसूर्य्यादीनामुद्गमे आङ्पूर्व्वात् क्रमो मं स्यात् धे। आक्रमते उद्गच्छतीत्यर्थः। पाणिनिः १।३।४०, वार्त्तिकञ्च।

§ वेः परात् क्रमो मं स्यात् धे पद्भिर्गत्यर्थे निष्पन्ने। वाजी घोटकः पद्भिर्गच्छति। पाणिनिः १।३।४१।

८९४। प्रोपादारम्भे। (प्र-उपात् ५।, आरम्भे ७)।

भोक्तुं प्रक्रमते उपक्रमते। *

८९५। वाऽनेः। (वा ।१।, अनेः ५।)।

क्रमते क्रामति। †

८९६। निह्नवे ज्ञः। (निह्नवे ७।, ज्ञः ५।)।

शतमपजानीते। ‡

८९७। अढात्। (अढात् ५।)।

सर्पिषो जानीते। §

८९८। संप्रतेरस्मृतौ। (सं-प्रतेः ५।, अस्मृतौ ७)।

संजानीते प्रतिजानीते। अस्मृतौ किं, पुत्रं संजानाति। ¶

८९९। ओर्ङेऽजौ घे। (ओः ५।, ङे ७, अजौ ७, घे ७)।

दर्शयते भवो भवान्। अजौ यत् ङं तद्वेत् घ इति किं—

---

* प्रोपाभ्यां परात् क्रमो ङं स्यात् वा आरम्भे। (८९१ सूत्रे) वृत्त्यादिषु अर्थेष्वेव उपक्रमोक्तः, अत्र तु आरम्भे इति भेदः। भोक्तुं प्रक्रमते आरभते इत्यर्थः। आरम्भे किं, प्रक्रामति गच्छतीत्यर्थः। पाणिनिः १।३।४२।

† नास्ति निर्बन्धिम् योऽगिसत्वात्। अनेः क्रमो ङं स्याद्वा। उपसर्गरहितः क्रमधातुः उभयपदीत्यर्थः। (८९१) वृत्त्यादिषु अर्थेषु तु नित्यमेव आत्मनेपदम्, अतोऽत्र तदभिन्नेषु अर्थेषु बोध्यम्। पाणिनिः १।३।४२।

‡ जानातेर्ङं स्यात् वा निह्नवे। निह्नवोऽपलापः। शतमपलपतीत्यर्थः। अपजानातिरपलापार्थः। पाणिनिः १।३।४४।

§ अकर्मकात् जानातेर्ङं स्यात्। सर्पिषो इत्यत्र जानीते सर्पिषा करणेन प्रवर्तते इत्यर्थः। (१०२) ज्ञोऽज्ञाने वे इति करणे षष्ठी। पाणिनिः १।३।४५। अत्र भट्टोजिदीक्षितेन "सर्पिषोऽनुजानीते" इति सोपसर्गमुदाहरणं प्रयुक्तम्।

¶ सं-प्रतिभ्यां परात् जानातेर्ङं स्यात्, न तु स्मृतौ। संजानीते प्रतिजानीते अङ्गीकरोतीत्यर्थः। पुत्रं संजानाति सोत्कण्ठं स्मरतीत्यर्थः। पाणिनिः १।३।४६।

दर्शयति मधुं भक्तान् भक्तिः। स्मृतौ तु, आरयति भक्तान् हरिः। *

## ९००। ज्ञानयत्नप्रलोभे वदः।

(ज्ञान-यत्न-प्रलोभे ७, वदः ५।)।

पाणिनिर्वदते, क्षेत्रे वदते, शिष्यमुपवदते। †

## ९०१। अनोरढात्। (अनोः ५।, अढात् ५।)।

अनुवदते। ‡

## ९०२। विमति-व्यक्तसङ्घोक्त्योः।

(विमति-व्यक्तसङ्घोक्त्योः ७।)।

विवदन्ते शिष्याः। व्यक्तं किं, संप्रवदन्ति खगाः। §

---

* अणौ (अण्यन्तदशायां) ढे कर्मणि णौ (ण्यन्तदशायामिति यावत्) कर्तरि सति, आत्मनेपदं स्यात् घे, न तु स्मृतौ। भक्ताः भवं पश्यन्ति, भवः भक्तान् दर्शयते, आत्मानमिति शेषः। भक्ताः मधुं पश्यन्ति, भक्तिः भक्तान् मधुं दर्शयति। अत्र अण्यन्तस्य कर्म मधुः, ण्यन्तस्य कर्त्री भक्तिः; अतो नात्मनेपदम्। आरयतीति अत्र अण्यन्तदशायां कर्मणो हरेः ण्यन्तदशायां कर्तृत्वेऽपि स्मरणार्थत्वान्नात्मनेपदम्। पाणिनिः १।३।६७।

† ज्ञानं यत्नः प्रलोभः (उपमन्त्रणमिति पाणिनिः, रहस्युपच्छन्दनमिति क्रमदीश्वरः) एष्वर्थेषु वदेः वर्तमानात् ङं स्यात् घे। पाणिनिर्वदते जानातीत्यर्थः। क्षेत्रे यत्नं करोतीत्यर्थः। शिष्यं प्रलोभयतीत्यर्थः। पाणिनिः १।३।४७।

‡ अनुपूर्व्वादकर्म्मकात् वदो ङं स्यात् घे। यथापि व्यक्तोक्तौ इति पाणिनिक्रमदीश्वरौ। अनुवदते रामस्य कृष्णः, रामो यथा वदति कृष्णोऽपि तथा वदतीत्यर्थः। अढात् किं, पूर्व्वोक्तमनुवदति। पाणिनिः १।३।४९।

§ विविधा मतिर्विमतिः, व्यक्ता चासौ सङ्घोक्तिश्चेति व्यक्तसङ्घोक्तिः, विमतिश्च व्यक्तसङ्घोक्तिश्च ते तयोः। एतयोरर्थयोर्वर्त्तमानात् वदो ङं स्यात् घे। विवदन्ते शिष्या इति हठीयत्वाकरणं, विरोधिज्ञानपूर्व्वकं वदन्ति, व्यक्तं सङ्घवदन्ति वा इत्यर्थः। संप्रवदन्ति अस्फुटं वदन्तीत्यर्थः। पाणिनिः १।३।४७,४८।

९०३। तद्योगे वा। (तद्योगे ७, वा ।१)।

विप्रवदन्ते विप्रवदन्ति वैद्याः। *

९०४। अवाद्गिरः। (अवात् ५।, गिरः ५।)।

अवगिरते। †

९०५। समः प्रतिज्ञायां। (समः ५।, प्रतिज्ञायां ७)।

शतं संगिरते। ‡

९०६। उच्चरः सढात्। (उत्-चरः ५।, सढात् ५।)।

धर्म्ममुच्चरते। सढात् किं, धूम उच्चरति। §

९०७। समस्त्र्या। (समः ५।, त्र्या १।)।

अश्वेन सञ्चरते। ¶

९०८। दानः सा चेच्च्यर्थे।

(दानः ५।, सा ।१।, चेत् ।१।, च्यर्थे ७।)।

---

* तयोः (विसर्ग-व्यञ्जनयोः) योगस्तस्मिन्। व्यक्तवाचां वदो ङं स्याद्वा धे। वैद्याः विरोधिभाषणपूर्व्वकं व्यक्तं सहवदन्तीत्यर्थः। पाणिनिः १।३।५०।

† अव गिर इति कथनात् गृणातेर्नेति भाष्यम्। पाणिनिः १।३।५१।

‡ संपूर्व्वात् गिरतेः प्रतिज्ञायां धे ङं स्यात्। शतं प्रतिजानीते इत्यर्थः। प्रतिज्ञायां किं, ग्रासं संगिरति ददातीत्यर्थः; (सङ्गिरति ग्रासमिति भट्टोजिः)। पाणिनिः १।३।५२।

§ उत्पूर्व्वकात् सकर्म्मकात् चरो धे ङं स्यात्। धर्म्ममुच्चरते उल्लङ्घयति। धूम उच्चरति उद्गच्छतीत्यर्थः। पाणिनिः १।३।५३।

¶ साधन-तृतीयान्तेन योगे सम्पूर्व्वकात् चरो धे ङं स्यात्। रीतौ तदर्थे च तृतीयया न स्यात्, तेन पुत्त्रेण सञ्चरति, पुत्त्रेण सञ्चरति। "हेतुतृतीयाप्रयुक्तादपि भवति, क्रुद्धा सञ्चरते नृपः" इति तु गोयीचन्द्रः। पाणिनिः १।३।५४।

दास्या संयच्छते कामी। चर्थे किं, दास्या संयच्छति भिक्षां भिक्षवे।*

९०९। उप-यमो विवाहे। (उप-यमः ५।, विवाहे ७।)।

रामः सीतामुपायत उपायंस्त।†

९१०। भुजो ऽशने। (भुजः ५।, अशने ७।)।

ग्रासान् भुङ्क्ते गौः। अनशने तु, पृथ्वीं भुनक्ति राजा।‡

९११। संक्ष्णोः। (सं-क्ष्णोः ५।)।

अस्त्रं संक्ष्णुते।§

९१२। युजिर उदङ्ग्यमो ऽयज्ञपात्रे।

(युजिरः ५।, उदङ्ग्यमः ५।, अयज्ञपात्रे ७।)।

---

* सा तृतीया चेत् यदि चर्थे चतुर्थ्यर्थे भवति तदा तेन तृतीयान्तेन संपूर्व्वकात् दाणो मं स्यात्। कामी जनः दास्या संयच्छते दास्यै वस्त्रादिकं ददातीत्यर्थः। दास्या इति (२९१) अधर्म्यसम्प्रदाने तृतीया। दास्या संयच्छति भिक्षां भिक्षवे इत्यत्र दास्या इति करणे तृतीया। उपसर्गान्तरव्यवधानेऽपि यथा, दास्या सम्प्रयच्छते। पाणिनिः १।३।५५।

† उपात् यमो मं स्यात् चे विवाहे। विवाहशब्देनात्र स्वीकारार्थो बोद्धव्य इति भाष्यमतम्, यतः पाणिनौ 'स्वकरणे' इत्युक्तम्। "स्वीकरणे" इति च क्रमदीश्वरः। तेन "शस्त्राण्युपायंसत जिष्णुराणि" शकटमुपयच्छते इत्यादि सम्यच्छते। वोपदेवेन तु "पाणिग्रहणविशिष्टमिव स्वकरणं गृह्यते न स्वकरणमात्रम्" इति जयादित्यसर्व्वधर्म्मचन्द्रादीनां मतमनुसृत्य 'विवाहे' इत्युक्तम्। उपायत इति (५८०) सेः किच्चात् (६७६) अमूलोपे, (५६२) सिलोपः, किच्चविकल्पपक्षे मस्य (५०) अनुस्वारः। पाणिनिः १।३।५६।

‡ भोजनार्थे भुजो मं स्यात् चे। 'अनवने' इति तु पाणिनिः, अवनं रक्षणं तद्भिन्नेऽर्थे इत्यर्थः। ग्रासान् धान्यानि। रक्षार्थिने उपभोगार्थेऽपि महाकविप्रयोगादौ मं भवतीति बोद्धव्यम्। यथा—बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् (रघुवंशम्) इत्यादौ। पाणिनिः १।३।६६।

§ संपूर्व्वकात् क्ष्णौतेर्मं स्यात् चे। संक्ष्णुते शाणयतीत्यर्थः। पाणिनिः १।३।६५।

छद्युङ्क्ते प्रयुङ्क्ते। यज्ञपात्रे तु, प्रयुनक्ति स्रुचं। *

## ९१३। प्रतारे वञ्चि-गर्द्धेः। (प्रतारे ७।, वञ्चि-गर्द्धेः ५।)।

वटुं वञ्चयते गर्द्धयते। प्रतारे किं, श्येनोऽहिं वञ्चयति। †

## ९१४। पूजाभिभवे च लापेः।

(पूजाभिभवे ७।, च ।१।, लापेः ५।)।

जटाभिर्लापयते। श्येनो वर्त्तिकामुल्लापयते। पुत्रमुल्लापयते। एषु किं, घृतं विलापयति। ‡

## ९१५। मिथ्या कारे-रभ्यासे।

(मिथ्या ।५।, कारेः ५।, अभ्यासे ७।)।

पदं मिथ्या कारयते। मिथ्या किं, साधु पदं कारयति। अभ्यासे किं, सकृत् पदं मिथ्या कारयति। §

---

* छत् च, णेरस्य वचनात्। छदो णेरचश्च परात् युजिरो ञ च युतौ इत्यस्मात् ञं स्यात् षे, न तु यज्ञपात्रे। प्रयुनक्ति स्रुचमिति स्रुचं यज्ञे नियोजयतीत्यर्थः। पाणिनिः १।३।६४, वार्त्तिकञ्च। "यसंनिर्दुरः प्रादेः" इति क्रमदीश्वरः।

† वञ्चु गत्यां, गृधिगृ लिप्से इत्येताभ्यां प्रेरणान्ताभ्यां णौ ञं स्यात् प्रतारे प्रतारणार्थे। प्रलम्भनमिति पाणिनिसम्मतपर्यायो, विसंवाद इति क्रमदीश्वरः। वटुं माणवकुमारं वञ्चयते गर्द्धयते प्रतारयतीत्यर्थः। श्येनः पक्षी अहिं सर्पं वञ्चयति परिहरतीत्यर्थः। पाणिनिः १।३।६९।

‡ पूजायाम् अभिभवे चकारात् प्रतारे च लापयतेर्णौ ञं स्यात्। लापिरिति लीधातोर्णौ (७४५) लापत्वे, ला-धातोर्वा णौ, उभयोरादन्तत्वात् (७८४) पकि रूपम्। जटाभिर्जटिलकैः पुष्पजटाभिर्वा पूजयतीत्यर्थः। श्येनो वर्त्तिका-अभिभवतीत्यर्थः। पुत्रं प्रतारयतीत्यर्थः। घृतं द्रवीकरोतीत्यर्थः (७९१)। पाणिनिः १।३।७०।

§ मिथ्या-शब्दात् परात् कारयतेर्णौ ञं स्यात् पौनःपुन्ये। पदं मिथ्या कारयते स्वरादिदुष्टं पदं पुनःपुनरुच्चारयतीत्यर्थः। साधु पदं पुनःपुनरुच्चारयतीत्यर्थः। स्वरादिदुष्टं पदं सकृदुच्चारयतीत्यर्थः। पाणिनिः १।३।७१।

९१६। व्यतीहारे गतिहिंसाशब्दार्थ-हसान्य-ह्ववहोऽनन्योन्यार्थे। (व्यतीहारे ७, गति—वहः ५।, अनन्योन्यार्थे ७)।

व्यतिभवते चर्कमिन्दुः, व्यतिहरते व्यतिवहते। व्यतिजघ्निष्व व्यतिजघ्निध्वं।*

९१७। होऽस्तेरेति। (हः १।, अस्तेः ६।, एति ७)।

अस्तेर्हः स्यादेकारे परे। व्यतिहे।†

गत्यर्थादिषु, व्यतिसर्पन्ति व्यतिघ्नन्ति व्यतिजल्पन्ति व्यतिहसन्ति। अन्योन्यार्थे तु, परस्परं व्यतिलुनन्ति।‡

९१८। स्मृदृश(ऽ)ननुज्ञानाप्रतिश्रोः सनः।

(स्मृ—श्रोः ५।, सनः ५।)।

---

* गतिश्च हिंसा च शब्दश्च गतिहिंसाशब्दाः, ते अर्था येषां ते गतिहिंसाशब्दार्थाः ते च हसश्च ते गतिहिंसाशब्दार्थहसाः, तेभ्योऽन्यः गतिहिंसाशब्दार्थहसान्यः। गतिहिंसाशब्दार्थहसान्यश्च ह्वश्च वहश्चेति तस्मात्। अन्योन्यस्य अर्थ इव अर्थो यस्य सोऽन्योन्यार्थः, न अन्योन्यार्थो ऽनन्योन्यार्थस्तस्मिन्। अन्योन्यार्थेन अन्योन्य-इतरेतर-परस्परशब्दा बोध्याः। गत्यर्थ हिंसार्थ शब्दार्थ हसति—भिन्न धातुभ्यो ह्ववहाभ्याञ्च मं स्यात् चे व्यतीहारे, न त्वन्योन्यार्थशब्दे प्रयुज्यमाने। परस्परमेकजातीय-क्रियाकरणं व्यतीहारः, क्रिया-विनिमयः क्रिया-विपर्ययः इत्यादि। ह्ववहोर्गत्यर्थत्वात् पृथगुक्तिः। इन्दुरर्कं व्यतिभवते, अर्को यथा इन्द्रावस्तं गते उदेति, इन्दुरपि तथा अर्के अस्तं गते उदेतीति व्यतीहारः। व्यतिहरते व्यतिवहते द्रव्यं बालकः। एवं व्यतिहरन्ते धान्यं चौराः, व्यतिवहन्ते भारं कृषकाः इत्यादि। व्यतिजघ्निष्व त्वमिति शेषः, व्यतिजघ्निध्वं यूयमिति शेषः, अत्र च लिट् जघ्ने, (७२६) हिलं, (७०८) हन्, (२२०) उङ्लोपः। एवं व्यतिते, व्यतिघ्नते इत्यादि। पाणिनिः १।३।१४,१५,१६, वार्त्तिकचयश्च।

† व्यतिहे इति व्यति-अस-ङी-ए, अनेन असस्थाने ह-आदेशः। पाणिनिः ७।४।५२।

‡ व्यतिसर्पन्तीत्यादि गत्यर्थादित्वात् व्यतीहारेऽपि न मं। परस्परं व्यतिलुनन्तीति परस्परशब्देनैव व्यतीहारद्योतनात् न मं। सम्पद्विनिमयेनोभौ 'दधतुर्भुवनद्वयमिति रघुवंशे विनिमय-शब्दस्यापि अन्योन्यार्थकत्वेन नात्मनेपदम्।

एभ्यः सनन्तेभ्यो मं स्यात्। शुश्रूषते दिदृक्षते जिज्ञासते सुस्मूर्षते। अन्यत्र अनुजिज्ञासति आशुश्रूषति प्रतिशुश्रूषति। *

**९१९। जिञ् आन्त-पिब धे नृत्वद् वस दम्-रुचाद परिमुह्यायमयसो ऽगिन्नापवदाङ्यन्योत्समा-यमः फलिनि।** † (जित्—वृत्तः ५।, अगिन्ना—यमः ५।, फलिनि ७।)।

जितो आन्तपिबादे-रगिन्नाते-रपवदो ऽयन्योदादिपूर्व्वयमश्च फलवति धे मं स्यात्। यजते। पाययते धापयते नर्त्तयते वादयते वासयते दमयते रोचयते आदयते परिमोहयते आयामयते आयासयते। आनीते अपवदते उद्यच्छते संयच्छते आयच्छते। अन्ये तु, वेदमुद्यच्छति। फलिनि किं, यजति याजकः। ‡

इति म-पादः।

---

* नास्ति अनुर्यस्मिन् सोऽननुः, स चासौ ज्ञश्चेति अननुज्ञः। न विद्यते आ-प्रती यस्मिन् सोऽनाप्रतिः, स चासौ श्रु चेति अनाप्रतिश्रुः। स्मृ च दृश् च अननुज्ञश्च अनाप्रतिश्रु चेति तस्मात्। एभ्यः सनन्तेभ्यो मं स्यात् धे। पाणिनिः १।३।५७,५८,५९।

† परिमुहः परिमुहः, आङौ यम-यसौ आयमयसौ, पिबश्च धेश्च नृत् च वदश्च वसश्च दम च रुचश्च अदश्च परिमुहश्च आयमयसौ चेति तत्। आन्तश्चासौ पिबधेनृत्वद्वसदम्रुचाद-परिमुह्यायमयस् चेति तत्। जिश्च आन्त-पिब——यस् चेति तस्मात्। नास्ति गिर्यस्मिन् सोऽगिः, अगिश्चासौ ज्ञश्चेति अगिज्ञः। अपात् वदः अपवदः। उद च सम् च आङ् च उत्समाः, तेभ्यो यम् उत्समायम्, न यन्योऽयन्यः, अयन्ये उत्समायम् अयन्योत्समायम्। ततः अगिज्ञश्च अपवदश्च अयन्योत्समायम् चेति तस्मात्। पाणिनिः १।३।७२—७७,८९, वार्त्तिकञ्च।

‡ अत्र जित्पदेन गणपाठे आद्यन्ताः धात्वाश्च गृह्यन्ते। तेन जिज्ञोश्च आन्तसमासौ आन्त-पिबादिसंज्ञकं (८६१) सम्यासाद्यैश्च इत्यादिना विहित-परस्मैपदस्य बाधनार्थम्। अन्यथा पिब धे नृद् एषामन्तार्थत्वात् अन्येषामगिज्ञविषयत्वात् तेन परस्मैपदापत्तिः स्यात्।

६२०। ढ-भावे मं। (ढ-भावे ७।, मं १।)।

धो ढें भावे च मं स्यात्। *

६२१। र-तनोर्यगिणौ। (र-तनोः ७॥, यक्-इणौ १॥)।

धोः रे परे यक्, तनि परे इण्, स्यात् ढे भावे च।

सूयते विष्णुः, सूयेत, सूयतां, असूयत। असावि। †

---

अतश्च अन्याभ्यामेँ ञित्यादि-विशेषविधे रभाव सर्वेभ्यो धातुभ्यः फलवत्कर्त्तरि आत्मनेपदं सिद्धमिति। किञ्च यस ञ य ङ् वितर्के इत्यादि चुरादिगणीयस्य आनुबन्धात् चुरादेः ञें ङकारेण आनुबन्धिकं नाप्नोति सूचनात् गणपठितआनुबन्धभिन्न-चुरादेर्नैयं व्यवस्था। यजते इत्यादि। यजे ञौ देवार्चादौ इति ञित्। पा पाने, धें ट पाने, नृत्य नर्त्तने, वदे वाचि, ऐ वसो निवासे, दह ञ इर् भ्रमे, रुच ङ् ल प्रीतिप्रकाशयोः, पद ली भवे, शुभ ञि ल वैचित्त्ये, षी यमूपरमे, इर् यसु यतने, एकादशैते आत्मनाः। ज्ञा म बोधे, वदे वाचि, षी यमूपरमे इति त्रयः। वेदमुद्दयच्छति वेदग्रहणमुद्यमं करोतीत्यर्थः। याजको यजतीत्यत्र वेतनदानेन यजमान-एव फलवान्, न तु याजक इत्यर्थः।

(६११) नवमः पमे इत्यनेन उभयपदप्राप्तौ व्यवस्थेयं, फलवति कर्त्तरि आत्मनेपदम्, अफल-वति परस्मैपदमिति।

---

* ढं कर्म, भावो धात्वर्थः, समाहारे ढ-भावं तस्मिन्। (२२५) भावे मायमिति यद्यपि, तथाप्यत्र भावग्रहणं परस्मात्ययर्थम्। ढमौ धोरिति कथनं धातुमात्रस्याप्यर्थं, तेन पच्यते, चिकित्स्यते, कार्यते, पिपठ्यते, पापच्यते इत्यादि। कर्मणि वाच्ये प्रत्ययेन कर्मण-एवोक्तत्वात् कर्मपदस्य प्रथमा-नाम-पुरुषवचनादयस्तथाश्च क्रियापदस्य वचनादि भविष्य। पाणिनिः १।३।१३।

† पर्वंतात-विधिनापेक्षया निमित्तमात्र-विशेषस्य बलवत्त्वात् यो त्रिणा यक् बाध्यते, एवं च शिवाध्यते। ञिणात् यकि न गुणः, ञिणात् यदि वृद्धिः। सूयते इत्यादि (६२०)

## ९२२। हन ग्रह दृशच: सिद्यादेर्मिण् वा।

(हन-ग्रह-दृश-अच: ५।, सि-आदे: ६।, मिण्।१।, वा।१।)।

एभ्य: पराणां सि-डी-ढी-ती-धीनां मिण् वा स्यात् ङ-भावे। अस्ताविषातां अस्तोषातां हरिहरौ। तुष्टुवे, स्ताविता स्तविता स्तोता, स्ताविषीष्ट स्तोषीष्ट, स्ताविष्यते स्तोष्यते, अस्ताविष्यत अस्तोष्यत।* अर्य्यते, चर्य्यते, संस्क्रियते। †

## ९२३। नेण् तपोऽनुतापे।

(न।१।, इण्।१।, तप: ५।, अनुतापे ७)।

अन्वतप्त। दीयते। ‡

## ९२४। यन् ञ्णित्कृदिण्यात:।

(यन्।१।, ञ्णित्कृदिणि ७।, आत: ६।)।

---

घोऽन्न्यरे इति दीर्घ:। विष्णुरिति कर्म्म, अनेरिति शेष:। टी-तन् अस्ताचि (५००) वृद्धि:, (६४४) इणसन् लोप्य:। पाणिनि: १।१।६६,६७।

* हनश ग्रहश दृश च अच तस्मात्। सिश आदिश (डी ढी ती धी) तस्य। मिणो मिण्वदादौ, णित्वात् वृद्धि:। इणो बाधकोऽयम्। स्तु-टी-आतां सि:, सेरादौ मिण्, उकारस्य (५००) वृद्धि:। पक्षे (५८०) नेमिकाजादिति इम्निषेध:, (५४२) गुण:। हरि-हरौ कर्म्म। स्तौ-ता, वा मिण्, मिणो विकल्पपक्षे (९०६) वा इम्। एवं ढी-सीष्ट, ती-स्यते, धी-स्यत। पाणिनि: ६।४।६२।

† ऋ-ते, यक्, (९१५) ऋवर्ण्यृत इति गुण:। एवम् चर-ते चर्य्यते। सं-कृ-ते, (७०६) सुट्, (९१५) स्वसु व्यामेवेति नियमात् गुणाभावे, (९२०) रङ्गि:।

‡ तपोऽनुतापार्थे इण् न स्यात् ङभावे। अन्वतप्तेति तप्, धौ निषेधे व्या सि:, धीदिस्वात्सेम्, (५६२) सिलोप:। दीयते इति दा-ण दाने, दु दा ण खि दाने, दा ण लूनी, दे ङ पालने, दै प शोधने, दो य छेदे इत्येषां (९१२) दाजादे इति ई:। पाणिनि: ३।१।६५।

आदन्तानां युक् स्यात् ञिणति कृति, इटि च । *

अदायि, अदायिषातां अदिषातां । †

हन्यते, अवधि अघानि, अघानिषातां अवधिषातां अहसातां । ‡

गृह्यते, अग्राहि, अग्राहिषातां अग्रहीषातां । §

दृश्यते, अदर्शि, अदर्शिषातां अदृक्षातां । ¶

गम्यते मोक्षो मुकुन्देन, अगमि अगामि, अगमिषातां अगामि-षातां अगमयिषातां । ‖

---

* ञ च ण च ञणौ, तौ इतौ यस्य स ञिणत्, स चासौ कृदेति ञिणत्कृत्, तत्र इट् च तस्मिन् । युगो न इत् यके । आदन्तधातुभ्यो यपः स्थाने (९०९) ञौ विधानात्, ञौ च (७८४) यक्-विधानात् अत्र ञिणति इत्यनेनैव सिद्धे कृद्ग्रहणं दरिद्रा-धातोरपि दरिद्र इत्यत्र युगागम-निषेधार्थम्, अन्यथा, लोपोऽन्त्यादेश इष्यते इति न्यायेन लोपस्यादेशत्वे, आदेशादेशयोर्मध्ये बलीयानागमो विधिरिति न्यायात्, (७०२) दरिद्र आलोप इति सूत्रं बाधित्वा अनेन युगागमापत्तेः । पाणिनिः ७।३।३३ ।

† अदायीत्यादि दा-तन्, इञ्, (९४४) तन्लोपः, अनेन युक् । आतां, सिः, सिच्, इट्-सिचोरभेदात् युक् । सिचो विकल्पपक्षे (७१६) स्थादोरिति इः ।

‡ अवधीत्यादि हन-तन्, इञ्, तन्लोपः, (९७८) वधादेशः, (५००) हदिः, (७४४) पुनः हस्य घः । वधादेशविकल्पपक्षे (९७९) हेर्घौ च इति हस्य घः, हदिः । आतां, सिः, सिच्, हस्य घः, हदिः । सिचो विकल्पपक्षे वधादेशः, तत्रापि विकल्पपक्षे (८०९) हनः सिच् सिरिति सिः किन्नं, (९०६) नम्-लोपः ।

§ गृह्यते इति (९६१) जिः । टी-आतां, सिः, सिच्, हदिः । पक्षे इम् (७०१) ग्रहो दीर्घः ।

¶ अदर्शि, दृश-टी-तन्, इञ्, गुणः, तन्लोपः । टी-आतां, सिः, सिच्, गुणः । पक्षे लोपदित्यादेश, (१५४) षत्व, (९०२) षस्य कः, (९१८) सेः किन्नं, (१११) षत्वम् ।

‖ गम्यते इति गमधातोः जिः, (८००) वा गमेरिति मिन्नं प्रत्ययः, गमि इति स्थिते वाच्य, (९३१) लोपः । लोप [illegible] [illegible] (२८०) अवधा । अगमि-षातां, इञ्, (७६८) ञौणलोपदिति अतो दीर्घत्व, ततः तन्लोपः । सिआतां, सिः (९१४) [illegible] सिच्; ञौणलोपदिति अतो दीर्घत्व । सिचो विकल्पपक्षे [illegible]

## ९२५। भावे माद्यं। (भावे ७।, माद्यं १।)।

मस्याद्यं वचनं भावे प्रयुज्यते। मया भूयते, अभावि, बभूवे बुभूवे, भाविता भविता। श्रम्यते मुनिना, अश्रमि। अकामि अशामि आचामि। व्यश्रमि व्यशामि। अवधि। अजागारि, ओौ तु अजागरि अजागारि। *

## ९२६। भन्जगिलभ्भो.वेसमोर्नलोपः।

(भन्ज्-गिलभः ६।, वा।१।, इस्रमोः ७।, न-लोपः १।)।

अभाजि अभञ्जि, अलाभि अलम्भि। गौ तु, प्रालम्भि। †

---

* भावे स्यादिविभक्तयः अकर्म्मकादेव धातोः स्युः, कृत्प्रत्ययास्तु सकर्म्मकादपि। भावो धात्वर्थः, [भावो भावना उत्पादना क्रिया इति सिद्धान्तकौमुदी। "व्यापारो भावना सैवोत्पादना सैव च क्रिया" इति तत्त्वबोधिनी] तस्मिन् वाच्ये आत्मनेपदस्य आद्यं वचनं स्यादित्यर्थः। धात्वर्थस्य वाच्यत्वात् युष्मदस्मदोरवाच्यत्वे सि-मप्रभृतयो न स्युः, अपिच धात्वर्थस्य द्वित्वादेरविवक्षातो द्विवचन-बहुवचने न स्तः, धात्वर्थस्य द्वित्वादेर्विवक्षायामपि पुत्राभ्यां भूयते इत्यादौ द्विवचनादि न स्यादिति। भूयते इति, मया इति अनुक्तकर्त्तरि तृतीया। भू सत्तायामिति अकर्म्मकात् भावे क्षो-ते, यक्। अभावि टौ-तन्, इञ्, वृद्धिः। बभूवे बुभूवे इति (५६०) भुवोऽङ् ज्याम्। इदन्तु पाणिनीया नेच्छन्ति। भाविता भविता, णिच् वा, ञचे इम्। श्रम्यते मुनिना इति श्रमु खिदे श्रमे, ते, यक्। मुनिः श्रान्तो भवतीत्यर्थः। अश्रमि, टौ-तन्, इञ्, वृद्धिः, (७४४) जनवध इति ह्रस्वः। तत्रैव कम-वम-आचम-वर्जनात् तेषु न ह्रस्वः। आङ्-पूर्व-चमो वर्जनात् अचमीत्यत्र ह्रस्वः। शम-यम-विश्रमस्तु वेति व्यश्रमि व्यशामि, एवम् शम शमि शामि, अयमि अयामि। अवधि वध हतौ टौ-तन्, अत्रापि ह्रस्वः। अजागारि, (९९८) जागोऽचविति गुणनिषेधः, वृद्धिः। ओौ तु (७२८) ओौचमोस्तु णंच जागुरेति वा ह्रस्वे पदद्वयम्। भाव्यम्।

† नास्ति विर्यस्मिन् सोऽवि:, स चासौ समश्चेति अविसमः। भन्ज च अविसम च तयोस्तस्य। अनयोर्नस्य लोपः आत्वा इञि अमि च परे। अभाजीति भन्ज भञ्जो मोटने टौ-तन्, इञ्, नलोपः, ततः उङ्-अकारस्य वृद्धिः। नलोपाभावपक्षे उङ्-अकाराभावात् न वृद्धिः। एवं लभी ङ च प्राप्तौ टौ-तन्, इञ्, (७४१) नुम् रभ इति नुम्, अनेन नलोपपक्षे वृद्धिः, अन्यत्र न वृद्धिः। गौ तु इति उपसर्गे उपपदे सतीत्यर्थः। पाणिनिः ६।४।३२,७।१।६९।

## ८२७। ङवद् ङघो ऽङे। (ङभत्।१।, ङघ: १।, चङे ७।)।

ङमेव घत्वं प्राप्तं ङघ:, स च ङवत् स्यात् न तु ङे सति। *

तथाच—क्रियमाणन्तु यत् कर्म्म स्वयमेव प्रसिध्यति।

सुकरैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद्विदुः॥

स्वयमेव भिद्यते काष्ठं, अभेदि। †

---

* ङस्य तत् घश्चेति ङघ, आदौ ङं पश्चात् घ इत्यर्थः। ङघः कर्म्मकर्त्ता ङवत् कर्म्मवत् भवति, न तु ङे कर्म्मणि सति, द्विकर्म्मकस्थले एकस्य कर्म्मणः कर्त्तृत्वविवक्षायां अन्यस्मिन् कर्म्मणि विद्यमाने न स्यादित्यर्थः। तेन याच्यते राजा स्वयमेव भूमिमिति न स्यात्। ङवदित्यनेन कर्म्मवाच्यविहितं यक् इञ् ञिण् आत्मनेपदञ्च अतिदिश्यते, न तु कर्म्मकर्त्तुः कर्म्मत्वं विधीयते। पाणिनिः ३।१।८७, वार्त्तिकञ्च।

धात्वर्थाः केचित् कर्म्मस्थाः केचित् कर्त्तृस्थाश्च भवन्ति। अत्र कर्म्मस्थानां धातूनामेव कर्म्मणः कर्त्तृत्वविवक्षा, न तु कर्त्तृस्थानां धातूनां, तेन पच्यते ओदनः स्वयमेव, भिद्यते काष्ठं स्वयमेव इत्यादि स्यात्, खाद्यते ओदनः स्वयमेव, गम्यते ग्रामः स्वयमेव इत्यादि तु न स्यादिति बोध्यम्। तथाच प्राञ्चः—कर्म्मस्थेऽपि च धात्वर्थे कर्म्मकर्त्ता च कर्म्मवत्। कर्त्तृस्थेऽपि च धात्वर्थे कर्म्मकर्त्ता च कर्त्तृवत्॥ कर्म्मस्थः पचतेर्भावः कर्म्मस्थाश्च भिदादयः। कर्त्तृस्थो बुध्यतेर्भावः कर्त्तृस्थाश्च गमादयः इति॥ पचतेर्भावस्तण्डुलादीनां विक्लित्तिस्तण्डुलादिष्वेव भवति न तु पाककर्त्तरि, एवं भिदादेर्भावो भेदादिः काष्ठादिष्वेव न तु भेदादिकर्त्तरि। बुध्यतेर्भावो ज्ञानं ज्ञातर्य्येव न तु घटादौ, एवं गमादीनां भावः पादचालनादिः कर्त्तर्य्येव न तु ग्रामादावित्यर्थः। एवञ्च—निर्व्वर्त्त्ये च विकार्य्ये च कर्म्मवद्भाव इष्यते। न तु प्राप्ये कर्म्मणीति सिद्धान्तोऽयं व्यवस्थितः॥ किञ्च एकक्रियाकर्म्मणः कर्त्तृत्वं विवक्ष्यते इति बोध्यं, तेन पचत्योदनं देवदत्तः, राध्यते ओदनः स्वयमेव इत्यत्र न स्यात्।

† एकक्रियायाम् एकस्य कर्म्मत्वं कर्त्तृत्वञ्च कथं सम्भवतीत्यत आह—क्रियमाणमिति। क्रियमाणं साध्यमानं यत् कर्म्म, कर्त्तुः सुकरैः सुखनिष्पाद्यैः, स्वैर्निजैः कर्म्मसम्बन्धिभिर्गुणैः, यावत् गुणैः, स्वयमेव प्रसिध्यति निष्पद्यते तत् कर्म्मकर्त्ता इति विदुर्जानन्ति बुधा इति शेषः। यथा भिद्यमानं काष्ठं स्वयमेव भिद्यते, काष्ठस्यातिमसृणत्वरूपगुणेन कर्त्तुः सुकरैव, स्वयमेव भेदो जात इत्यर्थः। काष्ठमिति अचेतनत्वात् प्रथमा। ङी-तङ् अभेदि।

९२८। कुषि-रञ्जः श्यन्-ये वा रे।

(कुषि-रञ्जः ५।, श्यन्-पे १।, वा ।१।, रे ७।)।

कुष्यति कुष्यते, रज्यति रज्यते। *

९२९। वेणजदुहः। (वा ।१।, इण् ।१।, अजदुहः ५।)।

अजन्तात् दुहश्च इण् स्याद् डवे। अकारि अकृत, अदोहि अदुग्ध। †

९३०। न तप-बध-सढपचदुहः।

(न ।१।, तप-बध-सढ-पचदुहः ५।)।

तपो बधः सढाभ्यां पचदुहाभ्याञ्च इण् न स्यात् डवे। अतप्त, अबद्ध। अपक्त पाकः पाकं, अदुग्ध गौर्दुग्धं। अतएवानयो-र्डेऽपि डवत्वं। ‡

---

* कुषिश्च रञ्जश्च तयोः समाहारात्। श्यन् च यश्च ते। आभ्यां रे विषये श्यन् परस्मैपदञ्च वा स्यात् कर्मकर्तरि वाच्ये। कुष इति निष्कर्षे, रे परे पं श्यन् च, पक्षे मं यक्। एवं रज्यतीति रञ्जो ञ रागे, (५६०) नलोपः। रे किं, अकोषि, चुकुषे। अरञ्जि, ररञ्जे। यं वेति कृते सिद्धेऽपि श्यन्विधानं, कुष्यन्ती रज्यन्ती इत्यत्र (२४५) नित्यनुमर्थम्। पाणिनिः ३।१।९०।

† अच् च दुह च तयोः समाहारात्। अजन्ताद्धातोर्दुहधातोश्च तनि परे इण् वा स्यात् डवे। वा-ग्रहणं वाधिकारनिवृत्त्यर्थम्। अकारीति कृ-तन्, इण्, (६४४) तन्-लोपः, (५६०) वृद्धिः। पक्षे क्वां सिः, (६५८) सेः सिज्, (५६२) सिलोपः। अदोहीति इणि गुणः। पक्षे (६५०) [illegible] अदुग्ध। पाणिनिः ३।१।६३,६२।

‡ डेन सह वर्त्तेते यौ तौ सडौ, सडौ च यौ पचदुहौ चेति, अतः तपश्च बधश्च सढपचदुहौ चेति तस्मात्। अतप्तेति तप्-तिन्(?) क्वां सिः, [illegible] [illegible]। एवम् अबद्ध, बन्ध सेः सिलुक्। अपक्त पाकः इत्यादि, [illegible] [illegible] [illegible] सनं फलम् अपक्त, एवं [illegible] [illegible] [illegible] अदुग्ध। [illegible] [illegible]

## ९३१। सन अम्ब ग्रन्थ ब्रू कृ गृ दुह नम-भूषार्थात् यक् च जिस्नुश्रि-माढात्त्वमिष्।

(सन—भूषार्थात् ५।, यक् ।१।, च ।१।, जि—माढात् ५।, तु ।१।, अमिष् ।१।)।

सनन्तादे-रिष् यक् च न स्यात् ठचे, अजन्तादेस्तु मिष्वर्जं। *

चिकीर्षते अचिकीर्षिष्ट। अम्बीते अअम्बिष्ट, ग्रन्थीते अग्रन्थिष्ट। ब्रूते अवोचत। किरते अकीर्ष्ट, गिरते अगीर्ष्ट। दुग्धे अदुग्ध। नमते अनंस्त। तंसते अतंसिष्ट। कारयते, अचीकरत अकारिष्ट अकारयिष्ट। स्नुते, अस्नाविष्ट अस्नोष्ट। श्रयते, अशिश्रियत अश्रायिष्ट अश्रयिष्ट। आहते, आवधिष्ट आघानिष्ट आहत। †

---

पचदुहाभ्यां इष्-निषेधे स्यां सिः, सिलोपः, उभयत्र चौदित्वाच्चेम्। अतएवेति, सूत्रे सकर्मक-पचदुहग्रहणात् अनयोः कर्मान्तरसत्त्वेऽपि कर्मकर्तृत्वमिति बोध्यम्। पाणिनिः ३।१।६४,६५, वार्त्तिकञ्च।

* सन् सनन्तः। भूषा अर्थो यस्य स भूषार्थः। सन् च अम्बश्च ग्रन्थश्च ब्रूश्च कृश्च गृश्च दुहश्च नमश्च भूषार्थश्चेति तस्मात्। जिर्ण्यन्तः। श्रि (आत्मनेपदे) माढः (अकर्मकः) माढः। जिश्च स्नुश्च श्रिश्च माढश्चेति तस्मात्। न मिष् अमिष्। एभ्यो यक्, चकारात् इष् च, न स्यात्, इत्योऽमिषत्वेन मिष् अपि न स्यात् ठचे, अजन्तादेस्तु मिष्-भिन्नः इष् यक् च न स्यात्, मिष् तु स्यादित्यर्थः। दुहधातोः पूर्व्वेण इष्-निषेधे अत्र ग्रहणं यक्निषेधार्थम्। अम्बग्रन्थयोरकर्मकत्वेऽपि अतएवानयोर्ठेऽपि ठचत्वमिति बोध्यम्। पाणिनिः ३।१।८९, वार्त्तिकञ्च।

† चिकीर्षति इत्यादि, यं कर्त्तुमिच्छति स स्वयमेव चिकीर्षते इति चिकीर्ष-धातोः यक्निषेधे ख्यिकत्वकर्तृत्वाच्चात् शप्। ठो-तम्, इष्-निषेधे (५५१) सिः, अनिट्कत्वात् सिचोऽपि निषेधे (५५४) इम्। ठचकाले विप्रतिषेधो यद्बाधितं तद्बाधितमेवेति न्यायात् विध्यभावपक्षेऽपि निषेधे पुनः कथं सिरिति चेत् न्यायस्य सर्व्वत्राप्रवृत्तेरिति। कृञ्च नोदि, गीर्-नि, अतो निषेधे आविधातुत्वात् (७१८) वा (७०१) आद्योरिति ई, (११६७) गलोपः। ठो-तम्, इष्-निषेधे सिः इम् च। एवं यत्र न दर्शितमपि।

## ९३२ । न्यादि-अग्न्याढगत्यर्था मुख्ये ढे ढ्यमामुयुः । गौणे यामादयोऽन्ये तु यथेष्टं द्विढमुग्मिति ॥*

ग्रन्थते ग्रन्थते इति भौवादिकौ कश्चिदुदाहरति । न्यूते, यक्निषेधे शप्, श्वादित्वात् शपो लुक्, टौ-तन्, इब्निषेधे, चर-विषये (७२५) घषादेशे, (६१८) वक्तव्येति कः, (६५२) लोपादेशः । नू म निक्षेपे, ते, यक्-निषेधे तुदादित्वात् (७१८) शः, (६२८) ऋत्वाले रट् । टौ-तन्, इब्निषेधे सिः, (७४०) सायूहदिति इमोऽभावपक्षे (६५९) इः त्रिज्वत्, रट्, (२२८) दीर्घः । इमपक्षे तु न्यकरीष्ट न्यकरिष्ट इति च । एवं गॄ म निगरणे इत्यस्यापि । दुग्धे इति दुह-ते, यक्निषेधे शप्, शपो लुक्, (१७६) दादेशः । टौ-तन्, पूर्वसूत्रेणैव इब्निषेधे, (६५७) सकोऽप्राप्तिपक्षे सि-निषेधः । गम-ते, यक्निषेधे शप् । टौ-तन्, इब्निषेधे सिः, णोदित्वाग्नेम् । तस्य धातुर्भूतार्थः । कारयते इति कृ-ञि: कारिधातोः ते, यक्निषेधे शप् । टौ-तन्, इब्निषेधे (६१३) चङ्, द्वित्वादिकं, अचीकरत । अत्रो नित्यत्वेऽपि अत्र निच्चमिति कथनेन जिचः प्राप्त्युरोधात् आत्म-निच्चा पक्षे ञ्यां सिरिति, अतः ञ्यि ञेर्लोपे अकारिष्ट, ञिचोऽप्राप्तिपक्षे इति ञेर्लोपाभावे अकारयिष्ट । णु च प्रस्तुत्यां, णु-ते, यक्निषेधे शप्, शपो लुक् । टौ-तन्, इब्निषेधे ञ्यां सिः, ञिच्, वृद्ध्यादि, अनाविष्ट । ञिचोऽप्राप्तिपक्षे (५९६) गुक्रमोऽस्के इति नियमादिम्निषेधः । त्रि ञ सेवने, ते, यक्निषेधे शप् । टौ-तन्, इब्निषेधे चङ्, द्वित्वादि, अशिश्रियत । ञिच्पक्षे अश्रायिष्ट, इम्पक्षे अश्रयिष्ट । आहते इति आ-हन-ते, यक्निषेधे शप्, शपो लुक्, (६७६) अम्लोपः । टौ तन्, इबो निषेधे सिः, ञिच्, (६७८) घत्वादेशः, वृद्धिः, (७४४) ग्रहः, आघानिष्ट । घत्वादेशाभाव-पक्षे (६७९) हस्य घः, वृद्ध्यादि, आघानिष्ट । ञिचोऽभाव-पक्षे (८७९) सिः कित्त्वं, ततो अम्लोपः ततः सिलोपः, आहत । आङ्पूर्वहन्तेरकर्मकत्वात् (८७८) आत्मनेपदविधानात्, सकर्मकोऽप्ययं नाङः बोद्धव्यः, अकर्मकस्य कर्मकर्तृत्वाभावात् ।

* द्विकर्मकधातुभ्यः कर्मणि वाच्ये प्रत्ययोत्पत्तौ मुख्यं गौणमुभयं वा कर्म उक्तं भवतीति सन्देहे व्यवस्थामाह—न्यादीति । नासि ढं (कर्म) यत्र सोऽढः । अढश्च गत्यर्थश्च अढगत्यर्थौ, अग्नौ च तौ अढगत्यर्थौ चेति अग्न्याढगत्यर्थौ । न्यादयश्च अग्न्याढगत्यर्थौ च ते । तिष्ठन्तु द्विकर्मकधातुषु मध्ये, (२८४) न्यादयो—नी वह ह हषि कृष् ... नय ... यथाया नय, अग्न्यादयोऽपि अग्न्यादयश्च धातवो मुख्ये हि कर्मणि वाच्ये ... प्रत्ययम् आहुः । (२८५) यामादयो—याच्ञार्थ दुह पि ... धातवो गौणे कर्मणि वाच्ये कर्मप्रत्ययमाहुः । ... तु द्विकर्मका धातवः ... गौणे वा कर्मणि वाच्ये कर्मप्रत्ययमाहुरिति व्यवस्था । (२८६) ... आमार्थं यत्र इत्थ नृ ... इत्येतानेव धातून् ... कश्चित् पठति । ...

निन्ये विजनमजागरि रजनिमगमि मुदमयाचि सम्भोगं।
गोपी हावमकार्य्यत भावयैनामनन्तेन॥ *

इति ढभाव-पादः।

---

मुख्यत्वं, व्यवहितक्रियान्वयित्व गौणत्वमिति। अत्र यथेष्टमिति अनिर्णयादुक्तं, सर्व्वेष ण्यन्तानां प्रयोज्यं कर्म्मैवोक्तं भवतीति पाणिनि-सर्व्ववर्म्म-क्रमदीश्वराः। पाणिनिः यथा— "गौणे कर्म्मणि दुह्यादेः (दुह याच पच दण्ड रुध प्रच्छ चि ब्रू शास जि मन्थ मुष) प्रधाने नी ह्व कृष् वहाम्, बुद्धिभक्षार्थयोः शब्दकर्म्मकाणां निजेच्छया, प्रयोज्यकर्म्मण्यन्येषां ण्यन्तानां लादयो मताः।"

* उदाहरणान्याह निन्ये इत्यार्य्यया। अनन्तेन कृष्णेन गोपी विजनं (वनं) निन्ये प्रापिता, अत्र गोपीति मुख्यं कर्म्म उक्तम्। अनन्तेन गोपी रजनिं अजागरि जागरिता, (२८२) दिवाद्यकालत्वेन कालाधिकरणस्य रजनेः कर्म्मत्वे सकर्म्मकस्यापि, स्वभावादकर्म्मकस्य जागृधातोरण्यन्तकर्त्ता गोप्याः (२८४) कर्म्मत्वं, ततश्च प्रेरणक्रियाया मुख्यं कर्म्म गोपीत्युक्तम्। अनन्तेन गोपी मुदं हर्षं अगमि प्रापिता, अत्रापि गोपी मुख्यं कर्म्म उक्तम्। अगमीति ण्यन्तगमधातोः टी·तन्। अनन्तेन गोपी सम्भोगम् अयाचि प्रार्थिता, अत्र गोपी गौणं कर्म्म उक्तम्। यथेष्टमाह—अनन्तेन हावं (भावविशेषं) अकार्य्यत कारिता, अत्र गोपी मुख्यं कर्म्म उक्तम्। अनन्तेन एनां गोपीं भावश्च अकार्य्यतेति शेषः, अत्र भाव इति गौणं कर्म्म उक्तम्। अकार्य्यत इति कारि इति ण्यन्तकृधातोः यी·त।

अकर्म्मकास्तु—

सत्ता-जीवन-दर्प-भीति-शयन-क्रीडा-निवास-त्रपा-
ऽवस्थान-प्रमोगति-ग्लानि-जरा-लज्जा-प्रमादोदये।
उन्मादे च पलायन-श्वसनयोः ख्यातौ रुचौ खेटने
मोदे वायन-युद्ध-वृद्धि-रुदने शान्तौ धृतौ मज्जने॥
दीप्तौ जागर-बोध-वञ्चनमनोत्साहे मृतौ संशये
त्यागे मन्दगतौ च कूल-पतने चेष्टा-क्षुधो रोदने।
हर्षे हासगतौ च सिद्धि-विरतौ क्रोधोपवेशे सवे
कम्पोद्वेग-निमिष-सङ्ग-यतन-खेदे ध्वनावकर्म्मकाः॥

सकर्म्मकाश्च कर्म्माविवक्षायामकर्म्मका भवन्ति, तथाच भाष्यम्—

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रियेति॥

धातोरर्थान्तरे यथा—भारं वहति, नदी वहति। धात्वर्थेन सह कर्म्मण उपसंग्रहात् यथा—प्राणिति, जीवति, जलमित्यादि।

४र्थ पादः—त्रिः ।

---

## ९३३ । भवद्भूतभव्ये त्रिशः क्याद्याः ।

(भवत्-भूत-भव्ये ७, त्रिशः ।(१ब), क्याद्याः १ब) ।

क्याद्याः त्रय-स्त्रिस्त्रिसः क्रमात् वर्त्तमानातीतभविष्यत्सु कालेषु स्युः । *

प्रीते स पित्त-शयने मम मीन-कूर्म-
कोलोऽभवन्नृहरिवामनजामदग्न्यः ।

---

* भवंश्च भूतश्च भव्यश्च तस्मिन् । क्य आद्या यासां ताः । अत्र काले इति [illegible] पदमध्याहार्य्यम् । भवन्निति वर्त्तमाने शतृविधानात् वर्त्तमानः, भूत इति अतीते क्तविधानादतीतः ; भव्यो भविष्यत्कालः, सामान्यकाले तव्यादि-विधानादपि इह भविष्यत्काले यः । क्यो ख्यो गो—वर्त्तमाने, थी टी ठो—अतीते, जी डी डो—भविष्यति, पो—सर्वकाले (९१२) ।

आरब्धक्रियायाः समाप्तिपर्य्यन्तः कालो वर्त्तमानः, यथा महाभारतं पठति । स चतुर्विधः—यथा, प्रवृत्तोपरतश्चैव, वृत्ताविरत एव च ; नित्यप्रवृत्तः सामीप्यो वर्त्तमानश्चतुर्विधः । क्रमेण यथा—मांसं न खादति, [illegible] प्रवृत्तं [illegible] [illegible] । इह कुमाराः क्रीडन्ति, तदानीं क्रीडाभावेऽपि पूर्व्वक्रीडया तुष्टौ वर्त्तमानत्वात् । पर्व्वतास्तिष्ठन्ति, नित्यप्रवृत्तत्वात् । किञ्च पर्व्वतानां नित्यप्रवृत्तत्वेऽपि [illegible] भूतभविष्यत्कालयोरपि प्रयोगो भविष्यति । सामीप्यो द्विविधः—भूतसामीप्यो भविष्यत्सामीप्यश्च, यथा—[illegible] [illegible] एषोऽहमागच्छामि, एवं [illegible] पूर्व्वमपि गतोऽहं गच्छामीति । पाणिनिः ३।२।१२२ ।

कस्मिन् काले क्रियायाः [illegible] स भूतः, स च त्रिधा,—[illegible], [illegible], परोक्षश्चेति । क्रमेण यथा—सः [illegible], स [illegible], स [illegible] । [illegible] [illegible] टी, परोक्षे ठौति कश्चित् तत्र, [illegible] । पाणिनिस्तु "[illegible]" (३।२।१११), "[illegible]" (३।२।११०), "परोक्षे लिट्" (३।२।११५) ।

भविष्यदपि द्विधा—[illegible] [illegible] [illegible] । [illegible] भविता, भो भविष्यति, [illegible] भविष्यतीति । पाणिनिस्तु "[illegible]" ([illegible]), "लृट् शेषे च" (३।३।१३) ।

योऽभूद्भवमूष भरताग्रजकाकुत्स्थः
कल्की यतश्च भविता प्रहरिष्यतेऽरीन् ॥ *

९३४। यौ स्रोणातीते। (यौ ।१।, स्रोण ३।, अतीते ७।)।

स्रोण योगे अतीते काले यौ स्यात्। हन्ति स्म रावणं रामः। †

* आत् च ऋश्च उङ्लोपी चेति तस्मात्। उङ्लोपिनश्च (२२०) सूत्रे प्रदर्शिताः। ददातीति ददिः, किः, द्वित्वं, (६१०) उभयोरपि आल्लोपः। एवं दधिः। करोति किरति इति चक्रिः। एवं सस्रिः। जायते इति जज्ञिः, द्वित्वं, (२१०) उङ्लोपः, (४६) नस्य ञ। एवं हन—जघ्निः, गम—जग्मिः, खन—चख्निः, घस—जक्षिः। पाणिनिः ३।२।१७१, वार्त्तिकञ्च।

† यक्षं यातीति यङि यायाय-धातुः, भास ङ न दीप्तौ, कस ञ गतौ, ष्ठा स्थाने, ईश ङ ग ऐश्वर्ये, पिश श पादवने, प्रपूर्व-मदी भिदं जि हर्षे—एभ्य इत्यर्थः। यायाय-धातोः वरः (१०११) इट्निषेधे, (७७५) यकारलोपे, (६४२) यलोपः। ईश्वर इति वरप्रत्ययस्य, इत्यादित्वात् (२५४) न वक्। वरप्रत्ययान्ता आकारान्ताः स्त्रीलिङ्गे। पाणिनिः ३।२।१७५, १७६। पश्यति पिश इत्यन्नाः। प्रमद्वर इति पदं कातन्त्राद्यनुरोधीतम्।

‡ क्वरपः कित्त्वात् (६४२) अगुणः, कित्त्वात् (२५०) ईप्, पित्त्वात् (९८२) तुक्। सरति जयति एति नश्यति गच्छतीति वाक्यानि। नश्वरीति (१०११) इड्वर्जितेति इट्निषेधः। गत्वरीति मस्य तश्च त। पाणिनिः ३।२।१६३,१६४। "नशेरौणादिकमपि वरट् च" इत्यौणादिकसूत्रेण नशधातोः वरटि नश्वरीति पदं सिद्धम्।

११२२। हिंस दीप कम्पाजस स्मिङ् कम नमो रः। (हिंस—नमः ५।, रः १।)।

एभ्यो रः स्यात् घे। हिंस्रः दीप्रः कम्प्रः अजस्रः स्मेरः कम्रः नम्रः। *

११२३। सन्भिक्षाशंस उः।

(सन्-भिक्ष-आशंसः ५।, उः १।)।

एभ्यः उः स्यात् घे। रिप्सुः भिक्षुः आशंसुः। †

११२४। विन्दिच्छू। (१।)।

एतौ निपात्यौ। वेत्तीति विन्दुः, इच्छतीति इच्छुः। ‡

११२५। स्वप तृष धृषो नजिङ्।

(स्वप-तृष-धृषः ५।, नजिङ् १।)।

एभ्यो नजिङ् स्यात् घे। स्वप्नक् तृष्णक् धृष्णक्। §

११२६। शृवन्द्यारुः। (शृ-वन्दः ५।, आरुः १।)।

आभ्यामारुः स्यात् घे। शरारुः वन्दारुः। ¶

---

* हिनस्ति दीप्यते कम्पते न जसति स्मयते कामयते नमतीति वाक्यानि। हिंस इत्यादौ (१०२२) इड्निषेधः। कम इति (५८२) णारे इति णिङोऽप्राप्तिः। पाणिनि: ३।२।१६७।

† रब्धुमिच्छति, सन्, (८२१) त्रिलोपः रभ् च, (२१२) स्वादेः स-लोपः, (६०) ... च, रिप्स प्रत्ययात् उः, (७०५) सनाद्यन्तोऽपि रिप्सुः। भिक्षते भिक्षुः, आशंसते आशंसुः। पाणिनि: ३।२।१६८।

‡ पाणिनि: ३।२।१६९। अत्रायं विन्दुशब्दः ज्ञानादिवेदनशीलार्थे वर्त्तते। जल-पर्यायो बिन्दुशब्दस्तु तवर्गपञ्चमादिः "बिदि अवयवे" इति धौतादिकप्रत्ययान्तनिपातः।

§ नजो ज इत् ङुत्वाभावः, नङ्-स्थितिः। स्वपिति, तृष्यति, धृष्णोति, इति वाक्यानि, तृषधृषोः (१०२२) इड्निषेधः, (२११) कुत्वम्। पाणिनि: ३।२।१७२, वार्त्तिकं च।

¶ शृणाति वन्दते इति वाक्यद्वयम्। पाणिनि: ३।२।१७३।

## ११२७। क्रुक्लुकौ भियः। (क्रु-लुकौ १॥, भियः ५।)।

भीरुः भीलुकः। *

## ११२८। स्पृहि गृहि श्रु दृ जे राय्यः।

(स्पृहि—जेः ५।, आय्यः १।)।

एभ्य आय्यः स्यात् चे। स्पृहयाय्यः गृहयाय्यः श्रवाय्यः दराय्यः जयाय्यः। †

## ११२९। गण्डि मण्डि जि जनि नन्दिभ्योऽन्तः।

(गण्डि—नन्दिभ्यः ५॥, अन्तः १।)।

एभ्योऽन्तः स्यात् चे। गण्डयन्तः मण्डयन्तः जयन्तः जनयन्तः नन्दयन्तः। ‡

## ११३०। स्तनि गदि मदि ह्रदि दूषे रित्नुः।

(स्तनि—दूषेः ५।, इत्नुः १।)।

एभ्य इत्नुः स्यात् चे। स्तनयित्नुः गदयित्नुः मदयित्नुः ह्रदयित्नुः दूषयित्नुः। §

---

* [illegible]तो रेफो लकारो च। उभयोः कित्त्वात् गुणाभावः। बिभेतीति वाक्यम्। क्रु-क-पि प्रत्ययान्तम्। भीरुकः। पाणिनिः ३।२।१७४।

† स्पृह ईप्सायाम्, ग्रह च च ग्रहे, श्रो श्रवण-चुरादी ; श्रु श्रुती, दृ च आदरे, जि जये—एषां प्रयोगः। नामोदाहरणार्थे, (६०१) आय-वर्जनात् न लोपः। चुरादिः।

‡ गडि वदने, मडि च भूषे, जि जये, जनी जनि प्रादुर्भावे, टु नदि समृद्धौ। चय [illegible] [illegible]। [illegible] (६०१) [illegible]-वर्जनात् न लोपः। [illegible] [illegible]। चुरादिः।

§ [illegible] च शब्दे च [illegible], [illegible]। मदी [illegible] [illegible] [illegible], [illegible], [illegible] नदिः। [illegible] (८५५) [illegible]। [illegible] [illegible],

११३१ । कॄ गॄ आगुः क्विः । (कॄ-गॄ-आगुः ५।, क्विः १।) ।
एभ्यः क्विः स्यात् षे । कीर्विः गीर्विः आस्तविः । *

११३२ । स्वयं शं वि सं प्राद् भुवो डुः ।
(स्वयं—प्रात् ५।, भुवः ५।, डुः १।) ।
एभ्यो भुवो डुः स्यात् षे । स्वयम्भुः शम्भुः विभुः सम्भुः प्रभुः । †

११३३ । लॄ धॄ खन सॄ चर पॄ सह वह इत्रो षे । (लू-धू-खन-सू-चर-पू-सह-वहः ५।, इत्रः १।, षे ७।) ।
एभ्य इत्रः स्यात् षे । लवित्रं परित्रं धवित्रं खनित्रं सवित्रं चरित्रं पवित्रं सहित्रं वहित्रं । ‡

११३४ । घञजनटोऽघे । (घञ्-अच्-अनटः १॥, अघे ७।) ।
घोरेते स्युर्न तु घे । प्राकारः, पादः, दासः, उपाध्यायः,

---

ञिः, वृषि, (७८०) णोस्थाने अ इति वृषिः । सर्नाविंशुरित्यादी (६४१) श्रुकर्जनात् न णेर्लोपः । उणादिः । तत्र तु ञादिरप्ये ञपिर्दृश्यते ।

* कॄ श विक्षेपे, गॄ श निगरणे गॄ ञि शब्दे इति द्वयं, जागृ षङ्क जागरे । किरतीति कीर्विः, (१०११) इत्वतेरित्ति इत्वनिषेधे, (६२६) इर्, (२८८) दीर्घः । एवं गिरति ग्रणाति वा गीर्विः । जागर्तीति जागृविः (६९८) वि-वर्जनात् न गुणः । उणादिः । क्विः जागर्विरिति तु संक्षिप्तसारः ।

† डु डकार्य डित्वात् (१२६) टिलोपः । सतत्-प्रयोगेषु वाच्यलिङ्गत्वम्ऽभिधानात् । पाणिनिः ३।२।१८०, वार्त्तिकञ्च ।

‡ लू ञ छिदि, धू ञ कम्पे, षू ञ मि प्राणिगर्भविमोचने, खनु ञ अवदारणे, षु ञ प्रसवे, चर गती भक्षणे च, पूञ् ञि शोधे, षह ञि मर्षणे, वह ञ प्रापणे । पवित्र-चरित्राणि पुंसि स्त्रियाम् च इत्यादि शब्दानि । पाणिनिः ३।२।१८४-१८६ । एतच्चाते पवित्रम् इत्यादिविधानम् । देववाचां कर्त्तरि पवित्र ।

प्रासादः । समाजः, भ्रमः, वमः वामः आचामः, चमः चामः यमः यामः विश्रमः विश्रामः । *

**११३५ । कभावेऽमौ ।** (क-भावे ७।, अमौ १।।।) । †

प्रघसः, वधः, करः निलयः समजः भयः लयः ।

ध्मानं म्लानं दानं प्रदीपनं, वयनं यजनं, दरिद्राणं शयनं । ‡

---

* घस्य वर्जनात् कर्मादि-कारके भावे च वाच्ये इत्यर्थः । भावो धात्वर्थः, क्रियामात्र-वाचीति यावत् । क्रियायाश्च अवस्थाद्वयं भवति, तथाच—अवस्थे द्वे क्रियायाः स्तः साध्यता सिद्धतापि च । साध्यता त्यादि-वाच्या स्यात् सिद्धता द्रव्यवत् भवेत् । द्रव्यवत्त्वे घञादिः स्यात् योगो लिङ्गेन संख्यया इति । तेन पाकः पाकौ पाकाः इत्यादि । पाणिनिः ३।३।१८, १९,५६-८०,११५-११७ । एतन्मते घञ्, अप्=अल् । ल्युट्=अनट् ।

घञो घकारः (९०१) घत्वोः ज्ञापनार्थः, ञकारः (५७७) वृद्ध्यर्थः । यथा पाकः त्यागः इत्यादि । अलो लकारः कालन्त्यानुयायी । अनटष्टकारः (२५७) ईवर्थः । भाजन इत्यादि । प्रकर्षेण क्रियतेऽसौ, कर्मणि घञ्, वृद्धिः । अत्र दीर्घविधानात् घञन्तधातौ परे क्वचिदुप-सर्गस्य दीर्घत्वं स्यादिति सूचितम् । तथाच—उपसर्गस्य दीर्घत्वं क्विप्-घञादौ क्वचित् भवेदिति प्राचः, ("उपसर्गस्य घञि अमनुष्ये बहुलम्" इति पाणिनिः (६।३।१२२), मनुष्यभिन्ने इति किं, निषादः ।) यथा—प्रासादः नीहारः नीवारः प्रतीकारः प्रतीहारः व्यतीहारः व्यती-पातः प्रतीवेशः परीवादः अतीसारः, क्विपि परीतत् नीवृत् (१०४२,१०४६ सूत्रटीका द्रष्टव्या) इत्यादि । 'क्वचिद्भवेत्' इत्यनेन 'बहुलम्' इत्यनेन च क्वचिन्नित्यम् यथा नीवारः, क्वचिद्विकल्पः यथा प्रतिवेशः प्रतीवेशः, क्वचिन्न भवेत् यथा प्रहारः । "वेशादिषु विभाषा" इति काशिका ।

पच्यतेऽनेनेति पाकः, दीयतेऽस्मै दायः, उपेत्य अधीयतेऽस्मात् उपाध्यायः, प्रसीदन्ति (प्रसन्नाः) अस्मिन् प्रासादः इति कारकोदाहरणानि । भावे यथा, समजनं समाजः समूहः, (५८६) अज्वर्जनात् न वी-भावः । भ्रमणं भ्रमः, घञि वृद्धौ, (७४४) अनवचेति ह्रस्वः । वाम इति (५९८) वारि इति निकोऽप्राप्तिपक्षे घञि वृद्धिः, अनवचेत्यत्र चमेर्वर्जनात् न ह्रस्वः, एवं चामः आचामः । क्लम वम विश्रमां वा ह्रस्वः चमः चामः इत्यादि ।

† पूर्वसूत्रे घञादयः कर्तरि न स्युरित्युक्तापि, अत्र सूत्रे अमौ सर्वकारकेषु भावे च स्युरित्युक्तम्, प्रयोगानुसारेण क्वचित् कर्त्तर्यपि स्युरिति सूचितम् । यथा, चलि चलतीति चेलः, अतिचरतीति अतीचारः इत्यादि । अन्यत्र पूर्वसूत्रे संज्ञायाम्, अत्र असंज्ञायामिति । पाणिनिः ३।३।११९ ।

‡ घञि प्राप्तेऽपि, अत्तीति प्रघसः, (९०१) घसो घसादेशः । हननं वधः, ([illegible])

११३६ । ष्ठीवन-सीवने वा । (ष्ठीवन-सीवने १॥, वा ।१।)।

एते निपात्येते वा । पक्षे ष्ठेवनं सेवनं । *

११३७ । सुप् खभोऽनेकदुःसोर्गेः खल्घञोः ।

(सुप् ।१।, खभः ६।, अन्-एक-दुः-सोः ५।, गेः ५।, खल्-घञोः ७।)।

केवलदुःसुवर्जात् गेः परस्य खभो मुप् स्यात् खलि घञि च । प्रलम्भः । सम्प्रलम्भ दुर्लभः । एवेति किं, अतिदुर्लभः । †

११३८ । स्वदेधावोद् हिमश्रथ प्रश्रथ स्फार स्फाल राग काय निकायाकायाः । (१॥)।

एते घञन्ता निपात्यन्ते । स्वदो वेगः । एध वृधं । अवोद अवक्लेदः । हिमश्रथः हिमश्रन्थनं । प्रश्रथः प्रश्रन्थनं । स्फारः

---

इमौ घञादिशः । क्रियतेऽनेन करः । निगीर्यतेऽनेन निगरः, (७३५) अयवर्जनात् न ञः । समजनं समजः, (५८६) अव्यवर्जनात् न वी-आदेशः । कु सि व न षेपे वौ च न वर्ष इति शब्दो भावे अल् नवः, (७३५) अव्यवर्जनात् ञः । एवं वौ वृ व वो त्रिपि, यवनं यवः । अनट् यथा, भावते इति भावेऽनट् भानं । भा-अदपायां निम्नोष (७३५) ञादिशे भानं । दा-कृदपायां दीक्ष्य (७३२) ञादिशे दानं । प्रवेपनजिति (२६८) वीपवर्जनात् न वलम् । अज-अनट् (५८६) विकल्पेन वी-आदेशे वयनं अजनं । दरिद्रायतेति (७०२) अनवर्जनात् आलोपः । वी उ व यवनं यवनं । कारके अनट् यथा—क्रियतेऽनेनेति करणः करः, यथनी रज्जुरित्यादि ।

* ष्ठिवु निरसने, षिवु तन्तुसन्ताने एतयोर्भावेऽनटि दीर्घो वा निपात्यते, पक्षे गुणः । "ष्ठिवुक्लमुचमां शिति" इति अनुशासनम् । पृषोदरादित्वादिति पाणिनीयाः ।

† [illegible] (वक्तव्यो) न वौ दुःसु केवलदुःसु, न विद्यते एवकदुःसु, यत्र सोऽनेकदुःसुः तस्मात् । तुमौ च इत् अत्यायः परः, धकारविशेषः, कृत्विति । सुलभः इति, अपि चनेन सुप् । केवलदुःसुवर्जनात् दुर्लभः, एवं सुलभः । अतिदुर्लभः इत्यत्र न केवलदुः । (७३१) सुप्ट्य इत्यनेन विहितेऽपि एतद्विधानं नियमार्थम् । पाणिनिः ७।१।६७,६८ ।

स्फोरणं । स्फालः स्फोलनं । रज्यतेऽनेनेति रागः । कायो देहः । निकायो निवासः । आकायश्चितिः । *

११३९ । खनो घ-डरेकेकवकाः ।

(खनः ५।, घ-डर-इक-इकवकाः १॥) ।

आखः आखरः आखनिकः आखनिकवकः । †

११४० । व्याप्तौ भावे णिनः ।

(व्याप्तौ ७।, भावे ७।, णिनः १।) ।

धोर्भावे णिनः स्यात् व्याप्तौ सत्यां । णिनान्तात् स्वार्थे ष्णः । सांराविणं वर्त्तते । ‡

११४१ । व्यतीहारे णन् स्त्रौ ।

(व्यतीहारे ७।, णन् ।१।, स्त्रौ ।१।) ।

---

* स्यन्द् ङ स्रुतु चरणे स्यदः, वेगादन्यत्र स्यन्दः । जि इन्धी ङ द्युतौ एधः काष्ठम्, अन्यत्र इन्धः । अपपूर्व्व उन्द क्ली क्लेदे अपोदः, अपादन्यत्र उन्दः प्रोन्दः । श्रन्थ श मोचे, हिमश्रन्थ्यत्र हिमश्रथः प्रश्रन्थन प्रश्रथः, अन्यत्र श्रन्थः परिश्रन्थः । स्फुर स्फुल च छि स्फूर्त्तौ अनयोः स्फारः, स्फालः । स्फार इति (७८१) ओजीक इत्यनेन आ-हते, स्फुलधातोश्च स्फाल इति सिद्धावपि, निपातनं, पक्षे स्फोरः स्फोल इति अनिष्ट-निवारणार्थम् । रञ्जी ञ रागे, करणे भावे वा रागः, अन्यत्र रङ्गः । चि ञ न चित्यां कायः, निकायः, आकायः, अन्यत्र चायः, निचायः, आचाय इति । चितिश्चितेत्यर्थः । पाणिनिः ६।१।४७, ६।४।२७,२८,२९, ३।३।४१ ।

† खन-धातोः घ डर इक इकवक एते स्युः कभावे इत्यर्थः । ड-डरयोः डित्त्वात् टिलोपः । वार्त्तिकम् ।

‡ णिनक च इत् इत्यर्थः । संपूर्व्व रु क शब्दे भावे णिने, इद्धौ, संराविन् इति स्थिते, (४११) आर्द्धे णे, (४१६) णिते णिरिति आयश्चो वृद्धौ, (२५८) नलोपे इत्यकार-लोपे, सांराविणं, बहूनां सम्भूय रवणमित्यर्थः । पाणिनिः ३।३।४४, ५।४।१५ ।

योर्भावे घञ् स्यात् व्यतीहारे, घञन्तात् स्वार्थे ष्णः, तदन्तञ्च स्त्रियां । व्यावहारी ।*

११४२ । ट्वितोऽथुर्भावे ।

(ट्वितः ५।, अथुः १।, भावे ७।) ।

टुकारेतो धोरथुः स्यात् भावे । वेपथुः ।†

११४३ । ड्वितस्तज्जे त्रिमक् ।

(ड्वितः ५।, तज्जे ७।, त्रिमक् १।) ।

डुकारेतस्त्रिमक् स्यात् धात्वर्थाज्जाते । करणाज्जातं कृत्रिमं ।‡

११४४ । स्वप रक्ष यत प्रच्छ विच्छ याच यजो नङ् भावे न ञिः ।

(स्वप—यजः ५।, नङ् ।१।, भावे ७।, न ।१।, ञिः १।) ।

---

* घञो घकारो वृद्ध्यर्थः, ञकारस्तु (१०००) दुगोभूञ्धादीति घप्रत्ययेन सह भेदार्थः, तत्फलञ्च (४१७) यौर्युमदाव्नोत्य व्यक्तम् । चकार-स्थितिः । परस्परव्यवहरणम् इति वाक्ये व्यावहारी, व्यव-हृ घञ्, (५००) वृद्धिः, व्यवहार इति स्थिते, (४२१) स्वार्थे ष्णः, (४१७) [यौर्युम इत्यत्र घञन्तवर्जनात् वकारस्य न युम्, (४१६) आयचो वृद्धिः, (२५८) अकारलोपः, (२५७) स्त्र्यादीप्, पुनः अकारलोपः । एवं परस्पर-व्याक्रोशनं व्याक्रोशीत्यादि । पाणिनिः ३।३।४३, ५।४।१४ ।

† टु इत् यस्य स ट्वित् तस्मात् । [illegible] व्यतीहारस्य [illegible] । वेपनं वेपथुः । एवं वमथुः श्वयथुः क्षवथुरित्यादि । पाणिनिः ३।३।८९ । 'भावादौ' इति तु काशिका । 'अथमपि स्वभावात् भाव एव' इति तु सिद्धान्तकौमुदी ।

‡ डु इत् यस्य स ड्वित् तस्मात् । तस्मात् (धात्वर्थात्) जातं तज्जं (९९०) समासेन सिद्धं, तस्मिन् । डु कृ ञ इत्यस्मात् त्रिमक्, क्रियादगुणे कृत्रिमं, एवं डु दा ञ दत्त्रिमं (१०८८) दा स्थाने दत्, डु पा ञ (१०८९) [illegible], डु पच ष पक्त्रिमं, डु वप् उप्त्रिमं, डु धे ञ [illegible]मित्यादि । पाणिनिः ३।३।८८, ४।४।२० । 'भावेऽर्थेऽपि च कारके' इति तु काशिका । 'अयं भाव एव स्वभावात्' इति तु सिद्धान्तकौमुदी । वस्तुतस्तु [illegible] [illegible] ।

एभ्यो नङ् स्यात् भावे; न च ञिः। स्वप्नः रक्ष्णः यज्ञः प्रश्नः विश्नः याच्ञा यत्नः। *

११४५। किर्दोऽन्तर्गेः। (किः १।, दः ५।, अन्तर्-गेः ५।)।

अन्तरो गेश्च परात् दा-संज्ञकात् किः स्यात् भावे। अन्तर्धिः आदिः। †

११४६। ढाद्डे। (ढात् ५।, डे ७।)।

ढात् परात् दः किः स्यात् डे। वारिधिः पयोनिधिः। ‡

११४७। क्तिः स्त्र्यघे। (क्तिः १।, स्त्री ।१।, अघे ७।)।

धोः क्तिः स्यात् न तु घे, तदन्तश्च स्त्रियां। कृतिः बुद्धिः मतिः स्मृतिः प्रकृतिः। (१०८२) कृपादेः लः क्तौ चेति। प्रक्लृप्तिः, भूतिः फुल्लिः। §

---

* नङो ङित्वात् गुणाभावः, न-ञित्वं। न ञिरिति निषेधात् (६६१) यङस्यपाद्योरिति प्राप्तस्य वृद्धिनिषेधः। प्रश्नः विश्नः उभयत्र (८१४) छ्वोः शूट्यविति छस्य शः। याच्ञा इति (४६) नस्य ञः, अभिधानात् स्त्रीत्वं, (२४९) आप्। यज्ञ इति (४६) नस्य ञः। एषु (१०२२) छ्वतेरिति इम्निषेधः। पाणिनिः ३।३।९०,९१। "भावेऽकर्त्तरि कारके चेति वर्त्तते। अतएव यज्ञेन यज्ञमयजन्त देवा इत्यत्र इज्यते यज्ञ इति व्याचष्टे" इति तत्त्वबोधिनी।

† अन्तर्धानम् अन्तर्धिः, आदानम् आदिः, कित्वादगुणे, (६१०) दधोचौति आलोपः। पाणिनिः ३।३।९२, वार्त्तिकञ्च। 'भावेऽकर्त्तरि च कारके इति वर्त्तते' इति काशिका। अतएव 'उपाधीयतेऽनेनेत्युपाधिः' इति सिद्धान्तकौमुदी। 'एतेन उप समीपे स्वकर्मकमादधातीत्युपाधिः आहुलकात् कर्त्तरि किरिति माधवादिग्रन्थो नादर्त्तव्य इति ध्वनितम्। विधातः विधानम् विधिरित्यत्रापि कर्त्तरि मा भूत् किः किन्तु विध विधाने इत्यस्मादिगुपधात् किदितीगि रूपसिद्धिः' इति तत्त्वबोधिनी।

‡ डे अधिकरणवाच्ये। वारि धीयतेऽस्मिन्, पयांसि निधीयतेऽस्मिन् इति वाक्यद्वयम्। पाणिनिः ३।३।९३।

§ क्त प्रत्ययो, अस्य वर्त्तनात् कर्तृभिन्न-कारके भावे च वाच्ये इत्यर्थः। क्रियतेऽसौ इति कर्मणि, करणमिति भावे वा, कृतिः। बुध्यतेऽनया इति करणे, बोधनमिति भावे वा, बुद्धिः, (६०५) तस्य ध, (६४) धस्य दः। मननं मतिः, (६७६) अम्लोपः। स्मरणं स्मृतिः।

## ११४८। कॄ गॄ ज्याम्लाह्लाल्वादेर्निः।

(कॄ—ल्वादेः ५।, निः १।)।

एभ्यः परस्याः क्ते निः स्यात्। कीर्णिः गीर्णिः ज्यानिः म्लानिः ह्लानिः लूनिः पूर्णिः। *

## ११४९। साति हेति यूति जूति। (१।)।

स्यति-हिनोति-यौति-जवतीनां क्तेनी लयन्ता निपात्यन्ते। †

## ११५०। श्री व्रज यज विद स्वास मन चर भटाट्येन समज निपत निषदः क्यप्।

(श्री—निषदः ५।, क्यप् ।१।)।

एभ्यो भावे क्यप् स्यात् तदन्तश्च स्त्रियां। श्रय्या व्रज्या इज्या विद्या सुत्या आस्या मन्या चर्या भृत्या अटाट्या इत्या समज्या निपत्या निषद्या। ‡

---

प्रक्रियतेऽनया करणे प्रक्षतिः। प्रस्रादनं प्रक्षप्तिः, (१०११) इण्वतेरितीण्निषेधः (प्रक्षप्तिरिति तु सिद्धान्तकौमुदी, तत्तु चिन्त्यम्। भूयते ऽनया भूतिः सम्पत्तिः, भवनमिति वा, (१०५१) वृङ्श्रीति इण्निषेधः। फणनं फुण्तिः, (१०८०) चरफलोऽदुरिति चकारस्य उः। पाणिनिः ३।३।९४।

* लू आदि यस्य स ल्वादिः, कॄ गॄ ज्या म्ला ह्ला आदिश्च, समाहारे तस्मात्। ल्वादिश्च (७९९) सूत्रटीकायां द्रष्टव्यः। कीर्णिरिति, क्तेः स्थाने निः (१०५१) इण्निषेधः, (६२८) ऋतस्थाने इर्, (२२८) दीर्घः। एवं गीर्णिः। ज्यानिरित्यत्र क्तेः स्थानिवद्भावात्‌ (६६१) न ञिः। ह्लानिरिति ह्ला-क धातोः क्तेः स्थाने निः, (६१२) ह्लानामैवाक इति...कत्वाभावात् न ञी। ("श्री ह्लाक् ह्लानिरपचयः" इति तु संक्षिप्तसारः)। लूनिरिति (१०५१) इण्निषेधः... पूर्णिरिति पृ-धातोः। पूर्णिरिति तु पूर-धातोरेव। तृपर्ण संक्षिप्तसारे च तु ...र्णिरिति। उणादिः, वार्त्तिकञ्च।

† षो क्षये, हि गत्यां वर्द्धने च, यु च मिश्रणे, जु गतौ, एषामेते क्तीनां रूपाणि। सातिरित्यत्र, (१०८३) दोषोमास्थां क्तिरिति न क्तिः। पाणिनिः ३।३।९७।

‡ षच, सूचे भाषे इति. क्तीनां... क्यौ भावे इति व्याख्यानात्. मवीनांदसारेष

११५१ । कृञः श च । (कृञः ५।, शः १।, च ।१।)।

करोतेः शः स्यात् क्यप् च, भावे, स च स्त्रियां । क्रिया, कृत्या । *

११५२ । सृ-जागृ र्यः । (सृ-जागृः ५।, यः १)।

आभ्यां यः स्यात् भावे, स च स्त्रियां । परिसर्य्या जागर्य्या । †

११५३ । शंस्यादेः । (शंस्-आदि ५।, अः १)।

आभ्यामः स्यात् भावे, स च स्त्रियां । प्रशंसा, दिदृक्षा अटाटा कण्डूया । ‡

---

कर्त्तृभिन्ने कारकेऽपि स्यात्, यथा, शेतेऽस्यामिति अधिकरणे शय्या खट्वादिः, शयनमिति भावे वा, क्यप्, (८३५) शीङो ङ्य, स्त्रीत्वात् (२४८) आप् । व्रजनं व्रज्या । यजनम् इज्या (६६१) जिः । विदन्त्यनया इति करणवाच्ये विद्या, वेदन (ज्ञानं) इति वा । सवनं (यजनं) सुत्या, (९८२) तम् । आसनम् आस्या । मन्यतेऽनया मन्या (पश्चाद्ग्रीवाशिरा), मननमिति वा । चरणं (आचरणं) चर्या । भरणं (पोषणं) भृत्या । अट-यङ्, अटाट्यधातोः क्यप्, (७७५) यसालोप इति क्रमशः अकार-यकारयोर्लोपः अटाट्या पुनःपुनर्भ्रमणम् । एति यनया, अयनं वा, इत्या । (ईयतेऽनया इत्या शिविका इति भट्टोजिः ।) समजन्ति (सङ्गच्छन्ते) अस्यामिति समज्या सभा, समजनमिति वा । (५८६) क्यप्वर्जनात् न वी-आदेशः । निपतन्त्यस्यामिति निपत्या, पिच्छिला भूमिः । निषीदन्त्यस्यामिति निषद्या, क्रयविक्रयभूमिः । पाणिनिः ३।३।९८,९९, वार्त्तिकञ्च ।

* प्रत्ययात् र-संज्ञः, अकार-स्थितिः । कृ-शः, (भाववाच्ये) (९२१) र-तनोरिति यक्, (६९०) ऋत् रिः, स्त्रियामाप्, क्रिया । अपि च, पुंभावे, (९८२) तम्, कृत्या । अत्र अकारेण लोऽपि बहुलत्वात् कृतिः इति च । पाणिनिः ३।३।१०० ।

† परिसरणं परिसर्य्या, परिपूर्व्वस्यैव प्रयोगः । जागरणं जागर्य्या । वार्त्तिकम् ।

‡ प्रत्ययान्त च धातोरिति शंस्यं तस्मात् । अः प्रत्ययान्तः । प्रशंसनं प्रशंसा । दृश-सन्, (५३४) सुक् (६०२) सस मः, दिदृक्ष-धातोः अ-प्रत्ययः, (५४२) पूर्व्वाकारलोपः, दिदृक्षा । एवं चिकित्सा प्रभृति । अटाटा इति अट-यङ्, अटाट्यधातोः अः, (७७५) यकार-यकारयो-र्लोपः । कण्डूया इति कण्डूशब्दात् (८५४) यः, कण्डूय-धातोः अः । अयः परत्वात् (७०५)

**११५४ । सेमूक्तात् यतोः ।** (सेमूक्तात् ५।, यतोः ५।)।

यस्मात् क्तो विहितः सेम् स सेमूक्तः, तस्मात् यमतो धोः घः स्यात् भावे, स च स्त्रियां । ईहा आगरा । सेमूक्तात् किं, नीतिः रातिः । यमतः किं, पक्तिः । *

**११५५ । तुलेच्छाऽऽरा तारा धारा कारा क्षारा गोधा लेखा रेखा चूडाः ।** (१॥)।

एते घान्ता निपात्यन्ते । चोदना चूडा । †

**११५६ । भीषि चिन्ति पूजि कथि कुम्बि चर्चि स्पृहि तोलि दोलि षिद् भिदाद्यात्वर्घटादेङः ।** (भीषि—घात्वर्-घटादेः ५।, ङः १।)।

---

न धकार-यकार-लोपः । एवं ऋतीया गोपाया इत्यादि । पाणिनि ३।३।१०२ । "शंसिप्रत्ययादः" इति कातन्त्रे कृत्सु पञ्चमे पादे ।

* इमा सह वर्तते यः स सेम्, सेम् क्तो यस्मात् स सेमूक्तस्तस्मात् । सेमूक्तात् [illegible]-युक्तात् धातोः घः स्यादित्यर्थः । ईहनं ईहा, आगरणं आगरा । क्ते कृते ईहितं आगरितं । नयनं, नीयतेऽनया इति वा, नीतिः ; रायनं रातिः । क्ते कृते नातं रातं । पक्तिरिति पच-क्तिः, क्ते पक्तिमिति । पाणिनिः ३।३।१०१, वार्त्तिकञ्च ।

† तुल धातोः, तोलयन्त्यनया तुला परिमाणदण्डः । इच्छ-धातो-रिच्छा । क्षर—क्षारा छुरिका । तॄ—तारा नक्षत्रं, उद्धारकारिणी भगवती च । धृ—धारा, [illegible], [illegible], [illegible], प्रकारश्च । कृ—कारा, बन्धनालयः । क्षर—क्षार [illegible] । गुध—गोधा चर्मकृमिः, गोधिका च । लिख—लेखा लिखनं, [illegible] रेखा च, सेवी । चुद—चूडा, चोदना प्रेरणा इत्यर्थः । पाणिनिः ३।३।१०१, १०४ । एतस्मात् धातवः सर्वे भिदादिगणपठिताः [illegible], न तु घान्ताः, तुलादयस्तु घञन्ता इत्यन्ये [illegible] ।

एभ्यो भावे ङः स्यात्, स च स्त्रियां ।
भीषा चिन्ता पूजा कथा कुम्बा चर्चा स्पृहा तोला टोला, पचा, भिदा छिदा गुहा विदा चिपा जना पीड़ा सरा वसा वजा, घटा व्यथा त्वरा । *

११५७ । आतोऽन्तःसद्गेः ।

(आतः ५।, अन्तर्-सत-गेः ५।) ।

एभ्यः परादादन्तात् ङः स्यात्, स च स्त्रियां । अन्तर्धा श्रद्धा, संज्ञा प्रमा । †

११५८ । औ-षि श्रन्थि ग्रन्थि वेत्ति वन्दासो ऽनः ।

(षि—धातः ५।, अनः १।) ।

एभ्योऽनः स्यात्, स च स्त्रियां ।

---

* ष इत् यस्य स षित् । भिद आदिर्यस्य स भिदादिः । घात्वर् त्वरपर्यन्तः, स चासौ घटादिश्चेति घात्वर्घटादिः । ततः, भीषिश्च चिन्तिश्चेत्यादि द्वन्द्वे तस्मात् । भीष्यादि-दीपि-पर्यन्ता नव धातवः । षित् गणपाठे मूर्धन्यषकारेत् धातुः । भिदादिर्गणः । ङ-प्रत्ययस्य ङ इत्, अकारस्थितिः । भी-ञि, भीषि-ङः, (६४१) ञेर्लोपः, (२४९) आप् भीषा । एवं चिन्ता इत्यादि । पचा इति डु औ ष् पच पाके, षित्त्वात् ङः । एवं मृजा, क्षमा इत्यादि। भिदादिर्यथा, भिदा छिदा गुहा विदा चिपा एषु ङित्त्वात् न गुणः । जना इति (२१०) जनगमित्यस्य ङवर्जनात् न उङ्लोपः । सरा इति (६१८) हृमोरिति गुणः । घात्वर्-घटादिर्यथा, घटा व्यथा त्वरा । एवं जृ जरा, प्रथ प्रथा, चप चपा, लज्ज लज्जा, मेथ मेथा, वप वपा, क्षप क्षपा इत्यादयः । पाणिनिः ३।३।१०४,१०५ । भीषि इत्यारभ्य दीपि इत्यन्तः पूर्वं पठितं ज्ञातव्यम् ।

† अन्तर्धानम् अन्तर्धा, एवं श्रद्धा, श्रत् इत्यव्ययम् । संज्ञायतेऽनया संज्ञा नाम । प्रमीयतेऽनया प्रमाणमिति वा प्रमा । एषु (६१०) आतोऽचीति आ-लोपे, स्त्रीत्वादाप् । पाणिनिः ३।३।१०६, वार्त्तिकञ्च ।

कारणा ईषणा श्रन्थना ग्रन्थना वेदना वन्दना घासना । *

११५९ । प्रश्नाख्याने ञिः । (प्रश्न-आख्याने ७, ञिः ।१) ।

प्रश्ने आख्याने च धोर्ञिः स्यात्, स च स्त्रियां । कां कारिमकार्षीः, सर्वां कारिमकार्षं । †

११६० । नञोऽन्याक्रोशे स्त्री ।

(नञः ५।, अनि ।१।, आक्रोशे ७।, स्त्री ।१।) ;

नञः परात् धोरनिः स्यात् आक्रोशे, स च स्त्रियां ।
अजीवनिस्तव भूयात्, अप्रयाणिः । ‡

११६१ । ईषत्-दुःस्वोः खल् भावे ढे ।

(ईषत्-दुर्-सोः ५।, खल् ।१।, भावे ७।, ढे ७।) ।

एभ्यः परात् धोः खल् स्यात् भावे ढे च । ईषदाढ्यम्भवं भवता, दुराढ्यम्भवं भवता । ईषत्करः कटस्त्वया, दुष्करः सुकरः । §

---

* ञिसंज्ञकः, ञिच ईषियेत्यादि इत्यः । कारि-अनः कारणा इत्यादि । एतु (६४१) अेर्लोपः । पाणिनिः ३।३।१०७, वार्त्तिकञ्च । "इषेरनिच्छार्थस्य" इति वार्त्तिके तु इषधातोः अन्वेषणा । कातन्त्रे तु ईषिधातुर्लिखितः ।

† ञि इत्यस्य च इत् इत्यर्थः, इ-स्थितिः । कृ-ञिः, (५००) इञिः, कारिः कार्य्यमित्यर्थः, अकार्षीः अभूदिति प्रश्नः, अकार्षं अकरमिति शेषः । प्रश्ने आख्याने (उत्तरदाने) च उदाहरणद्वयम् । पाणिनिः ३।३।११० । एतन्मते विभाषा । विभाषाग्रहणात् पक्षे यथाप्राप्तं प्रत्यया भवन्ति, क्रियां कृत्यां कृतिं वा ।

‡ आक्रोशः शपनम् इति कालिका । अ-जीव-अनिः अजीवनिः, अ-प्र-या-अनिः अप्रयाणिः (२५८) णोऽपं इति णत्वम् । व्यभिचारेऽपि जीवनं व्यभिचारेणेत्यर्थः । आक्रोशे किं, अकृतिस्तस्य पटस्य । नञः किं, मृतिस्ते इति भूयात् । पाणिनिः ३।३।११२ ।

§ खलः ख-ली इतौ, अकारस्थितिः । एषामव्ययत्वात् (१०१६) षितो-भावेऽपि, ईषत्दुःस्वोः परात् भातोः खल्विधानसामर्थ्यात् भावादिष्वप्यर्थेष्वपि

## ११६२ । आतो ऽनो ऽदरिद्रः ।

(आतः ५।, अनः १।, अदरिद्रः ५।) ।

दरिद्रावर्जादादन्ता-दीषद्दुःसोः परात् अनः स्यात् भावे ठे च ।
ईषत्पानः दुष्पानः सुपानः । अदरिद्रः किं, ईषद्दरिद्रं । *

## ११६३ । दृश शास युध धृष मृषो वा ।

(दृश—मृष ५।, वा ।१।) ।

ईषत् दुः सोः परेभ्य एभ्यो ऽनः स्यात् भावे ठे च वा । सुदर्शनः सुदर्शः, दुःशासनः दुःशासः, दुर्य्योधनः दुर्य्योधः, सुधर्षणः सुधर्षः, ईषन्मर्षणः ईषन्मर्षः । †

## ११६४ । तादर्थ्ये अतुम् । (तादर्थ्ये ७।, अतुम् ।१।) ।

धो-अतुम् स्यात् तादर्थ्ये । कन्यां द्रष्टुं याति । ‡

---

आदिति, तेन, ईषदाढ्येन भूयते इति वाक्ये ईषदाढ्यशब्दात् भूधातो र्भावे खल्, गुणः, च्विवत्वात् आढ्यस्य मुम् ईषदाढ्यम्भवं, एवं दुराढ्यम्भवम् । ईषत् क्रियतेऽसौ ईषत्करः, एवं दुःखेन क्रियतेऽसौ, सुखेन क्रियतेऽसौ, एषु अव्ययत्वात् न मुम् । पाणिनिः ३।३।१२६ ।

* ईषत् पीयतेऽसौ, दुःखेन पीयतेऽसौ, सुखेन पीयतेऽसौ, एषु कर्म्मणि अनः । ईषत् दरिद्रायते इति पूर्व्वेण भावे खल्, (७०२) दरिद्र आलोपः । पाणिनिः ३।३।१२८ ।

† सुखेन दृश्यतेऽसौ, अनः सुदर्शनः, पक्षे खल् सुदर्शः । दुःखेन शिष्यतेऽसौ दुःशासनः दुःशासः । दुःखेन युध्यतेऽसौ दुर्य्योधनः दुर्य्योधः । एवं सुखेन धृष्यतेऽसौ, ईषत् मृष्यतेऽसौ । वार्त्तिकम् । एतन्मते नित्यम् । कातन्त्रमते विभाषा ।

‡ स धात्वर्थः, स चासौ अर्थः प्रयोजनश्चेति तदर्थः, तस्य भावस्तादर्थ्यं तस्मिन् । यस्य धातोरर्थः अन्य-धात्वर्थस्य प्रयोजनं भवति तस्मात् धातोः अतुम् स्यात्, अ इत् अव्ययं, तुम्-स्थितिः । अत्र भावे वाच्ये भविष्यत्काले चेति बोध्यम् । द्रष्टुमिति दृश-तुम्, (६०४) ऋकारस्य अम्(१०३) [illegible], (४७) लस्यानि ट । अत्र दृश-धात्वोरर्थः या-धात्वर्थस्य प्रयोजनम् । अयं [illegible] क्रियार्थेषु धातुषु उपपदेषु एककर्तृकत्वमभिहितम् । (पा. ३।३।१५८ ।) [illegible] एककर्तृकाभावे [illegible] क्रियायाः अनुपादानात् [illegible] एककर्तृकत्वम् । अतएव [illegible] सुखेन अतुम् स्यात्, तेन विप्रं भोक्तुं निमन्त्रयति इति न स्यात्, भोजनाय निमन्त्रयति इत्येव स्यात् । पाणिनिः ३।३।१० ।

## ११६५ । क्त्वाच् वा निषेधे ऽलं-खलुना ।

(क्त्वाच् ।१।, वा ।१।, निषेधे ७, अलं-खलुना ३।) ।

निषेधार्थयोरलं-खल्वोर्योगे धोः क्त्वाच् स्याद्वा भावे ।
अलं दत्त्वा अलं दानेन, खलु पीत्वा खलु पानेन । *

## ११६६ । पूर्व्वकाले । (७।) ।

पूर्व्वस्मिन् काले स्थितात् धोः क्त्वाच् स्यात् । विष्णुं नत्वा स्तौति । †

## ११६७ । न कित् स्कन्दस्यन्दः ।

(न ।१।, कित् ।१।, स्कन्द-स्यन्दः ५।) ।

स्कन्त्वा स्यन्त्वा । ‡

---

* क्त्वाच-चकारोऽव्ययार्थः, क इत् गुणाभावः, त्वा-स्थितिः । अलं दत्त्वा दानं निषिद्धमित्यर्थः, (१०८८) दा-स्थाने दत्-आदेशः, पक्षे दानेन (२८९) सहयाद्यर्थेनेति तृतीया । खलु पीत्वा पानं निषिद्धमित्यर्थः, (६१२) दामा इति ई । पाणिनिः ३।४।१८ ।

† यदा कर्त्ता क्रियाद्वयं क्रियात्रयं वा करोति, तदा परक्रियापेक्षया पूर्व्वस्मिन् काले वर्त्तमानात् धातोः भावे क्त्वाच् स्यादित्यर्थः । विष्णुं नत्वा स्तौतीति स्तुतिक्रियायाः पूर्व्वकाले वर्त्तमानात् नम धातोः क्त्वाच, (६७६) अम्लोपः । नमति च स्तौति च इत्यादौ समकालत्वात् न स्यात् । तथापि, क्रियाणामेककर्तृकत्वे एव क्त्वाच् स्यादिति । पुत्रं दृष्ट्वा सुखं भवतीत्यादौ तु स्थितस्याध्याहारादेककर्तृकत्वम् । भ्रमत्रास्य पतति, मुखं व्यादाय स्वपिति इत्यादौ तु पूर्व्वकालाविवक्षयेति वक्तव्यम् । (अपूर्व्वकालत्वादिति तु काशिका ।) पाणिनिः ३।४।२१ ।

‡ धातोः परः क्त्वाच् कित्र स्यात् । क्त्वाचः कित्त्वनिषेधस्य फलं (४६०) इत्युदन इति नलोपाभावः । स्कन्त्वा इति धौदित्वादिण्निषेधः, स्यन्त्वा इति ऊदित्वादिणो विकल्पपक्षे उदाहरणम् । उभयत्र धयो वर्गचयमौ मध्यमस्य लुप्यते इति द-लोपः । एतयोर्न्या क्त्वाच-एव कित्त्वनिषेधः, ल्यप-स्थानजातस्य यपस्तु कित्त्वमेवेति, तेन प्रस्कद्य प्रस्यद्य इति । पाणिनिः ६।४।२२ ।

११६८ । सेमऽक्षुध कुष क्लिश गुध मृड मृद वद वस ग्रहः । (सेम् ।१।, क्षुध—ग्रह: ५।) ।

धोः पर इम्सहितः क्त्वाप् कित्न स्यात्, नतु क्षुधादेः । मथित्वा । सेम् किं, स्नुत्वा । क्षुधादेः किं, क्षुधित्वा । *

११६९ । तृष मृष कृष वञ्च लुञ्चृतो वा । (तृष—ऋतः ५।, वा ।१।) ।

एभ्यः सेम् क्त्वाच् कित्न स्याद्वा । तर्षित्वा मर्षित्वा कर्षित्वा वञ्चित्वा लुञ्चित्वा अर्तित्वा । पक्षे तृषित्वा इत्यादयः । †

११७० । थफान्नुङः । (थ-फात् ५।, नुङः ५।) ।

नकारोङ्त्यान्तात् फान्ताच्च सेम् क्त्वाच् कित्न स्याद्वा । श्रन्थित्वा श्रथित्वा, ग्रन्थित्वा ग्रथित्वा, गुम्फित्वा गुफित्वा । नुङः किं, कोथित्वा रेफित्वा । ‡

---

* अत्र क्त्वा वर्तते योऽसौ सेम्, क्त्वाप् इत्यस्य विशेषणम् । मथित्वा इति मथौ-क्त्वा, (५५४) वसोरस्येतीम्, कित्त्वनिषेधात् (५४२) गुणः, (२५) एस्याने अय । क्षुधित्वा इति, एवं कुषित्वा क्लिशित्वा गुधित्वा मृडित्वा मृदित्वा उदित्वा उषित्वा गृहीत्वा । एषु क्षुधित्वा उषित्वा उभयत्र (१०६६) क्षुधवसेतीम् । क्लिशित्वा इति ऊदित्वात् (५७१) इम्पक्षे प्रयोगः । अन्येषु (५५४) वसोरस्येतीम् । उदित्वा उषित्वा गृहीत्वा इति (६६१) जिः । गृहीत्वा इति (७७१) इमो दीर्घः । पाणिनिः १।२।१८,७,८ । क्रोधित्वापीति भट्टोजिदीक्षितः ।

† ऋत इति ऋत धातुः । तर्षित्वा इत्यादिषु (५५४) वसोऽरस्येतीम्, कित्त्वाभावपक्षे यथासम्भवं गुणः नलोपाभावश्च, कित्त्वपक्षे तु गुणाभावो नलोपश्च । पाणिनिः १।२।२४,२५ । [illegible] तालव्यान्तः ।

‡ येन विधिस्तदन्तस्येति न्यायात् थान्तात् फान्ताच्चेति । श्रन्थित्वेत्यादि सर्वत्र (५५४) वसोऽरस्येतीम् । कित्त्वाभाव-पक्षे नलोपाभावः, कित्पक्षे (५६७) नलोपः । कोथित्वा रेफित्वा इति (११६८) सेमऽक्षुधेति कित्त्वनिषेधः, गुणः । पाणिनिः १।२।२३ ।

११७१ । नशू-जोऽनिमः । (नशू-जः ५।, अनिमः ५।) ।

नशो जान्ताच्च गुङ्गोऽनिमः परः क्त्वाप् किच्च स्याद्वा ।

नष्ट्वा नंष्ट्वा भक्त्वा भङ्क्त्वा । अनिमः किं, भञ्जित्वा । *

(८१८) व्युङ्गोऽवो वसादेरिति । द्युतित्वा द्योतित्वा, लिखित्वा लेखित्वा । वदादेस्तु वदित्वा विदित्वा मुषित्वा । अवः किं, देवित्वा । वसादेः किं, एषित्वा ओषित्वा । †

११७२ । पूक्लिशूदित इम् । (पू-क्लिश-उदितः ५।, इम् ।१।)

एभ्यः क्त्वाच इम् स्याद्वा । पवित्वा पूत्वा, क्लिशित्वा क्लिष्ट्वा, शमित्वा शान्त्वा । ‡

११७३ । क्रमो र्वी वा । (क्रमः ६।, र्वं: १।, वा ।१।) ।

---

* नश च ज चेति तस्मात् । नष्ट्वा इति, नश ष यू नाशे ऊदित्वात् (५०५) इमो-ऽभावपक्षे (७४१) गुण् टच इति गुण्, क्वित्पक्षे (५९०) न-लोपे, (११४) षक्, (४०) तस्मात् ष्ट । अकित्पक्षे नस्यानुस्वारः नंष्ट्वा इति । भक्त्वा इति, भञ्ज भी मोटने, औदित्वादिमो-ऽभावे, कित्पक्षे न-लोपे, (२११) कुत्, अकित्पक्षे (५०,५१) नस्यानुस्वारः, तस्य च ङः । भञ्जित्वा इति ऊदित्वात् (५०५) इम्, (११६८) सिमऽक्षुधेति कित्त्वनिषेधे, नस्यानुस्वारे, तस्य च ञः । अनिम्पक्षे तु भक्त्वा भङ्क्त्वा इति । पाणिनिः ६।४।३२ ।

† व्युङ्गोऽवो वसादेरित्यस्योदाहरणमात्र, धुक्लिशेत्यादि (५५४) वस्योदरणमेतीम् । देवित्वा इति दिवु क्रीडायाम् उदित्वात् (११७२) पूक्लिशूदित इति वा इम्, (११६८) नित्यकित्त्वाभावे गुणः । अनिम्पक्षे (८१४) द्यूत्वा इति । एषित्वा ओषित्वा इति ऊदित्वादनयोरपि वेम्-त्वादिम्पक्षे नित्य-कित्त्वाभावः । पाणिनिः १।२।२६ ।

‡ (१०५२) वृतुन्नीत्वनेन चित इम्-निषेधादप्राप्तौ विकल्पार्थं पू इत्यस्य ग्रहणे, पवित्वा (११६८) सिमऽक्षुधेति कित्त्वनिषेधात् गुणः । तथैव क्लिशग्रहणात् क्लिशित्वेत्यत्र न गुणः । शान्त्वा इति (१०२८) अनुङ इति दीर्घः, नस्यानुस्वारस्तस्य च नकारः । पाणिनिः ७।२।५६, ५१;५६ ।

क्रमित्वा, क्रान्त्वा क्रन्त्वा । *

११७४ । जृव्रश्चो न ञिः । (जृ-व्रश्च: ६।, न ।१।, ञि: १।) ।

आभ्यां क्त्वाच इम् स्यात्, न तु अनयोर्ञिः । जरित्वा व्रश्चित्वा । †

११७५ । धाञो हिः । (धाञ: ६।, हि: १।) ।

हित्वा । ‡

११७६ । व्यादनञः क्त्वो यप् सैः ।

(व्यात् ५।, अनञ: ५।, क्त्व: ६।, यप् ।१।, सै ७।) ।

नञ्वर्जात् व्यात् परात् धोः क्त्वो यप् स्यात् से सति । प्रकर्षेण कृत्वा प्रकृत्य, प्रणत्य प्रतत्य प्रहत्य, उद्गम्य, प्रदाय प्रध्याय प्रगाय प्रहाय प्रपाय प्रस्थाय । §

---

* क्रमो क्त्वः क्त्वा क्वापि । क्रमित्वा इति उदित्त्वात् पूर्विकत्वादिति इम्, विकल्पपक्षे अनेन वा दीर्घः । पाणिनिः ६।४।१८ ।

† [illegible] निःक्त्वा । जरित्वा इति (१०५६) वृद्ध्वोरिति इम् [illegible], अनेन इम्, (११६८) [illegible] कित्वनिषेधात् गुणः । (६२०) [illegible] इति वा इमो दीर्घत्वे जरीत्वा इत्यपि । व्रश्चित्वा इति [illegible] अनेन नित्यमिम् । [illegible] कित्वनिषेधादिन [illegible] अथवा इति [illegible] । पाणिनिः ७।२।५५ ।

‡ धाञो हिः स्यात् । धाञः किं, धाञ इत्यस्य धाता । पाणिनिः ७।४।४२ ।

§ [illegible] नञ् यत्र सोऽनञ् तस्मात्, व्यात् इत्यस्य विशेषणम् । प्रकर्षेण कृत्वा इति (५४८) [illegible] इति समासे, अनेन क्त्वो यपि, [illegible] पित्वात् [illegible], (६६२) [illegible] तक्, प्रकृत्य । प्र-नम प्रणत्य, प्र-तन प्रतत्य, प्र-हन प्रहत्य, एषु (६०६) [illegible], [illegible] तक् । उद्-गम्ल (५६७) [illegible] इति [illegible] उद्गम्य । प्र-डुदाञ् प्रदाय, प्र [illegible] प्रध्याय, गै प्रगाय, ओ-हाक प्रहाय, पा-पाने प्रपाय, ष्ठा प्रस्थाय, एषु (६१८) [illegible] [illegible] ञ्यपवर्जनात् न [illegible] । पाणिनिः ७।१।३७ ।

(७४३) दीङ्ख्यामिति यपि ङा, प्रदाय । (७४५) मिम्बो-रिति ङा, प्रमाय, प्रलाय प्रलीय । *

११७७ । म्लोपो वानिमः ।

(म्-लोपः १।, वा ।१।, अनिमः ६।) ।

अनिमो मस्य लोपः स्याद्वा यपि । प्रणत्य प्रणम्य । अनिमः किं, प्रशम्य । †

११७८ । ग्वो ञेरयः । (ग्वोः ५।, ञेः ६।, अयः १।) ।

गु-पूर्व्वस्य ञेरयः स्यात् यपि । विगणय्य । ग्वोः किं, सम्प्रधार्य्य । ‡

११७९ । वापः । (वा ।१।, आपः ५।) ।

आपः परस्य ञेरयः स्याद्वा यपि । प्रापय्य प्राप्य । §

११८० । वा मेच्यो मिच्यौ ।

(वा ।१।, मे-च्योः ६।, मि-च्यौ १।) ।

मेङो मिः चेः ची स्याद्वा यपि । अपमित्य अपमाय, प्रचीय प्रचित्य । ¶

---

* ओ दो ङ व यपि, ङा प्रदाय । कृ ङ्मि ङ न ल्यपि, मो ङ् व तृ, मी ञ ग यपि एषां ङा प्रमाय । ली इत्यस्य विकल्पे ङा प्रलाय प्रलीय इति । अनजः किं, न ज्ञात्वा अज्ञात्वा । ई किं, सपदि ज्ञात्वा इत्यादौ न यप् ।

† प्र-नम, ञ्चाचो यपि अनेन मलोपे, तस्य तग् प्रणत्य, पक्षे प्रणम्य, (५४९) णत्वम् । एवम् आगत्य आगम्य इत्यादि । प्रशम्य इति इमत्वात् न मलोपः, एवं विक्रम्य आचम्य इत्यादि । निर्गम्य आहत्य विहत्य इत्यादौ आगमविधेर्बलवत्त्वात् आदौ तस्य तग्, सुतरां (५९०) घौं-ल्लृकारे इति न दीर्घाभावः । पाणिनिः ६।४।३८ ।

‡ गवोरव्यवहित-परस्थितस्य ञेः इत्यव्यवधाने इत्यर्थः । वि-गणि इति ज्ञान्तात् ञ्चाचो यपि, अनेन ञेः स्थाने अय, विगणय्य, एवं विघटय्य इत्यादि । सं-प्र-धारि इति ज्ञान्तात् यपि, धा इति गुर्व्वक्षरपूर्व्वत्वात् ञेरयाभावे, ञेर्लोपे सम्प्रधार्य्य, एवं विभाज्य विगाह्य इत्यादि । पाणिनिः ६।४।५६ ।

§ प्र-आपि-यप्, प्रापय्य प्राप्य इति, गुरुपूर्व्वत्वादप्राप्ते, विभाषा । पाणिनिः ६।४।५७ ।

¶ पुनर्व्वाग्रहणं वाधिकार-निवृत्त्यर्थम् । अपमित्य इति मि स्थाने मि-आदेशे, तस्य तग् ;

## ११८१। न वे-ज्या-व्यो ञि:।

(न ।१।, वे-ज्या-व्य: ६।. ञि: १।)।

एषां ञि र्न स्यात् यपि। प्रवाय प्रज्याय प्रव्याय। *

## ११८२। सं-परि-व्यो वा। (सं-परि-व्य: ६।, वा ।१।)।

आभ्यां व्येञो ञि र्वा स्यात् यपि। संवीय संव्याय, परिवीय परिव्याय। †

## ११८३। णमम् वाभीक्ष्ण्ये पूर्व्वकाले।

(णमम् ।१।, वा ।१।, आभीक्ष्ण्ये ७।, पूर्व्वकाले ७)।

धो: पूर्व्वकाले णमम् स्याद्वा पौन:पुन्ये। स्मृत्वा स्मृत्वा नमसि, स्मारं स्मारं नमसि। ‡

---

पक्षे (६०८) एचोऽशित्या इति आपमाय। चिधातो: णौ इति दीर्घान्तादेशे प्रचीय, पक्षे स्वस्य तनि प्रचित्य। पाणिनि: ६।४।५९,७०।

* वे ञ संवृतौ, ज्या जि जरायां, व्ये ञ हृतौ, एषां (६६१) यङस्यपाणोरिति प्राप्तौ ञि र्न स्यात् यपि। पाणिनि: ६।१।४१-४२।

† सं-परि-पूर्व्वस्य व्ये ञ हृतौ इत्यस्य ञि र्वा स्यात् यपि। संवीय परिवीय उभयत्र जौ कृते, (१०२६) ञिर्घोऽन्त्य इति दीर्घ:। पाणिनि: ६।१।४४।

‡ अभीक्ष्णं मुहुरर्थ-मव्ययं, तस्य भाव: आभीक्ष्ण्यं तस्मिन्। अत्रापि क्रिययोरेककर्तृकत्वे सतीति बोध्यम्। स्मृत्वा स्मृत्वा नमसि, पक्षे स्मारं स्मारं नमसि। स्मृ-णमम्, ण इत् ममवं, म इत् (५७७) वृद्धि:, अम् इत्यस्य स्थिति:। आभीक्ष्ण्यार्थे द्वित्वं वक्तव्यं (पा. ८।१।४)। क्वचिदाभीक्ष्ण्याभिवेऽपि णमम् भवति यथा, चौर इति कृत्वा इति चौरङ्कारमाक्रोशति (पा. ३।४।२५), स्वादुङ्कारं भुङ्क्ते (पा. ३।४।२६), मूलकोपदंशं भुङ्क्ते (पा. ३।४।४७); एवङ्कारं, अन्यथाकारं (पा. ३।४।२७); येथाकारं, तथाकारं (पा. ३।४।२८)। क्वचित्त पूर्व्व-कालार्थमोपो भवति यथा, समूलघातं हन्ति, जीवग्राहं गृह्णाति (पा. ३।४।३६), चूर्णपेषं पिनष्टि (पा. ३।४।३५), विद्युत्प्रकाशं गच्छति (पा. ३।४।४५) इत्यादि। पाणिनि: ३।४।२२-६४।

कृतो ये यत्र विहितास्तत्र नूनं भवन्ति ते ।
क्वचोः क्वभाव इत्युक्ते-रन्यत्रापि प्रयोगतः ॥
तथाच । कृत्तद्धितसमासाना-मभिधानं नियामकम् ।
लक्षणन्त्वनभिज्ञानां तदभिज्ञानसूचकम् ॥ *

११८४ । बहुलं ब्रह्मणि । (बहुलं १।, ब्रह्मणि ७)।

यदिदं लौकिकप्रयोगव्युत्पत्तये लक्षणमुक्तं तत् वैदिकप्रयोगव्युत्पत्तौ बहुलं ज्ञेयं । क्वचित् विहितं न स्यात् (१), क्वचित् निषिद्धं स्यात् (२), क्वचित् वा स्यात्, क्वचित् ततोऽन्यदपि स्यादित्यर्थः । यथा,—पूर्व्वेभिः (१), मामकास् (२), इत्यादौ वेदसिद्धेः । † 'ब्रह्म'शब्दोऽत्र मन्त्रार्थः ।

इति स्यादि-पादः ।

कृदन्ताध्यायः ।

समाप्तम् ।

---

* कृदन्तप्रकरणं समाप्य ग्रन्थकृत् न्यूनता-परिहारार्थमाह—कृतो ये इति । ये कृतः यत्र येष्वर्थेषु विहिताः, ते तत्र तेष्वर्थेषु नूनं निश्चितं भवन्ति । प्रयोगतः महाकविप्रयोगानुसारेण अन्यत्रापि स्युः । तत्र हेतुमाह (८६५) क्वचोः क्वभावे इत्युक्तेरिति । तथाच, माघः इति शेषः । कृतां तद्धितानां समासानाञ्च, अभिधानं प्राचीनः शब्दकोष एव नियामकं, कस्मिन्नर्थे यस्मिन् लिङ्गे च तत् भवति तन्नियमकारकम् । व्याकरणलक्षणन्तु अनभिज्ञानां प्रसिद्धप्रमाणमजानतां तदभिज्ञानस्य सूचकं प्रकाशकमित्यर्थः ।

† ब्रह्मणि वेदे, बहुलं—बहवः (प्रकाराः) सन्त्यस्य, चूडादित्वात् (४४६) लः, अथवा बहून् प्रकारान् लाति गृह्णातीति बहुलं, आदन्तत्वात् (९९७) कः । सामान्यत्वात् नपुंसकम् । एवम् व्याकरणं लौकिकप्रयोग-साधनाय, वैदिकप्रयोग-साधनार्थन्तु प्रकारान्तरमपि आश्रितव्यं, यथाहि वर्षितव्यादि । पूर्व्वेभिरित्यत्र, भिसः ऐसि ऐस् (१०६) विहितमपि न जातम् । मामकास् इत्यत्र, निषेधः (१०२) विहितोऽपि निषिद्ध जातः । वैदिकविधिरिति शैवो बहुलोऽत्र पाणिनिः ३।१।३४,८२,८५ ; ३।२।८८ ; ३।३।११३ ; ६।१।३४ ; ७।१।८,१०,१०३ ; ७।३।८७ ; ७।४।७८ ।

# परिशिष्ट-पञ्चम् ।

## लिङ्गानुशासनम् ।

(११४७ सूत्रोक्त-स्त्रीलिङ्गसूत्राणामवलम्ब्य अत्र प्रचलितानां कतिपय-कृत्-तद्धित-समास-प्रत्ययान्तानामेव लिङ्गनिर्देशः क्रियते ।

(९६७) सूत्रस्य टीका द्रष्टव्या ।)

### कृदन्त-पुंलिङ्गाः—

(११२४) घञन्ताः *, (११२४) अजन्ताः *, (११४४) नङन्ताः †, (११४५-११४६) कि-प्रत्ययान्ताः ‡, (१११२) ष्ट्रन्-प्रत्ययान्ताः §, (११४२) अथु-प्रत्ययान्ताः (१०००-१००१) घ-प्रत्ययान्ताः ।

### तद्धित-पुंलिङ्गाः—

(४७५) इमन्-प्रत्ययान्ताः ¶ ।

### समास-पुंलिङ्गाः—

(२६२) रात्रान्ताः, (२५२) अह्नान्ताः ||, (२५४) अह्नान्ताः ।

* घञन्ताः अजन्ताश्च भावार्थे एव पुंलिङ्गाः, अन्यार्थे तु विशेष्यलिङ्गा अपि भवन्ति । अजन्तेषु—भयं वर्षं पदं सुखं नपुंसकम् ।

† याच्ञा—स्त्री ।

‡ इषुधिः—पुमान्, स्त्री च ।

§ दात्र.(काष्ठं), अशु—नपुंसकम् ।

¶ प्रेम—नपुंसकमपि ।

|| पुण्याहं—नपुंसकम् ।

### कृदन्त-स्त्रीलिङ्गाः—

(११४७-११४९) क्ति-प्रत्ययान्ताः, (११५०) भावविहितक्यप्प्रत्ययान्ताः *, (११५२) भावविहित-यप्रत्ययान्ताः †, (११५३-११५५) अप्रत्ययान्ताः, (११५६-११५७) ङ-प्रत्ययान्ताः, (११४१) अन्-प्रत्ययान्ताः, (११५८) अन-प्रत्ययान्ताः ‡, (११५९) णि-प्रत्ययान्ताः, (११६०) अनि-प्रत्ययान्ताः ।

### तद्धित-स्त्रीलिङ्गाः—

(४२८) त-प्रत्ययान्ताः, (४४९) सूत्रोक्ताः कतिपयं— (तद्धित-नपुंसक-लिङ्गाः द्रष्टव्याः) ।

### समास-स्त्रीलिङ्गाः—

(२८९) अप्रत्ययान्त-धुर्शब्दान्ताः ।

* (९८१-९८७) सूत्रोक्तक्यबन्ताः प्रायेण कर्मविहिताः कर्तृविहिता वा दृश्यन्ते, भावविहितास्तु नपुंसकलिङ्गाः ।

† (९६७-९६९, ९७६-९८०) सूत्रोक्त-यान्ताः प्रायेण कारक-विहिताः, भावविहितास्तु नपुंसकलिङ्गाः ।

‡ (११६२-११६२) कर्मविहितान-प्रत्ययान्तास्तु विशेष्यलिङ्गाः ।

### कृदन्त-नपुंसकलिङ्गाः—

(११२४-११२६) अनट्-प्रत्ययान्ताः*, (११११) इत्र-प्रत्ययान्ताः, (१०५०) भावविहित-क्तप्रत्ययान्ताः।

### तद्धित-नपुंसकलिङ्गाः—

(४२२) भावार्थ-समूहार्थ-प्रत्ययान्ताः†, (४२८) त्व-प्रत्ययान्ताः, (४६०-४६१) तयट्-अयट्-प्रत्ययान्ताः*, (४९२) तैल-आद्यन्ताः, (४९३) शाकट-शाकिन-प्रत्ययान्ताः।

### समास-नपुंसकलिङ्गाः—

(३२२) समाहार-द्वन्द्वनिष्पन्नाः, (३१२) समाहार-द्विगुनिष्पन्नाः†, (३११) अव्ययीभावनिष्पन्नाः, (३८५) अप्रत्ययान्त-पुर्-शब्दान्ताः।

---

* भावविहिता एव बोध्याः। कारकविहितास्तु प्रायेण विशेष्यलिङ्गाः।

† (४४९) जनता, बन्धुता, खलिनी, हलिनी, गोत्रा, रथकट्या—स्त्रीलिङ्गाः। वातूलस्तु पुंलिङ्गः।

* स्त्रीलिङ्गा अपि भवन्ति।

† (३१९) अकारान्त-भिन्नाः, पात्रादीनि तु नपुंसकानि एव। (३७०,३७२) सूत्रयोस्तु स्त्रीलिङ्गा नपुंसकलिङ्गाश्च।

---

## उणादयः।

(१००७) सूत्रोक्त-सङ्केतमाश्रित्य कतिपये प्रचलिताः उणादि-प्रत्ययान्ताः अकारादिवर्णक्रमेण लिख्यन्ते।

### अ

अङ्गच्—कुर-कुरङ्गः, तृ-तरङ्गः, मृद-मृदङ्गः, लू-लवङ्गः, सृ-सारङ्गः।

अटन्—कनक-कङ्कटः, कप-कपटः, कृ-कारटः, कर्क-कर्कटः, कृप-कर्पटः, मर्क-मर्कटः, शक-शकटः, सृ-सरटः।

अठ—कम-कमठः, जृ-जरठः।

अण्डन्—कृ-कारण्डः, वृ-वरण्डः।

अत्—पृष पृषत्, मह-महत्, वह-वहत्।

अति—वस-वसतिः, हन-अंहतिः।

अथन्—अम-अमथं, गड़-कलथं, मच-मचथं, पत-पतथं, वृ-वरथा।

अत्रिन्—पत-पतत्रिः।

अथन्—शप-शपथः, आ-वस-आवसथः।

अद—शृ-शरत्, दृ-दृषत्।

अनि—ऋ-अरणिः, अव-अवनिः, अश-अशनिः, आ-पण-सम्-आपणपणिः, वह-वहणिः, तृ-तरणिः, धम-धमनिः, धृ-धरणिः, रञ्ज-रजनिः, सृ-सरणिः।

अन्ति—अव-अवन्तिः, किं-वद-किंवदन्तिः।

अभ—ऋ-अरभ्रं, पृष-पर्षभः।

अप—सृ-सर्षपः।

अभच्—ऋष-ऋषभः, कृ-करभः, कल-कलभः, गर्द-गर्दभः, रास-रासभः,

वल्ल-वल्लभः, ऋष-ऋषभः, शृ-शरभः, शल-शलभः ।

अम—अव-अधमः, कर्द-कर्दमः, कल-कलीमः, चर-चरमः, प्रथ-प्रथमः ।

अम्बच्—कड-कडम्बः, कद-कदम्बः, स्था-स्तम्बः ।

अयु, अयू—सृ-सरयुः, सरयूः ।

अरन्—ऋ-अररं, कु-कवरः, चम-चमरः, जन-जठरं, जर्ज-जर्जरः, झर्झ-झर्झरः, दिव-देवरः, भ्रम-भ्रमरः, वस-णि-वासरः ।

अव—ऋ-अरवः ।

अल—तृ-तरलः, मन्ग-मङ्गलं, सृ-सरलः ।

अलि—अन्ज-अञ्जलिः ।

अवक—स्था-स्तवकः ।

असच्—चम-चमसः, तम-तमसं, नभ-नभसं, पन-पनसः, यु-यवसः, रभ-रभसः, वे-वेतसः ।

## आ

आ—नि-कष-निकषा, सम्-इ-समया ।

आक—तड-तडाकः, तडागः, पत-पताका, पा-पिनाकः, बल-बलाका, शल-शलाका ।

आनक—भी-भयानकः ।

आयुच्—क्षम-क्षमायुः ।

आन्य—वद-वदान्यः ।

आर—शृङ्ग-शृङ्गारः, कड-कडारः, भृ-भृङ्गारः, मन्द-मन्दारः, मृज-मार्जारः ।

आलञ्—पत-पातालं, चण्ड-चण्डालः ।

## इ

इज्—वण-वणिज् ।

इतन्—रुह-रोहितः, हृ-हरितः ।

इत्—तड-तडित्, युष-योषित्, सृ-सरित्, हृ-हरित् ।

इथिन्—अत-अतिथिः ।

इन—अज-अजिनं, हृ-हरिणः, कठ-कठिनः, कुण्ड-कुण्डिनः, तुह-तुहिनं, दक्ष-दक्षिणः, द्रु-द्रविणं, नल-नलिनं, पुल-पुलिनं, मल-मलिनः, वेप-विपिनं, रुह-रोहिणः, श्ये-श्येनः ।

इल—अन-अनिलः, कप-कपिलः, कुक-कोकिलः, कुट-कुटिलः, मन्थ-मिथिला, मह-महिला, सल-सलिलं ।

## ई

ई—अव-अवीः, तन्त्र-तन्त्रीः, तॄ-तरीः, लक्ष-लक्ष्मीः, वात-प्र-मा-वातप्रमीः ।

ईकन्—अन-अनीकं, अल-अलीकं, इष-इषीका, वल-वलीक, हृष-हृषीकं ।

ईचि—मृ-मरीचिः, वे-वीचिः ।

ईरन्—कट-कटीरः, कृ-करीरः, पट-पटीरं, शृ-शरीरं, शौट-शौटीरः ।

ईषन्—अम्ब-अम्बरीषं, कृ-करीषं, पॄ-पुरीषं, शॄ-शिरीषं ।

## उ

उ—अण-अणुः, उन्द-इन्दुः, इष-इषुः, कट-कटुः, स्कन्द-कन्दुः, गड-गडुः, चर-चरुः, जन-जनुः, जन-जनु, जन-दनुः, तन-तनुः, तृ-तरुः, त्सर-त्सरुः, धन-धनुः, नि-अन्च-न्यङ्कुः, पट-पटुः, फल-फल्गुः, बन्ध-बन्धुः, भृ-भरुः, मन-मधु, मन-मनुः, मृ-मरुः, मस्ज-मद्गुः, रज-रज्जुः, वट-वटुः, वल-वल्गुः, वस-वसुः, विद-विन्दुः, शॄ-शरुः, शो-शिशुः, स्यन्द-सिन्धुः, हन-हनुः ।

उण्—पा-पायुः, कृ-कारुः (उणादिषु प्रथमोदाहरणं), वा-वायुः, स्वद-स्वादुः ।

उत्—गृ-गरुत्, मृ-मरुत् ।

उन, उनि, उल, उलि—शक-शकुन:, शकुनि:, शकुल:, शकुलि:।

उनन्—यज-यजन:, अर्ज-अर्जुन:, कृ-करुण:, तृ-तरुण:, दृ-जि-दारुण:, मिथ-मिथुन:, मिथ-मिथुन, वृ-वरुण:।

उमक्—कुस-कुसुमम्।

उम्भक्—कुस-कुसुम्भम्।

उर—अनक-अङ्कुर:, कर्ब-कर्बुर:, चत-चतुर:, दृ-दर्दुर:, बन्ध-बन्धुर:, मन्थ-मन्थुरा, मद-मद्गुर:, मन्द-मन्दुरा, मनक-मुकुर:, आशु-अश-अशुर:।

उल—चट-चटुल:, तन्त्र-तण्डुल:।

उलि—अनग-अङ्गुलि:।

उष—अनक-अङ्कुश:।

उषन्—कल-कलुषं, नह-नहुष:, पृ-परुष:।

ऊ

ऊ—चम-चमू:, जन-जनू:, तन-तनू:, दरिद्रा-दद्रू:, बन्ध-बधू:, वह-वधू:।

ऊक—वल-उलूक:, भल्ल-भल्लूक:, मनुड-मण्डूक:, शल-शल्लूक:, बन्ध-बन्धूकं।

ऊख—मय-मयूख:।

ऊथन्—व-वरूथ:।

ऊम—गुध-गोधूम:।

ऊर—कप-कर्पूरं, खर्ज-खर्जूर:, मि-मयूर:, स्यन्द-सिन्दूर।

ऊल—लनग-लाङ्गूल।

ऊषन्—गड-गण्डूष:, पीय-पीयूषं, मञ्ज-मञ्जूषा।

ऋ

ऋ—दिव-देवा, न-नन्द-नन(ना)न्दा, सव्ये-ष्ठा-सव्येष्ठा, सु-अस-स्वसा।

ऋत्—शक-शकृत्।

ए

एणु—क्र-करेणु:।

एण्य—वृ-वरेण्य:।

एरक्—कठ-कठेर:।

ओ

ओरन्—कठ-कठोर:, किम-शृ-किशोर:, चक-चकोर:।

ओल—कप-कपोल:, पट-पटोल:।

क

क—कल-कल्क:, कै-काक:, नि-सद-निष्क:, रा-राका, वल-वल्क, शल-शल्कं।

कक्—उष-उल्का, शुष-शुष्क:, श्लप-श्लक:।

कन्—इ-एक:, भी-भेक:।

कण—चित-चिक्कण:।

कतु—क्र-क्रतु:।

कन—कृ-किरण:, षप-धिषण:।

कनस्—वश-उशना:।

कनिन्—तक्ष-तक्षा, यु-युवा, राज-राजा।

कन्यन्—हृ-हिरण्यं। [कुणप:।

कपन्—उल-उलपं, विट-विटप:, कुण-

कयन्—तन-तनय:, मल-मलय:, वल-वलयं, हृ-हृदयं।

करन्—पुष-पुष्कर, शृ-शर्करा।

कल—कम-कम्बलं, कु,कम-कोमल:, चुप-चपल:, छो-छगल:, पलि-पललं, मुष-मुसलं, लनग-लाङ्गलं, वल-वल्कलं, शब-शबल:, शक-शकल:, शप-शबल:।

कालन्—कप-कपाल:, कुल-कुलाल:, तम-तमाल:, पनुच-पञ्चाल:, पल-पलाल:, पीय-पियाल:, मृण-मृणाल:, विड-विडाल:, विश-विशाल:।

किकन्—मुष-मूषिक:, वृष-वृश्चिक:।

कित—वच-वचित:।

किन्द—पुल-पुलिन्दः ।

किर—अज-अजिरं, इष-इषिरः, खद-खदिरः, खिद-खिदिरः, छिद-छिदिरः, तिम-तिमिर, बन्ध-बधिरः, भिद-भिदिरं, मद-मदिरा, मन्द-मन्दिरं, मिह-मिहिरः, मुद-मुदिरः, रुच-रुचिरः, रुध-रुधिरं, शी-शिविरं, शश-शिशिरः, शुष-शुषिरः, स्था-स्थविरः, स्था-स्थिरः, स्फाय-स्फिरः ।

किष्यन्—भुज-भुजिष्यः ।

कीटन्—कृ-किरीटं, तप-तपीटं ।

कु—अम-अम्बुः, ऊर्णु-उरुः,ऊरुः, ऋज-ऋजुः, कृ-कुरुः, खन-खरुः,गृ-गुरुः,दृश-पशुः, पन्स-पांसुः, पृ-पुरुः, प्रथ-पृथुः, बन्ह-बहुः, भ्रस्ज-भृगुः, मृद-मृदुः, रन्घ-रघुः, लन्घ-लघुः, व्यध-विधुः ।

कुषन्—पुर्-पुरुषः ।

कू—अन्द-अन्दूः, जन,जम-जम्बूः, दिधि-सो-दिधिषूः, दृभ-दृन्भूः ।

क्त्र—चि-चित्रं, मिद-मित्र ।

क्थन्—अव-भृ-अवभृथः, काश-काष्ठं, कुष-कुष्ठं, रम-रथः ।

क्थिन्—अस-अस्थि, सन्ज-सक्थि ।

क्न—वृह-वृक्णं ।

क्मलन्—कुट-कुड्मलं ।

क्रन्—कु-कुररः ।

क्रि—भू-भूरिः, सू-सूरिः ।

क्रु—रु-रुरुः ।

क्वन्—लिह-जिह्वा, विश-विश्वम् ।

क्सि—कुष-कुक्षिः ।

क्सु—इष-इक्षुः ।

क्स्न—अश-अक्ष्णं, तिज-तीक्ष्णः, श्लिष-श्लक्ष्णः ।

ख

ख—मुह-मूर्खः, शम-शङ्खः, शी-शिखा ।

ग

गक्—छो-छागः, पू-पूगः, भृ-भृङ्गः, मुद-मुद्गः, शॄ-शृङ्गं, सिट-सिङ्गः ।

गन्—खड-खड्गः, गम-गङ्गा, गृ-गर्गः ।

च

चट्—सिव-सूची ।

ञ

ञुण्—किं-शॄ-किंशारुः, कृक-वच-कृकवाकुः, चट-चाटु, चर-चारुः, जरा-इ-जरायुः, जन-जानुः, तॄ-तालुः, दॄ-दारु, सन-सानुः ।

ट

टिषच्—अम-आमिषं, किल-किल्बिषं, मह-महिषः ।

ठ

ठ—कण-कण्ठः ।

ड

ड—अम-अण्डं, कण-काण्डं, खन-खण्डः, गम-गण्डः, दम-दण्डः, पण-पण्डः, मन-मण्डः, रम-रण्डा, षण-षण्डः ।

डउ—तन-तितउः ।

डक्—गु-गुडः ।

डति—पा-पतिः ।

डवतु—भा-भवान् ।

डिम्—कै-किम् ।

डुत—अद्-भू-अद्भुतं ।

डुन्—प-श्रि-पश्रु, श्मन्-श्रि-श्मश्रु ।

डुमस्—पा-पुमान् ।

डू—अम-अमूः ।

डृ—नी-ना ।

डै—रा-राः ।

डैस्—उद-चि-उच्चैः, नि-चि-नीचैः ।

डौ—गम-गौः, युत-द्यौः।
डोस्—दम-दोः।
ड्रौ—ग्लै-ग्लौः, नुद-नौः।
ड्रुट्—ग्लै-ग्लौ।
ड्रि—तृ-त्रयः।

## ठ

ठ—सन-षण्ढः।

## ण

णित्रन्—चर-चारित्रं।
णु—अज-वेणुः, स्था-स्थाणुः।
ण्य—धृष-धिष्ण्यं।

## त

तकक्—इष-इष्टका।
तकन्—अश-अष्टका।
तन्—अम-अन्तः, इ-एतः, गृ-गर्त्तः, तृस-तृस्तं, दम-दन्तः, धुर्व्व-धूर्त्तः, पू-पोतः, मृ-मर्त्तः, हस-हस्तः।
ततन्—पत-पततं, अज-वेततं।
ति—अग-अस-अगस्तिः, न-भस-नभस्तिः, पद-पत्तिः, वस-वस्तिः, वि-तस-वितस्तिः, ग्रास-ग्रास्तिः, सु-अस-स्वस्ति।
तिक—ऋत-ऋत्तिका, व्रत-वर्त्तिका।
तुक्—ऋ-ऋतुः।
तुण्—वस-वास्तुः।
तुन्—अव-ओतुः, चाय-केतुः, क्रुश-क्रोष्टा, जन-जन्तुः, गै-गातु, तन-तन्तुः, धा-धातुः, मन-मन्तुः, मस-मस्तु, या-यातुः, वस-वस्तु, ग्रच-ग्रतुः, सि-सेतुः, हि-हेतुः।
तृच्—जाया-मा-जामाता, दुह-दुहिता, पा-पिता, भ्राज-भ्राता, मान-माता।
त्युक्—मृ-मृत्युः।
त्रिप्—अद-अत्रिः, रा-रात्रिः।

## थ

थक्—वच-उक्थं, उद-गै-उद्गीथं, तृ-तृथं, तृ-तीर्थः, तुद-तुत्थ, नि-शी-निशीथः, पृष-पृष्ठं, गुध-गुथं, रिच-रिक्थं, सिच-सिक्थं।
थण्—सृ-सार्थः।
थन्—ऋ-अर्थः, उष-ओष्ठः, कुष-कोष्ठः, गै-गाथा, प्रु-प्रोथः, श्रु-श्रोथः।

## द

द—अब-अब्दः, कम-कन्दं, कु-कुन्दं, वृष-वृन्दं, शी-शादः।

## ध

धुक्—शी-शीधु।

## न

न—ऋ-अर्णः, क,कृ-कर्णः, द्रु-द्रोणः, धा-धानः, रम-जि-रत्नं, सू-सूना, सि-सेना, स्था-स्थूणा।
नक्—इ-इनः, उष-उष्णः, तृष-तृष्णः, जि-जिनः, तृष-तृष्णा, प्याय-पीनः, बन्ध-बुध्नः, मी-मीनः, वी-वीणा, सि-सिनः।
नक्—रस-रास्ना, सस-सास्ना।
नि—अग,अनृग-अग्निः,द्रु-द्रोणिः, पृश-पृश्निः, युं-योनिः, वह-वह्निः, श्रि-श्रोणिः।
निक्—वृष-वृष्णिः, सृ-सृणिः।
नु—का-अनुः, धे-धेनुः, भा-भानुः।
नुक्—विष-विष्णुः, सू-सूनुः।

## प

प—तल-तल्पं, पा-पापं, बाध,बा-बाष्पः,बाष्कः, ग्रस-ग्रष्पं, शृ-शूर्पं।
पक्—कु-कूपः, नी-नीपः, पू-पूपः, यु-यूपः, शिल-शिल्पं, सु-सूपः, स्तु-स्तूपः।
पाश—ऋ-कर्पासः।

### फ

फक्—गल-गुल्फः ।

### भ

भ—ऋ-अर्भः, गॄ-गर्भः, दॄ-दर्भः ।

भक्—इ-इभः ।

### म

म—अव-ओम्, क्षि-क्षेमं, ग्रस-ग्रामः, घृ-घर्म्मः, ह्वा-जिह्मः, धृ-धर्म्मः, नी-नेमः, पद-पद्मं, भा-भामः, या-यामः, वा-वामः, सु-सोमः, हु-होमः ।

मक्—इन्ध-इध्मं, ईर-ईर्म्मं क्षु-क्षुमा, ग्रस-ग्रीष्मः, तिज-तिग्मः, धू-धूमः, भी-भीमः, भीष्मः, युज-युग्मं, रुच-रुक्मं, श्यै-श्यामः ।

मद—अस-अहं, युष-त्वं, युष-युषं ।

मि—ऋ-ऊर्म्मिः, नी-नेमिः, रश-रश्मिः ।

मिक्—भू-भूमिः ।

मुक—उष-उल्मुकं ।

### य

य—कन-कन्या, छो-छाया, जन-जाया, जन्यं, पू-पुण्यं, मा-माया, सस-सस्यं ।

यु—जन-जन्युः, दस-दस्युः, मन-मन्युः ।

### र

र—अम-अम्रः, अस-अस्रं, अर्द्द-आर्द्रः, इन्द-इन्द्रः, तम-ताम्रं, दस-दस्रौ, भी-भेलः, मद-मद्रः, मन्द-मन्द्रः, वज-वज्रं, वप-वप्रः,विप्रः, वज-वीरं, शक-शक्रः, स्फाय-स्फारः ।

रक्—अङ्ग-अग्रं, इ-इरा, उच-उग्रः, उन्द-उद्रः, वस-उस्रः, कृत-क्रेष्ठं, क्रूरः, क्षिप-क्षिप्रः, क्षुद-क्षुद्रः, क्षुर-क्षुरः, खुर-खुरः, गृध-गृध्रः, चन्द-चन्द्रः, चि-चीरं, छिद-छिद्रं, तक-तक्रं, दम्भ-दभ्रः, दुर्-दूरं, धी-धीरं, भन्द-भद्रः, मुद-मुद्रा, रुद-णि-रुद्रः, वन्क-वक्रः, शत-शत्रः, शुच-शुक्रः, शूद्रः, शुभ-शुभ्रः, श्वित-श्वित्रं, सि-सीरः, सु-सुरः, सू-सूरः ।

रि—अन्घ-अङ्घ्रिः, अद-अद्रिः, भी-भेरिः ।

रु—अस-अस्रु, जन-जत्रु, मि-मेरुः ।

### ल

लक्—शी-शीलं, शुच-शुक्लः ।

### व

व—अश-अश्वः, खट-खट्वा, कण-कण्वः, गॄ-ग्रीवा, नी-निम्बः, प्र ह्वा-प्रह्वः, बी-बिम्बं, शी-शिवः, क्लस-क्लवः ।

वल—इल-इल्वलः, पल-पल्वलः ।

वलञ्, वालञ्—शी-शैवलं, शैवालं ।

वालन्—चत-चत्वालः ।

वि—दॄ-दर्विः ।

### श

शन्, श्वन्—स्पृश-पर्शुः,पार्श्वः ।

### ष

षिवन्—प्रथ-पृथिवी ।

ष्ट्रन्—उष-उष्ट्रः, वस-वस्त्रं, शस-शस्त्रं ।

ष्वरच्—गाह-गह्वरं, चत-चत्वरं, चि-चीवरं, तृ-तीवरः, धा-धीवरः, प्यै-पीवरः, व-वर्वरः, शॄ-शर्वरी ।

### स

स—उन्द-उत्सः, कम-कंसः, कष-कक्षः, मन-मांसं, वद-वत्सः, हन-हंसः ।

सक्—ऋष-ऋक्षः, प्लुष-प्लक्षः, क्षु-क्षुधा ।

सरक्—कृ-कृसरः, धू-धूसरः ।

सरन्—मद-मत्सरः, वस-वत्सरः ।

स्मन्—सूच-सूक्ष्मः ।

स्यन्—मद-मत्स्यः ।

# सूचोपत्राणि ।

## अकारादिवर्णक्रमेण

## सूत्रसूची ।

---

# संज्ञासूची ।

# आगम-सूची।

## आदेश-सूची ।

# शब्द-सूची ।

पृष्ठाङ्कः ।

## स्त्रीत्य-सूची ।



## समासान्त-सूची ।*



## तद्धित-सूची ।



* वोपदेवमते समासान्ताः तद्धितान्तर्गता एव, (३२७) सूत्रं द्रष्टव्यम् ।

# धातु-सूची ।

# कृदन्त-सूची ।





## क्तोत्य-समासान्त-तद्धित-कृदन्तेतर-प्रत्यय-

## (धात्ववयव)-सूची ।